त्वाच्छब्दविरोधित्वाच्चेति। व्याख्याता व्याख्याता इति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति।


इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमद्गोविन्दपूज्यपादशिष्यश्रीमच्छङ्करभगवत्पादकृतौ प्रथमाध्यायस्य चतुर्थः पादः समाप्तः॥ * ॥

॥ * ॥ इति प्रथमोऽध्यायः समाप्तः॥ * ॥

दानां प्रधानवादवदश्रौतत्वं, ब्रह्मकारणश्रुतिबाधितत्वञ्च, तस्माद्ब्रह्मैव परमकारणं, तस्मिन्नेव सर्वेषां वेदान्तानां समन्वय इति सिद्धं।

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीगोविन्दानन्द-भगवत्पादकृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां प्रथमाध्यायस्य चतुर्थः पादः॥ * ॥

॥ * ॥ अध्यायश्च समाप्तः॥ * ॥



ॐ परमात्मने नमः ।

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ १ ॥

प्रथमेऽध्याये सर्वज्ञः सर्वेश्वरो जगत उत्पत्तिकारणं मृत्सुवर्णादय इव घटरुचकादीनां, उत्पन्नस्य जगतो नियन्तृत्वेन स्थितिकारणं मायावीव मायायाः प्रसारितस्य जगतः पुनः स्वात्मन्येवोपसंहारकारणमवनिरिव चतुर्विधस्य भूतग्रामस्य, स एव च सर्वेषां न आत्मेत्येतद्वेदान्तवाक्यसमन्वयप्रतिपादनेन प्रतिपादितं, प्रधानादिवादाश्चाशब्दत्वेन निराकृताः । इदानीं स्वपक्षे स्मृतिन्यायविरोधपरिहारः प्रधानादिवादानाञ्च न्यायाभासोपबृंहितत्वं प्रतिवेदान्तञ्च सृष्ट्यादिप्रक्रियाया अविगीतत्वमित्यस्यार्थजातस्य प्रतिपादनाय द्वितीयोऽध्याय आरभ्यते । तत्र प्रथमं तावत् स्मृतिविरोधमुपन्यस्य परिहरति यदुक्तं ब्रह्मैव सर्वज्ञं जगतः कारणमिति तदयुक्तं ।

ॐ ब्रह्मणे नमः ।

साङ्ख्यादिस्मृतियुक्तिभिर्न चलितो वेदान्तसिद्धान्तगो
निर्मूलैर्विविधाशमैरविदिते व्योमादिजन्माप्ययः ।
उत्पत्त्यन्तविवर्ज्जितस्थितिवपुर्य्यो या च कर्त्तांशको
लिङ्गेन प्रथितोऽपि नामतनुकृत्तं ज्ञानकोशं भजे ॥

नामरूपे व्याकरवाणीति श्रुतेर्नामतनुकृदपि संज्ञामूर्तिव्याकर्त्ताऽपि लिङ्गशरीरोपाधिना कर्त्तेति अंश इति च प्रथितः प्रसिद्धो यस्तं प्रत्य-

कुतः, स्मृत्यनवकाशदोषप्रसङ्गात्। स्मृतिश्च तन्त्राख्या परमर्षिप्रणीता शिष्टपरिगृहीता, अन्याश्च तदनुसारिण्यः स्मृतयः, एवं सत्यनवकाशाः प्रसज्येरन्, तासु ह्यचेतनं प्रधानं स्वतन्त्रं जगतः कारणमुपनिबध्यते, मन्वादिस्मृतयस्तावच्चोदनालक्षणेनाग्निहोत्रादिना धर्मजातेनापेक्षितमर्थं समर्पयन्त्यः सावकाशा भवन्ति, अस्य वर्णस्यास्मिन् कालेऽनेन विधानेनोपनयनमीदृशश्चाचार इत्थं वेदाध्ययनमित्थं समावर्तनमित्थं सहधर्मचारिणीसंयोग इति, तथा पुरुषार्थांश्चतुर्वर्णाश्रमधर्मान् नानाविधान् विदधति, नैवं कापिलादिस्मृतीनामनुष्ठेये विषयेऽवकाशोऽस्ति, मोक्षसाधनमेव हि सम्यग्दर्शनमधिकृत्य ताः प्रणीताः, यदि तत्राप्यनवकाशाः स्युः आनर्थक्यमेवासां प्रस-

---

गभिन्नं परमात्मानं मूलप्रकृतिनियन्तारं भजे इत्यर्थः। स्मृतिप्रसङ्गात् पूर्वोत्तराध्याययोर्विषयविषयिभावसङ्गतिं वक्तुं वृत्तं कीर्तयति। प्रथमेऽध्याय इति। जन्मादिसूत्रमारभ्य जगदुत्पत्त्यादिकारणं ब्रह्मेति प्रतिपादितं शास्त्रदृष्ट्या त्वित्यादिसूत्रेषु, स एवाद्वितीयः सर्वात्मेत्युक्तं आनुमानिकमित्यादिना कारणान्तरस्याश्रौतत्वं दर्शितमित्यर्थः। एवं प्रथमाध्यायस्यार्थमनूद्य तस्मिन् विषये विरोधपरिहारविषयिणं द्वितीयाध्यायस्यार्थं पादशः सङ्क्षिप्य कथयति। इदानीमिति। अत्र प्रथमपादे समन्वयस्य साङ्ख्यादिस्मृतियुक्तिभिर्विरोधपरिहारः क्रियते, द्वितीयपादे साङ्ख्याद्यागमानां भ्रान्तिमूलत्वमविरोधाय कथ्यते, तृतीये पादे प्रतिवेदान्तं सृष्टिश्रुतीनां जीवात्मश्रुतीनाञ्च व्योमादिमहाभूतानां जन्मलयक्रमादिकथनेनाविरोधः प्रतिपाद्यते, चतुर्थपादे लिङ्गशरीरश्रुतीनां अविरोध इत्यर्थः। अयमेवार्थः सुखबोधार्थं श्लोकेन संगृहीतः।

ज्येत, तस्मात् तदविरोधेन वेदान्ता व्याख्यातव्याः। कथं पुनः ईक्षत्यादिभ्यो हेतुभ्यो ब्रह्मैव सर्वज्ञं जगतः कारणमित्यवधारितः श्रुत्यर्थः स्मृत्यनवकाशदोषप्रसङ्गेन पुनराक्षिप्यते। भवेदयमनाक्षेपः स्वतन्त्रप्रज्ञानां परतन्त्रप्रज्ञास्तु प्रायेण जनाः स्वातन्त्र्येण श्रुत्यर्थमवधारयितुमशक्नुवन्तः प्रख्यातप्रणेतृकासु स्मृतिष्ववलम्बेरन्, तद्बलेन च श्रुत्यर्थं प्रतिपित्सेरन्। अस्मत्कृते च व्याख्याने न विश्वस्युर्बहुमानात् स्मृतीनां प्रणेतृषु। कपिलप्रभृतीनाञ्चार्षं ज्ञानमप्रतिहतं स्मर्यते, श्रुतिश्च भवति "ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानञ्च पश्येत्" इति।

"द्वितीये स्मृतितर्काभ्यामविरोधोऽन्यदुष्टता।
भूतभोक्तृश्रुतेर्लिङ्गश्रुतेरप्यविरुद्धता" ॥ इति ॥

तत्राज्ञाते विषये विरोधशङ्कासमाध्ययोगात् समन्वयाध्यायानन्तर्यमविरोधाध्यायस्य युक्तम्, तत्र प्रथमाधिकरणतात्पर्यमाह। प्रथममिति। श्रौते समन्वये विरोधनिरासार्थत्वादस्य पादस्य श्रुतिशास्त्राध्यायसङ्गतयः स्वमतस्थापनात्मकत्वात् सर्वेषामधिकरणानामेतत्पादसङ्गतिः। अत्र पूर्वपक्षे स्मृतिविरोधादुक्तसमन्वयासिद्धिः फलं सिद्धान्ते तत्सिद्धिरिति विवेकः। तत्र ब्रह्मण्युक्तवेदान्तसमन्वयो विषयः, स किं साङ्ख्यस्मृत्या विरुध्यते न वेति स्मृतिप्रामाण्याप्रामाण्याभ्यां सन्देहे पूर्वपक्षमाह। यदुक्तमिति। तन्त्र्यन्ते व्युत्पाद्यन्ते तत्त्वान्यनेनेति तन्त्रं शास्त्रं कपिलोक्तमन्याश्च पञ्चशिखादिभिः प्रोक्ताः, एवं सति वेदान्तानामद्वयब्रह्मसमन्वये निरर्थकाः स्युरित्यर्थः। तासामपि ब्रह्मार्थकत्वमस्तीत्यविरोध इत्यत आह। तासु हीति। ननु साङ्ख्यस्मृतिप्रामाण्याय प्रधानवादग्रहे मन्वादिस्मृतीनामप्रामाण्यं स्यादित्याशङ्क्य तासां धर्मे सावकाशत्वात् प्रामाण्यं स्यादित्याह। मन्वादीति।

तस्मान्नैषां मतमयथार्थं शक्यं सम्भावयितुं, तर्कावष्टम्भेन *च तेऽर्थं प्रतिष्ठापयन्ति, तस्मादपि स्मृतिबलेन वेदान्ता व्याख्येया इति पुनराक्षेपः, तस्य समाधिर्नान्यस्मृत्यनवकाशदोषप्रसङ्गादिति। यदि स्मृत्यनवकाशदोषप्रसङ्गेनेश्वरकारणवाद आक्षिप्येतैवमप्यन्या ईश्वरकारणवादिन्यः स्मृतयोऽनवकाशाः प्रसज्येरन् ता उदाहरिष्यामः। "यत् तत् सूक्ष्ममविज्ञेयं" इति परं ब्रह्म प्रकृत्य स ह्यन्तरात्मा भूतानां क्षेत्रज्ञश्चेति कथ्यत इति चोक्त्वा "तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम" इत्याह। तथान्यत्रापि "अव्यक्तं पुरुषे ब्रह्मन् †निर्गुणे सम्प्रलीयते" इत्याह।

तर्हि सांख्यादिस्मृतीनामपि धर्मे तात्पर्येण प्रामाण्यमस्तु तत्त्वं तु ब्रह्मैवेत्यविरोध इत्यत आह। नैवमिति। तत्त्वे विकल्पनानुपपत्तेर्निरवकाशस्मृत्यनुसारेण श्रुतिव्याख्यानमुचितं सावकाशान्निरवकाशं बलीय इति न्यायादित्याह। तस्मादिति। श्रुतिविरोधे स्मृत्यप्रामाण्यस्येष्टत्वात् पूर्वपक्षो न युक्त इति शङ्कते। कथमिति। ये स्वातन्त्र्येण श्रुत्यर्थं ज्ञातुं शक्नुवन्ति तेषामयं पूर्वपक्षो न भवेत्, साक्षादृष्टेषु श्रद्धालूनान्तु भवेदित्याह। भवेदिति। तेषामतीन्द्रियार्थज्ञानवत्त्वाच्च तत्र श्रद्धा स्यादित्याह। कपिलप्रभृतीनाञ्चेति।

"आदौ यो जायमानञ्च कपिलं जनयेदृषिं।
प्रसूतं बिभृयात् ज्ञानैस्तं पश्येत् परमेश्वरम्" ॥ इति—

श्रुतियोजना। यथा साङ्ख्यस्मृतिविरोधाद्ब्रह्मवादस्त्याज्य इति त्वयोच्यते तथा स्मृत्यन्तरविरोधात् प्रधानवादस्त्याज्य इति मयोच्यत इति सिद्धान्तयति। तस्य समाधिरिति। तस्माद्ब्रह्मणः सकाशादव्यक्तं मायायां लीनं सूक्ष्मात्मकं जगदिति यावत्। इतिहासवाक्यानुक्त्वा पुराणसम्मतिमाह। अतश्चेति। प्रभवत्यस्मादिति प्रभवो जन्महेतुः, प्रलीयते तस्मिन्निति प्रलयो लयाधिष्ठानं, तस्मात् कर्तुरीश्वरात्

---

* चैते इति का० पु० पाठः।　　† निष्क्रिये इति वर्ध०।

"अतश्च सङ्क्षेपमिमं शृणुध्वं
नारायणः सर्वमिदं पुराणः।
स सर्गकाले च करोति सर्गं
संहारकाले च तदत्ति भूयः" ॥ इति

पुराणे, भगवद्गीतासु च "अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा" इति, परमात्मानमेव च प्रकृत्यापस्तम्बः पठति "तस्मात् कायाः प्रभवन्ति सर्वे स मूलं शाश्वतिकः स नित्यः" इति। एवमनेकशः स्मृतीष्वपीश्वरः कारणत्वेनोपादानत्वेन च प्रकाश्यते। स्मृतिबलेन प्रत्यवतिष्ठमानस्य स्मृतिबलेनैवोत्तरं प्रवक्ष्यामि इत्यतोऽयमन्यस्मृत्यनवकाशदोषोपन्यासः। दर्शितन्तु श्रुतीनामीश्वरकारणवादं प्रति तात्पर्यं, विप्रतिपत्तौ च स्मृतीनामवश्य-

---

कायाः ब्रह्मादयः प्रभवन्ति। स एव मूलमुपादानं किंपरिणामि न शाश्वतिकः कूटस्थः अतः स नित्य इत्यर्थः। ननु श्रुतिविरोधः किमिति नोक्त इत्यत आह। स्मृतिबलेनेति। स्मृतीनां मिथो विरोधे कथं तत्त्वनिर्णयस्तत्राह। दर्शितन्त्विति। श्रुतिभिरेव तत्त्वनिर्णय इत्यर्थः। स्मृतीनां का गतिरित्यत आह। विप्रतिपत्तौ चेति। वस्तुतत्त्वे स्मृतीनां मिथो विरोधे वस्तुनि विकल्पायोगात् कॢप्तश्रुतिमूला स्मृतयः प्रमाणं, इतरास्तु कल्प्यश्रुतिमूला न प्रमाणमित्यर्थः। कॢप्तश्रुतिविरोधे स्मृतिर्न प्रमाणमित्यत्र जैमिनीयन्यायमाह। तदुक्तमिति। औदुम्बरीं स्पृष्ट्वोद्गायेदिति प्रत्यक्षश्रुतिविरुद्धा सा सर्वा वेष्टयितव्येति स्मृतिर्मानं न वेति सन्देहे मूलश्रुत्यनुमानान्मानमिति प्राप्ते सिद्धान्तः कॢप्तश्रुतिविरोधे स्मृतिप्रामाण्यमनपेक्षमपेक्षाशून्यं हेयमिति यावत्। हि यतो सति विरोधे श्रुत्यनुमानं भवति, अत्र तु विरोधे सत्यनुमानायोगान्मूलाभावात् सर्ववेष्टनस्मृतिरप्रमा-

कर्तव्येऽन्यतरपरिग्रहे*ऽन्यतरस्यापरित्यागे च श्रुत्यनुसारिण्यः स्मृतयः प्रमाणमनपेक्ष्या इतराः, तदुक्तं प्रमाणलक्षणे "विरोधे त्वनपेक्षं स्यादसति ह्यनुमानं" इति। न चातीन्द्रियानर्थान् श्रुतिमन्तरेण कश्चिदुपलभत इति शक्यं सम्भावयितुं, निमित्ताभावात्, शक्यं कपिलादीनां सिद्धानामप्रतिहतज्ञानत्वादिति चेत्, न सिद्धेरपि सापेक्षत्वात्। धर्मानुष्ठानापेक्षा हि सिद्धिः, स च धर्मश्चोदनालक्षणः, ततश्च पूर्वसिद्धायाश्चोदनाया अर्थो न पश्चिमसिद्धपुरुषवचनवशेनातिशङ्कितुं शक्यते, सिद्धव्यपाश्रयकल्पनायामपि बहुत्वात्, सिद्धानां प्रदर्शितेन प्रकारेण स्मृतिविप्रतिपत्तौ सत्यां न श्रुतिव्यपाश्रयादन्यत् निर्णयकारणमस्ति। परतन्त्रप्रज्ञस्यापि नाकस्मात् स्मृतिविशेषविषयः पक्षपातो युक्तः, कस्यचित् क्वचित्तु पक्षपाते सति

णामित्यर्थः। ननु साङ्ख्यस्मृतिः प्रत्यक्षमूलेत्यत आह। न चेति। योगिनां सिद्धिमहिम्नाऽतीन्द्रियज्ञानं सम्भावयितुं शक्यमिति शङ्कते। शक्यमिति। कपिलादिभिः किलादौ वेदप्रामाण्यं निश्चित्य तदर्थस्यानुष्ठानेन सिद्धिः सम्पादिता, तया सिद्ध्या प्रणीतस्मृत्यनुसारेणानादिश्रुतिपीडा न युक्तोपजीव्यविरोधादिति परिहरति। न सिद्धेरपीति। अतिशङ्कितुमिति, श्रुतीनां मुख्यार्थमतिक्रम्योपचरितार्थत्वं शङ्कितुं न शक्यत इत्यर्थः। स्वतः सिद्धैर्वेदो नोपजीव्य इति चेन्नानीश्वरस्य स्वतः सिद्धौ मानाभावात्। अङ्गीकृत्याप्याह। सिद्धेति। सिद्धानां वचनमाश्रित्य वेदार्थकल्पनायामपि सिद्धोक्तीनां मिथो विरोधे श्रुत्याश्रितमन्वाद्युक्तिभिरेव वेदार्थनिर्णयो युक्त इत्यर्थः। श्रुतिव्यपाश्रयं विना सिद्धोक्तिमात्रं न तत्त्वनिर्णयकारणमित्यक्षरार्थः। ननु मन्दमतेः साङ्ख्यस्मृतौ श्रद्धा भवति तस्य मतिः वेदान्तमार्गे कथमा-

---

*अन्यतरपरित्यागे इति वर्ध० पु० पाठः।

पुरुषमतिवैश्वरूप्येण तत्त्वाव्यवस्थानप्रसङ्गात्, तस्मात्तस्यापि स्मृतिविप्रतिपत्त्युपन्यासेन श्रुत्यनुसाराननुसार*विवेचनेन च सन्मार्गे प्रज्ञा संग्रहणीया। या तु श्रुतिः कपिलस्य ज्ञानातिशयं प्रदर्शयन्ती प्रदर्शिता न तया श्रुतिविरुद्धमपि कापिलं मतं श्रद्धातुं शक्यं, कपिलमिति श्रुतिसामान्यमात्रत्वात्। अन्यस्य च कपिलस्य सगरपुत्राणां प्रतप्तुर्वासुदेवनाम्नः स्मरणात्, अन्यार्थदर्शनस्य च प्राप्तिरहितस्यासाधकत्वात्। भवति चान्या मनोर्माहात्म्यं प्रख्यापयन्ती श्रुतिः "यद्वै किञ्च मनुरवदत् तद्भेषजं" इति। मनुना च

"सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति"॥ इति-

सर्वात्मत्वदर्शनं प्रशंसता कापिलं मतं निन्द्यत इति गम्यते। कपिलो हि न सर्वात्मत्वदर्शनमनुमन्यते, आत्मभेदाभ्युपगमात्।

नेत्यत आह। परतन्त्रेत्यादिना। ननु श्रुत्या कपिलस्य सर्वज्ञत्वोक्तेस्तन्मते श्रद्धा दुर्वारा इत्यत आह। या त्विति। कपिलशब्दमात्रेण साङ्ख्यकर्ता श्रौत इति भ्रान्तिरयुक्ता, तस्य द्वैतवादिनः सर्वज्ञत्वायोगादत्र च सर्वज्ञानसम्भूतत्वेन श्रुतः कपिलो वासुदेवांश एव, स हि सर्वात्मत्वज्ञानं वैदिकं साङ्ख्यमुपदिशतीति सर्वज्ञ इति भावः। प्रतप्तुः प्रदाहकस्य। किञ्च यः कपिलं ज्ञानैर्बिभर्ति तमीश्वरं पश्येदिति विधीयते, तथा चान्यार्थस्य ईश्वरप्रतिपत्तिशेषस्य कपिलसर्वज्ञत्वस्य दर्शनमनुवादस्तस्य मानान्तरेण प्राप्तिशून्यस्य स्वार्थसाधकत्वायोगाद्भ्रान्तानुवादमात्रात् सर्वज्ञत्वसिद्धिरित्याह। अन्यार्थेति। द्वैतवादिनः कपिलस्य श्रौतत्वं निरस्य ब्रह्मवादिनो मनोः श्रौतत्वमाह। भवति चेति। इतिहासेऽपि कापिलमतनिन्दापूर्वकमद्वैतं दर्शितमित्याह।

---

* विषयविवेचनेनेति का० पु० पाठः।

महाभारतेऽपि च "बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु" इति विचार्य "बहवः पुरुषा राजन् साङ्ख्ययोगविचारिणाम्" इति परपक्षमुपन्यस्य तद्व्युदासेन-

"बहूनां पुरुषाणां हि यथैका योनिरुच्यते।
तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकम्" ॥

इत्युपक्रम्य-

"ममान्तरात्मा तव च ये चान्ये देहिसंज्ञिताः।
सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित् क्वचित् ॥
विश्वमूर्द्धा विश्वभुजो विश्वपादाक्षिनासिकः।
एकश्चरति भूतेषु स्वैरचारी यथासुखम्" ॥ इति

सर्वात्मतैव निर्द्धारिता। श्रुतिश्च सर्वात्मतायां भवति

महाभारतेऽपीति। पुरुषाः आत्मानः किं वस्तुतो भिन्नाः उत सर्वदेहानां प्रत्यगात्मा एक इति विमर्शार्थः। बहूनां पुरुषाकाराणां देहानां यथैका योनिरुपादानं पृथ्वी तथा तं पुरुषमात्मानं विश्वं सर्वोपादानत्वेन सर्वात्मकं सर्वज्ञत्वादिगुणैः सम्पन्नं कथयिष्यामि विश्वे सर्वलोकप्रसिद्धादेव तिर्यङ्मनुष्यादीनां मूर्द्धानोऽस्यैवेति विश्वमूर्द्धा, एकस्यैव सर्वक्षेत्रेषु प्रतिविम्बभावेन प्रविष्टत्वात्, एवं विश्वभुजत्वादियोजना। सर्वभूतेष्वेकश्चरति अवगच्छति सर्वज्ञ इत्यर्थः। स्वैरचारी स्वतन्त्रः, नास्य नियन्ता कश्चिदस्ति सर्वेश्वर इत्यर्थः। यथा सुखमिति विशोकानन्दस्वरूप इति यावत। कापिलतन्त्रस्य वेदमूलस्मृतिविरोधमुक्त्वा साक्षाद्वेदविरोधमाह। श्रुतिश्चेति। यस्मिन् ज्ञानकाले केवलं स्वतन्त्रप्रकृतिकल्पनयैव वेदविरुद्धं न किन्त्वात्मभेदकल्पनयापीति सिद्धमिति सम्बन्धः। स्मृतिविरोधे वेदस्यैवाप्रामाण्यं किं न स्यादित्यत आह। वेदस्य हीति। वेदस्य प्रामाण्यं स्वतः सिद्धम-

"यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः।

तत्र को मोहः कः शोक एकत्वमनुपश्यतः" ॥ इति-

एवंविधा। अतश्चात्मभेदकल्पनयापि कापिलस्य तन्त्रस्य वेदविरुद्धत्वं वेदानुसारिमनुवचनविरुद्धत्वञ्च। न केवलं स्वतन्त्रप्रकृतिपरिकल्पनयैवेति*सिद्धं, वेदस्य हि निरपेक्षं स्वार्थे प्रामाण्यं रवेरिव रूपविषये पुरुषवचसान्तु मूलान्तरापेक्षं। †स्वार्थे प्रामाण्यं वक्तृस्मृतिव्यवहितञ्चेति विप्रकर्षः, तस्माद्वेदविरुद्धे विषये स्मृत्यनवकाशप्रसङ्गो न दोषः। कुतश्च स्मृत्यनवकाशप्रसङ्गो न दोषः॥

इतरेषाञ्चानुपलब्धेः॥ २॥

प्रधानादितराणि यानि प्रधानपरिणामत्वेन स्मृतौ ‡कल्पितानि महदादीनि न तानि वेदे लोके चोपलभ्यन्ते, भूतेन्द्रियाणि तावत् लोकवेदप्रसिद्धत्वात् शक्यन्ते स्मर्तुं। अलोक-

पौरुषेयत्वात् पौरुषेयवाक्यानां स्वार्थस्मृतितन्मूलानुभवयोः कल्पनया प्रामाण्यं ज्ञेयमिति व्यवहितं, परतः प्रामाण्यमिति विप्रकर्षः, श्रुतिस्मृत्योर्विशेष इत्यक्षरार्थः। समयोर्विरोधे हि निरवकाशेन सावकाशं बाध्यमिह स्वतः परतः प्रामाण्ययोर्वैषम्यात् झटिति निश्चितप्रामाण्येन चानुपसंजातविरोधिना वेदवाक्येन विरुद्धस्मृतेरेव बाध इति भावः। तस्मादिति विशेषादित्यर्थः, भ्रान्तिमूलत्वसम्भवादिति भावः॥

महदहङ्कारौ तावदप्रसिद्धौ अहङ्कारप्रकृतिकत्वेन तन्मात्राण्यप्रसिद्धानि स्मर्तुं न शक्यन्त इत्याह। इतरेषाञ्चेति। ननु महतः

* सिद्धमिति वर्ध० पु० नास्ति। † स्वार्थे प्रामाण्यमिति वर्ध० पु० नास्ति।
‡ निरूपितानीति वर्ध० पु० पाठः।

वेदप्रसिद्धत्वात्तु महदादीनां षष्ठस्येवेन्द्रियार्थस्य न स्मृतिरवकल्पते। यदपि क्वचित् तत्परमिव श्रवणमवभासते तदप्यतत्परं व्याख्यातं 'आनुमानिकमप्येकेषां' इत्यत्र। कार्यस्मृतेरप्रामाण्यात् कारणस्मृतेरप्यप्रामाण्यं युक्तमित्यभिप्रायः, तस्मादपि न स्मृत्यनवकाशप्रसङ्गो दोषः। तर्कावष्टम्भन्तु न विलक्षणत्वादित्यारभ्योन्मथिष्यति॥

एतेन योगः प्रत्युक्तः॥ ३॥

एतेन साङ्ख्यस्मृतिप्रत्याख्यानेन योगस्मृतिरपि प्रत्याख्याता द्रष्टव्येत्यतिदिशति, तत्रापि श्रुतिविरोधेन प्रधानं स्वतन्त्रमेव कारणं महदादीनि च कार्याणि अलोकवेदप्रसिद्धानि कल्प्यन्ते। नन्वेवं सति समानन्यायत्वात् पूर्वेणैवैतद्गतं किमर्थं पुनरतिदिश्यते,अस्ति ह्यत्राभ्यधिका शङ्का सम्यग्दर्शनाभ्युपायो हि योगो वेदे विहितः "श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति "त्रिरुन्नतं स्थाप्य समं शरीरं" इत्यादिना चासनादिकल्पना-

---

परमव्यक्तमिति श्रुतिप्रसिद्धानि महदादीनीत्यत आह। यदपीति। सूत्रतात्पर्यमाह। कार्येति। सांख्यस्मृतेर्महदादिष्विव प्रधानेऽपि प्रामाण्यं नेति निश्चीयत इत्यर्थः। सांख्यस्मृतिबाधेऽपि तदुक्तयुक्तीनां कथं बाध इत्यत आह। तर्केति॥

ब्रह्मण्युक्तसमन्वयः प्रधानवादियोगस्मृत्या विरुध्यते न वेति सन्देहे पूर्वन्यायमतिदिशति। एतेन योगः प्रत्युक्तः। अतिदेशत्वात् पूर्ववत् सङ्गत्यादिकं द्रष्टव्यं। पूर्वत्रानुक्तनिरासं पूर्वपक्षमाह। अस्ति ह्यत्रेति। निदिध्यासनं योगः। त्रीणि उरोग्रीवाशिरांस्युन्नतानि यस्मिञ्छरीरे तत् त्र्युन्नतं त्रिरुन्नतमिति पाठस्तु छान्दसः, युञ्जीतेति शेषः।

पुरःसरं बहुप्रपञ्चं योगविधानं श्वेताश्वतरोपनिषदि दृश्यते, लिङ्गानि च वैदिकानि योगविषयाणि सहस्रश उपलभ्यन्ते, "तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्" इति, "विद्यामेतां योगविधिञ्च कृत्स्नम्" इति चैवमादीनि। योगशास्त्रेऽपि "अथ तत्त्वदर्शनाभ्युपायो योगः" इति सम्यग्दर्शनाभ्युपायत्वेनैव योगोऽङ्गीक्रियते, अतः सम्प्रतिपन्नार्थैकदेशत्वादष्टकादिस्मृतिवद्योगस्मृतिरप्यनपवदनीया भविष्यतीति। इयमप्यधिका शङ्कातिदेशेन निवर्त्त्यते। अर्थैकदेशसम्प्रतिपत्तावप्यर्थैकदेशविप्रतिपत्तेः पूर्वोक्ताया दर्शनात्। सतीष्वप्यध्यात्मविषयासु बह्वीषु स्मृतिषु साङ्ख्ययोगस्मृत्योरेव निराकरणाय यत्नः कृतः, साङ्ख्ययोगौ हि परमपुरुषार्थसाधनत्वेन लोके प्रख्यातौ शिष्टैश्च परिगृहीतौ लिङ्गेन च श्रौतेनोपबृंहितौ, तत्कारणं साङ्ख्ययोगाभिपन्नं ज्ञात्वा देवं

न केवलं योगे विधिः किन्तु योगस्य ज्ञापकान्यर्थवादवाक्यान्यपि सन्तीत्याह। लिङ्गानि चेति। तां पूर्वोक्तां धारणां योगविदो योगं परमं तप इति मन्यन्ते। उक्तामेतां ब्रह्मविद्यां योगविधिं ध्यानप्रकारञ्च मृत्युप्रसादान्नचिकेता लब्ध्वा ब्रह्म प्राप्त इति सम्बन्धः। योगस्मृतिः प्रधानादितत्त्वांशेऽपि प्रमाणत्वेन स्वीकार्या। सम्प्रतिपन्नः प्रामाणिकोऽर्थैकदेशो योगरूपो यस्यास्तत्त्वादित्यर्थः। अष्टकाः कर्तव्याः गुरुरनुगन्तव्य इत्यादिस्मृतीनां वेदाविरुद्धार्थकत्वान्मूलश्रुत्यनुमानेन प्रामाण्यमुक्तं प्रमाणलक्षणे। एवं योगस्मृतेर्योगे प्रामाण्यात्तत्त्वांशेऽपि प्रामाण्यमिति पूर्वपक्षमनूद्य सिद्धान्तयति। इयमिति। ननु बौद्धादिस्मृतयोऽत्र किमिति न निराकृता इत्यत आह। सतीष्वपीति। तासां प्रतारकत्वेन प्रसिद्धत्वादशिष्टैः पशुप्रायैर्गृहीतत्वाद्वेदबाह्यत्वाच्चानोपे-

मुच्यते सर्वपाशैरिति। निराकरणन्तु न *साङ्ख्यस्मृतिज्ञानेन वेदनिरपेक्षेण योगमार्गेण वा निःश्रेयसमधिगम्यत इति। श्रुतिर्हि वैदिकादात्मैकविज्ञानादन्यन्निःश्रेयससाधनं वारयति "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति। द्वैतिनो हि ते साङ्ख्या योगाश्च नात्मैकत्वदर्शिनः। यत्तु दर्शनमुक्तं तत्कारणं साङ्ख्ययोगाभिपन्नमिति वैदिकमेव तत्र ज्ञानं ध्यानञ्च साङ्ख्ययोगशब्दाभ्यामभिलप्येते प्रत्यासत्तेरित्यवगन्तव्यं, येन त्वंशेन न विरुध्यते तेनेष्टमेव साङ्ख्ययोगस्मृत्योः सावकाशत्वं। तद्यथाऽसङ्गो ह्ययं पुरुष इत्येवमादिश्रुतिप्रसिद्धमेव पुरुषस्य विशुद्धत्वं निर्गुणपुरुषनिरूपणेन साङ्ख्यैरभ्युपगम्यते। तथा च योगैरपि "अथ परिव्राट् विवर्णवासा मुण्डोऽपरिग्रहः" इत्येवमादिश्रुतिप्रसिद्धमेव निवृत्तिनिष्ठत्वं प्रव्रज्याद्युपदेशेनानुगम्यते। एतेन सर्वाणि तर्कस्मरणानि प्रतिवक्तव्यानि, तान्यपि तर्कोपपत्तिभ्यां तत्त्वज्ञानायोपकुर्वन्तीति चेत्, उप-

---

च्येति भावः। तत्कारणमिति। तेषां प्रकृतानां कामानां कारणं सांख्ययोगाभ्यां विवेकध्यानाभ्यामभिपन्नं प्रत्यक्तया प्राप्तं देवं ज्ञात्वा सर्वपाशैरविद्यादिभिर्मुच्यत इत्यर्थः। समूलत्वे स्मृतिद्वयस्य निरासः किमिति कृत इत्यत आह। निराकरणन्त्विति। इति हेतोः, कृतमिति शेषः। प्रत्यासत्तेरिति श्रुतिस्थसांख्ययोगशब्दयोः सजातीयश्रुत्यर्थग्राहित्वादिति यावत्। किं सर्वांशेषु स्मृत्यप्रामाण्यं नेत्याह। येन त्वंशेनेति। ब्रह्मवादस्य कणभक्षादिभिर्विरोधमाशङ्कातिदिशति। एतेनेति। श्रुतिविरोधेनेत्यर्थः। उपकारकबाधो न युक्त इत्या-

---

* सांख्यज्ञानेन का०। सांख्यदर्शनेन वर्ध०।

कुर्वन्तु नाम, तत्त्वज्ञानन्तु वेदान्तवाक्येभ्य एव भवति "नावेदविन्मनुते तं बृहन्तं, तं त्वौपनिषदं पुरुषं पृच्छामि" इत्येवमादिश्रुतिभ्यः॥

न विलक्षणत्वादस्य तथात्वञ्च शब्दात्॥ ४॥

ब्रह्मास्य *जगतो निमित्तं कारणं प्रकृतिश्चेत्यस्य पक्षस्याक्षेपः स्मृतिनिमित्तः परिहृतः, तर्कनिमित्त इदानीमाक्षेपः परिह्रियते। कुतः पुनरस्मिन्नवधारिते आगमार्थे तर्कनिमित्तस्याक्षेपस्यावकाशः। ननु धर्म इव ब्रह्मण्यप्यनपेक्ष आगमो भवितुमर्हति, भवेदयमवष्टम्भो यदि प्रमाणान्तरानवगाह्य आगममात्रप्रमेयोऽयमर्थः स्यादनुष्ठेयरूप इव धर्मः, परिनिष्पन्नरूपन्तु ब्रह्मावगम्यते। परिनिष्पन्ने च वस्तुनि प्रमाणान्तराणामस्त्यवकाशो यथा पृथिव्यादिषु। यथा च श्रुतीनां परस्परविरोधे सत्येकवशेनेतरा नीयन्ते, एवं प्रमाणान्तरविरोधेऽपि तद्वशेनैव श्रुतिर्नीयते। †दृष्टसाधर्म्येण चादृष्टमर्थं समर्प-

---

शास्त्र योऽंश उपकारकः स न बाध्यः किन्तु तत्त्वांश इत्याह। तान्यपीति। तर्कोऽनुमानं, तदनुग्राहिका युक्तिरुपपत्तिः॥

स्मृतीनामप्रामाण्यात्ताभिः समन्वयस्य न विरोध इति सिद्धान्तविलक्षणत्वात् वृत्तानुवादेनास्याधिकरणस्य तात्पर्यमाह। ब्रह्मास्येति। पूर्वपक्षमाक्षिपति। कुतः पुनरिति। अनवकाशे हेतुमाह। ननु धर्म इवेति। मानान्तरानपेक्षे वेदैकसमधिगम्ये ब्रह्मण्यनुमानात्मकतर्कस्याप्रवेशात्तेनाक्षेपस्यानवकाशः, भिन्नविषयत्वात् तर्कवेदयोरित्यर्थः।

---

* जगतः कारणमिति का०। † दृष्टसाम्येनेति वर्ध० का०।

यन्ती युक्तिरनुभवस्य सन्निकृष्यते, विप्रकृष्यते तु श्रुतिरैतिह्यमात्रेण स्वार्थाभिधानात्। अनुभवावसानञ्च ब्रह्मविज्ञानमविद्याया निवर्तकं मोक्षसाधनञ्च दृष्टफलतयेष्यते। श्रुतिरपि "श्रोतव्यो मन्तव्यः" इति श्रवणव्यतिरेकेण मननं विदधती तर्कमप्यत्रादर्तव्यं दर्शयति, अतस्तर्कनिमित्तः पुनराक्षेपः क्रियते, न विलक्षणत्वादस्येति। यदुक्तं चेतनं ब्रह्म जगतः प्रकृतिरिति तन्नोपपद्यते। कस्माद्विलक्षणत्वादस्य विकारस्य प्रकृत्याः। इदं हि ब्रह्म कार्यत्वेनाभिप्रेयमाणं जगद्ब्रह्मविलक्षणं अचेतनमशुद्धञ्च दृश्यते, ब्रह्म च जगद्विलक्षणं चेतनं शुद्धञ्च श्रूयते। न च विलक्षणत्वे प्रकृतिविकारभावो दृष्टः, न हि रुचकादयो विकारा मृत्प्रकृतिका भवन्ति, शरावादयो वा सुवर्णप्रकृतिकाः, मृदैव तु मृदन्विताः विकाराः प्रक्रियन्ते, सुव-

---

सिद्धस्य मानान्तरगम्यत्वादेकविषयत्वाद्विरोध इति पूर्वपक्षं समर्थयते। भवेदयमिति। अवष्टम्भो दृष्टान्तः। नन्वेकविषयत्वेन विरोधेऽपि श्रुतिविरोधान्मानान्तरमेव बाध्यतामित्यत आह। यथा चेति। प्रबलश्रुत्या दुर्बलश्रुतिबाधवन्निरवकाशमानान्तरेण लक्षणावृत्त्या सावकाशश्रुतिनयनं युक्तमित्यर्थः। किञ्च ब्रह्मसाक्षात्कारस्य मोक्षहेतुत्वेन प्रधानस्यान्तरङ्गं तर्कस्तस्यापरोक्षदृष्टान्तगोचरत्वेन प्रधानवदपरोक्षार्थविषयत्वात्, शब्दस्तु परोक्षार्थकत्वाद्बहिरङ्गमतस्तर्केण बाध्य इत्याह। दृष्टेति। ऐतिह्यमात्रेण परोक्षतयेति यावत्। अनुभवस्य प्राधान्यं दर्शयति। अनुभवावसानञ्चेति। नैषा तर्केण मतिरित्यर्थवादेन तर्कस्य निषेधमाशङ्क्य विधिविरोधान्नैवमित्याह। श्रुतिरपीति। एवं पूर्वपक्षं सम्भाव्य चेतनब्रह्मकारणवादिवेदान्तसमन्वयः, क्षित्यादिकं न चेतनप्रकृतिकं कार्यद्रव्यत्वात् घटवदिति सांख्ययोगन्यायेन विरुध्यते न वेति सन्देहे स्मृतेर्मूलाभावात् दुर्बलत्वेऽप्यनुमानस्य व्याप्तिमूलत्वेन

र्णेन सुवर्णान्विताः, तथेदमपि जगदचेतनं सुखदुःखमोहा-न्वितं सदचेतनस्यैव सुखदुःखमोहात्मकस्य कारणस्य कार्यं भवितुमर्हति न विलक्षणस्य ब्रह्मणः, ब्रह्मविलक्षणत्वं चास्य जगतोऽशुद्ध्यचेतनत्वदर्शनादवगन्तव्यं। अशुद्धं हीदं जगत् सुखदुःखमोहात्मकतया प्रीतिपरितापविषादादिहे-तुत्वात् स्वर्गनरकाद्युच्चावचप्रपञ्चत्वाच्च। अचेतनं चेदं जगत् चेतनं प्रति कार्यकरणभावेनोपकरणभावोपगमात्, न हि साम्ये सत्युपकार्योपकारकभावो भवति, न हि प्रदीपौ परस्प-रस्योपकुरुतः। ननु चेतनमपि कार्यकरणं स्वामिभृत्यन्यायेन भोक्तुरुपकरिष्यति, न, स्वामिभृत्ययोरप्यचेतनांशस्यैव चेतनं प्रत्युपकारकत्वात्। यो ह्येकस्य चेतनस्य परिग्रहे बुद्ध्यादिरचे-तनभागः स एवान्यस्य चेतनस्योपकरोति न तु स्वयमेव चेत-नश्चेतनान्तरस्य उपकरोत्यपकरोति वा, निरतिशया ह्यक-र्तारश्चेतना इति साङ्ख्या मन्यन्ते, तस्मादचेतनं कार्यकरणं।

प्राबल्यात्तेन विरुध्यत इति प्रत्युदाहरणेन पूर्वपक्षयति। न विल-क्षणत्वादिति। पूर्वोत्तरपक्षयोः समन्वयासिद्धिः तत्सिद्धिश्चेति पूर्व-वत् फलं, जगन्न ब्रह्मप्रकृतिकं तद्विलक्षणत्वात्, यद्यद्विलक्षणं तन्न तत्प्रकृतिकं यथा मृद्विलक्षणा रुचकादय इत्यर्थः। सुखदुःखमोहाः सत्त्वरजस्तमांसि, तथा च जगत् सुखदुःखमोहात्मकसामान्यप्रकृ-तिकं तदन्वितत्वात् यदित्थं तत्तथा यथा मृदन्विता घटादय इत्याह। मृदैवेति। विलक्षणत्वं साधयति। ब्रह्मविलक्षणत्वञ्चेति। यथा हि एक एव स्त्रीपिण्डः पतिसपत्न्युपपतीनां प्रीतिपरितापविषादा-दीन् करोति एवमन्येऽपि भावा द्रष्टव्याः। तत्र प्रीतिः सुखं, परितापः

न च काष्ठलोष्टादीनां चेतनत्वे किञ्चित्प्रमाणमस्ति, प्रसिद्धश्चायं चेतनाचेतनविभागो लोके, तस्माद्ब्रह्मविलक्षणत्वान्नेदं जगत् तत्प्रकृतिकं। योऽपि कश्चिदाचक्षीत श्रुत्या जगतश्चेतनप्रकृतिकतां तद्बलेनैव समस्तं जगच्चेतनमवगमिष्यामि प्रकृतिरूपस्य विकारेऽन्वयदर्शनात्, अविभावनन्तु चैतन्यस्य परिणामविशेषाद्भविष्यति, यथा स्पष्टचैतन्यानामप्यात्मनां स्वापमूर्च्छाद्यवस्थासु चैतन्यं न विभाव्यते, एवं काष्ठलोष्टादीनामपि चैतन्यं न विभावयिष्यते। एतस्मादेव च विभावितत्वाविभावितत्वकृतात् विशेषाद्रूपादिभावाभावाभ्याञ्च कार्यकरणानामात्मनाञ्च चेतनत्वाविशेषेऽपि गुणप्रधानभावो न विरोत्स्यते। यथा च पार्थिवत्वाविशेषेऽपि मांससूपौदनादीनां प्रत्यात्मवर्त्तिनो विशेषात् परस्परोपकारित्वं भवत्येवमिहापि भविष्यति, प्रविभागप्रसिद्धिरप्यत एव न विरोत्स्यत इति। तेनापि कथञ्चिच्चेतनत्वाचेतनत्वलक्षणं विलक्षणत्वं परिह्रियेत।

शोकः, विषादो भ्रमः, आदिपदात् रागादिग्रहः। उभयोश्चेतनत्वेन साम्यादुपकार्योपकारकभावो न स्यादित्ययुक्तं। स्वामिभृत्ययोर्व्यभिचारादिति शङ्कते। ननु चेतनमपीति। भृत्यदेहस्यैव स्वामिचेतनोपकारकत्वान्न व्यभिचार इत्याह। नेत्यादिना। उत्कर्षापकर्षशून्यत्वाच्चेतनानां मिथो नोपकारकत्वमित्याह। निरतिशया इति। तस्मादुपकारकत्वात्। श्रुतचेतनप्रकृतिकत्वबलेन जगच्चेतनमेवेत्येकदेशिमतमुत्थापयति। योऽपीति। घटादेश्चेतनत्वमनुपलब्धिबाधितं इत्यत आह। अविभावनन्त्विति। अतः कारणान्यपरिणामत्वात् सतोऽपि चैतन्यस्यानुपलब्धिरित्यर्थः। अन्तःकरणादन्यस्य वृत्त्युपरागदशाया-

शुद्ध्यशुद्धित्वलक्षणन्तु विलक्षणत्वं नैव परिह्रियते, *न वेतरदपि विलक्षणत्वं परिहर्तुं शक्यत इत्याह। तथात्वञ्च शब्दादिति। अनवगम्यमानमेव हीदं लोके समस्तस्य वस्तुनः चेतनत्वं चेतनप्रकृतिकत्वश्रवणाच्छब्दशरणतया केवलयोत्प्रेक्ष्यते, तच्च शब्देनैव विरुध्यते, यतः शब्दादपि तथात्वमवगम्यते। तथात्वमिति प्रकृतिविलक्षणत्वं कथयति। शब्द एव विज्ञानञ्चाविज्ञानं चेति कस्यचिद्विभागस्याचेतनतां श्रावयन् चेतनाद्ब्रह्मणो विलक्षणमचेतनं जगच्छ्रावयति। ननु चेतनत्वमपि क्वचिदचेतनत्वाभिमतानां भूतेन्द्रियाणां श्रूयते यथा, "मृदब्रवीदापोऽब्रुवन्" इति, "तत्तेज ऐक्षत ता आप ऐक्षन्त" इति चैवमाद्या भूतविषया चेतनत्वश्रुतिः, इन्द्रियविषयापि "ते हेमे प्राणा अहंश्रेयसे विविदमाना ब्रह्म जग्मुः" इति "ते ह वाचमूचुस्त्वन्न उद्गाय" इति चैवमाद्येन्द्रियविषयेति। अत उत्तरं पठति॥

मेव चैतन्याभिव्यक्तिर्नान्यदेति भावः। वृत्त्यभावे चैतन्यानभिव्यक्तौ दृष्टान्तः। यथेति। आत्मानात्मनोश्चेतनत्वे स्वस्वामिभावः कुत इत्यत आह। एतस्मादेवेति। साम्येति प्रातिस्विकस्वरूपविशेषाच्छेषशेषित्वे दृष्टान्तः। यथा चेति। चेतनाचेतनभेदः कथमित्यत आह। प्रविभागेति। चैतन्याभिव्यक्त्यनभिव्यक्तिभ्यामित्यर्थः। सर्वस्य चेतनत्वमेकदेश्युक्तमङ्गीकृत्य सांख्यः परिहरति। तेनापि कथञ्चिदिति। अङ्गीकारं त्यक्त्वा सूत्रशेषेण परिहरति। न चेत्यादिना। इतरचेतनाचेतनरूपं वैलक्षण्यं तथात्वशब्दार्थः। श्रुतार्थापत्तिः शब्देन बाध्येति भावः। श्रुतिसाहाय्यान्न बाध्येत्युत्तरसूत्रव्यावर्त्यं शङ्कते। नन्विति॥

---

* न चेति का०।

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्यां ॥ ५ ॥

तुशब्द आशङ्कामपनुदति। न खलु मृदब्रवीदित्येवंजातीयकया श्रुत्या भूतेन्द्रियाणां चेतनत्वमाशङ्कनीयं यतोऽभिमानिव्यपदेश एषः। मृदाद्यभिमानिन्यो वागाद्यभिमानिन्यश्च चेतनादेवता वदनसंवदनादिषु चेतनोचितेषु व्यवहारेषु व्यपदिश्यन्ते न भूतेन्द्रियमात्रं। कस्माद्विशेषानुगतिभ्यां। विशेषो हि भोक्तृणां भूतेन्द्रियाणाञ्च चेतनाचेतनप्रविभागलक्षणः प्रागभिहितः, सर्वचेतनतायां चासौ नोपपद्येत। अपि च कौषीतकिनः प्राणसंवादे करणमात्राशङ्काविनिवृत्तये अधिष्ठातृचेतनपरिग्रहाय देवताशब्देन विशिंषन्ति "(कौ॰२।१४) एता ह वै देवता अहंश्रेयसे विवदमानाः" इति "(कौ॰२।१४) ता वा एताः सर्वा देवताः प्राणे निःश्रेयसं विदित्वा" इति च। अनुगताश्च सर्वत्राभिमानिन्यश्चेतनादेवता मन्त्रार्थवादेतिहासपुराणादिभ्योऽवगम्यन्ते "अग्निर्वाग्भूत्वा मुखं प्राविशत्" इत्येवमादिका च श्रुतिः करणेष्वनुग्राहिकां देवतामनुगतां दर्शयति, प्राणसंवादवाक्यशेषे च

मृदादीनां वक्तृत्वादिश्रुतेस्तदभिमानिविषयत्वात् तया विज्ञानं चाविज्ञानञ्चेति चेतनाचेतनविभागशब्दस्योपचरितार्थत्वं न युक्तमिति सांख्यः समाधत्ते। अभिमानीति। संवदनं विवादः, न भूतमात्रमिन्द्रियमात्रं वा चेतनत्वेन व्यपदिश्यते। लोकवेदप्रसिद्धविभागबाधायोगादित्यर्थः। विशेषपदस्यार्थान्तरमाह। अपि चेति। अहंश्रेयसे स्वश्रेष्ठत्वाय प्राणा विवदमाना इत्युक्तप्राणानां चेतनवाचिदेवतापदेन विशेषितत्वात्, प्राणादिपदैरभिमानिव्यपदेश इत्यर्थः। प्राणे निःश्रेयसं श्रैष्ठ्यं विदित्वा

"ते ह प्राणाः प्रजापतिं पितरमेत्योचुः" इति श्रेष्ठत्वनिर्द्धारणाय प्रजापतिगमनं तद्वचनाच्चैकैकोत्क्रमणेनान्वयव्यतिरेकाभ्यां प्राणश्रैष्ठ्यप्रतिपत्तिः, "तस्मै वलिहरणं" इति चैवंजातीयकोऽस्मदादिष्विव व्यवहारोऽनुगम्यमानोऽभिमानिव्यपदेशं द्रढयति। "तत्तेज ऐक्षत" इत्यपि परस्या एव देवताया अधिष्ठात्र्याः स्वविकारेष्वनुगताया इयमीक्षा व्यपदिश्यत इति द्रष्टव्यं, तस्माद्विलक्षणमेवेदं ब्रह्मणो जगद्विलक्षणत्वाच्च न ब्रह्मप्रकृतिकमित्याक्षिप्ते प्रतिविधत्ते॥

दृश्यते तु॥ ६॥

तुशब्दः *पूर्वपक्षं व्यावर्तयति, यदुक्तं विलक्षणत्वान्नेदं जगत् ब्रह्मप्रकृतिकमिति नायमेकान्तो दृश्यते हि लोके चेतनत्वेन प्रसिद्धेभ्यः पुरुषादिभ्यो विलक्षणानां केशनखादीनामुत्पत्तिरचेतनत्वेन प्रसिद्धेभ्यो गोमयादिभ्यो वृश्चिकादीनां। नन्वचेतनान्येव पुरुषादिशरीराण्यचेतनानां केशनखादीनां कारणानि

प्राणाधीना जाता इत्यर्थः। अनुगतिं बहुधा व्याचष्टे। अनुगताश्चेति। तस्मै प्राणाय, वलिहरणं वागादिभिः स्वीयवशिष्ठत्वादिगुणसमर्पणं कृतं। तेजआदीनामीक्षणं त्वयैवेक्षत्यधिकरणे चेतननिष्ठतया व्याख्यातं द्रष्टव्यमित्यर्थः। यस्मान्नास्ति जगतश्चेतनत्वं तस्मादिति पूर्वपक्षोपसंहारः॥

किं यत्किञ्चिद्वैलक्षण्यं हेतुः बहुवैलक्षण्यं वा। आद्ये व्यभिचारमाह। नायमेकान्तो दृश्यते हीति। हेतोरसत्त्वान्न व्यभिचार इति शङ्कते। नन्विति। यत्किञ्चिद्वैलक्षण्यमस्तीति व्यभिचार इत्याह। उच्यत इति। शरीरस्य केशादीनाञ्च प्राणित्वाप्राणित्व-

* पूर्वेति का० वर्ध० नास्ति।

अचेतनान्येव वृश्चिकादिशरीराण्यचेतनानां गोमयादीनां कार्याणीत्युच्यते, एवमपि किञ्चिदचेतनं चेतनस्यायतनभावमुपगच्छति किञ्चिन्नेत्यस्त्येव वैलक्षण्यं। महांश्चायं पारिणामिकः स्वभावविप्रकर्षः पुरुषादीनां केशनखादीनाञ्च रूपादिभेदात्, तथा गोमयादीनां वृश्चिकादीनाञ्च, अत्यन्तसारूप्ये च प्रकृतिविकारभाव एव प्रलीयेत। अथोच्येत अस्ति कश्चित्पार्थिवत्वादिस्वभावः पुरुषादीनां केशनखादिष्वनुवर्तमानो गोमयादीनां च वृश्चिकादिष्विति, ब्रह्मणोऽपि तर्हि सत्तालक्षणः स्वभाव आकाशादिष्वनुवर्तमानो दृश्यते। विलक्षणत्वेन च कारणेन ब्रह्मप्रकृतिकत्वं जगतो दूषयता किमशेषस्य ब्रह्मस्वभावस्याननुवर्तनं विलक्षणत्वमभिप्रेयते उत यस्य कस्यचित्, अथ चैतन्यस्येति वक्तव्यं। प्रथमे विकल्पे समस्तप्रकृतिविकारोच्छेदप्रसङ्गः। न ह्यसत्यतिशये प्रकृतिविकारभाव इति भवति। द्वितीये

रूपं वैलक्षण्यमस्तीत्यर्थः। द्वितीयेऽपि तत्रैव व्यभिचारमाह। महानिति। पारिणामिकः केशादीनां स्वगतपरिणामात्मक इत्यर्थः। किञ्च ययोः प्रकृतिविकारभावस्तयोः सादृश्यं वदता वक्तव्यं किमात्यन्तिकं यत्किञ्चिद्वेति, आद्ये दोषमाह। अत्यन्तेति। द्वितीयमाशङ्क्य ब्रह्मजगतोरपि तत्सत्त्वात् प्रकृतिविकृतित्वसिद्धिरित्याह। अथेत्यादिना। विलक्षणत्वं विकल्प्य दूषणान्तरमाह। विलक्षणत्वेनेत्यादिना। जगति समस्तस्य ब्रह्मस्वभावस्य चेतनत्वादेरननुवर्तमानान्न ब्रह्मकार्यत्वमिति पक्षे सर्वसाम्ये प्रकृतिविकारत्वमित्युक्तं स्यात् तदसङ्गतमित्याह। प्रथमे इति। तृतीये तु दृष्टान्ताभाव इति। न च जगन्न ब्रह्मप्रकृतिकमचेतनत्वादविद्यावदिति दृष्टान्तोऽस्तीति वाच्यं, अना-

चाप्रसिद्धत्वं, दृश्यते हि सत्तालक्षणो ब्रह्मस्वभाव आकाशादिष्वनुवर्तमान इत्युक्तं। तृतीये च दृष्टान्ताभावः, किं हि यच्चैतन्येनानन्वितं तद्ब्रह्मप्रकृतिकं दृष्टमिति*ब्रह्मकारणवादिनं प्रत्युदाह्रियेत, समस्तस्यास्य वस्तुजातस्य ब्रह्मप्रकृतिकत्वाभ्युपगमात्। आगमविरोधस्तु प्रसिद्ध एव चेतनं ब्रह्म जगतः कारणं प्रकृतिश्चेत्यागमतात्पर्यस्य प्रसाधितत्वात्। यत्तूक्तं परिनिष्पन्नत्वात् ब्रह्मणि प्रमाणान्तराणि सम्भवेयुरिति तदपि मनोरथमात्रं, रूपाद्यभावाद्धि नायमर्थः प्रत्यक्षस्य गोचरः, लिङ्गाद्यभावाच्च नानुमानादीनामागममात्रसमधिगम्य एव त्वयमर्थो धर्मवत्। तथा च श्रुतिः,

"नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ" इति।

"कोऽद्धा वेद क इह प्रवोचत् इयं विसृष्टिः यत आबभूव"

दित्वस्योपाधित्वात्। न च ध्वंसे साध्यव्यापकता, तस्यापि कार्यसंस्कारात्मकस्य भावत्वे सब्रह्मप्रकृतिकत्वादभावत्वाग्रहे चानादिभावत्वस्योपाधित्वादिति, सम्प्रति कल्पत्रयसाधारणं दोषमाह। आगमेति, पूर्वोक्तमनूद्य ब्रह्मणः शुष्कतर्कविषयत्वासम्भवान्न तर्केणाक्षेप इत्याह। यत्तूक्तमित्यादिना। लिङ्गसादृश्यपदप्रवृत्तिनिमित्तानामभावादनुमानोपमानशब्दानामगोचरः, ब्रह्म लक्षणया वेदैकवेद्यमित्यर्थः। एषा ब्रह्मणि मतिस्तर्केण स्वतन्त्रेण नापनेया न सम्पादनीया। यद्वा कुतर्केण न †बाधनीया ‡कुतार्किकादन्येनैव वेदविदार्येण प्रोक्ता मतिः सुज्ञानायानुभवाय फलाय भवति। हे प्रेष्ठ प्रियतमेति नचिकेतसम्प्रति मृत्योर्वचनं। इयं विविधा सृष्टिर्यतः आ समन्ताद्बभूव तं को वा अद्धा साक्षाद्वेद, तिष्ठतु वेदनं क इह लोके तं प्रवोचत्, प्रवोचच्छान्दसो दीर्घलोपः, यथावद्वक्तापि नास्तीत्यर्थः। प्रभवं जन्म न विदुः मम सर्वा-

* ब्रह्मवादिनमिति का०। † साधनीयेति सो० २ टी०।

‡ तार्किकादिति सो० २ टी०।

इति चैतौ मन्त्रौ सिद्धानामपीश्वराणां दुर्बोधतां जगत्कारणस्य दर्शयतः। स्मृतिरपि भवति-

"अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्।
प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणम्" ॥ इति
"अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते"।

इति च

"न मे विदुः सुरगणाः प्रभवं न महर्षयः।
अहमादिर्हि देवानां महर्षीणां च सर्वशः" ॥ इति

चैवंजातीयका। यदपि श्रवणव्यतिरेकेण मननं विदधच्छब्द एव तर्कमप्यादर्तव्यं दर्शयतीत्युक्तं नानेन मिषेण शुष्कतर्कस्यात्रात्मलाभः सम्भवति, श्रुत्यनुगृहीत एव ह्यत्र तर्कोऽनुभवाङ्गत्वेनाश्रीयते, स्वप्नान्तबुद्धान्तयोरुभयोरितरेतरव्यभिचारादात्मनोऽनन्वागतत्वं सम्प्रसादे च प्रपञ्चपरित्यागेन सदात्मना सम्पत्तेर्निष्प्रपञ्चसदात्मत्वं, प्रपञ्चस्य च ब्रह्मप्रभवत्वात् कार्यकारणानन्यत्वन्यायेन ब्रह्माव्यतिरेक इत्येवंजातीयकः।

दित्वेन जन्माभावात्। मिषेण मननविधिव्याजेन, शुष्कः श्रुत्यनपेक्षः। श्रुत्या तत्त्वे निश्चिते सत्यनु पश्चात् पुरुषदोषस्यासम्भावनादेर्निरासाय गृहीतः श्रुत्यनुगृहीतस्तमाह। स्वप्नान्तेति। जीवस्यावस्थावतो देहादिप्रपञ्चयुक्तस्य निष्प्रपञ्चब्रह्मैक्यमसम्भवि द्वैतग्राहिप्रमाणविरोधाद्ब्रह्मणश्चाद्वितीयत्वमयुक्तमित्येवं श्रौतार्थासम्भावनायां तन्निरासाय सर्वास्ववस्थास्वात्मनोऽनुगतस्य व्यभिचारिणीभिरवस्थाभिरनन्वागतत्वमसंस्पृष्टत्वं अवस्थानां स्वाभाविकत्वे औष्ण्यवदात्मव्यभिचारायोगात सुषुप्तौ प्रपञ्चभ्रान्त्यभावे सता सोम्येत्युक्ताभेददर्शनान्निष्प्रपञ्चब्रह्मैक्यसम्भवः, यथा घटादयो मृदभिन्नास्तथा जगद्ब्रह्माभिन्नं तज्जत्वाद-

तर्काप्रतिष्ठानादिति च केवलस्य तर्कस्य विप्रलम्भकत्वं दर्शयिष्यति। योऽपि चेतनकारणश्रवणबलेनैव समस्तस्य जगतश्चेतनतामुत्प्रेक्षेत तस्यापि विज्ञानञ्चाविज्ञानञ्चेति चेतनाचेतनविभागश्रवणं विभावनाविभावनाभ्यां चैतन्यस्य शक्यत एव योजयितुं। परस्यैव त्विदमपि विभागश्रवणं न युज्यते, कथं परमकारणस्य ह्यत्र समस्तजगदात्मना समवस्थानं श्राव्यते विज्ञानञ्चाविज्ञानञ्चाभवदिति। तत्र यथा चेतनस्याचेतनभावो नोपपद्यते विलक्षणत्वात्, एवमचेतनस्यापि चेतनभावो नोपपद्यते, प्रत्युक्तत्वात्तु विलक्षणत्वस्य यथा श्रुत्यैव चेतनं कारणं ग्रहीतव्यं भवति॥

असदिति चेन्न प्रतिषेधमात्रत्वात्॥ ७॥

यदि चेतनं शुद्धं शब्दादिहीनञ्च ब्रह्म तद्विपरीतस्याचेत-

स्तर्क आश्रीयत इत्यर्थः। इतोऽन्यादृशतर्कस्यात्र ब्रह्मण्यप्रवेशादस्य चानुकूलत्वान्न तर्केणाक्षेपावकाश इति भावः। ब्रह्मणि शुष्कतर्कस्याप्रवेशः सूत्रसम्मत इत्याह। तर्काप्रतिष्ठानादिति। विप्रलम्भकत्वमप्रमाणकत्वं। यदुक्तं एकदेशिना सर्वस्य जगतश्चेतनत्वोक्तौ विभागश्रुत्यनुपपत्तिरिति दूषणं सांख्येन तन्न तत्र तेनैकदेशिना विभागश्रुतेश्चैतन्याभिव्यक्त्यनभिव्यक्तिभ्यां योजयितुं शक्यत्वात्, साङ्ख्यस्य त्विदं दूषणं वज्रलेपायते, प्रधानकार्यत्वे सर्वस्याचेतनत्वेन चेतनाचेतनकार्यविभागासम्भवादित्याह। योऽपीत्यादिना। सिद्धान्ते चेतनाचेतनवैलक्षण्याधिकारे कथं ब्रह्मणः प्रकृतित्वमित्यत आह। प्रत्युक्तत्वादिति। अप्रयोजकत्वव्यभिचाराभ्यां निरस्तत्वादित्यर्थः॥

कार्यमुत्पत्तेः प्रागसदेव स्यात् स्वाविरुद्धकारणात्मना सत्त्वायोगा-

नस्याशब्दस्य शब्दादिमतश्च कार्यस्य कारणमिष्येत, असत् तर्हि कार्यं प्रागुत्पत्तेरिति प्रसज्येत, अनिष्टञ्चैतत् सत्कार्यवादिनस्तवेति चेत्, नैष दोषः, प्रतिषेधमात्रत्वात्, प्रतिषेधमात्रं हीदं नास्य प्रतिषेध्यमस्ति, न ह्ययं प्रतिषेधः प्रागुत्पत्तेः सत्त्वं कार्यस्य प्रतिषेद्धुं शक्नोति, कथं, यथैव हीदानीमपीदं कार्यं कारणात्मना सत् एवं प्रागुत्पत्तेरपीति गम्यते। न हीदानीमपीदं कार्यं कारणात्मानमन्तरेण स्वतन्त्रमेवास्ति, "सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद" इत्यादिश्रवणात्। कारणात्मना तु सत्त्वं कार्यस्य प्रागुत्पत्तेरविशिष्टं। ननु शब्दादिहीनं ब्रह्म जगतः कारणं, वाढं, न तु शब्दादिमत्कार्यं कारणात्मना हीनं प्रागुत्पत्तेरिदानीञ्चास्तीति, तेन न शक्यते वक्तुं प्रागुत्पत्तेरसत्कार्यमिति। विस्तरेण चैतत्कार्यकारणानन्यत्ववादे वक्ष्यामः॥

अपीतौ तद्वत् प्रसङ्गादसमञ्जसं॥ ८॥

अत्राह, यदि स्थौल्यसावयवत्वाचेतनत्वपरिच्छिन्नत्वाशु-

दित्यपसिद्धान्तापत्तिमाशङ्क्य मिथ्यात्वात् कार्यस्य कालत्रयेऽपि कारणात्मना सत्त्वमविरुद्धमिति समाधत्ते। असदिति। चेदित्यादिना असत् स्यादिति सत्त्वप्रतिषेधो निरर्थक इत्यर्थः। कार्यसत्यत्वाभावे श्रुतिमाह। सर्वन्तमिति। मिथ्यात्वमजानतः शङ्कामनूद्य परिहरति। नन्वित्यादिना। विस्तरेण चैतदिति मिथ्यात्वमित्यर्थः।

सत्कार्यवादसिद्ध्यर्थं कार्यभेदे कारणस्यापि कार्यवदशुद्ध्यादिप्रसङ्ग

द्धादिधर्मकं कार्यं ब्रह्मकारणकमभ्युपगम्येत, तदापीतौ प्रलये प्रतिसंहृज्यमानं कार्यं *कारणेऽविभागमापद्यमानं कारणमात्मीयेन धर्मेण दूषयेदित्यपीतौ कारणस्यापि ब्रह्मणः कार्यस्येवाशुद्ध्यादिरूपताप्रसङ्गात् सर्वज्ञं ब्रह्म जगतः कारणमित्यसमञ्जसमिदमौपनिषदं दर्शनं। अपि च समस्तस्य विभागस्याविभागप्राप्तेः पुनरुत्पत्तौ नियमकारणाभावात् भोक्तृभोग्यादिविभागेनोत्पत्तिर्न प्राप्नोतीत्यसमञ्जसं। अपि च भोक्तॄणां परेण ब्रह्मणाऽविभागं गतानां कर्मादिनिमित्तप्रलयेऽपि पुनरुत्पत्तौ अभ्युपगम्यमानायां मुक्तानामपि पुनरुत्पत्तिप्रसङ्गादसमञ्जसं। अथेदं जगदपीतावपि विभक्तमेव परेण ब्रह्मणावतिष्ठेतैवमप्यपीतिरेव न सम्भवति, कारणाव्यतिरिक्तञ्च कार्यं न सम्भवतीत्यसमञ्जसमेवेति, अत्रोच्यते॥

इति शङ्कासूत्रं व्याचष्टे। अत्राहेति। प्रतिसंहृज्यमानपदस्य व्याख्यां करोति, यथा जले लीयमानं लवणद्रव्यं जलं दूषयति तद्वदित्यर्थः। सूत्रस्य योजनान्तरमाह। अपि चेति। सर्वस्य कार्यस्यापीतौ कारणवदेकरूपत्वप्रसङ्ग इत्यर्थः। अर्थान्तरमाह। अपि चेति। कर्मादीनामुत्पत्तिनिमित्तानां प्रलयेऽपि भोक्तॄणां उत्पत्तौ तद्वदेव मुक्तानामप्युत्पत्तिप्रसङ्गादित्यर्थः। शङ्कापूर्वकं व्याख्यान्तरमाह। अथेति। यदि लयकालेऽपि कार्यं कारणादविभक्तं तर्हि स्थितिकालवल्लयाभावप्रसङ्गात् कार्यस्य द्वैतापत्तेश्चासमञ्जसमिदं दर्शनमित्यर्थः॥

अपीतौ जगत् स्वकारणं न दूषयति कारणे लीनत्वान्मृदादिषु नील-

---

* कारणाविभागमिति सो० वर्ध०।

न तु दृष्टान्तभावात् ॥ ९ ॥

नैवास्मदीये दर्शने किञ्चिदसामञ्जस्यमस्ति यत्तावदभिहितं कारणमपिगच्छत्कार्यं कारणमात्मीयेन धर्मेण दूषयेदिति, तददूषणं, कस्मात् दृष्टान्तभावात्। सन्ति हि दृष्टान्ताः यथा कारणमपिगच्छत् कार्यं कारणमात्मीयेन धर्मेण न दूषयति, तद्यथा शरावादयो मृत्प्रकृतिका विकारा विभागावस्थायामुच्चावचमध्यमप्रभेदाः सन्तः पुनः प्रकृतिमपिगच्छन्तो न तामात्मीयेन धर्मेण संसृजन्ति। रुचकादयश्च सुवर्णविकारा अपीतौ न सुवर्णमात्मीयेन धर्मेण संसृजन्ति। पृथिवीविकारश्चतुर्विधो भूतग्रामो न पृथिवीमपीतौ आत्मीयेन धर्मेण संसृजति। *तत्पक्षस्य तु न कश्चित् दृष्टान्तोऽस्ति, अपीतिरेव हि न सम्भवेत् यदि कारणे कार्यं स्वधर्मेणैवावतिष्ठेत, अनन्यत्वेऽपि कार्यकारणयोः कार्यस्य कारणात्मत्वं न तु कारणस्य कार्यात्मत्वं, आरम्भणशब्दादिभ्य इति वक्ष्यामः। अत्यल्प-

---

घटादिवदिति। सिद्धान्तसूत्रं व्याचष्टे। नैवेत्यादिना। अपिगच्छत् लीयमानं, विभागावस्था स्थितिकालः, त्वत्पक्षस्येति मधुरजलं लवणस्याकारणमित्यदृष्टान्तः। किञ्च दूषकत्वे कार्यस्य स्थितिः स्याल्लवणवदित्याह। अपीतिरेवेति। असति कार्ये तद्धर्मेण कारणस्य योगो न सम्भवति धर्म्यसत्त्वे धर्माणामप्यसत्त्वादिति भावः। ननु सत्कार्यवादे लयेऽपि कार्यस्य कारणाभेदेन सत्त्वात् दूषकत्वं स्यादित्यत आह। अनन्यत्वेऽपीति। कल्पितस्याधिष्ठानधर्मवत्त्वमभेदान्न त्वधिष्ठानस्य कल्पितकार्यधर्मवत्त्वं तस्य कार्यात् पृथक् सत्त्वादित्यर्थः। किञ्चापीताविति

---

* त्वत्पक्षस्येति वर्ध० सो० का०।

च्छेदमुच्यते, कार्यमपीतावात्मीयेन धर्मेण कारणं संसृजेदिति स्थितावपि हि समानोऽयं प्रसङ्गः कार्यकारणयोरनन्यत्वाभ्युपगमात् इदं सर्वं यदयमात्मा आत्मैवेदं सर्वं ब्रह्मैवेदममृतं पुरस्तात् सर्वं खल्विदं ब्रह्मेत्येवमाद्याभिर्हि श्रुतिभिरविशेषेण त्रिष्वपि कालेषु कार्यस्य कारणादनन्यत्वं श्राव्यते। तत्र यः परिहारः कार्यस्य तद्धर्माणाञ्चाविद्याध्यारोपितत्वान्न तैः कारणं संसृज्यत इति अपीतावपि स समानः। अस्ति चायमपरो दृष्टान्तः, यथा स्वयं प्रसारितया मायया मायावी त्रिष्वपि-कालेषु न संस्पृश्यते अवस्तुत्वात्, एवं परमात्मापि संसार-मायया न संस्पृश्यत इति। यथा च *स्वप्नदर्शकः स्वप्नदर्शनमायया न संस्पृश्यते† प्रबोधसम्प्रसादयोरनन्वागतत्वात्, एवमवस्थात्रयसाक्ष्येकोऽव्यभिचार्यवस्थात्रयेण व्यभिचारिणा न संस्पृश्यते। मायामात्रं ह्येतत् परमात्मनोऽवस्थात्रयात्मनावभासनं रज्ज्वा इव सर्पादिभावेनेति। अत्रोक्तं वेदान्तार्थसम्प्रदायविद्भिराचार्यैः।

विशेषणं व्यर्थमिति प्रतिबन्द्या समाधत्ते। अत्यल्पञ्चेति। परिणामदृष्टान्तं व्याख्याय विवर्तदृष्टान्तं व्याचष्टे। अस्ति चेति। मायाव्यनुपादानमित्यरुच्या दृष्टान्तान्तरमाह। यथेति। अस्यैव स्वप्नकाले दृष्टसंसर्ग इत्यत आह। प्रबोधेति। जाग्रत्सुषुप्त्योः स्वप्ने चात्मनोऽस्पर्शात् तत्कालेऽप्यस्पर्श इत्यर्थः। यदाऽज्ञस्य जीवस्यावस्थाभिरसंसर्गस्तदा सर्वज्ञस्य किं वाच्यमिति दार्ष्टान्तिकमाह। एवमिति। यद्वा जगज्जन्मस्थितिलया ईश्वरस्यावस्थात्रयं तदसङ्गित्वे वृद्धसम्मतिमाह। अत्रोक्तमिति। यदा तत्त्वमसीत्युपदेशकाले प्रबुध्यते मायानिद्रां त्यजति तदा

---

* स्वप्नदृगेक एव इति सो० का० वर्ध०। † असंस्पृश्यत इतीति सो० का० वर्ध०।

"अनादिमायया सुप्तो यदा जीवः प्रबुध्यते।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा" ॥ इति

तत्र यदुक्तमपीतौ कारणस्यापि कार्यस्येव स्थौल्यादिदोषप्रसङ्ग इत्येतदयुक्तं। यत्पुनरेतदुक्तं समस्तस्य विभागस्याविभागप्राप्तेः पुनर्विभागेनोत्पत्तौ नियमकारणं नोपपद्यत इत्ययमप्यदोषः दृष्टान्तभावादेव, यथा हि सुषुप्तिसमाध्यादावपि सत्यां स्वाभाविक्यामविभागप्राप्तौ मिथ्याज्ञानस्यानपोदितत्वात् पूर्ववत् पुनः प्रबोधे विभागो भवत्येवमिहापि भविष्यति। श्रुतिश्चात्र भवति "इमाः सर्वाः प्रजाः सति संपद्य न विदुः सति सम्पद्यामहे" इति। त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद्यद्भवन्ति तत्तदा भवन्तीति। यथा हि असंविभागेऽपि परमात्मनि मिथ्याज्ञानप्रतिबद्धो विभागव्यवहारः स्वप्नवदव्याहतः स्थितौ दृश्यते, एवमपीतावपि मिथ्याज्ञानप्रतिबद्धैव विभागशक्ति-

---

जन्मलयस्थित्यवस्थाशून्यमद्वैतमीश्वरमात्मत्वेनानुभवतीत्यर्थः। फलितमाह। तत्रेति। द्वितीयमसामञ्जस्यमनूद्य तेनैव सूत्रेण परिहरति। यत्पुनरिति। सुषुप्तावज्ञानसत्त्वे पुनर्विभागोत्पत्तौ च मानमाह। श्रुतिश्चेति। सति ब्रह्मण्येकीभूय न विदुरित्यज्ञानोक्तिः, इह सुषुप्तेः प्राक् प्रबोधे येन येन जात्यादिना विभक्ता भवन्ति तदा पुनरुत्थानकाले तथैव भवन्तीति विभागोक्तिः। ननु सुषुप्तौ पुनर्विभागप्रयज्ञानसत्त्वे सर्वप्रलये तत्सत्त्वं कुत इत्यत आह। यथा हीति। यथा सुषुप्तौ परमात्मनि सर्वकार्याणामविभागेऽपि पुनर्विभागहेत्वज्ञानशक्तिरस्ति एवमपीतौ महाप्रलयेऽपि मिथ्याभूताज्ञानसम्बद्धा पुनः

रनुमास्यते। एतेन मुक्तानां पुनरुत्पत्तिप्रसङ्गः प्रत्युक्तः, सम्यग्ज्ञानेन मिथ्याज्ञानस्यापोदितत्वात्। यः पुनरयमन्तेऽपरो विकल्प उत्प्रेक्षितोऽथेदं जगदपीतावपि विभक्तमेव परेण ब्रह्मणावतिष्ठेतेति सोऽप्यभ्युपगमादेव प्रतिषिद्धः, तस्मात् समञ्जसमिदमौपनिषदं दर्शनं ॥

स्वपक्षदोषाच्च ॥ १० ॥

स्वपक्षे चैते प्रतिवादिनः साधारणा दोषा प्रादुःष्युः, कथमित्युच्यते यत्तावदभिहितं विलक्षणत्वान्नेदं जगद्ब्रह्मप्रकृतिकमिति, प्रधानप्रकृतिकतायामपि समानमेतच्छब्दादिहीनात् प्रधानाच्छब्दादिमतो जगत उत्पत्त्यभ्युपगमात्, अत एव च विलक्षणकार्योत्पत्त्यभ्युपगमात् समानः प्रागुत्पत्तेरसत्कार्यवादप्रसङ्गः, तथाऽपीतौ कार्यस्य कारणाविभागाभ्युपगमात्, तद्वत् प्रसङ्गोऽपि समानः, तथा मृदितसर्वविशेषेषु विकारे-

---

ष्विदविभागशक्तिरनुमास्यते। यतः स्थिताविदानीं मिथ्याज्ञानकार्यविभागव्यवहारस्तत्त्वबोधाभावात् स्वप्नान्तवदबाधितो दृश्यते, अतः कार्यदर्शनात् कारणसत्त्वसिद्धिरित्यर्थः। अज्ञानां जीवानां महाप्रलयेऽप्यज्ञानशक्तिनियमात् पुनर्जन्मनियम इति भावः। एतेनेति जन्मकारणाज्ञानशक्त्यभावेनेत्यर्थः।

वैलक्षण्यादीनां सांख्यपक्षेऽपि दोषत्वान्नास्माभिस्तन्निरासप्रयासः कार्य इत्याह। स्वपक्षेति। सूत्रं व्याचष्टे। स्वेति। प्रादुःष्युः प्रादुर्भवेयुः अत एवेति सत्यकार्यस्य विरुद्धकारणात्मना सत्त्वायोगात्, सांख्यस्यैवायं दोषो न कार्यमिथ्यात्ववादिन इति मन्तव्यं। अपीताविति सूत्रो

ष्वपीतावविभागात्मतां गतेष्विदमस्य पुरुषस्योपादानमिदमस्येति प्राक् प्रलयात् प्रति पुरुषं ये नियता भेदा न ते तथैव पुनरुत्पत्तौ नियन्तुं शक्यन्ते कारणाभावात्, विनैव च कारणेन नियमेऽभ्युपगम्यमाने कारणाभावसामान्यात् मुक्तानामपि पुनर्बन्धप्रसङ्गः। अथ केचिद्भेदा अपीतावविभागमापद्यन्ते केचिन्नेति चेत्, ये नापद्यन्ते तेषां प्रधानकार्यत्वं न प्राप्नोतीत्येवमेते दोषाः साधारणत्वान्नान्यतरस्मिन् पक्षे चोदयितव्या भवन्तीत्यदोषतामेवैषां द्रढयति अवश्याश्रयितव्यत्वात्॥

तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यविमोक्षप्रसङ्गः॥ ११॥

इतश्च नागमगम्येऽर्थे केवलेन तर्केण प्रत्यवस्थातव्यं, यस्मान्निरागमाः पुरुषोत्प्रेक्षामात्रनिबन्धनास्तर्का अप्रतिष्ठिताः सम्भवन्त्युत्प्रेक्षाया निरङ्कुशत्वात्। तथा हि कैश्चिदभियुक्तैर्यत्नेनोत्प्रेक्षितास्तर्का अभियुक्ततरैरन्यैराभास्यमाना दृश्यन्ते, तैरप्युत्प्रेक्षितास्तदन्यैराभास्यन्त इति न प्रतिष्ठितत्वं तर्काणां

क्तदोषचतुष्टयमाह। तथापीताविति। कार्यवत्प्रधानस्य रूपादिमत्त्वप्रसङ्गः। इदं कर्मादिकमस्योपादानं भोग्यमस्य नेत्यनियमः। बद्धमुक्तव्यवस्था च यदि व्यवस्थार्थं मुक्तानां भेदाः सङ्घातविशेषाः प्रधाने लीयन्ते बद्धानां भेदास्तु न लीयन्त इत्युच्येत तर्हि अलीनानां पुरुषवत् कार्यत्वव्याघात इत्यर्थः।

किञ्च तर्कस्य सम्भावितदोषत्वात्तेन निर्दोषपदार्थसमन्वयो न बाध्य इत्याह। तर्काप्रतिष्ठानादपीति। पुरुषमतीनां विचित्रत्वेऽपि

शक्यं समाश्रयितुं *पुरुषमतिवैरूप्यात्। अथ कस्यचित् प्रसिद्धमाहात्म्यस्य कपिलस्यान्यस्य वा सम्मतस्तर्कः प्रतिष्ठित इत्याश्रीयेत, एवमपि अप्रतिष्ठितत्वमेव, प्रसिद्धमाहात्म्याभिमतानामपि तीर्थकराणां कपिलकणभुक्प्रभृतीनां परस्परविप्रतिपत्तिदर्शनात्। अथोच्येतान्यथा वयमनुमास्यामहे यथा नाप्रतिष्ठादोषो भविष्यति, न हि प्रतिष्ठितस्तर्क एव नास्तीति शक्यते वक्तुं, एतदपि हि तर्काणामप्रतिष्ठितत्वं तर्केणैव प्रतिष्ठाप्यते। केषाञ्चित् तर्काणामप्रतिष्ठितत्वदर्शनेनान्येषामपि तज्जातीयकानां तर्काणामप्रतिष्ठितत्वकल्पनात्। सर्वतर्काप्रतिष्ठायाञ्च सर्वलोकव्यवहारोच्छेदप्रसङ्गः। अतीतवर्तमानाध्वसाम्येन ह्यनागतेऽप्यध्वनि सुखदुःखप्राप्तिपरिहाराय प्रवर्तमानो लोको दृश्यते। श्रुत्यर्थविप्रतिपत्तौ चार्थाभासनिरा-

---

कपिलस्य सर्वज्ञत्वात् तदीयतर्केऽविश्वास इति शङ्कते। अथेति। कपिलो यदि सर्वज्ञः कणादो नेति का प्रमा इति न्यायेन परिहरति। एवमपीति। सूत्रमध्यस्थशङ्काभागं व्याचष्टे। अथोच्येतेति। विलक्षणत्वादितर्काणामप्रतिष्ठितत्वेऽपि व्याप्तिपक्षधर्मतासंपन्नः कश्चित् तर्कः प्रतिष्ठितो भविष्यति तेन प्रधानमनुमेयमित्यर्थः। ननु सोऽप्यप्रतिष्ठितः तर्कजातीयत्वात् विलक्षणत्वादिवदित्यत आह। न हीति। तर्कजातीयत्वादिति तर्कः प्रतिष्ठितो न वा, आद्येऽत्रैवाप्रतिष्ठितत्वसाध्याभावाद्व्यभिचारः, द्वितीयेऽपि न सर्वतर्काणां अप्रतिष्ठितत्वं हेत्वभावादित्यभिसन्धिमानाह। एतदपीति। किञ्चानागतपाक इष्टसाधनं पाकत्वादतीतपाकवदित्यादीष्टानिष्टसाधनानुमानात्मकतर्कस्य प्रवृत्तिनिवृत्तिव्यवहारहेतुत्वान्नाप्रतिष्ठेत्याह। सर्वतर्केति। अध्वा विषय

---

* पुरुषमतिवैश्वरूप्यादिति का० वर्ध० सो०।

करणेन सम्यगर्थनिर्द्धारणं तर्केणैव वाक्यवृत्तिनिरूपणरूपेण क्रियते। मनुरपि चैवमेव मन्यते-

"प्रत्यक्षमनुमानञ्च शास्त्रञ्च विविधागमं।
त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता" ॥ इति
"आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः" ॥ इति च-

ब्रुवन्। अयमेव च तर्कस्यालङ्कारो यदप्रतिष्ठितत्वं नाम, एवं हि सावद्यतर्कपरित्यागेन निरवद्यस्तर्कः प्रतिपत्तव्यो भवति। न हि पूर्वजो मूढ आसीदित्यात्मनापि मूढेन भवितव्यं इति किञ्चिदस्ति प्रमाणं, तस्मान्न तर्काप्रतिष्ठानं दोष इति चेदेवमप्यविमोक्षप्रसङ्गः। यद्यपि क्वचिद्विषये तर्कस्य प्रतिष्ठितत्वमुपलक्ष्यते तथापि प्रकृते तावद्विषये प्रसज्यत एवाप्रतिष्ठितत्वदोषादनिर्मोक्षस्तर्कस्य, न हीदमतिगम्भीरं भावयाथात्म्यं मुक्तिनिबन्धनमागममन्तरेणोत्प्रेक्षितुमपि शक्यं, रूपाद्यभावाद्धि नायमर्थः प्रत्य-

---

पाकभोजनादिर्विषभक्षणादिस्थ तत्सामान्येन पाकत्वादिना नागतविषये पाकादौ सुखदुःखहेतुत्वानुमित्या प्रवृत्त्यादिरित्यर्थः। किञ्च पूर्वोत्तरमीमांसयोस्तर्केणैव वाक्यतात्पर्यनिर्णयस्य क्रियमाणत्वात् तर्कः प्रतिष्ठित इत्याह। श्रुत्यर्थेति। मनुरपि केषाञ्चित् तर्काणां प्रतिष्ठां मन्यत इत्याह। मनुरिति। धर्मस्य शुद्धिरधर्माद्भेदनिर्णयः। कस्यचित् तर्कस्याप्रतिष्ठितत्वमङ्गीकरोति। अयमेवेति। सर्वतर्काणां प्रतिष्ठायां पूर्वपक्ष एव न स्यादिति भावः। पूर्वपक्षतर्कवत् सिद्धान्ततर्कोऽप्यप्रतिष्ठितः तर्कत्वाविशेषादिति वदन्तं उपहसति। न हीति। क्वचित् तर्कस्य प्रतिष्ठायामपि जगत्कारणविशेषे तर्कस्य स्वातन्त्र्यं ना-

स्य गोचरो लिङ्गाद्यभावाच्च नानुमानादीनामित्यवोचाम* । अपि च सम्यग्ज्ञानान्मोक्ष इति सर्वेषां मोक्षवादिनामभ्युपगमः, तच्च सम्यक् ज्ञानमेकरूपं वस्तुतन्त्रत्वात्, एकरूपेण ह्यवस्थितो योऽर्थः स परमार्थः लोके तद्विषयं ज्ञानं सम्यक् ज्ञानमित्युच्यते यथाऽग्निरुष्ण इति, तत्रैवं सति सम्यग्ज्ञाने पुरुषाणां विप्रतिपत्तिरनुपपन्ना, तर्कज्ञानानान्तु अन्योन्यविरोधात् प्रसिद्धा विप्रतिपत्तिः, यद्धि केनचित्तार्किकेणेदमेव सम्यक् ज्ञानमिति प्रतिष्ठापितं तदपरेण व्युत्थाप्यते, तेनापि प्रतिष्ठापितं ततोऽपरेण व्युत्थाप्यत इति च प्रसिद्धं लोके, कथमेकरूपानवस्थितविषयं तर्कप्रभवं सम्यक् ज्ञानं भवेत्। न च प्रधानवादी तर्कविदामुत्तम इति सर्वैस्तार्किकैः परिगृहीतः, येन तदीयं मतं सम्यक् ज्ञानमिति प्रतिपद्येमहि। न च श-

---

स्तीति सूत्रशेषं व्याचष्टे। यद्यपीत्यादिना। अतिगम्भीरत्वं ब्रह्मणो वेदान्यमानागम्यत्वं। भावस्य जगत्कारणस्य, याथात्म्यमद्वयत्वं, मुक्तिनिबन्धनं मुक्त्यालम्बनं। परमानन्दविषयं दर्शयति। रूपादीति। अविमोक्षो मुक्त्यभाव इत्यर्थान्तरमाह। अपि चेत्यादिना। एकरूपवस्तुज्ञानस्य सम्यग्ज्ञानत्वेऽपि तर्कजन्यत्वं किं न स्यादित्यत आह। तत्रैवं सतीति। तर्कोत्थज्ञानानां मिथो विप्रतिपत्तेर्न सम्यग्ज्ञानत्वं सम्यग्ज्ञाने विप्रतिपत्त्ययोगादित्यर्थः। एकरूपेणानवस्थितो विषयो यस्य तत् तर्कप्रभवं, कथं सम्यक् ज्ञानं भवेदिति योजना। ननु सांख्यस्य श्रेष्ठत्वात् तज्ज्ञानं सम्यगित्याशङ्क्य हेत्वसिद्धिमाह। न च प्रधानेति। ननु सर्वतार्किकैर्मिलित्वा निश्चितं तर्कोत्था मतिर्मुक्तिहेतुरित्यत आह। न च शक्यन्त इति। तस्मात् तर्कोत्थज्ञानान्मुक्त्ययोगात् तर्केण वेदान्त-

---

* इति वावोचामेति का० सो० वर्ध०।

क्यन्ते अतीतानागतवर्त्तमानास्तार्किका एकस्मिन् देशे काले च समाहर्तुं, येन तन्मतिरेकरूपैकार्थविषया सम्यङ्मतिरिति स्यात्, वेदस्य तु नित्यत्वे विज्ञानोत्पत्तिहेतुत्वे च सति व्यवस्थितार्थविषयत्वोपपत्तेः, तज्जनितस्य ज्ञानस्य सम्यक्त्वं अतीतानागतवर्तमानैः सर्वैरपि तार्किकैः अपह्नोतुमशक्यं, अतः सिद्धमस्यैवौपनिषदस्य ज्ञानस्य सम्यग्ज्ञानत्वं, अतोऽन्यत्र सम्यग्ज्ञानत्वानुपपत्तेः संसाराविमोक्ष एव प्रसज्येत, अत आगमवशेनागमानुसारितर्कवशेन च चेतनं ब्रह्म जगतः कारणं प्रकृतिश्चेति स्थितं ॥

एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥ १२ ॥

वैदिकस्य *दर्शनस्य प्रत्यासन्नत्वात् गुरुतरतर्कबलोपेतत्वात् वेदानुसारिभिश्च कैश्चिच्छिष्टैः केनचिदंशेन परिगृहीतत्वात् प्रधानकारणवादं तावद्व्यपाश्रित्य यस्तर्कनिमित्त आक्षे-

---

समन्वयबाधो न युक्तस्तद्बाधे सम्यग्ज्ञानालाभेनानिर्मोक्षप्रसङ्गादिति सूत्रांशार्थमुपसंहरति । अतोऽन्यत्रेति । समन्वयस्य तर्केणाविरोधे फलितमधिकरणार्थमुपसंहरति । अत आगमेति ।

ब्रह्म जगदुपादानमिति ब्रुवन् वेदान्तसमन्वयो विषयः स किं यद्विभु तन्न द्रव्योपादानमिति वैशेषिकादिन्यायेन विरुध्यते न वेति सन्देहे सांख्यवृद्धानां †तर्ककुशलमतित्वेऽपि वैशेषिकादीनां ‡तर्कमतिकुशलत्वप्रसिद्धेस्तदीयन्यायस्य अबाधितत्वाद्विरुध्यत इति प्रत्युदाहरणेन प्राप्तेऽतिदिशति । एतेनेति । फलं पूर्ववत् । ननु सांख्यमतस्योपदेशन्तार्किकमतस्यातिदेशः किमिति कृतो •वैपरीत्यस्यापि

---

* सम्यग्दर्शनस्येति वर्ध० ।

† तर्कामतित्वेऽपि इति सो० २ टी० ।

‡ तर्कमतित्वप्रसिद्धेरिति सो० २ टी० ।

यो वेदान्तवाक्येषूद्भावितः स परिहृतः, इदानीमण्वादिवादव्यपाश्रयेणापि कैश्चिन्मन्दमतिभिर्वेदान्तवाक्येषु पुनस्तर्कनिमित्त आक्षेप आशङ्क्यत इत्यतः प्रधानमल्लनिबर्हणन्यायेनातिदिशति, परिगृह्यन्त इति परिग्रहाः न परिग्रहा अपरिग्रहाः शिष्टानामपरिग्रहाः शिष्टापरिग्रहाः, एतेन प्रकृतेन प्रधानकारणवादनिराकरणकारणेन शिष्टैर्मनुव्यासप्रभृतिभिः केनचिदप्यंशेनापरिगृहीता येऽण्वादिकारणवादास्तेऽपि प्रतिषिद्धतया व्याख्याता निराकृता वेदितव्याः, तुल्यत्वात् निराकरणकारणस्य नात्र पुनराशङ्कितव्यं किञ्चिदस्ति । तुल्यमत्रापि परमगम्भीरस्य जगत्कारणस्य तर्कानवगाह्यत्वं तर्कस्य चाप्रतिष्ठितत्वमन्यथानुमानेऽप्यविमोक्ष आगमविरोधश्चेत्येवंजातीयकं निराकरणकारणं ॥

सम्भवादित्याशङ्क्य पूर्वोत्तरयोरुपदेशातिदेशभावे कारणमाह । वैदिकस्येति । सत्कार्यत्वात्मासङ्गत्वस्वप्रकाशत्वाद्यंशैर्वेदान्तशास्त्रस्य प्रत्यासन्नः प्रधानवादः शिष्टैर्देवलादिभिः सत्कार्यत्वांशेन स्वीकृत इति प्रबलत्वादुपदेशः । अण्वादिवादानां निर्मूलत्वेन दुर्बलत्वादतिदेश इति भावः । किं निराकरणकारणमिति प्रष्टव्यं नास्तीत्याह । तुल्यत्वादिति । कारणमेवाह । तुल्यमिति । यदुक्तं विभुत्वान्न ब्रह्मोपादानं ब्रह्मेति तत्र पक्षसाधकत्वेन श्रुतेरुपजीव्यत्वात् तया बाधः । महापरिमाणवत्त्वस्य सर्वसंयोगिकत्वरूपविभुत्वस्य निर्गुणे ब्रह्मण्यसिद्धेश्चेति द्रष्टव्यं, अतः समन्वयस्य तार्किकन्यायेन न विरोध इति सिद्धं । अद्वितीयात् ब्रह्मणो जगत्सर्गादिवादी वेदान्तसमन्वयो विषयः, स किं यन्मिथोऽभिन्नं तन्नाद्वितीयकारणाभिन्नं यथा मृत्तन्तू घटपटाविति तर्कसहितभेदं प्रत्यक्षादिना विरुध्यते न वेति सन्देहे ब्रह्मणि तर्कस्याप्रतिष्ठितत्वेऽपि जगद्भेदे प्रतिष्ठितत्वाद्विरुध्यत इति पूर्वपक्षयति ।

भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत् ॥ १३ ॥

अन्यथा पुनर्ब्रह्मकारणवादस्तर्कबलेनैवाक्षिप्यते। यद्यपि श्रुतिः प्रमाणं स्वविषये भवति, तथापि प्रमाणान्तरेण विषयापहारेऽन्यपरा भवितुमर्हति, यथा मन्त्रार्थवादौ, तर्कोऽपि हि स्वविषयादन्यत्राप्रतिष्ठितः स्यात् यथा धर्माधर्मयोः। किमतो यद्येवं अत इदमयुक्तं यत्प्रमाणान्तरप्रसिद्धार्थबाधनं श्रुतेः, कथं पुनः प्रमाणान्तरप्रसिद्धोऽर्थः श्रुत्या बाध्यत इति, अत्रोच्यते, प्रसिद्धो ह्ययं भोक्तृभोग्यविभागः, लोके भोक्ता च चेतनः शारीरः, भोग्याः शब्दादयो विषया इति। यथा भोक्ता देवदत्तः भोग्य ओदन इति, तस्य च विभागस्याभावः प्रसज्येत, यदि भोक्ता भोग्यभावमापद्येत भोग्यं वा भोक्तृभावं

भोक्त्रापत्तेरिति। विरोधादद्वैतासिद्धिः पूर्वपक्षफलं सिद्धान्ते तत्सिद्धिरिति भेदः। अनपेक्षश्रुत्या स्वार्थनिर्णयात् तर्केणाक्षेपो न युक्त इत्युक्तमिति शङ्कते। यद्यपीति। मानान्तरायोग्यश्रुत्यर्थे भवत्यनाक्षेपः। यस्त्वद्वितीयब्रह्माभेदाद्भूजलादीनामभेदो ब्रह्मोपादानकत्वश्रुतिविषयः स आदित्यो यूप इत्यर्थवादार्थवन्मानान्तरयोग्य एवेति द्वैतप्रमाणैरपक्रियत इति समाधत्ते। तथापीति। अन्यपरत्वं गौणार्थकत्वं। स्वविषये जगद्भेदे तर्कस्य प्रतिष्ठितत्वात्तेनाक्षेप इत्याह। तर्कोऽपीति। तर्कादेर्द्वैते प्रामाण्येऽपि ततः समन्वयविरोधे किमायातमिति शङ्कते। किमत इति। पूर्वपक्षी समाधत्ते। अत इति। तर्कादेः प्रामाण्यात् द्वैतबाधकत्वं श्रुतेरयुक्तमित्यद्वैतसमन्वयबाधो युक्त इत्यर्थः। इममर्थं शङ्कापूर्वकं स्पष्टयति, कथमित्यादिना। ननु भोक्तृभोग्ययोर्मिथ एकत्वं केनोक्तमित्याशङ्क्य श्रुतार्थापत्त्येत्याह। तयोस्त्वेति।

आपद्येत, तयोश्चेतरेतरभावापत्तिः परमकारणात् ब्रह्मणोऽनन्यत्वात् प्रसज्येत, न चास्य प्रसिद्धस्य विभागस्य बाधनं युक्तं। यथा त्वद्यत्वे भोक्तृभोग्ययोर्विभागो दृष्टः तथातीतानागतयोरपि कल्पयितव्यः, तस्मात् प्रसिद्धस्यास्य भोक्तृभोग्यविभागस्याभावप्रसङ्गात् अयुक्तमिदं ब्रह्मकारणतावधारणमिति चेत् कश्चिच्चोदयेत् तं प्रति ब्रूयात् स्याल्लोकवदिति, उपपद्यत एवायमस्मत्पक्षेऽपि विभागः, एवं लोके दृष्टत्वात्। तथा हि समुद्रादुदकात्मनोऽनन्यत्वेऽपि तद्विकाराणां फेणवीचीतरङ्गबुद्बुदादीनां इतरेतरविभाग इतरेतरसंश्लेषादिलक्षणश्च व्यवहार उपलभ्यते। न च समुद्रादुदकात्मनोऽनन्यत्वेऽपि तद्विकाराणां फेणतरङ्गादीनां इतरेतरभावापत्तिर्भवति, न चैतेषामितरेतरभावानुपपत्तावपि *समुद्रात्मनोऽनन्यत्वं भवति,

---

तयोरेकब्रह्माभेदश्रवणादेकत्वं कल्प्यते एकस्मादभिन्नयोर्भेदे एकस्यापि भेदापत्तेः ततश्च भेदो बाध्येतेत्यर्थः। इष्टापत्तिं वारयति। न चास्येति। श्रुतेर्गौणार्थत्वेन सावकाशत्वान्निरवकाशदृष्टमानबाधो न युक्त इत्यर्थः। ननु विभागस्याधुनिकत्वादनाद्यद्वैतश्रुत्या बाध इत्यत आह। यथेति। अतीतानागतकालौ भोक्त्रादिविभागाश्रयौ कालत्वाद्वर्तमानकालवदित्यनुमानाद्विभागोऽनाद्यनन्त इत्यर्थः। एवं प्राप्ते परिणामदृष्टान्तेनापाततः सिद्धान्तमाह। स्याल्लोकवदिति। दृष्टान्तेऽपि कथमेकसमुद्राभिन्नानां परिणामानां मिथो भेदः कथं वा तेषां भेदे सत्येकस्मादभिन्नत्वमित्याशङ्क्य न हि दृष्टेऽनुपपत्तिरिति न्यायेनाह। न चेति। एवं भोक्तृभोग्ययोर्मिथो भेदो ब्रह्माभेदश्चेत्याह। एवमिहेति। जीवस्य ब्रह्मविकारत्वाभावात् दृष्टान्तवैष-

---

* समुद्रात्मनोऽन्यत्वमिति सो० का० वर्ध०।

एवमिहापि, न च भोक्तृभोग्ययोरितरेतरभावापत्तिः, न च परस्माद्ब्रह्मणोऽन्यत्वमिति भविष्यति। यद्यपि भोक्ता न ब्रह्मणो विकारः "तत्सृष्ट्वा तदेवानुप्राविशत्" इति स्रष्टुरेवाविकृतस्य कार्य्यानुप्रवेशेन भोक्तृत्वश्रवणात्, तथापि कार्य्यमनुप्रविष्टस्यास्ति कार्य्योपाधिनिमित्तो विभागः आकाशस्येव घटाद्युपाधिनिमित्तः, इत्यतः परमकारणात् ब्रह्मणोऽनन्यत्वेऽप्युपपन्नो भोक्तृभोग्यलक्षणो विभागः समुद्रतरङ्गादिन्यायेनेत्युक्तं॥

तदनन्यत्वमारम्भणशब्दादिभ्यः॥ १४॥

अभ्युपगम्य चेमं व्यावहारिकं भोक्तृभोग्यलक्षणं विभागं स्याल्लोकवदिति परिहारोऽभिहितो न त्वयं विभागः परमार्थतोऽस्ति यस्मात् तयोः कार्य्यकारणयोरनन्यत्वमवगम्यते। कार्य्यमाकाशादिकं बहुप्रपञ्चं जगत्, कारणं परं ब्रह्म, तस्मात् कारणात् परमार्थतोऽनन्यत्वं व्यतिरेकेणाभावः का-

---

स्यमिति शङ्कते। यद्यपीति। औपाधिकं जन्मास्तीति तरङ्गादिसाम्यमाह। तथापीति। विभागो जन्म, यद्वा तथापीतिशब्देनैवोक्तः परिहारः। ननु भोक्तुः प्रतिदेहं विभागः कथमित्यत आह। कार्य्यमनुप्रविष्टस्येति। औपाधिकविभागे फलितमुपसंहरति। इत्यत इति। एकब्रह्माभिन्नत्वेऽपि भोक्त्रादेस्तरङ्गादिवद्भेदाङ्गीकारान्न द्वैतमानेनाद्वैतसमन्वयस्य विरोध इत्यर्थः॥

पूर्वस्मिन्नेव पूर्वपक्षे विवर्त्तवादेन मुख्यं समाधानमाह। तदनन्यत्वमिति। समानविषयत्वं सङ्गतिं वदन्नुभयोः परिहारयोः परिणामविवर्त्ताश्रयत्वेनार्थभेदमाह। अभ्युपगम्येति। प्रत्यक्षादीनामौत्सर्गिकप्रामाण्यमङ्गीकृत्य स्थूलबुद्धिसमाधानार्थं परिणामदृष्टान्तेन भे-

र्थस्यावगम्यते, कुतः आरम्भणशब्दादिभ्यः। आरम्भणशब्दस्ताव-देकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय दृष्टान्तापेक्षायामुच्यते "यथा सोम्यैकेन मृत्पिण्डेन *विज्ञातेन सर्वं मृण्मयं विज्ञातं स्या-द्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं" इति। एत-दुक्तं भवति एकेन मृत्पिण्डेन परमार्थतो मृदात्मना विज्ञातेन सर्वं मृण्मयं घटशरावोदञ्चनादिकं मृदात्मत्वाविशेषाद्विज्ञातं भवेत्, यतो वाचारम्भणं विकारो नामधेयं वाचैव केवलमस्ती-त्यारभ्यते विकारो घटः शराव उदञ्चनश्चेति न तु वस्तु-वृत्तेन विकारो नाम कश्चिदस्ति, नामधेयमात्रं ह्येतदनृतं मृत्तिकेत्येव सत्यमिति। एष ब्रह्मणो दृष्टान्त आम्नातः, तत्र श्रुताद्वाचारम्भणशब्दात् दार्ष्टान्तिकेऽपि ब्रह्मव्यतिरेकेण का-र्यजातस्याभाव इति गम्यते। पुनश्च तेजोऽबन्नानां ब्रह्मकार्य-तामुक्त्वा तेजोऽबन्नकार्याणां तेजोऽबन्नव्यतिरेकेणाभावं ब्रवीति

दाभेदावुक्तौ संप्रत्यङ्गीकृतं प्रामाण्यं तत्त्वावेदकत्वात् प्रच्याव्य व्याव-हारिकत्वे स्थाप्यते, तथा च मिथ्याद्वैतग्राहिप्रमाणैरद्वैतश्रुतेर्न बाधः, एकस्यां रज्ज्वां दण्डस्रगादिद्वैतदर्शनादित्ययं मुख्यः परिहार इति भावः, एवमद्वैतसमन्वयस्याविरोधार्थं द्वैतस्य मिथ्यात्वं साधयति। यस्मात् तयोरिति। स्वरूपैक्ये कार्यकारणत्वव्याघात इत्यत आह। व्यतिरेकेणेति। कारणात् पृथक् सत्त्वशून्यत्वं कार्यस्य साध्यते नैक्य-मित्यर्थः। वागारभ्यं नाममात्रं विकारो न कारणात् पृथक् अस्ती-त्येवकारार्थ इति श्रुतिं योजयति। एतदुक्तमिति। आरम्भण-शब्दार्थान्तरमाह। पुनश्चेति। अपागात् अग्नित्वमपगतं कारणमा-

---

* विज्ञातेनेति वर्धं० का० पु० नास्ति।

"अपागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यं" इत्यादिना। आरम्भणशब्दादिभ्य इत्यादिशब्दात् "ऐतदात्म्यमिदं सर्वं" "तत्सत्यं स आत्मा" "तत्त्वमसि" "इदं सर्वं यदयमात्मा" "ब्रह्मैवेदं सर्वं" "आत्मैवेदं सर्वं" "नेह नानास्ति किञ्चन" इत्येवमाद्यप्यात्मैकत्वप्रतिपादनपरं वचनजातमुदाहर्त्तव्यं। न चान्यथा एकविज्ञानेन सर्वविज्ञानं सम्पद्यते, तस्माद्यथा घटकरकाद्याकाशानां महाकाशादनन्यत्वं, यथा च मृगतृष्णिकोदकादीनामूषरादिभ्योऽनन्यत्वं दृष्टनष्टस्वरूपत्वात् स्वरूपेण त्वनुपाख्यत्वात् एवमस्य *भोग्यभोक्तृत्वादिप्रपञ्चजातस्य ब्रह्मव्यतिरेकेणाभाव इति द्रष्टव्यं। नन्वनेकात्मकं ब्रह्म यथा वृक्षोऽनेकशाखः एवमनेकशक्तिप्रवृत्तियुक्तं ब्रह्म, अत एकत्वं नानात्वञ्चोभयमपि सत्यमेव, यथा वृक्ष इत्येकत्वं शाखा इति च नानात्वं, यथा च समुद्रात्मनैकत्वं फेणतरङ्गाद्यात्मना नानात्वं,

---

सत्यत्वात्, त्रीणि तेजोऽबन्नानां रूपाणि रूपतन्मात्रात्मकानि सत्यं, तेषामपि सन्मात्रत्वात् सदेव शिष्यत इत्यभिप्रायः। जीवजगतोर्ब्रह्मात्मत्वे प्रतिज्ञाबाध इत्याह। न चान्यथेति। तयोरनन्यत्वे क्रमेण दृष्टान्तावाह। तस्माद्यथेति। प्रतिज्ञाबलादित्यर्थः। दृष्टं प्रातीतिकं नष्टमनित्यं यत्स्वरूपं तद्रूपेणानुपाख्यत्वात् सत्तास्फूर्तिशून्यत्वादनन्यत्वमिति सम्बन्धः। शुद्धाद्वैतं स्वमतमुक्त्वा भेदाभेदमतमुत्थापयति। नन्विति। अनेकाभिः शक्तिभिः तदधीनप्रवृत्तिभिः परिणामैर्युक्तमित्यर्थः। भेदाभेदमते सर्वव्यवस्थासिद्धिरत्यन्ताभेदे द्वैतमानबाध इत्यभिमन्यमानो दूषयति। नैवं स्यादिति। एवकारवाचारम्भणशब्दाभ्यां विकारसत्तानिषेधात् परिणामवादः श्रुतिबाह्य

---

* भोग्यभोक्त्रादि इति का० वर्ध० सो०।

यथा च मृदात्मना एकत्वं घटशरावाद्यात्मना नानात्वं, तत्र एकत्वांशेन ज्ञानान्मोक्षव्यवहारः सेत्स्यति, नानात्वांशेन तु कर्मकाण्डाश्रयौ लौकिकवैदिकव्यवहारौ सेत्स्यत इति, एवं च मृदादिदृष्टान्ता अनुरूपा भविष्यन्तीति। नैवं स्यान्मृत्तिकेत्येव सत्यमिति प्रकृतिमात्रस्य दृष्टान्ते सत्यत्वावधारणात्, वाचारम्भणशब्देन च विकारजातस्यानृतत्वाभिधानात्, दार्ष्टान्तिकेऽपि "ऐतदात्म्यमिदं सर्वं" "तत्सत्यं" इति च परमकारणस्यैवैकस्य सत्यत्वावधारणात्, "स आत्मा तत्त्वमसि श्वेतकेतो" इति च शारीरस्य ब्रह्मभावोपदेशात्। स्वयं प्रसिद्धं ह्येतच्छारीरस्य ब्रह्मात्मत्वमुपदिश्यते न यत्नान्तरप्रसाध्यं, अतश्चेदं शास्त्रीयं ब्रह्मात्मत्वमभ्युपगम्यमानं स्वाभाविकस्य शारीरात्मत्वस्य बाधकं सम्पद्यते रज्ज्वादिबुद्धय इव सर्पादिबुद्धीनां। बाधिते च शारीरात्मत्वे तदाश्रयः समस्तः स्वाभाविको व्यवहारो बाधितो भवति,

---

इत्यर्थः। किञ्च संसारस्य सत्यत्वे तद्विशिष्टस्य जीवस्य ब्रह्मैक्योपदेशो न स्याद्विरोधादित्याह। स आत्मेति। एकत्वं ज्ञानकर्मसमुच्चयसाध्यमित्युपदेशार्थमित्याशङ्क्यासीतिपदविरोधान्नैवमित्याह। स्वयमिति। अतस्तत्त्वज्ञानबाध्यत्वात् संसारित्वं मिथ्येत्याह। अतश्चेति, स्वतः सिद्धोपदेशादित्यर्थः। यदुक्तं व्यवहारार्थं नानात्वं सत्यमिति, तत् किं ज्ञानादूर्द्ध्वं व्यवहारार्थं प्राग्वा नाद्य इत्याह। बाधिते चेति। स्वभावोऽनाविद्या तया कृतः स्वाभाविकः, ज्ञानादूर्द्ध्वं प्रमातृत्वादिव्यवहारस्याभावान्नानात्वं न कल्प्यमित्यर्थः। न द्वितीयः ज्ञानात् प्राक् कल्पितनानात्वेन व्यवहारोपपत्तौ नानात्वस्य सत्यत्वासिद्धेः। यत्तु प्रमातृत्वादिव्यवहारः सत्य एव मोक्षावस्थायां निवर्त

त्वप्रसिद्धये नानात्वांशोऽपरो ब्रह्मणः कल्प्येत। दर्शयति च "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्" इत्यादिना ब्रह्मात्मत्वदर्शिनं प्रति समस्तस्य क्रियाकारकफललक्षणस्य व्यवहारस्याभावं। न चायं व्यवहाराभावोऽवस्थाविशेषनिबद्धोऽभिधीयत इति युक्तं वक्तुं, तत्त्वमसीति ब्रह्मात्मभावस्यानवस्थाविशेषनिबन्धनत्वात्। तस्करदृष्टान्तेन चानृताभिसन्धस्य बन्धनं सत्याभिसन्धस्य मोक्षं दर्शयन्नेकत्वमेवैकं पारमार्थिकं दर्शयति, मिथ्याज्ञानविजृम्भितञ्च नानात्वं। उभयसत्यतायां हि कथं व्यवहारगोचरोऽपि जन्तुरनृताभिसन्ध इत्युच्यते, "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" इति च भेददृष्टिमपवदन्नेतदेव दर्शयति। न चास्मिन् दर्शने ज्ञानान्मोक्ष इत्युपपद्यते। सम्यग्ज्ञानापनोद्यस्य कस्यचिन्मिथ्याज्ञानस्य संसारकारणत्वेनानभ्युपगमात्। उभयस्य सत्यतायां हि कथमेकत्वज्ञानेन नानात्वज्ञानमपनुद्यत इत्युच्यते। नन्वेकत्वैकान्ताभ्युपगमे नानात्वा-

---

इति तन्नेत्याह। न चायमिति। संसारसत्यत्वे तदवस्थायां जीवस्य ब्रह्मत्वं न स्यात्, भेदाभेदयोरेकदैकत्र विरोधादतोऽसंसारिब्रह्माभेदस्य सदातनत्वावगमात् संसारोऽपि मिथ्यैवेत्यर्थः। किञ्च यथा लोके कश्चित् तस्करबुद्ध्या भटैर्गृहीतोऽनृतवादी चेत्तप्तपरशुं गृह्णाति स दह्यते बध्यते च, तथा नानात्ववादी दह्यते, सत्यवादी चेन्न दह्यते मुच्यते च। तथैतदात्म्यमिदं सर्वमित्येकत्वदर्शी मुच्यत इति श्रुतदृष्टान्तेनैकत्वं सत्य नानात्वं मिथ्येत्याह। तस्करेति। व्यवहारगोचरो नानात्वव्यवहाराश्रयः। नानात्वनिन्दयाप्येकत्वमेव सत्यमित्याह। मृत्योरिति। किञ्चास्मिन् भेदाभेदमते जीवस्य ब्रह्माभेदज्ञानाद्भेदज्ञान-

भावात् प्रत्यक्षादीनि लौकिकानि प्रमाणानि व्याहन्येरन्, निर्विषयत्वात् स्थाण्वादिष्विव पुरुषादिज्ञानानि। तथा विधिप्रतिषेधशास्त्रमपि भेदापेक्षत्वात् तदभावे व्याहन्येत। मोक्षशास्त्रस्यापि शिष्यशासित्रादिभेदापेक्षत्वात् तदभावे व्याघात स्यात्, कथं चानृतेन मोक्षशास्त्रेण प्रतिपादितस्यात्मैकत्वस्य सत्यत्वमुपपद्येत इति, अत्रोच्यते, नैष दोषः सर्वव्यवहाराणामेव प्राग्ब्रह्मात्मताविज्ञानात् सत्यत्वोपपत्तेः, स्वप्नव्यवहारस्येव प्राक् बोधात्। यावद्धि न सत्यात्मैकत्वप्रतिपत्तिस्तावत् प्रमाणप्रमेयफललक्षणेषु *व्यवहारेष्वनृतबुद्धिर्न कस्यचिदुत्पद्यते, विकारानेव त्वहं ममेत्यविद्यया आत्मात्मीयभावेन सर्वो जन्तुः प्रतिपद्यते स्वाभाविकीं ब्रह्मात्मतां हित्वा, तस्मात् प्राग् ब्रह्मात्मताप्रबोधादुपपन्नः सर्वो लौकिको वैदिकश्च व्यवहारः

निवृत्तिर्मुक्तिरिष्टा सा न युक्ता भेदज्ञानस्य भ्रमत्वानभ्युपगमात्। प्रमाया प्रमान्तराबाध्यत्वादित्याह। न चास्मिन्निति। वैपरीत्यस्यापि सम्भवादिति भावः। इदानीं प्रत्यक्षादिप्रामाण्यान्यथानुपपत्त्या नानात्वस्य सत्यत्वमिति पूर्वपक्षबीजमुद्घाटयति। नन्वित्यादिना। एकत्वस्यैकान्तः कैवल्यं व्याहन्येरन्नप्रमाणानि स्युः। उपजीव्यप्रत्यक्षादिप्रामाण्याय वेदान्तानां भेदपरत्वमुचितमिति भावः। ननु कर्मकारकाणां यजमानादीनां विद्याकारकाणां शिष्यादीनाञ्च कल्पितभेदमाश्रित्य कर्मज्ञानकाण्डयोः प्रवृत्तेः स्वप्रमेयस्य धर्मादेरबाधात् प्रामाण्यमव्याहतमित्याशङ्क्याह। कथञ्चानृतेनेति। धूलिकल्पितधूमेनानुमितस्य वह्नेरिव प्रमेयबाधापत्तेरिति भावः। तत्र द्वैतविषये प्रत्यक्षादीनां

---

* विकारेष्विति सो० वर्ध०।

यथा सुप्तस्य प्राकृतस्य जनस्य स्वप्ने उच्चावचान् भावान् पश्य-
तो निश्चितमेव प्रत्यक्षाभिमतं विज्ञानं भवति प्राक् प्रबोधात्,
न च प्रत्यक्षाभासाभिप्रायस्तत्काले भवति तद्वत्। कथं
असत्येन वेदान्तवाक्येन सत्यस्य ब्रह्मात्मत्वस्य प्रतिपत्तिरुपप-
द्येत, न हि रज्जुसर्पेण दष्टो म्रियते, नापि मृगतृष्णिकाम्भ-
सा पानावगाहनादिप्रयोजनं क्रियत इति। नैष दोषः, श-
ङ्काविषादिनिमित्तमरणादिकार्योपलब्धेः। स्वप्नदर्शनावस्थस्य
च सर्पदंशनोदकस्नानादिकार्यदर्शनात्। तत्कार्यमप्यनृतमे-
वेति चेत् ब्रूयात् तत्र ब्रूमः। यद्यपि स्वप्नदर्शनावस्थस्य
सर्पदंशनोदकस्नानादिकार्यमनृतं तथापि तदवगतिः सत्य-
मेव फलं प्रतिबुद्धस्याप्यबाध्यमानत्वात्। न हि स्वप्नादु-
त्थितः स्वप्नदृष्टं सर्पदंशनोदकस्नानादिकार्यं मिथ्येति मन्य-

वद्बाधं व्यावहारिकं प्रामाण्यमुपपद्यत इत्याह। अत्रोच्यत इत्या-
दिना। सत्यत्वं बाधाभावः बाधो मिथ्यात्वनिश्चयः वस्तुतो मिथ्यात्वेऽपि
विकारेषु तन्निश्चयाभावेन प्रत्यक्षादिव्यवहारोपपत्तावुक्तदृष्टान्तं वि-
वृणोति। यथा सुषुप्तस्य प्राकृतस्येति। एवं द्वैतप्रमाणानां व्यवहार-
काले बाधशून्यार्थबोधकत्वं व्यावहारिकं प्रामाण्यमुपपाद्याद्वैतप्रमा-
णानां वेदान्तानां सर्वकालेषु बाधशून्यब्रह्मबोधकत्वं तात्त्विकं प्रामा-
ण्यमुपपादयितुं उक्तशङ्कामनुवदति। कथन्त्वसत्येनेति। किमसत्यात्
सत्यं न जायते किमुत सत्यस्य ज्ञानं नाद्य इष्ट एव, न हि वयं
वाक्योत्थज्ञानं सत्यमित्यङ्गीकुर्मः। अङ्गीकृत्यापि दृष्टान्तमाह। नैष
दोष इति। सर्पेण दष्टस्यापि दष्टत्वभ्रान्तिकल्पितविषात् सत्यमरण-
मूर्च्छादिदर्शनादसत्यात् सत्यं न जायत इत्यनियम इत्यर्थः। दृष्टा-
न्तान्तरमाह। स्वप्नेति। असत्यात् सर्पोदकादेः सत्यस्य दंशनस्ना-

मानस्तदवगतिमपि मिथ्येति मन्यते कश्चित् । एतेन स्वप्नदृशोऽवगत्यबाधनेन देहमात्रात्मवादो दूषितो वेदितव्यः । तथा च श्रुतिः-

"यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति ।

समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने"॥ इति-

असत्येन स्वप्नदर्शनेन सत्यस्य फलस्य समृद्धेः प्राप्तिं दर्शयति । तथा प्रत्यक्षदर्शनेषु केषुचिदरिष्टेषु जातेषु न चिरमिव जीविष्यतीति विद्यादित्युक्त्वा अथ यः स्वप्ने पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्तीत्यादिना तेनासत्येनैव स्वप्नदर्शनेन

नादिज्ञानस्य कार्यस्य दर्शनाद्व्यभिचार इत्यर्थः । यथाश्रुतमादाय शङ्कते । तत्कार्यमपीति । उक्तमर्थं प्रकटयति । अत्र ब्रूम इत्यादिना । अवगतिर्वृत्तिः घटादिवत् सत्यापि प्रातिभासिकस्वप्नदृष्टवस्तुनः फलं चैतन्यं वा वृत्त्यभिव्यक्तमवगतिशब्दार्थः । प्रसङ्गाद्देहात्मवादोऽपि निरस्त इत्याह । एतेनेति । स्वप्नस्थावगतेः स्वप्नदेहधर्मत्वे उत्थितस्य मया तादृशः स्वप्नोऽवगत इत्यबाधितावगतिप्रतिसन्धानं न स्यात्, अतो देहभेदेऽपि अनुसन्धानदर्शनाद्देहादन्योऽनुसन्धातेत्यर्थः । असत्यात् सत्यस्य ज्ञानं न जायत इति द्वितीयनियमस्य श्रुत्या व्यभिचारमाह । तथा च श्रुतिरिति । न च स्त्रियो मिथ्यात्वेऽपि तद्दर्शनात् सत्यादेव सत्यायाः समृद्धेर्ज्ञानमिति वाच्यं, विषयविशिष्टत्वेन दर्शनस्यापि मिथ्यात्वात् प्रकृतेऽपि सत्ये ब्रह्मणि मिथ्यावेदानुगतचैतन्यज्ञानसम्भवाच्चेति भावः । असत्यात् सत्यस्येष्टस्य ज्ञानमुक्त्वानिष्टस्य ज्ञानमाह । तथेति । असत्यात् सत्यस्य ज्ञाने दृष्टान्तान्तरमाह । तथाऽकारादिति । रेखास्वकारत्वादिभ्रान्त्या सत्या अकारादयो ज्ञायन्त इति प्रसिद्धमित्यर्थः । एवमसत्यात् सत्यस्य जन्मोक्त्वा यदर्थक्रियाकारि तत्सत्यमिति नियमो भग्नः अनृतात् सत्यस्य ज्ञानोत्पत्त्या यद

सत्यं मरणं सूच्यत इति दर्शयति। प्रसिद्धं चेदं लोकेऽन्वयव्यतिरेककुशलानां ईदृशेन स्वप्नदर्शनेन साध्वागमः सूच्यते ईदृशेनासाध्वागम इति। तथाऽकारादिसत्याक्षरप्रतिपत्तिर्दृष्टा रेखानृताक्षरप्रतिपत्तेः। अपि चान्त्यमिदं प्रमाणमात्मैकत्वस्य प्रतिपादकं नातः परं किञ्चिदाकाङ्क्ष्यमस्ति। यथा हि लोके यजेतेत्युक्ते किं केन कथं इत्याकाङ्क्ष्यते न चैवं तत्त्वमसीत्युक्ते किञ्चिदन्यदाकांक्ष्यमस्ति, सर्वात्मैकत्वविषयत्वादवगतेः। सति ह्यन्यस्मिन्नवशिष्यमाणेऽर्थे आकाङ्क्षा स्यात् न त्वात्मैकत्वव्यतिरेकेणावशिष्यमाणोऽन्योऽर्थोऽस्ति य आकांक्ष्येत। न चेयमवगतिर्नोत्पद्यत इति शक्यं वक्तुं, "तद्धास्य विजज्ञौ" इत्यादिश्रुतिभ्यः, अवगतिसाधनानां च श्रवणादीनां वेदानुवचनादीनाञ्च विधीयमानत्वात्। न चेयमवगतिरनर्थिका भ्रान्तिर्वेति शक्यं वक्तुं,

---

सत्करणगम्यन्तद्बाध्यं कूटलिङ्गानुमितवह्निवदिति व्याप्तिर्भग्ना। तथा च कल्पितानामपि वेदान्तानां सत्यब्रह्मबोधकत्वं सम्भवतीति तात्त्विकं प्रामाण्यमिति भावः। यदुक्तं एकत्वनानात्वव्यवहारसिद्धये उभयं सत्यमिति, तन्न भेदस्य लोकसिद्धस्यापूर्वफलवदभेदविरोधेन सत्यत्वकल्पनायोगात्। किञ्च यद्युभयोरेकदा व्यवहारः स्यात् तदा स्यादपि सत्यत्वं। नैवमस्ति एकत्वज्ञानेन चरमेणानपेक्षेण नानात्वस्य निःशेषं बाधात् शुक्तिज्ञानेनैव रजतस्येत्याह। अपि चान्त्यमिति। ननूपजीव्यद्वैतप्रमाणविरोधादेकत्वावगतिर्नोत्पद्यत इत्यत आह। न चेयमिति। तत् किलात्मतत्त्वमस्य पितुर्वाक्यात् श्वेतकेतुर्विज्ञातवान् इति ज्ञानोत्पत्तेः श्रुतत्वात् सामग्रीसत्त्वाच्चेत्यर्थः। व्यावहारिकगुरुशिष्यादिभेदमुपजीव्य जायमानवाक्यार्थावगतेः प्रत्यक्षादिगतं व्याव-

अविद्यानिवृत्तिफलदर्शनात्, बाधकज्ञानान्तराभावाच्च। प्राक् चात्मैकत्वावगतेरव्याहतः सर्वः *सत्यानृतव्यवहारो लौकिको वैदिकश्चेत्यवोचाम। तस्मादनन्येन प्रमाणेन प्रतिपादिते आत्मैकत्वे समस्तस्य प्राचीनभेदव्यवहारस्य बाधितत्वान्नानेकात्मकब्रह्मकल्पनावकाशोऽस्ति। ननु मृदादिदृष्टान्तप्रणयनात् परिणामवत् ब्रह्मशास्त्रस्याभिमतमिति गम्यते, परिणामिनो हि मृदादयोऽर्था लोके समधिगता इति। नेत्युच्यते, "स वा एष महानजः" "आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म" "स एष नेति नेत्यात्मा" "अस्थूलमनणु" इत्याद्याभ्यः सर्वविक्रियाप्रतिषेधश्रुतिभ्यो ब्रह्मणः कूटस्थत्वावगमात्। न ह्येकस्य ब्रह्मणः परिणामधर्मत्वं तद्रहितत्वञ्च शक्यं प्रतिपत्तुं। स्थितिगतिवत्

हारिकप्रामाण्यमुपजीव्यं तच्च पारमार्थिकैकत्वावगत्या न विरुध्यते। किन्तु तया विरोधादनुपजीव्यं प्रत्यक्षादेस्तात्त्विकं प्रामाण्यं बाध्यत-इति भावः। किञ्चैकत्वावगतेः फलवत्प्रमात्वान्निष्फलो द्वैतभ्रमो बाध्य इत्याह। न चेयमिति। ननु सर्वस्य द्वैतस्य मिथ्यात्वे स्वप्नो मिथ्या जाग्रत् सत्यमित्यादिलौकिको व्यवहारः सत्यश्चानृतञ्च सत्यमभवदिति वैदिकश्च कथमित्याशङ्क्य यथा स्वप्ने इदं सत्यमिदमनृतमिति तात्कालिकबाधाबाधाभ्यां व्यवहारस्तथा दीर्घस्वप्नेऽपीत्युक्तस्वप्नदृष्टान्तं स्मारयति। प्राक् चेति। व्यवहारार्थं नानात्वं सत्यमिति कल्पनमसङ्गतमित्युपसंहरति। तस्मादिति। नेदं कल्पितं किन्तु श्रुतमिति शङ्कते। नन्विति। कार्यकारणयोरनन्यत्वांशे अयं दृष्टान्तो न परिणामित्वे ब्रह्मणः कूटस्थत्वश्रुतिविरोधादिति परिहरति। नेत्युच्यत इति। स्रष्टौ परिणामित्वं प्रलये तद्राहित्यञ्च क्रमेणाविरुद्धमिति दृष्टान्तेन शङ्कते।

---

* सत्यानृतव्याहार इति का०।

स्यादिति चेन्न, कूटस्थस्येति विशेषणात्। न हि कूटस्थस्य ब्रह्मणः स्थितिगतिवदनेकधर्माश्रयत्वं सम्भवति। कूटस्थं नित्यञ्च ब्रह्म सर्वविक्रियाप्रतिषेधादित्यवोचाम। न च यथा ब्रह्मण आत्मैकत्वदर्शनं मोक्षसाधनं, एवं जगदाकारपरिणामित्वदर्शनमपि स्वतन्त्रमेव कस्मैचित् फलायाभिप्रेयेत, प्रमाणाभावात्। *कूटस्थब्रह्मात्मत्वविज्ञानादेव हि फलं दर्शयति शास्त्रं, "स एष नेति नेत्यात्मा" इत्युपक्रम्य "अभयं वै जनक प्राप्तोऽसि" इत्येवंजातीयकं। तत्रैतत्सिद्धं भवति ब्रह्मप्रकरणे सर्वधर्मविशेषरहितब्रह्मदर्शनादेव फलसिद्धौ सत्यां यत्राफलं श्रूयते ब्रह्मणो जगदाकारपरिणामित्वादि तद्ब्रह्मदर्शनोपायत्वेनैव विनियुज्यते, फलवत् सन्निधावफलं तदङ्गमितिवत्, न तु स्वतन्त्रफलाय कल्प्यते इति। न हि परिणामवत्त्वविज्ञानात् परिणामवत्त्वमात्मनः फलं स्यादिति वक्तुं युक्तं,

---

स्यतीति। कूटस्थस्य कदाचिदपि विक्रिया न युक्ता कूटस्थत्वव्याघातादित्याह। नेति। कूटस्थत्वासिद्धिमाशङ्क्याह। कूटस्थस्येति। कूटस्थस्य निरवयवस्य पूर्वरूपत्यागेनावस्थान्तरात्मकपरिणामायोगात् शुक्तिरजतवद्विवर्त एव प्रपञ्च इति भावः। किञ्च निष्फलस्य जगतः फलवन्निष्प्रपञ्चब्रह्मधीशेषत्वेनानुवादान्न सत्यतेत्याह। न च यथेत्यादिना। तं यथा यथोपासते तदेव भवतीति श्रुतेः ब्रह्मणः परिणामित्वविज्ञानात् तत्प्राप्तिर्विदुषः फलमित्याशङ्क्याह। न हि परिणामवत्त्वेति। ब्रह्मविदाप्नोति परमिति श्रुतकूटस्थनित्यमोक्षफलसम्भवे त्वानित्यपरिणामित्वफलकल्पनायोगादिति भावः। ननु पूर्वं जन्मा-

---

* कूटस्थब्रह्मात्मैकत्वज्ञानादिति का०। कूटस्थब्रह्मात्मज्ञानादिति वर्ध०।

कूटस्थनित्यत्वान्मोक्षस्य। ननु कूटस्थब्रह्मात्मवादिन एकत्वैकान्त्याद् ईशित्रीशितव्याभावे ईश्वरकारणप्रतिज्ञाविरोध इति चेत्, न, अविद्यात्मकनामरूपबीजव्याकरणापेक्षत्वात् सर्वज्ञत्वस्य "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः" इत्यादिवाक्येभ्यो नित्यशुद्धबुद्धमुक्तस्वरूपात् सर्वज्ञात् सर्वशक्तेरीश्वराज्जगदुत्पत्तिस्थितिलयाः, नाचेतनात् प्रधानादन्यस्माद्वेत्येषोऽर्थः प्रतिज्ञातो जन्माद्यस्य यत इति। सा प्रतिज्ञा तदवस्थैव न तद्विरुद्धोऽर्थः पुनरिहोच्यते, कथं नोच्येत अत्यन्तमात्मन एकत्वमद्वितीयत्वञ्च ब्रुवता। शृणु यथा नोच्यते सर्वज्ञस्येश्वरस्य आत्मभूते इवाविद्याकल्पिते नामरूपे तत्त्वान्यत्वाभ्यामनिर्वचनीये संसारप्रपञ्चबीजभूते सर्वज्ञस्येश्वरस्य मायाशक्तिः प्रकृतिरिति च श्रुतिस्मृत्योरभिलप्येते, ताभ्यामन्यः सर्वज्ञ ईश्वरः, "आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म" इति श्रुतेः। "नामरूपे व्याकरवाणि", "सर्वाणि रूपाणि विचित्य धीरो नामानि

द्यस्य यत इति ईश्वरकारणप्रतिज्ञा कृता अधुना तदनन्यत्वमित्यन्ताभेदप्रतिपादने ईशित्रीशितव्यभेदाभावात् तद्विरोधः स्यादिति शङ्कते। कूटस्थेति। कल्पितद्वैतमपेक्ष्येश्वरत्वादिकं परमार्थतोऽनन्यत्वमित्यविरोधमाह। नेत्यादिना। अविद्यात्मके चिदात्मनि लीने नामरूपे एव बीजं तस्य व्याकरणं स्थूलात्मना सृष्टिस्तदपेक्षत्वादीश्वरत्वादेर्न विरोध इत्यर्थः। संगृहीतार्थं विवृणोति। तस्मादित्यादिना। तत्त्वान्यत्वाभ्यामिति नामरूपयोरीश्वरत्वं वक्तुमशक्यं जडत्वात्तथापीश्वरादन्यत्वं कल्पितस्य पृथक् सत्तास्फुर्त्योरभावादित्यर्थः। सं

त्वाभिवदन् यदास्ते। एकं बीजं बहुधा यः करोति" इत्यादि-
श्रुतिभ्यश्च। एवमविद्याकृतनामरूपोपाध्यनुरोधीश्वरो भवति।
योमेव घटकरकाद्युपाध्यनुरोधि, स च स्वात्मभूतानेव घ-
टाकाशस्थानीयानविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणस-
ातानुरोधिनो जीवाख्यान् विज्ञानात्मनः प्रतीष्टे व्यवहार-
विषये। तदेवमविद्यात्मकोपाधिपरिच्छेदापेक्ष्यमेवेश्वरस्येश्वरत्वं
र्वज्ञत्वं सर्वशक्तित्वञ्च न परमार्थतो विद्ययापास्तसर्वोपाधिस्व-
रूपे आत्मनीशित्रीशितव्यसर्वज्ञत्वादिव्यवहार उपपद्यते। तथा
चोक्तं। "यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति
स भूमा" इति, "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्"
इत्यादि च। एवं परमार्थावस्थायां सर्वव्यवहाराभावं वदन्ति
वेदान्ताः, तथेश्वरगीतास्वपि-

"न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते॥
नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः"॥ इति-

ारात्मकनामरूपयोरविद्यैक्यविवक्षया ब्रूते। मायेति। नामरूपे चे-
श्वरस्यात्मभूते तर्हीश्वरो जड इत्यत आह। ताभ्यामन्य इति। स्वन्य-
 व्याकरणे च श्रुतिमाह। आकाश इत्यादिना। अविद्याद्युपाधिना
ल्पितभेदेन विम्बस्थानस्येश्वरत्वं प्रतिविम्बभूतानां जीवनां नियम्य-
मित्याह। स च स्वात्मभूतानिति। न चात्र नानाजीवा भाष्योक्ता
ति भ्रमितव्यं बुद्ध्यादिसङ्घातभेदेन भेदोक्तेः, अविद्याप्रतिविम्बस्यैक
व जीव इत्युक्तं। परमार्थत ईश्वरत्वादिद्वैताभावे श्रुतिमाह। तथा

परमार्थावस्थायामीशित्रीशितव्यादिव्यवहाराभावः प्रदर्श्यते। व्यवहारावस्थायान्तूक्तः श्रुतावपीश्वरादिव्यवहारः। "एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसम्भेदाय" इति। तथा चेश्वरगीतास्वपि-

"ईश्वरः सर्वभूतानां हृद्देशेऽर्ज्जुन तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया"॥ इति।

सूत्रकारोऽपि परमार्थाभिप्रायेण तदनन्यत्वमित्याह। व्यवहाराभिप्रायेण तु स्याल्लोकवदिति महासमुद्रादिस्थानीयतां ब्रह्मणः कथयति। अप्रत्याख्यायैव कार्यप्रपञ्चं परिणामप्रक्रियाञ्चाश्रयति सगुणोपासनेषूपयुज्यत इति॥

भावे चोपलब्धेः॥ १५॥

इतश्च कारणादनन्यत्वं कार्यस्य, यत्कारणं भाव एव कारणस्य कार्यमुपलभ्यते नाभावे। तद्यथा सत्यां मृदि घट

चेति। कथं तर्हि कर्तृत्वादिकमित्यत आह। स्वभावस्त्विति। अनाद्यविद्यैव कर्तृत्वादिरूपेण प्रवर्तत इत्यर्थः। भक्ताभक्तयोः पापसुकृतनाशकत्वादीश्वरस्य वास्तवमीश्वरत्वमित्यत आह। नादत्त इति न संहरतीत्यर्थः। तेन स्वरूपज्ञानावरणेन कर्ताहमीश्वरो नियन्तेत्येवं भ्रमन्ति। उक्तार्थः सूत्रकारसम्मत इत्याह। सूत्रकारोऽपीति। न केवलं लौकिकव्यवहारार्थं परिणामप्रक्रियाश्रयणं किन्तूपासनार्थञ्चेत्याह। परिणामप्रक्रियाञ्चेति। तदुक्तं "उपगणाधीः परिणाममुदीक्षते त्यजितकल्मषधीस्तु विवर्ततां" इति॥

एवं तदनन्यत्वे प्रत्यक्षादिविरोधं परिहृत्यानुमानमाह। भावे चेति। कारणस्य भावे सत्त्वे उपलब्धौ च कार्यस्य सत्त्वादुपलब्धेश्चानन्यत्वमिति

उपलभ्यते *नाभावे सत्सु च तन्तुषु पटः। न च नियमेनान्यभावेऽन्यस्योपलब्धिर्दृष्टा, न ह्यश्वो गोरन्यः सन् गोर्भाव एवोपलभ्यते। न च कुलालभाव एव घट उपलभ्यते सत्यपि निमित्तनैमित्तिकभावेऽन्यत्वात्। नन्वन्यभावेऽपि अन्यस्योपलब्धिर्नियता दृश्यते, यथाऽग्निभावे एव धूमस्येति। नेत्युच्यते, †उद्घापितेऽप्यग्नौ गोपालघटिकादिधारितस्य धूमस्य दृश्यमानत्वात्। अथ ‡धूमं कयाचिदवस्थया विशिंष्यात् ईदृशो धूमो नासत्यग्नौ भवतीति, नैवमपि कश्चिद्दोषः, तद्भावानुरक्तां हि

सूत्रार्थः। घटो मृदनन्यः मृत्सत्त्वोपलब्धित्वानियतसत्त्वोपलब्धिमत्त्वात मृद्वत्। अन्यत्वेऽप्ययं हेतुः किं न स्यादित्यप्रयोजकत्वमाशङ्क्य निरस्यति। न चेति। मृद्घटयोरन्यत्वे गवाश्वयोरिव हेतूच्छित्तिः स्यादित्यर्थः। गवाश्वयोर्निमित्तनैमित्तिकत्वाभावाद्धेत्वभावः। अतो मृद्घटयोस्तेन हेतुना निमित्तादिभावः सिध्यति नानन्यत्वमित्यर्थान्तरतामाशङ्क्याह। न च कुलालेति। न चोपादानोपादेयभावेनार्थान्तरता मृद्दृष्टान्ते तद्भावाभावेऽपि हेतुसत्त्वादन्यत्वे गवाश्ववत् तद्भावायोगाच्चेति भावः। कुलालघटयोर्निमित्तादिभावे सत्यप्यन्यत्वात् कुलालसत्यनियतोपलब्धिर्घटस्य नैवेत्यक्षरार्थः। यथाश्रुतसूत्रस्थहेतोर्व्यभिचारं शङ्कते। नन्विति। अग्निभाव एव धूमोपलब्धिरिति नियमात्मको हेतुस्तत्र नास्तीत्याह। नेति। अविच्छिन्नमूलदीर्घरेखावस्थधूमे नियमोऽस्तीति व्यभिचार इत्याशङ्कते। अथेति। तद्भावनियतभावत्वे सति तद्बुद्ध्यनुरक्तबुद्धिविषयत्वस्य हेतोर्विवक्षितत्वान्न व्यभिचार इत्याह। नैवमिति। आलोकबुद्ध्यनुरक्तबुद्धिग्राह्ये रूपे व्यभिचारनिरासाय सत्यन्तं आलोकाभावेऽपि घटादिरूपसत्त्वान्न व्यभिचार उक्तः धूमविशेषस्याग्निबुद्धिं विनाप्युपलम्भात् न

---

* नाभावे इति वर्ध० का० पु० नास्ति। † उद्घापिते इति वर्ध० का०।
‡ धूमः कयाचिदवस्थया विशेष्यते इति सो०।

बुद्धिं कार्यकारणयोरनन्यत्वे हेतुं वयं वदामः, न चासावग्नि-धूमयोर्विद्यते ॥ भावाच्चोपलब्धेरिति वा सूत्रं ॥ न केवलं शब्दादेव कार्यकारणयोरनन्यत्वं, प्रत्यक्षोपलब्धेर्भावाच्च तयोरनन्यत्वमित्यर्थः। भवति हि प्रत्यक्षोपलब्धिः कार्यकारणयोरनन्यत्वे। तद्यथा तन्तुसंस्थाने तन्तुव्यतिरेकेण पटो नाम कार्यं नैवोपलभ्यते, केवलास्तु तन्तव आतानवितानवन्तः प्रत्यक्षमुपलभ्यन्ते, तथा तन्तुष्वंशवोऽंशुषु तदवयवाः, अनया प्रत्यक्षोपलब्ध्या लोहितशुक्लकृष्णानि त्रीणि रूपाणि ततो वायुमात्रमाकाशमात्रं चेति अनुमेयं, ततः परं ब्रह्मैकमेवाद्वितीयं तत्र सर्वप्रमाणानां निष्ठामवोचाम ॥

व्यभिचार इत्यर्थः। तथा च तयोः कार्यकारणयोर्भावेन सत्तयानुरक्तां सद्रूपतामिति भाष्यार्थः। यद्वा तद्भावः सामानाधिकरण्यं तद्विषयकबुद्धिग्राह्यत्वं हेतुं वदामः। मृद्घट इति सामानाधिकरण्यबुद्धिदर्शनादग्निर्धूम इत्यदर्शनादित्यर्थः। अनुमानार्थत्वेन सूत्रं व्याख्याय पाठान्तरेण प्रत्यक्षपरतया व्याचष्टे। भावाच्चेति। पूर्वसूत्रोक्तारम्भणशब्दसमुच्चयार्थश्चकारः। न चैकः पट इति प्रत्यक्षं पटस्य तन्तुभ्यः पृथक्सत्त्वे प्रमाणं अपृथक्सत्ताकमिथ्याकार्यविषयत्वेनाप्युपपत्तेः। अतः आतानवितानसंयोगवन्तस्तन्तव एव पट इति प्रत्यक्षोपलब्धेः सत्त्वादनन्यत्वमित्यर्थः। पटन्यायं तन्त्वादावतिदिशति तथेत्यादिना। प्रत्यक्षोपलब्ध्या तत्तत्कार्यं कारणमात्रं परिशिष्यत इत्यर्थः। यत्र प्रत्यक्षं नास्ति तत्र कार्यं विमतं कारणादभिन्नं कार्यत्वात् पटवदित्यनुमेयमित्याह। अनयेति। कारणपरिशेषे प्रधानादिकं परिशिष्यतां न ब्रह्मेत्यत आह। तत्र सर्वेति। ब्रह्मणि वेदान्तानां सर्वेषां तात्पर्यस्योक्तत्वात् तदेवाद्वितीयं परिशिष्यते न कारणान्तरं अप्रामाणिकत्वादिति भावः ॥

सत्त्वाच्चावरस्य ॥ १६ ॥

इतश्च कारणात् कार्यस्यानन्यत्वं यत्कारणं प्रागुत्पत्तेः कारणात्मनैव कारणे सत्त्वमवरकालीनस्य कार्यस्य श्रूयते, "सदेव सोम्येदमग्र आसीत्" "आत्मा वा इदमेक एवाग्र आसीत्" इत्यादाविदंशब्दगृहीतस्य कार्यस्य कारणेन सामानाधिकरण्यात्। यच्च यदात्मना यत्र न वर्तते *न तत्तत्रोत्पद्यते, यथा सिकताभ्यस्तैलं, तस्मात् प्रागुत्पत्तेरनन्यत्वादुत्पन्नमप्यनन्यदेव कारणात् कार्यमित्यवगम्यते। यथा च कारणं ब्रह्म त्रिषु कालेषु सत्त्वं न व्यभिचरति, एवं कार्यमपि जगत् त्रिषु कालेषु सत्त्वं न व्यभिचरति, एकञ्च पुनः सत्त्वं अतोऽप्यनन्यत्वं कारणात् कार्यस्य ॥

असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् ॥ १७ ॥

ननु क्वचिदसत्त्वमपि प्रागुत्पत्तेः कार्यस्य व्यपदिशति श्रुतिः, "असदेवेदमग्र आसीत्" इति "असद्वा इदमग्र आसीत्" इति

इदं जगत् सदात्मैवेति सामानाधिकरण्यश्रुत्या सृष्टेः प्राक् कार्यस्य कारणात्मना सत्त्वं श्रुतं तदन्यथानुपपत्त्योत्पन्नस्यापि जगतः कारणादनन्यत्वं इत्याह सूत्रकारः। सत्त्वाच्चेति। श्रुत्यर्थे युक्तिमप्याह। च्च यदात्मनेति। घटादिकं प्राक् मृदाद्यात्मना वर्तते तत उत्पद्यमानत्वात् सामान्यतो व्यतिरेकेण सिकताभ्यस्तैलवदित्यर्थः। कारणात् कार्यस्यापि सत्त्वात् सत्त्वभेदे मानाभावात् कार्यस्य कारणादभिन्नसत्त्वाकत्वमिति सूत्रस्यार्थान्तरमाह। यथा चेति। इदानीं तः कार्यस्य प्रागुत्तरकालयोरसत्त्वायोगात् सत्त्वाव्यभिचारस्तच्च सत्त्वं र्वानुस्यूतचिन्मात्रमेकं तदभेदेन सती मृत्सन् घट इति भासमानयोः ार्यकारणयोरनन्यत्वमित्यर्थः ॥

न चैवं घटपटयोरप्येकसत्त्वाभेदादनन्यत्वं स्यादिति वाच्यं, वस्तुत

---

* न तत्तत उत्पद्यते इति नर्ष० सो०।

च। तस्मादसद्व्यपदेशान्न प्रागुत्पत्तेः कार्यस्य सत्त्वमिति चेत्, नेति ब्रूमः। न ह्ययमत्यन्तासत्त्वाभिप्रायेण प्रागुत्पत्तेः कार्यस्यासद्व्यपदेशः किं तर्हि व्याकृतनामरूपत्वाद्धर्माद्व्याकृतनामरूपत्वं धर्मान्तरं, तेन धर्मान्तरेणायमसद्व्यपदेशः प्रागुत्पत्तेः सत एव कार्यस्य कारणरूपेणानन्यस्य, कथमेतदवगम्यते वाक्यशेषात् यदुपक्रमे सन्दिग्धार्थं वाक्यं तच्छेषादेव निश्चीयते। इह च तावत् "असदेवेदमग्र आसीत्" इत्यसच्छब्देनोपक्रमे निर्दिष्टं यत् तदेव पुनः तच्छब्देन परामृश्य सदिति विशिनष्टि 'तत्सदासीत्' इति। असतश्च पूर्वापरकालासम्बन्धादासीच्छब्दानुपपत्तेश्च। "असद्वा इदमग्र आसीत्" इत्यत्रापि 'तदात्मानं स्वयमकुरुत' इति वाक्यशेषे विशेषणान्नात्यन्तासत्त्वं। तस्मात् धर्मान्तरेणैवायमसद्व्यपदेशः प्रागुत्पत्तेः कार्यस्य। नामरूपव्याकृतं हि वस्तु सच्छब्दार्हं लोके प्रसिद्धं, अतः प्राक् नामरूपव्याकरणादसदिवासीदित्युपचर्यते॥

एकसत्त्वात्मनाऽनन्यत्वस्येष्टत्वात्, तर्हि मृद्घटयोः को विशेषः तादात्म्यमिति ब्रूमः। वस्तुतः सर्वत्र सत्तैक्येऽपि घटपटयोर्भेदेन सत्ताया भिन्नत्वात् न तादात्म्यं कार्यकारणयोर्भेदकस्य सत्त्वाभेदकत्वाभावादभिन्नसत्ताकत्वं तादात्म्यमिति विशेषः। उक्तं कार्यस्य प्राक् कारणात्मना सत्त्वमसिद्धमित्याशङ्क्य समाधत्ते। असदिति। अक्ताः शर्करा उपदध्यादित्युपक्रमे केनाक्ता इति सन्देहे तेजो घृतमिति वाक्यशेषात् घृतेनेति यथा निश्चयः एवमत्रापि तत्सदिति वाक्यशेषात् सन्निश्चय इत्यर्थः। आसीदित्यतीतकालसम्बन्धोक्तेश्चासदव्याकृतमेव न शून्यमित्याह। असतश्च पूर्वापरेति। उक्तन्यायं वाक्यान्तरेऽतिदिशति। असद्वा इति। क्रियमाणत्वविशेषणं शून्यस्यासम्भवीति भावः॥

युक्तेः शब्दान्तराच्च ॥ १८ ॥

युक्तेश्च प्रागुत्पत्तेः कार्यस्य सत्त्वमनन्यत्वञ्च कारणादवगम्यते, शब्दान्तराच्च। युक्तिस्तावद्वर्ण्यते। दधिघटरुचकाद्यर्थिभिः प्रतिनियतानि कारणानि क्षीरसुवर्णमृत्तिकासुवर्णादीन्युपादीयमानानि लोके दृश्यन्ते, न हि दध्यर्थिभिः मृत्तिकोपादीयते, न घटाद्यर्थिभिः क्षीरं तदसत्कार्यवादेनोपपद्यते। अविशिष्टे हि प्रागुत्पत्तेः सर्वत्र सर्वस्यासत्त्वे कस्मात् क्षीरादेव दध्युत्पद्यते न मृत्तिकायाः, मृत्तिकाया एव च घट उत्पद्यते न क्षीरात्। अथाविशिष्टेऽपि प्रागसत्त्वे क्षीर एव दध्नः कश्चिदतिशयो न मृत्तिकायां मृत्तिकायामेव च घटस्य कश्चिदतिशयो न क्षीरे इत्युच्येत। तर्हि अतिशयवत्त्वात् प्रागवस्थायाः असत्कार्यवादहानिः सत्कार्यवादसि-

---

सत्त्वानन्यत्वयोर्हेत्वन्तरमाह सूत्रकारः। युक्तेरिति। दध्याद्यर्थिनां क्षीरादौ प्रवृत्त्यन्यथानुपपत्तिर्युक्तिस्तया कार्यस्य प्राक् कारणानन्यत्वेन सत्वं सिध्यतीत्यर्थः। असतोऽपि कार्यस्य तस्मादुत्पत्तेः कारणत्वधिया तत्र प्रवृत्तिरित्यन्यथोपपत्तिमाशङ्क्याह। अविशिष्टे हीति। असतः उत्पत्त्यभावादुत्पत्तौ वा सर्वस्मात् सर्वोत्पत्तिप्रसङ्गात् तत्तदुपादानविशेषे प्रवृत्तिर्न स्यादित्यर्थः। तदुक्तं साङ्ख्यवृद्धैः "असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यं" इति। शक्तस्य कारणस्य शक्यकार्यकारित्वाच्छक्तिविषयस्य कार्यस्य सत्त्वमसतोऽशक्यत्वात्, किञ्च सत्कारणाभेदात् कार्यं सदित्युत्तरार्द्धार्थः। कार्यस्यासत्त्वेऽपि कुतश्चिदतिशयात् प्रवृत्तिनियमोपपत्तिरिति शङ्कते। अथेति। अतिशयः कार्यधर्मः कारणधर्मो वा,

द्धिश्च । शक्तिश्च कारणस्य कार्यनियमार्था कल्प्यमाना ना-न्याप्यसती वा कार्यं नियच्छेत्, असत्त्वाविशेषादन्यत्वाविशेषाच्च । तस्मात् कारणस्यात्मभूता शक्तिः शक्तेश्चात्मभूतं कार्यम् । अपि च कार्यकारणयोर्द्रव्यगुणादीनां चाश्वमहिषवद्भेदबुद्ध्यभावा-त्तादात्म्यमभ्युपगन्तव्यं । समवायकल्पनायामपि समवायस्य स-मवायिभिः सम्बन्धेऽभ्युपगम्यमाने तस्य तस्यान्योऽन्यः सम्बन्धः कल्पयितव्य इत्यनवस्थाप्रसङ्गः, अनभ्युपगम्यमाने वा विच्छेदप्र-सङ्गः । अथ समवायः स्वयं सम्बन्धरूपत्वादनपेक्ष्यैवापरं सम्बन्धं सम्बध्यते, संयोगोऽपि तर्हि स्वयं सम्बन्धरूपत्वादनपेक्ष्यैव सम-

---

आद्ये धर्मित्वात् प्रागवस्थारूपस्य कार्यस्य सत्त्वं दुर्वारमित्याह । तर्ह्य-तिशयवत्त्वादिति । द्वितीयेऽपि कार्यसत्त्वमायातीत्याह । शक्तिश्चेति । कार्यकारणाभ्यामन्या कार्यवदसती वा शक्तिर्न कार्यनियामिका यस्य कस्यचिदन्यस्य नरशृङ्गस्य वा नियामकत्वप्रसङ्गादन्यत्वासत्त्वयोः श-क्तावन्यत्र चाविशेषात्, तस्मात् कारणात्मना लीनं कार्यमेवाभिव्यक्ति-नियामकतया शक्तिरित्येष्टव्यं ततः सत्कार्यसिद्धिरित्यर्थः । किञ्च का-र्यकारणयोरन्यत्वे मृद्घटौ भिन्नौ सन्ताविति भेदबुद्धिः स्यादित्याह । अपि चेति । तयोरन्यत्वेऽपि समवायवशात् तथाबुद्धिर्नेदेतीत्या-शङ्क्य समवायं दूषयति । समवायेति । समवायः समवायिभिः सम्बन्धो न वा, आद्ये सम्बन्धः किं समवायः उत स्वरूपं आद्ये समवा-यानवस्था द्वितीये मृद्घटयोऽपि स्वरूपसम्बन्धादेवोपपत्तेः, समवा-यासिद्धिः असम्बन्ध इति पक्षे दोषमाह । अनभ्युपगम्यमाने इति । द्रव्यगुणादीनां विशिष्टधीविरहप्रसङ्गः असम्बन्धस्य विशिष्टधीनिया-मकत्वायोगादित्यर्थः । विशिष्टधर्मधीनियामको हि सम्बन्धः,न तस्य नि-यामकान्तरापेक्षा अनवस्थानात्, अतः स्वपरनिर्वाहकः समवाय इति

ायं सम्बध्येत, तादात्म्यप्रतीतेश्च द्रव्यगुणादीनां समवाय-कल्पनानर्थक्यं। कथञ्च कार्यमवयवि द्रव्यं कारणेष्ववयवद्रव्येषु वर्तमानं वर्तेत किं समस्तेष्ववयवेषु वर्तेतोत प्रत्यवयवं। यदि तावत् समस्तेषु वर्तेत ततोऽवयव्यनुपलब्धिः प्रसज्येत, समस्तावयवसन्निकर्षस्याशक्यत्वात्। नहि बहुत्वं समस्तेषु आश्रयेषु वर्तमानं व्यस्ताश्रयग्रहणेन गृह्यते। अथावयवशः समस्तेषु वर्तेत, तदाप्यारम्भकावयवव्यतिरेकेणावयविनोऽवयवाः कल्प्येरन् यैरवयवैरारम्भकेष्ववयवेषु अवयवशोऽवयवी वर्तेत। कोशावयवव्यतिरिक्तैर्ह्यवयवैरसिः कोशं व्याप्नोति, अनवस्था चैवं प्रसज्येत, तेषु तेष्ववयवेषु वर्तयितुमन्येषामन्येषामवयवानां कल्पनीयत्वात्। अथ प्रत्यवयवं वर्तेत तदैकत्र व्यापारेऽन्यत्राव्यापारः स्यात्, न हि देवदत्तः स्रुघ्ने सन्निधीयमानस्तदहरेव पाटलि-

---

ङ्कते। घयेति। सम्बध्यते स्वस्य स्वसम्बन्धिनश्च विशिष्टधियं करोतीत्यर्थः। प्रतिबन्द्या दूषयति। संयोगोऽपीति। यत्तु गुणत्वात्संयोगस्य समवायापेक्षा न सम्बन्धत्वादिति तन्न, धर्मत्वात् समवायस्यापि सम्बन्धान्तरापत्तेरसम्बन्धस्यास्वत्वस्य गोधर्मत्वादर्शनात्। किञ्च निष्क्रियत्वाश्रयो गुणा इति श्रुतिस्मृत्यादिषु व्यवहारादिष्टधर्मा गुणा इति परिभाषया समवायस्यापि गुणत्वाच्च जातिविशेषो गुणत्वमिति परिभाषा तु समवायसिद्ध्युत्तरकालीननित्यानेकसमवेता जातिरिति ज्ञानस्य समवायज्ञानाधीनत्वादतः समवायसिद्धेः प्राक् संयोगस्य गुणत्वमसिद्धमिति दिक्। किञ्च प्रतीत्यनुसारेण वस्तु लोकार्यमन्यथा गोप्रतीतेरश्व आलम्बनमित्यपि सुवचत्वात् तथा च म्हूढ इति अभेदप्रतीतेरभेद एव लोकार्थः। ताभ्यां अत्यन्तभिन्नस्य समवायस्य नियामकत्वासम्भवादित्याह। तादात्म्येति। एवं प्रतीत्यनुसारेण

पुत्रे सन्निधीयते, युगपदनेकत्र वृत्तावनेकत्वप्रसङ्गात्, देवदत्तयज्ञदत्तयोरिव स्रुघ्नपाटलिपुत्रनिवासिनोः। गोत्वादिवत् प्रत्येकं परिसमाप्तेरदोष इति चेत्, न तथा प्रतीत्यभावात्। यदि गोत्वादिवत् प्रत्येकं परिसमाप्तोऽवयवी स्यात्। यथा गोत्वं प्रतिव्यक्तिप्रत्यक्षं गृह्यते एवमवयव्यपि प्रत्यवयवं प्रत्यक्षं गृह्येत, न चैव नियतं गृह्यते। प्रत्येकपरिसमाप्तौ चावयविनः कार्येणाधिकारात् तस्य चैकत्वात् शृङ्गेणापि स्तनकार्यं, कुर्यात् उरसा च पृष्ठकार्यं न चैवं दृश्यते। प्रागु-

---

कार्यस्य कारणात्मना सत्त्वं। स्वरूपेण तु मिथ्यात्वमित्युक्तं। वृत्त्यनिरूपणाच्च तस्य मिथ्यात्वमित्याह। कथञ्चेति। तत्राद्यमनूद्यावयविनः पटादेस्तन्त्वादिष्ववयवेषु त्रित्वादिवत् स्वरूपेण वृत्तिरुतावयवश इति विकल्प्याद्यं दूषयति। यदीत्यादिना। व्यासज्यवृत्ति वस्तु प्रत्यक्षस्य यावदाश्रयप्रत्यक्षजन्यत्वात् संवृतपटादेर्यावदवयवानां अप्रत्यक्षत्वादप्रत्यक्षत्वं प्रसज्येतेत्यर्थः। द्वितीयं शङ्कते। अथेति। यथा हस्ते कोशे चावयवशः खड्गो वर्तमानो हस्तमात्रग्रहेऽपि गृह्यते, एवं यत्किञ्चिदवयवग्रहेणावयविनो ग्रहसम्भवेऽपि अवयवानामनवस्था स्यादिति दूषयति। तदापीति। आद्यद्वितीयमुद्भाव्य दूषयति। अथ प्रत्यवयवमित्यादिना। एकस्मिंस्तन्तौ पटवृत्तिकाले तन्त्वन्तरे वृत्तिर्न स्यात् वृत्तावनेकत्वापत्तेरित्यर्थः। यथा युगपदनेकव्यक्तिषु वृत्तावपि जातेरनेकत्वदोषो नास्ति तथावयविन इत्याशङ्कते। गोत्वेति। जातिवदवयविनो वृत्तिरसिद्धा अनुभवाभावादिति परिहरति। न तथेति। दोषान्तरमाह। प्रत्येकेति। अधिकारासम्बन्धात् यथा देवदत्तः स्वकार्यमध्ययनं ग्रामेऽरण्ये वा करोति, यथा गौरवयवी स्वकार्यं क्षीरादि शृङ्गपुच्छादावपि कुर्यादित्यर्थः। एवं वृत्त्यनिरूपणादनिर्वाच्यत्वं कार्यस्य दर्शितं। सम्प्रत्यसत्कार्यवादे दोषान्तरमाह। प्रागिति

त्पत्तेश्च कार्यस्यासत्त्वे उत्पत्तिरकर्तृका निरात्मिका च स्यात्। उत्पत्तिश्च नाम क्रिया सा सकर्तृकैव भवितुमर्हति गत्यादिवत्, क्रिया च नाम स्यात् अकर्तृका चेति विप्रतिषिध्येत। घटस्य चोत्पत्तिरुच्यमाना न घटकर्तृका किं तर्हि अन्यकर्तृकेति कल्प्या स्यात्। तथा कपालादीनामप्युत्पत्तिरुच्यमानान्यकर्तृकैव कल्प्येत, तथा च सति घट उत्पद्यत इत्युक्ते कुलालादीनि कारणान्युत्पद्यन्त इत्युक्तं स्यात्। न च लोके घटोत्पत्तिरित्युक्ते कुलालादीनामप्युत्पद्यमानता प्रतीयते, उत्पन्नताप्रतीतेश्च। अथ स्वकारणसत्तासम्बन्ध एवोत्पत्तिरात्मलाभश्च कार्यस्येति चेत्, कथमलब्धात्मकं सम्बध्येतेति वक्तव्यं। सतोर्हि द्वयोः सम्बन्धः सम्भवति न सदसतोरसतोर्वा, अभावस्य च निरुपाख्यत्वात् प्रागुत्पत्तेरिति मर्यादाकरणमनुपपन्नं, सतां हि लोके क्षेत्रगृहादीनां मर्यादा दृष्टा नाभावस्य। न हि वन्ध्यापुत्रो राजा बभूव प्राक् पूर्णवर्मणोऽभिषेकादित्येवंजातीयकेन मर्या-

---

यथा घटश्चलतीत्युक्ते चलनक्रियां प्रत्याश्रयत्वरूपं कर्तृत्वं घटस्य भाति तथा पटो जायत इति जनिक्रियाकर्तृत्वं अनुभूयते। अतो जनिकर्तुः जनेः प्राक् सत्त्वं वाच्यं। कर्तुरसत्त्वे क्रियाया अप्यसत्त्वापत्तेरित्यर्थः। जनेरनुभवसिद्धेऽपि सकर्तृकत्वे क्रियात्वेनानमानमाह। उत्पत्तिश्चेति। असतो घटस्योत्पत्तौ कर्तृत्वासम्भवेऽपि कुलालादेः सत्त्वात् कर्तृत्वमित्याशङ्क्याह। घटस्य चेति। घटोत्पत्तिवदसत्कपालादुत्पत्तिरित्यतिदिशति। तथेति। प्रसङ्गमनूद्य दोषमाह। तथा चेति। अनुभवविरोध इत्यर्थः। उत्पत्तिर्भावस्याद्या विक्रियेति स्वमतेन कार्यसत्त्वमा-

द्‍ाकारणेन निरूपाख्यो बन्ध्यापुत्रो राजा बभूव भवति भविष्यति इति वा विशेष्यते। यदि च बन्ध्यापुत्रः कारकव्यापारादूर्द्ध्वमभविष्यत् तत इदमपि उपापत्स्यत कार्याभावोऽपि कारकव्यापारादूर्द्ध्वं भविष्यतीति। वयन्तु पश्यामो बन्ध्यापुत्रस्य कार्याभावस्य चाभावत्वाविशेषात्। यथा बन्ध्यापुत्रः कारकव्यापारादूर्द्ध्वं न भविष्यति एवं कार्याभावोऽपि कारकव्यापारादूर्द्ध्वं न भविष्यतीति। नन्वेवं सति कारकव्यापारोऽनर्थकः प्रसज्येत, यथैव हि प्राक्सिद्धत्वात् कारणस्य स्वरूपसिद्धये न कश्चिद्व्याप्रियते एवं प्राक्सिद्धत्वात् तदनन्यत्वाच्च कार्यस्वरूपप्रसिद्धयेऽपि न कश्चिद्व्याप्रियेत व्याप्रियते च, अतः कारकव्यापारार्थवत्त्वाय मन्यामहे प्रागुत्पत्तेरभावः कार्यस्येति। नैष दोषः, यतः कार्याकारेण कारणं व्यवस्थापयतः कारक-

---

नीतं सम्प्रति कार्यस्योत्पत्तिर्नाम स्वकारणे समवायः स्वस्मिन् सत्तासमवायो वेति तार्किकमतमाशङ्कते। अथेति। तन्मतेनापि कार्यस्य सत्त्वमावश्यकं असतः सम्बन्धित्वायोगादित्याह। कथमिति। असतो वेति दृष्टान्तोक्तिः। ननु नरशृङ्गादिवत् कार्यं सर्वदा सर्वत्रासन्नं भवति किन्तूत्पत्तेः प्राक् ध्वंसानन्तरं चासत् मध्ये तु सदेवेति वैषम्यात् सम्बन्धित्वोपपत्तिरित्याशङ्क्याह। अभावस्येति। अत्राभावशब्दा असच्छब्दापरपर्याया व्याख्येयाः। असतः कालेनासम्बन्धात् प्राक्त्वं न युक्तमित्यर्थः। ननु कारकव्यापारादूर्द्ध्वभाविनः कार्यस्य बन्ध्यापुत्रतुल्यत्वं कथमित्यत आह। यदि चेति। कार्याभावः असत्कार्यमित्यर्थः, इत्युपापत्स्यत उपपन्नमभविष्यदित्यन्वयः। कस्तर्हि निर्णयस्तमाह। वयन्त्विति। नासतो विद्यते भाव इति स्मृतेरिति भावः। सत्का-

व्यापारस्यार्थवत्त्वमुपपद्यते। कार्याकारोऽपि कारणस्यात्मभूत एव, अनात्मभूतस्यानारभ्यत्वादित्यभाणि। न च विशेषदर्शनमात्रेण वस्त्वन्यत्वं भवति। न हि देवदत्तः सङ्कोचितहस्तपादः प्रसारितहस्तपादश्च विशेषेण दृश्यमानोऽपि वस्त्वन्यत्वं गच्छति, स एवेति प्रत्यभिज्ञानात्। तथा प्रतिदिनमनेकसंस्थानानामपि पित्रादीनां न वस्त्वन्यत्वं भवति, मम पिता मम *माता मम भ्राता इति प्रत्यभिज्ञानात्। जन्मच्छेदानन्तरितत्वात् तत्र तत्र युक्तं नान्यत्रेति चेत्, न, क्षीरादीनामपि दध्याद्याकारसंस्थानस्य प्रत्यक्षत्वात्। अदृश्यमानानामपि वटधानादीनां समानजातीयावयवान्तरोपचितानामङ्कुरादिभावेन दर्शनगोचरतापत्तौ जन्मसंज्ञा तेषामेवावयवानां †अपचयवशाददर्शनापत्तावुच्छेदसंज्ञा। तत्रेदृक् जन्मोच्छेदान्तरितत्वेन

र्यवादे कारकवैयर्थ्यं शङ्कते। नन्विति। सिद्धकारणानन्यत्वाच्च कार्यस्य सिद्धत्वमित्याह। तदनन्यत्वाच्चेति। अनिर्वाच्यकार्यात्मना कारणस्याभिव्यक्त्यर्थः कारकव्यापार इत्याह। नैष दोष इति। कार्यसत्यत्वमिच्छतां साङ्ख्यानां सत्कार्यवादे कारकवैयर्थ्यं दोष आपतति, अभिव्यक्तेरपि सत्त्वात्, अद्वैतवादिनान्त्वघटितघटनावभासनचतुरमायामहिम्ना स्वप्नवद्यथादर्शनं सर्वमुपपन्नं। विचार्यमाणे सर्वमयुक्तं, युक्तत्वे द्वैतापत्तेरिति मुख्यसमाधानं समाधानान्तराभावात्। ननु कारणाद्भिन्नमसदेवोत्पद्यत इति समाधानं किं न स्यादित्याशङ्क्यासत्पक्षस्य दूषणमुक्तं स्मारयति। कार्याकारोऽपीति। अतः कारणाद्भेदाभेदाभ्यां दुर्निरूपस्य सदसद्विलक्षणस्यानिर्वाच्याभिव्यक्तिरनिर्वाच्यकारकव्यापाराणां फलमिति पक्ष एव श्रेयानिति भावः। ननु स्वप्नदृष्ट

* माता मम पुत्र इति का० वर्ध० से०।

† अपकर्षादिति वर्ध०।

चेद्सतः सत्त्वापत्तिः सतश्चासत्त्वापत्तिः, तथा सति गर्भवासिन उत्तानशायिनश्च भेदप्रसङ्गः । तथा बाल्ययौवनस्थाविरेष्वपि भेदप्रसङ्गः, पित्रादिव्यवहारलोपप्रसङ्गश्च । एतेन *क्षणभङ्गवादः प्रतिवदितव्यः । यस्य पुनः प्रागुत्पत्तेरसत्कार्यं तस्य निर्विषयः कारकव्यापारः स्यात्, अभावस्य विषयत्वानुपपत्तेः, आकाशस्य हननप्रयोजनखड्गाद्यनेकायुध†प्रसक्तिवत् । समवायिकारणविषयः कारकव्यापारः स्यादिति चेत्, न, अन्यविषयेण कारकव्यापारेणान्यनिष्पत्तेरतिप्रसङ्गात् । समवायिकारणस्यैवात्मातिशयः कार्यमिति चेत् न ‡अतस्तर्हि सत्कार्यतापत्तिः । तस्मात् क्षीरादीन्येव द्रव्याणि दध्यादिभावेनावतिष्ठमानानि कार्याख्यां लभन्त इति न कारणादन्यत् कार्यं वर्षशतेनापि शक्यं कल्पयितुं । यथा च मूलकारणमेवान्त्यात्कार्यात् तेन तेन कार्याकारेण नटवत् सर्वव्यवहारास्पदत्वं प्रतिपद्यते, एवं युक्तेः कार्यस्य

पृथुबुध्नत्वाद्यवस्थाविशेषो घटे दृश्यते । तथा च घटो मृद्भिन्नः तद्विरुद्धविशेषवत्त्वात् वृक्षवदित्यत आह । न चेति । वस्तुतोऽन्यत्वं सत्यो भेदः । हेतोर्व्यभिचारस्थलान्तरमाह । तथा प्रतिदिनमिति । प्रत्यहं पित्रादिदेहस्यावस्थाभेदेऽपि जन्मनाशयोरभावादभेदो युक्तः, दार्ष्टान्तिके तु मृदादिनाशे सति घटादिकं जायत इति जन्मविनाशरूपविरुद्धधर्मवत्त्वात् कार्यकारणयोरभेदो न युक्तः इति शङ्कते । जन्मेति । कारणस्य नाशाभावाद्धेत्वसिद्धिरिति परिहरति । नेति । दधिघटादिकार्यान्वितत्वेन क्षीरमृदादीनां प्रत्यक्षत्वान्नाशासिद्धिरित्यर्थः । ननु

---

* क्षणिकवादः प्रत्युक्त इति वर्ध० ।

† प्रयुक्तिवदिति वर्ध० ।

‡ सत्कार्य्यापत्तेरिति सो० वर्ध० ।

प्रागुत्पत्तेः सत्त्वमनन्यत्वञ्च कारणादवगम्यते, शब्दान्तराच्चैतदवगम्यते। पूर्वसूत्रेऽसद्व्यपदेशिनः शब्दस्योदाहृतत्वात्, ततोऽन्यः सद्व्यपदेशी शब्दः शब्दान्तरं, "सदेव सोम्येदमग्र आसीत्" "एकमेवाद्वितीयं" इत्यादि 'तद्धैक आहुः' 'असदेवेदमग्र आसीत्' इति चासत्पक्षमुपक्षिप्य कथमसतः सज्जायेतेति आक्षिप्य 'सदेव सोम्येदमग्र आसीत्' इत्यवधारयति। तत्रेदंशब्दवाच्यस्य कार्यस्य प्रागुत्पत्तेः सच्छब्दवाच्येन कारणेन सामानाधिकरण्यस्य श्रूयमाणत्वात् सत्त्वानन्यत्वे प्रसिध्यतः। यदि तु प्रागुत्पत्तेरसत्कार्यं स्यात् पश्चाच्चोत्पद्यमानं कारणे समवेयात् तदाऽन्यत् कारणात् स्यात्, तत्र 'येनाश्रुतं श्रुतं भवति' इतीयं प्रतीज्ञा पीड्येत सत्त्वानन्यत्वावगतेस्त्वियं प्रतिज्ञा समर्थ्यते॥

यत्रान्वयो दृश्यते तत्र हेत्वसिद्धावपि यत्राङ्कुरादौ वटवीजादीनां अन्वयो न दृश्यते तत्र हेतुसत्त्वाद्वस्त्वन्यत्वं स्यादित्यत आह। अदृश्येति। तत्राप्यङ्कुरादौ वीजाद्यवयवानामन्वयान्न त एव जन्मविनाशौ किन्त्ववयवान्तरोपचयापचयाभ्यां तद्व्यवहार इत्यर्थः। अस्तूपचयापचयलिङ्गेन वस्तुभेदानुमानं ततोऽसत उत्पत्तिः सतो नाश इत्याशङ्क्य व्यभिचारमाह। तत्रेदृगिति। पितृदेहेऽपि भेदसत्त्वान्न व्यभिचार इत्यत्र बाधकमाह। पित्रादीति। एतेनेति कारणस्य सर्वकार्येष्वन्वयकथनेनेत्यर्थः। स्वपक्षे दोषं परिहृत्य परपक्षे प्रसञ्जयति। यस्य पुनरिति। असतः कार्यस्य कारकव्यापाराहितातिशयाश्रयत्वायोगादविषयत्वेऽपि मृदादेर्विषयत्वं स्यादिति शङ्कते। समवायीति। समवायिकारणात् कार्यं भिन्नमभिन्नं वेति विकल्प्याद्यं निरस्यति। नेत्यादिना। द्वितीयमाशङ्क्येष्टापत्तिमाह। समवायीति। कार्याणामवान्तरकारणानन्यत्वमुपसंहरति। तस्मादिति। परमकारणानन्यत्वं फलितमाह। यथा च मृलेति। असत्कार्यवादे प्रतिज्ञाबाधः स्यादित्याह। यदि तु प्रागुत्पत्तेरिति॥

पटवच्च ॥ १९ ॥

यथा च संवेष्टितः पटो न व्यक्तं गृह्यते किमयं पटः किं चान्यत् द्रव्यमिति, स एव प्रसारितो यत्संवेष्टितं द्रव्यं स पट एवेति प्रसारणेनाभिव्यक्तो गृह्यते। यथा च संवेष्टनसमये पट इति गृह्यमाणोऽपि न विशिष्टायामविस्तारो गृह्यते स एव प्रसारणसमये विशिष्टायामविस्तारो गृह्यते, न संवेष्टितरूपादयं भिन्नः पट इति। एवं तन्त्वादिकारणावस्थं पटादिकार्यमस्पष्टं सत्तुरीवेमकुविन्दादिकारकव्यापाराभिव्यक्तं स्पष्टं गृह्यते। अतः संवेष्टितपटप्रसारितपटन्यायेनैवानन्यत् कारणात् कार्यमित्यर्थः॥

यथा च प्राणादि ॥ २० ॥

यथा च लोके प्राणापानादिषु प्राणभेदेषु प्राणायामेन निरुद्धेषु कारणमात्ररूपेण वर्तमानेषु जीवनमात्रं कार्यं निर्वर्त्यते नाकुञ्चनप्रसारणादिकं कार्यान्तरं, तेष्वेव प्राणभेदेषु पुनः प्रवृत्तेषु जीवनादधिकमाकुञ्चनप्रसरणादिकमपि का-

---

कार्यमुपादानाद्भिन्नं तदुपलब्धावप्यनुपलभ्यमानत्वात् ततोऽधिकपरिमाणत्वाच्च मशकादिव शशक इत्यत्र व्यभिचारार्थं सूत्रं। पटवच्चेति। द्वितीयहेतोर्व्यभिचारं स्फुटयति। यथा च संवेष्टनेति। आयामो दैर्घ्यं॥

तत्रैव विलक्षणकार्यकारित्वं हेतुमाशङ्क्य व्यभिचारमाह सूत्रकारः। यथा च प्राणादीति। एवं जीवजगतोर्ब्रह्मानन्यत्वात् प्रतिज्ञा-

र्थान्तरं निर्वर्त्त्यते । न च प्राणभेदानां प्रभेदवतः प्राणादन्यत्वं समीरणस्वभावाविशेषात्, एवं कार्यस्य कारणादनन्यत्वं । अतश्च कृत्स्नस्य जगतो ब्रह्मकार्यत्वात् तदनन्यत्वाच्च सिद्धैषा श्रौती प्रतिज्ञा येन 'अश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातं' इति ॥

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ २१ ॥

अन्यथा पुनश्चेतनकारणवाद आक्षिप्यते, चेतनाद्धि जगत्प्रक्रियायामाश्रीयमाणायां हिताकरणादयो दोषाः प्रसज्यन्ते, कुत इतरव्यपदेशात् । इतरस्य शारीरस्य ब्रह्मात्मत्वं व्यपदिशति श्रुतिः "स आत्मा तत्त्वमसि श्वेतकेतो" इति प्रतिबोधनात् । यद्वा इतरस्य च ब्रह्मणः शारीरात्मत्वं व्यपदिशति "तत्सृष्ट्वा तदेवानुप्राविशत्" इति स्रष्टुरेवाविकृतस्य ब्रह्मणः कार्यानुप्रवेशेन शारीरात्मत्वादर्शनात् । 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति च परा देवता जीवमात्मशब्देन व्यपदिशन्ती

...द्धिरित्यधिकरणार्थमुपसंहरति । अतश्च कृत्स्नस्येति । जीवाभिन्नं ... जगत्कारणमितिवद्वेदान्तसमन्वयो विषयः ॥
... स यदि तादृक् ब्रह्म जगज्जनयेत् तर्हि स्वानिष्टं नरकादिकं न जनयेत् ...तन्त्वचेतनत्वादिति न्यायेन विरुध्यते न वेति सन्देहे पूर्वोक्तजीवानन्यत्व... जीव्य जीवदोषाः ब्रह्मणि प्रसज्येरन् इति*पूर्वपक्षसूत्रं गृहीत्वा व्या... । इतरव्यपदेशादित्यादिना । पूर्वपक्षे जीवाभिन्ने समन्वयासिद्धिः ...द्धान्ते तत्सिद्धिरिति फलं, हिताकरणेत्यत्र नञ् व्यत्यासेनाहितकरणं

---

* यद्वेति वर्ध० का० पु० नास्ति ।

न ब्रह्मणो भिन्नः शारीर इति दर्शयति। तस्माद् यद्ब्रह्मणः स्रष्टृत्वं तच्छारीरस्यैवेति, अतश्च स्वतन्त्रः कर्ता सन् हितमेवात्मनः सौमनस्यकरं कुर्यात् नाहितं जन्ममरणजरारोगाद्यनेकानर्थजालं। नहि कश्चिदपरतन्त्रो बन्धनागारमात्मनः कृत्वानुप्रविशति। न च स्वयमत्यन्तनिर्मलः सन्नत्यन्तमलिनं देहमात्मत्वेनोपेयात् कृतमपि कथञ्चिद् यत् दुःखकरं तदिच्छया जह्यात् सुखकरञ्चोपाददीत स्मरेच्च, मयेदं जगद्विविधं विचित्रं विरचितमिति, सर्वो हि लोकः स्पष्टं कार्यं कृत्वा स्मरति मयेदं कृतमिति। यथा च मायावी स्वयं प्रसारितां मायामिच्छयाऽनायासेनैवोपसंहरति, एवं शारीरोऽपि इमां सृष्टिं उपसंहरेत्, स्वकीयमपि तावत् शरीरं शारीरो न शक्नोत्यनायासेनोपसंहर्तुं। एवं हितक्रियाद्यदर्शनादन्याय्या चेतनात् जगत्प्रक्रियेति मन्यते।

अधिकन्तु भेदनिर्देशात् ॥ २२ ॥

तुशब्दः पूर्वपक्षं व्यावर्तयति। यत्सर्वज्ञं सर्वशक्ति ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं शारीरादधिकमन्यत्तद्वयं जगतः स्रष्टृ ब्रूमः

दोषो व्याख्यातः। आदिपदोक्तं भ्रान्त्यादिकं आपादयति। न च स्वयमित्यादिना ॥

जीवेशयोरभेदाज्जीवजगतोर्दोषाः ब्रह्मणि स्युः ब्रह्मगताश्च सृष्टिसंहारसर्वज्ञत्वादयो गुणा जीवे स्युः, न चेष्टापत्तिः जीवस्य स्वशरीरेऽपि संहारसामर्थ्यादर्शनादिति प्राप्ते सिद्धान्तसूत्रं व्याचष्टे तुशब्द इत्यादिना। जीवेश्वरयोर्लोके बिम्बप्रतिबिम्बयोरिव कल्पितभेदाङ्गीकाराद्धर्मव्यवस्थेति सिद्धान्तग्रन्थार्थः। यदि वयं जी

न तस्मिन् हिताकरणादयो दोषाः प्रसज्यन्ते, न हि तस्य हितं किञ्चित् कर्तव्यमस्ति अहितं वा परिहर्तव्यं नित्यमुक्तत्वात्। न च तस्य ज्ञानप्रतिबन्धः शक्तिप्रतिबन्धो वा क्वचिदप्यस्ति, सर्वज्ञत्वात् सर्वशक्तित्वाच्च। शारीरस्त्वनेवंविधः, तस्मिन् न प्रसज्यन्ते हिताकरणादयो दोषा न तु तं वयं जगतः स्रष्टारं ब्रूमः। कुत एतत् भेदनिर्देशात्, "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः सता सोम्य तदा सम्पन्नो भवति शारीर आत्मा प्राज्ञेनात्मनान्वारूढः" इत्येवंजातीयकः कर्तृकर्मादिभेदनिर्देशो जीवादधिकं ब्रह्म दर्शयति। नन्वभेदनिर्देशोऽपि दर्शितः 'तत्त्वमसि' इत्येवंजातीयकः, थं भेदाभेदौ विरुद्धौ सम्भवेयातां। नैष दोषः, आकाशघटााशन्यायेनोभयसम्भवस्य तत्र तत्र प्रतिष्ठापितत्वात्। अपि च दा तत्त्वमसीत्येवंजातीयकेनाभेदनिर्देशेनाभेदः प्रतिबोधितो वति अपगतं भवति तदा जीवस्य संसारित्वं ब्रह्मणश्च स्रष्टृत्वं, मस्तस्य मिथ्याज्ञानविजृम्भितस्य भेदव्यवहारस्य सम्यक्ज्ञानेन ाधितत्वात्, तत्र कुत एव सृष्टिः कुतो वा हिता करणादयो ाषाः। अविद्याप्रत्युपस्थापितनामरूपकृतकार्यकरणसङ्घातो-

---

ष्टारं ब्रूमः तदा दोषाः प्रसज्यन्ते न तु तं ब्रूम इत्यन्वयः। किञ्चाभेज्ञानादूर्द्ध्वं वा दोषा आपाद्यन्ते पूर्वं वा नाद्य इत्याह। अपि चेति। ां मिथ्याज्ञानविजृम्भितत्वं स्फुटयति। अविद्येति। कर्तृत्वादिबुधर्माध्यासे देहधर्माध्यासं दृष्टान्तयति। जन्मेति। द्वितीयं प्रत्याह।

पाध्यविवेककृता हि भ्रान्तिः, हिताहितकरणादिलक्षणः संसारो न तु परमार्थतोऽस्तीत्यसकृदवोचाम जन्ममरणच्छेदनभेदनाद्यभिमानवत् । अबाधिते तु भेदव्यवहारे 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' इत्येवंजातीयकेन भेदनिर्देशेनावगम्यमानं ब्रह्मणोऽधिकत्वं हिताकरणादिदोषप्रसक्तिं निरुणद्धि ॥

अश्मादिवच्च तदनुपपत्तिः ॥ २३ ॥

यथा च लोके पृथिवीत्वसामान्यान्वितानामप्यश्मनां केचि न्महार्हाः मणयो वज्रवैदूर्यादयोऽन्ये मध्यमवीर्याः सूर्यकान्तादयोऽन्ये प्रहीणाः श्ववायसप्रक्षेपणार्हाः पाषाणाः इत्यनेकवि वैचित्र्यं दृश्यते । यथा चैकपृथिवीव्यपाश्रयाणामपि बीजान बहुविधं पत्रपुष्पफलगन्धरसादिवैचित्र्यं *चन्दनकिंपाकादिषू पलभ्यते । यथा चैकस्याप्यन्नरसस्य लोहितादीनि केशलोमादीनि च विचित्राणि कार्याणि भवन्ति, एवमेकस्यापि

अबाधिते त्विति । ज्ञानादूर्ध्वं स्रष्टृत्वादिधर्माणां बाधात् पूर्वञ्च कल्पितभेदेन व्यवस्थोपपत्तेर्न किञ्चिदनवद्यमित्यर्थः ॥

नन्वखण्डैकरूपे ब्रह्मणि कथं जीवेश्वरवैचित्र्यं कथञ्च तत्कार्यवैचित्र्यमित्यनुपपत्तिं दृष्टान्तैः परिहरति सूत्रकारः । अश्मादिवच्चेति किंपाको महातालफलं । तत्तत्कार्यसंस्काररूपानादिशक्तिभेदाद्वैचित्र्यमिति भावः । सूत्रस्थचकारार्थमाह । श्रुतेश्चेति । ब्रह्म जीवगतदोषवत् जीवाभिन्नत्वाज्जीववदित्याद्यनुमानं स्वतः प्रमाणनिरवद्यत्वादि श्रुतिबाधितं । किञ्च कर्तृत्वभोक्तृत्वादिविकारस्य मिथ्यात्वाज्जीवस्य तावद्दोषो नास्ति कुतो विम्बस्थानीयस्याशेषविशेषदर्शिनः परमेश्वर

* चन्दनचम्पकादिष्विति मु० सो० वर्ध० का० ।

ब्रह्मणो जीवप्राज्ञपृथक्त्वं कार्यवैचित्र्यञ्चोपपद्यत इति अतस्तदनुपपत्तिः परपरिकल्पितदोषानुपपत्तिरित्यर्थः। श्रुतेश्च प्रामाण्यादिकारस्य वाचारम्भणमात्रत्वात् स्वप्नदृश्यभाववैचित्र्यवच्चेत्यभ्युच्चयः॥

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि॥२४॥

चेतनं ब्रह्मैकमद्वितीयं जगतः कारणमिति यदुक्तं तन्नोपपद्यते, कस्मादुपसंहारदर्शनात्। इह हि लोके कुलालादयो घटपटादीनां कर्त्तारो मृद्दण्डचक्रसूत्राद्यनेककारकोपसंहारेण संगृहीतसाधनाः सन्तः तत्तत्कार्यं कुर्वाणा दृश्यन्ते, ब्रह्म चासहायं तवाभिप्रेतं, तस्य साधनान्तरानुपसंग्रहे सति कथं स्रष्टृत्वमुपपद्येत, तस्मान्न ब्रह्म जगत्कारणमिति चेत्, नैष दोषः। यतः क्षीरवत् द्रव्यस्वभावविशेषादुपपद्यते, यथा हि लोके क्षीरं जलं वा स्वयमेव *दधिहिमभावेन परि-

---

यप्रसक्तिः। यत्तु ब्रह्म न विचित्रकार्यप्रकृति एकरूपत्वाद्व्यतिरेकेण तन्त्वादिवदिति, तन्न, एकरूपे स्वप्नदृश्येव विचित्रदृश्यवस्तुवैचित्र्यदर्शनेन व्यभिचारादित्यर्थः, तस्मात् प्रत्यगभिन्ने ब्रह्मणि समन्वयस्याविरोध इति सिद्धं॥

उपसंहारदर्शनात्। असहायाद्ब्रह्मणो जगत्सर्गं ब्रुवन् समन्वयो विषयः। स किं यदसहायं तन्न कारणमिति लौकिकन्यायेन बाध्यते न वेति सन्देहे पूर्वमौपाधिकजीवभेदाद्ब्रह्मणि जीवदोषा प्रसज्यन्त इत्युक्तं, सम्प्रति उपाधितोऽपि विभक्तं ब्रह्मणः प्रेरकान्तरं सहकारि नास्तीशनानात्वाभावादिति प्रत्युदाहरणेन पूर्वपक्ष-

---

* दधिहिमकरकादिभावेनेति सो०।

णमतेऽनपेक्ष्य वाह्यं साधनं तथेहापि भविष्यति। ननु क्षीराद्यपि दध्यादिभावेन परिणममानमपेक्षत एव वाह्यं साधनं औष्ण्यादिकं, कथमुच्यते क्षीरवद्धीति। नैष दोषः स्वयमपि हि क्षीरं याञ्च यावतीं च परिणाममात्रामनुभवत्येव त्वार्यते त्वौष्ण्यादिना दधिभावाय। यदि च स्वः दधिभावशीलता न स्यान्नैवौष्ण्यादिनापि बलाद्दधिभावमापद्येत। न हि वायुराकाशो वौष्ण्यादिना बलाद् दधिभाः मापद्यते, साधनसम्पत्त्या च तस्य पूर्णता सम्पद्यते। परिपूर्णशक्तिकन्तु ब्रह्म न तस्यान्येन केनचित् पूर्णता सम्पादयितव्या श्रुतिश्च तत्र भवति

‘न तस्य कार्यं करणञ्च विद्यते
न तत्समश्चाभ्यधिकश्च दृश्यते।

सूत्रांशं व्याचष्टे। चेतनमित्यादिना। फलं पूर्ववत्, कारकाणां उपसंहारो मेलनं। उक्तन्यायस्य क्षीरादौ व्यभिचार इति सिद्धान्तयति। नैष इति। शुद्धस्य ब्रह्मणोऽकारणत्वमिष्टमेव विशिष्टस्येश्वरस्य तु मायैव सहाय इति भावेनाह। वाह्यमिति। क्षीरस्याप्यातञ्चनादिसहायोऽस्तीत्यसहायत्वहेतोर्न व्यभिचार इत्याशङ्क्य सहायाभावेऽपि यस्य कस्यचित् परिणामस्य क्षीरे दर्शनाद्व्यभिचारतादवस्थ्यमित्याह। नन्वित्यादिना। तर्हि सहायो व्यर्थस्तत्राह। त्वार्यते इति ननु त्वार्यते क्षीरं दधिभावाय शैघ्र्यं कार्यत इति किमर्थं कल्प्यते स्वतोऽशक्तं क्षीरं सहायेन शक्तं क्रियत इति किन्न स्यात् तत्राह यदि चेति। शक्तस्य सहायसम्पदा किं कार्यमित्यत्राह। साधनेति सहायविशेषाभावे कश्चिद्विकारः क्षीरस्य भवति, तत्र आतञ्चनप्रक्षेपौष्ण्याभ्यान्तूत्तमदधिभावसामर्थ्यं व्यज्यते इत्यर्थः। तर्हि शक्ति

परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च' इति।

तस्मादेकस्यापि ब्रह्मणो विचित्रशक्तियोगात् क्षीरादिवद्विचित्रपरिणाम उपपद्यते॥

देवादिवदपि लोके॥ २५॥

स्यादेतत्, उपपद्यते क्षीरादीनामचेतनानामनपेक्ष्यापि बाह्यं साधनं दध्यादिभावः दृष्टत्वात्, चेतनाः पुनः कुलालादयस्तु साधनसामग्रीमपेक्ष्यैव तस्मै तस्मै कार्याय प्रवर्तमाना दृश्यन्ते, कथं ब्रह्म चेतनं सदसहायं प्रवर्तेतेति, देवादिवदिति ब्रूमः। यथा लोके देवाः पितर ऋषय इत्येवमादयो महाप्रभावाश्चेतना अपि सन्तोऽनपेक्ष्यैव किञ्चिद्बाह्यं साधनमैश्वर्यविशेषयोगादभिध्यानमात्रेण स्वत एव बहूनि नानासंस्थानानि शरीराणि प्रासादादीनि रथादीनि च निर्मिमाणा उपलभ्यन्ते मन्त्रार्थवादेतिहासपुराणप्रामाण्यात्। तन्तुनाभश्च स्वत एव तन्तून् सृजति, बलाका चान्तरेणैव शुक्रं गर्भं

शङ्कोऽपि सहायो ब्रह्मणो वाच्यस्तत्राह। परिपूर्णेति। निरपेक्षमात्मशक्तिकमित्यर्थः। तादृक्शक्तौ मानमाह। श्रुतिश्चेति॥

ननु ब्रह्म न कारणं चेतनत्वे सत्यसहायत्वान्मृदादिशून्यकुलालादिवदिति न क्षीरादौ व्यभिचार इति सूत्रव्यावर्त्यां शङ्कामाह। स्यादेतदिति। तस्यापि हेतोर्देवादौ व्यभिचार इत्याह। देवादिवदिति। लोक्यते ज्ञायतेऽर्थोऽनेनेति लोको मन्त्रार्थवादादि शास्त्रं वृद्धव्यवहारश्च, अभिध्यानं सङ्कल्पः। ननु देवाद्यूर्णनाभान्तदृष्टान्तेषु शरीरेषु चेतनत्वं नास्ति, बलाकापद्मिनीचेतनयोर्गर्भप्रस्थानकर्तृत्वे

धत्ते, पद्मिनी चानपेक्ष्य किञ्चित् प्रस्थानसाधनं सरोऽन्तरात् सरोऽन्तरं प्रतिष्ठते, एवं चेतनमपि ब्रह्मानपेक्ष्य बाह्यं साधनं स्वत एव जगत् स्रक्ष्यति । स यदि ब्रूयाद्य ते देवादयो ब्रह्मणो दृष्टान्ता उपात्तास्ते दार्ष्टान्तिकेन ब्रह्मणा समानस्वभावा न भवन्ति, शरीरमेव ह्यचेतनं देवादीनां शरीरान्तरादिविभूत्युत्पादेन उपादानं न तु चेतन आत्मा, तन्तुनाभस्य च क्षुद्रतरजन्तुभक्षणाल्लाला कठिनतामापद्यमाना तन्तुर्भवति बलाका च स्तनयित्नुरवश्रवणाद्गर्भं धत्ते। पद्मिनी च चेतनप्रयुक्ता सती अचेतनेनैव शरीरेण सरोऽन्तरात् सरोऽन्तरमुपसर्पति वल्लीव वृक्षं न तु स्वयमेवाचेतना सरोऽन्तरोपसर्पणे व्याप्रियते, तस्मान्नैते ब्रह्मणो दृष्टान्ता इति, तं प्रति ब्रूयान्नायं दोषः, कुलालादिदृष्टान्तवैलक्षण्यमात्रस्य विवक्षितत्वादिति। यथा हि कुलालादीनां देवादीनाञ्च समाने चेतनत्वे कुलालादयः कार्यारम्भे बाह्यं साधनमपेक्षन्ते न देवादयः, तथा

मेघशब्दः शरीरस्य सहायोऽस्ति, अतो विशिष्टहेतोर्न व्यभिचा इति शङ्कते । स यदि ब्रूयादित्यादिना । व्यभिचारोऽस्तीति परिह रति । तं प्रति ब्रूयादिति । अयं दोषः दृष्टान्तवैषम्याख्यः । अत्र हेतौ चेतनत्वं अहंधीविषयत्वरूपं चित्तादात्म्यापन्नदेहसाधारणं ग्रा न तु मुख्यात्मत्वं, तव कुलालदृष्टान्ते साधनवैकल्यापत्तेः । असहायत्व चेतनस्य स्वातिरिक्तहेतुशून्यत्वं तदुभयं देवादिषु अस्तीति व्यभिचार देहस्य स्वान्तःपातित्वेन स्वातिरिक्तत्वाभावात् । तथा च कुलाल वैलक्षण्यं देवादीनां घटादिकार्ये स्वातिरिक्तानपेक्षत्वाद्देववैलक्षण ब्रह्मणः देहस्याप्यनपेक्षणात् नरदेवादीनां कार्यारम्भे नास्त्येकरूपा सा

ब्रह्म चेतनमपि न बाह्यं साधनमपेक्षिष्यत इत्येतावत् वयं देवाद्युदाहरणेन विवक्षामः, तस्मात् यथैकस्य सामर्थ्यं दृष्टं तथा सर्वेषामेव भवितुमर्हतीति नास्त्येकान्त इत्यभिप्रायः॥

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दव्याकोपो वा॥ २६॥

चेतनमेकमद्वितीयं ब्रह्म क्षीरादिवद्देवादिवच्चानपेक्षितबाह्यसाधनं स्वयं परिणममाणं जगतः कारणमिति स्थितं, शास्त्रार्थपरिशुद्धये तु पुनराक्षिपति कृत्स्नप्रसक्तिः, कृत्स्नस्य ब्रह्मणः कार्यरूपेण परिणामः प्राप्नोति, निरवयवत्वात्। यदि ब्रह्म पृथिव्यादिवत् सावयवमभविष्यत् ततोऽस्यैकदेशः पर्यणंस्यत, एकदेशश्चावास्थास्यत, निरवयवन्तु ब्रह्म श्रुतिभ्योऽवगम्यते-

'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्।
दिव्यो ह्यमूर्त्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः'॥

यी। श्रूयते हि महाभारते श्रीकृष्णस्य सङ्कल्पमात्रेण द्रौपद्याः पटसम्परोत्पत्तिः, अतः सिद्धमसहायस्यापि ब्रह्मणः कारणत्वं॥

कृत्स्नप्रसक्तिः। क्षीरदृष्टान्तेन ब्रह्म परिणामीति भ्रमोत्पत्त्या पूर्वोक्ते प्राप्ते शास्त्रार्थो विवर्तो न परिणामि इति भ्रमोत्पत्त्या निर्णयार्थमिदमधिकरणमिति पूर्वाधिकरणेनोत्तराधिकरणस्य कार्यत्वसङ्गतिरिह। चेतनमिति। निरवयवात् ब्रह्मणो जगत्सर्गं वदन् समन्वयो विरुद्धः, स किं यन्निरवयवं तन्न परिणामीति न्यायेन विरुध्यते न वेति सन्देहे विरुध्यत इति पूर्वपक्षसूत्रं व्याचष्टे। कृत्स्नेति।. ब्रह्म परिणामीति वदता वक्तव्यं ब्रह्म निरवयवं सावयवं वा, आद्ये सर्वत्र ब्रह्मणः परिणामात्मना स्थितिः स्यात् इत्युक्तं व्यतिरेकदृष्टान्तेन विवृणोति। यदि ब्रह्मेत्यादिना। पर्यणंस्यत परिणतोऽभविष्यत्, एकदेशश्चावास्थास्य-

'इदं महद्भूतमनन्तमपारं विज्ञानघन एव स एष नेति नेत्यात्माऽस्थूलमनणु, इत्याद्याभ्यः सर्वविशेषप्रतिषेधयित्रीभ्यः ततश्चैकदेशपरिणामासम्भवात् कृत्स्नपरिणामप्रसक्तौ सत्यां मूलोच्छेदः प्रसज्येत। द्रष्टव्यत्वोपदेशानर्थक्यं चापन्नं अयत्नदृष्टत्वात् कार्यस्य, तद्व्यतिरिक्तस्य च ब्रह्मणोऽभावात्, अजत्वादिशब्दव्याकोपश्च। अथैतद्दोषपरिजिहीर्षया सावयवमेव ब्रह्माभ्युपगम्येत, तथापि ये निरवयवत्वस्य प्रतिपादकाः शब्दा उदाहृतास्ते प्रकुप्येयुः। सावयवत्वे चानित्यत्वप्रसङ्ग इति सर्वथाऽयं पक्षो न घटयितुं शक्यते इत्याक्षिपति॥

श्रुतेस्तु शब्दमूलत्वात्॥ २७॥

तुशब्देनाक्षेपं परिहरति। न खल्वस्मत्पक्षे कश्चिदपि दोषोऽस्ति। न तावत् कृत्स्नप्रसक्तिरस्ति। कुतः श्रुतेः।

दपरिणतोऽभविष्यत्। उक्तश्रुतिभ्यो निरवयवत्वसिद्धेः फलितं दोषमाह। ततश्चेति। यदा परिणामव्यतिरेकेण मूलब्रह्मात्मनाऽस्ति तदात्मद्रष्टव्य इत्युपदेशोऽर्थशून्यः स्यादिति दोषान्तरमाह। द्रष्टव्येति ब्रह्मणः परिणामात्मना जन्मनाशाङ्गीकारेऽजोऽमर इति श्रुतिविरोधश्चेत्याह। अजत्वादीति। सावयवत्वपक्षमाशङ्क्य सूत्रशेषेण परिहरति। अथेत्यादिना॥

परिणामपक्षे दुर्घट इति यदुक्तं तदस्मदिष्टमेवेति विवर्तवादे सिद्धान्तयति। श्रुतेरिति। स्वपक्षे पूर्वोक्तदोषद्वयं नास्तीति सूत्रयोजनया दर्शयति। तुशब्देनेत्यादिना। ईक्षितृत्वेन व्याकर्तृत्वेन चेक्षणीय

यथैव हि ब्रह्मणो जगदुत्पत्तिः श्रूयते, एवं विकारव्यतिरेकेणापि ब्रह्मणोऽवस्थानं श्रूयते, प्रकृतिविकारयोर्भेदेन व्यपदेशात् 'सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति 'तावानस्य महिमातो ज्यायांश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि' इति चैवंजातीयकात्, तथा हृदयायतनत्ववचनात्, सत्सम्पत्तिवचनाच्च। यदि च कृत्स्नं ब्रह्म कार्यभावेनोपयुक्तं स्यात् सता सोम्य तदा सम्पन्नो भवति' इति सुषुप्तिगतं विशेषणमनुपपन्नं स्यात्, विकृतेन ब्रह्मणा नित्यं सम्पन्नत्वात्, अविकृतस्य च ब्रह्मणोऽभावात्, तथेन्द्रियगोचरत्वप्रतिषेधात् ब्रह्मणो विकारस्येन्द्रियगोचरत्वोपपत्तेः, तस्मादस्त्यविकृतं ब्रह्म। न च निरवयवशब्दव्याकोपोऽस्ति, श्रूयमाणत्वादेव निरवयवत्वस्याप्यभ्युपगम्यमानत्वात्। शब्दमूलञ्च ब्रह्म शब्दप्रमाणकं नेन्द्रियादिप्रमाणकं यथाशब्दमभ्युपगन्तव्यं। शब्दश्चोभयमपि ब्रह्मणः प्रतिपादयकृत्स्नप्रसक्तिं निरवयवताञ्च। लौकिकानामपि मणिमन्त्रौ-

---

कर्त्तव्यप्रपञ्चात् पृथगीश्वरसत्त्वश्रुतेर्न कृत्स्नप्रसक्तिरित्याह। सेयं देवता। न्यूनाधिकभावेनापि पृथक्सत्त्वं श्रुतमित्याह। तावानिति। इतस्त्यविकृतं ब्रह्मेत्याह। तथेति। स वा एष आत्मा हृदीति श्रुतेरस्ति रातिरिक्तं ब्रह्म। तदेति सुषुप्तिकालरूपविशेषणाच्चेत्यर्थः। लिङ्गान्तह। तथेन्द्रियेति। भूम्यादेर्विकारस्येन्द्रियगोचरत्वान्न चक्षुषा त इत्यादिश्रुत्या ब्रह्मणस्तत्प्रतिषेधादवाङ्मनसगोचरत्वश्रुतेश्चास्ति स्थं ब्रह्मेत्यर्थः। कृत्स्नप्रसक्तिदोषो नास्तीत्युक्त्वा द्वितीयदोषोऽपि

षधीप्रभृतीनां देशकालनिमित्तवैचित्र्यवशाच्छक्तयो विरुद्धानेककार्यविषया दृश्यन्ते, ता अपि तावन्नोपदेशमन्तरेण केवलेन तर्केणावगन्तुं शक्यन्ते अस्य वस्तुन एतावत्य एतत्सहाया एतद्विषया एतत्प्रयोजनाश्च शक्तय इति, किमुताचिन्त्यप्रभावस्य ब्रह्मणो रूपं विना शब्देन न निरूप्येत। तथाहुः पौराणिकाः-

'अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्।
प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणं' ॥ इति ।

तस्माच्छब्दमूल एवातीन्द्रियार्थयाथात्म्याधिगमः । ननु शब्देनापि न शक्यते विरुद्धोऽर्थः प्रत्याययितुं, निरवयवञ्च ब्र परिणमते न च कृत्स्नमिति । यदि निरवयवं ब्रह्म स्यान्नैव परिणमेत, कृत्स्नमेव वा परिणमेत । अथ केनचिद्रूपेण परिणमे केनचिद्रूपेणावतिष्ठेतेति* रूपभेदकल्पनात् सावयवमेव प्र

नास्तीत्याह । न चेति । ननु ब्रह्म कार्यात्मनाप्यस्ति, पृथगप्यस्ति चे सावयवत्वं दुर्वारं, निरवयवस्यैकस्य द्विधा सत्त्वायोगात्, अतो यद्द्विधा भूतं तत्सावयवमिति तर्कविरुद्धं ब्रह्मणो निरवयवत्वमिति विवर्तम जानतः शङ्कां गूढाशय एव परिहरति । शब्दमूलत्वेति । यदा लौ किकानां प्रत्यक्षदृष्टानामपि शक्तिरचिन्त्या तदा शब्दैकसमधिग म्यस्य ब्रह्मणः किमु वक्तव्यं । अतो ब्रह्मणो निरवयवत्वं द्विधाभावश्चे त्युभयं यथाशब्दमभ्युपगन्तव्यं, न तर्केण बाधनीयमित्यर्थः । प्रकृतिभ्यः प्रत्यक्षदृष्टवस्तुस्वभावेभ्यो यत्परं विलक्षणं केवलोपदेशगम्यं तदचिन्त्य स्वरूपमिति स्मृत्यर्थः । आशयानवबोधेन शङ्कते । ननु शब्देनापीति यदा ब्रह्म परिणामीत्येकदेशिनामियं सिद्धान्तसूत्रव्याख्या दर्शितं

* इतीति वर्ध० पु० नास्ति ।

ज्येत। क्रियाविषये हि 'अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णाति' इत्येवंजातीयकायां विरोधप्रतीतावपि विकल्पाश्रयणं विरोधपरिहारकारणं भवति पुरुषतन्त्रत्वादनुष्ठानस्य। इह तु विकल्पाश्रयणेनापि न विरोधपरिहारः सम्भवति अपुरुषतन्त्रत्वाद्वस्तुनः, तस्माद्दुर्घटमेतदिति। नैष दोषः, अविद्याकल्पितरूपभेदाभ्युपगमात्। न ह्यविद्याकल्पितेन रूपभेदेन सावयवं वस्तु सम्पद्यते। न हि तिमिरोपहतनयनेनानेक इव चन्द्रमा दृश्यमानोऽनेक एव भवति। अविद्याकल्पितेन च नामरूपलक्षणेन रूपभेदेन व्याकृताव्याकृतात्मकेन तत्त्वान्यत्वाभ्यामनिर्वचनीयेन ब्रह्मपरिणामादिसर्वव्यवहारास्पदत्वं प्रतिपद्यते, पारमार्थिकेन च रूपेण सर्वव्यवहारातीतमपरिणतमवतिष्ठते। वाचारम्भणमात्रत्वाच्चाविद्याकल्पितस्य नामरूपभेदस्य न

ामाक्षिपति। नन्विति। शब्दस्य योग्यताज्ञानसापेक्षत्वादित्यर्थः। नन ह्म सावयवं निरवयवं वेति विकल्पाश्रयणे सर्वश्रुतिसमाधानं स्याद्यत आह। क्रियेति। निरवयवत्वे ब्रह्मणः प्रकृतित्वश्रुतिविरोधः ावयवत्वे निरवयवत्वशब्दविरोधः, विकल्पस्य वस्तुन्ययुक्तः, अतः कारान्तरानुपलम्भाच्छ्रुतीनां प्रामाण्यं दुर्घटमिति प्राप्ते स्वाशयद्घाटयति। नैष दोष इति। निरवयवस्य वस्तुनः कूटस्थस्याप्यवि-या कल्पितनामरूपविकाराङ्गीकारात् दुर्घटत्वदोषो नास्ति वास्तवकूटस्थस्य कल्पितविकारप्रकृतित्वेनाविरोधादित्यर्थः। रूपभेदाङ्गीकारे सावयवत्वं स्यादित्याशङ्क्योक्तं विवृणोति। न हीत्यादिना। त्वप्रसक्तिं निरस्य दोषान्तरं निरस्यति। वाचारम्भणेति। ननिष्प्रपञ्चस्य परिणामस्य कथं मिथ्यात्मत्वं तत्राह। न चेयमिति।

निरवयवत्वं ब्रह्मणः कुप्यति । न चेयं परिणामश्रुतिः परिणामप्रतिपादनार्था, तत्प्रतिपत्तौ फलानवगमात् । सर्वव्यवहारहीनब्रह्मात्मभावप्रतिपादनार्था त्वेषा, तत्प्रतिपत्तौ फलावगमात् 'स एष नेति नेत्यात्मा' इत्युपक्रम्याह 'अभयं वै जनक प्राप्तोऽसि' इति, तस्मादस्मत्पक्षे न कश्चिदपि दोषप्रसङ्गोऽस्ति ॥

आत्मनि चैवं विचित्राश्च हि ॥ २८ ॥

अपि च नैवात्र विवदितव्यं कथमेकस्मिन् ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिः स्यादिति, यतः आत्मन्यपि एकस्मिन् स्वप्नदृशि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिः पठ्यते 'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान्रथयोगान् पथः सृजते' इत्यादिना । लोकेऽपि देवादिषु मायाव्यादिषु च स्वरूपानुपमर्देनैव विचित्रा हस्त्यश्वादिसृष्टयो दृश्यन्ते तथैकस्मिन्नपि ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिर्भविष्यतीति ॥

निष्प्रपञ्चब्रह्मधीशेषत्वेन सृष्टिरनूद्यते न प्रतिपाद्यते इत्यसकृदावेदितं, अतो विवर्तवादेन कश्चिद्दोष इत्युपसंहरति । तस्मादिति ॥

पूर्वावस्थानाशेनावस्थान्तरं परिणामः, यथा दुग्धस्य दधिभाव पूर्वरूपानुपमर्देनावस्थान्तरं विवर्तः, यथा शुक्तेः रजतभावः । तत्र ब्रह्मणो विवर्तोपादानत्वं स्वप्नसाक्षिदृष्टान्तेन द्रढयन्मायावादं स्फुटयति सूत्रकारः । आत्मनि चेति । रथयोगाः अश्वाः, किञ्च त्वत्पक्षप्रसक्त्यादीनां साङ्ख्यादिपक्षेऽपि दोषत्वान्नास्मान् प्रत्युद्भावनीयत्वं ।

*स्वपक्षदोषाच्च ॥ २९ ॥

परेषामप्येष समानः स्वपक्षदोषः, प्रधानवादिनोऽपि हि निरवयवमपरिच्छिन्नं शब्दादिहीनं प्रधानं सावयवस्य परिच्छिन्नस्य शब्दादिमतः कार्यस्य कारणमिति स्वपक्षस्तत्रापि कृत्स्नप्रसक्तिर्निरवयवत्वात् प्रधानस्य प्राप्नोति निरवयवत्वाभ्युपगमकोपो वा। ननु नैव तैर्निरवयवं प्रधानमभ्युपगम्यते, सत्त्वरजस्तमांसि हि त्रयो गुणाः, तेषां साम्यावस्था प्रधानं तैरवयवैस्तत् सावयवमिति, नैवंजातीयकेन सावयवत्वेन प्रकृतो दोषः परिहर्तुं पार्यते, यतः सत्त्वरजस्तमसामपि एकैकस्य समानं निरवयवत्वं एकैकमेव चेतरद्वयानुगृहीतं सजातीयस्य प्रपञ्चस्योपादानमिति समानत्वात् स्वपक्षदोषप्रसङ्गस्य।

यस्चोभयोः समो दोष इति न्यायादित्याह सूत्रकारः। स्वपक्षेति। धानस्य निरवयवत्वे कृत्स्नप्रसक्तिः सावयवत्वे च निरवयवत्वाभ्युगमविरोध इत्यत्र शङ्कते। नन्विति। किं साम्यावस्था गुणानां विारः समुदायो वा, आद्ये तस्या न मूलप्रकृतित्वं विकारत्वात्, द्वित प्रपञ्चाभावः, समुदायस्यावस्तुत्वेन मूलाभावात्। अथ निरवयवा णा एव विविधपरिणामानां प्रकृतिरिति चेत्, तर्हि कृत्स्नप्रसक्तिलोच्छेदो दुर्वार इत्यभिप्रेत्य परिहरति। नैवमित्यादिना। इति तः अतः समानत्वान्न वयं पर्यनुयोज्या इत्यन्वयः। प्रत्येकं सत्त्वादिमितरगुणद्वयसचिवं निरवयवं यद्युपादानं तर्हि कृत्स्नस्योपादानस्य कार्यरूपत्वप्रसक्तेर्मूलोच्छेद इत्युक्ते निरवयवत्वसाधकतर्काभासत्वाद्गुणानां सावयवत्वमेव परिणामित्वेन मृदादिवदतो न स्वप्रसक्तिरेकदेशपरिणामसम्भवादिति शङ्कते। तर्केति। एत-

---

* स्वपक्ष इति वर्ध० पाठः।

तर्काप्रतिष्ठानात् सावयवत्वमेवेति चेत्, एवमप्यनित्यत्वादिदोषप्रसङ्गः। अथ शक्तय एव कार्यवैचित्र्यसूचिता अवयवा इत्यभिप्रायः, तास्तु ब्रह्मवादिनोऽप्यविशिष्टाः, तथा अणुवादिनोऽप्यणुरण्वन्तरेण संयुज्यमानो निरवयवत्वाद्यदि कार्त्स्न्येन संयुज्येत ततः प्रथिमानुपपत्तेरणुमात्रत्वप्रसङ्गः। अथैकदेशेन संयुज्येत तथापि निरवयवत्वाभ्युपगमकोप इति स्वपक्षेऽपि समान एष दोषः। समानत्वाच्च नान्यतरस्मिन्नेव पक्षे उपक्षेप्तव्यो भवति। परिहृतस्तु ब्रह्मवादिना स्वपक्षे दोषः॥

सर्वोपेता च तद्दर्शनात्॥३०॥

एकस्यापि ब्रह्मणो विचित्रशक्तियोगादुपपद्यते, विचित्रो विकारप्रपञ्च इत्युक्तं, तत्पुनः कथमुपगम्यते विचित्रशक्ति-

---

दोषाभावेऽपि दोषान्तरं स्यादिति परिहरति। एवमपीति। न गुणानामवयवास्तन्तुवदारम्भका न भवन्ति किन्तु कार्यवैचित्र्यानुमितास्तद्गताः शक्तय इत्याशङ्क्य मायिकशक्तिभिर्ब्रह्मणोऽपि सावयवत्वतुल्यमित्याह। अथेत्यादिना। अनुवादेऽपि दोषसाम्यमाह। तथेति साङ्ख्यवद्दोषः समान इति सम्बन्धः। निरवयवयोः परमाण्वोः संयोगो व्याप्यवृत्तिर्वा, आद्ये तत्कार्यस्य द्व्यणुकस्यैकपरमाणुमात्रत्वापत्तिः प्रथिम्नोऽधिकपरिमाणस्यानुपपत्तेः। न ह्यणोरण्वन्तरेणोपर्यधः पार्श्वतश्च व्याप्तौ ततोऽधिकद्रव्यं सम्भवति। द्वितीये परमाण्वोः सावयवत्वापत्तिरित्यर्थः। ननु त्वं चोर इत्युक्ते त्वमपि चोर इति वद्दोषसाम्योक्तिरयुक्तेत्यत आह। परिहृतस्त्विति।

उक्तं हि मायावादे स्वप्नवत् सर्वं सामञ्जस्यं, अतो निरवयवे ब्रह्मणि समन्वयस्याविरोध इति सिद्धं। सर्वोपेता माया शक्तिमता ब्रह्मणा जगत्

युक्तं परं ब्रह्मेति, तदुच्यते, सर्वोपेता च तद्दर्शनात्। सर्वशक्तियुक्ता च परा देवतेत्यवगन्तव्यं, कुतः, तद्दर्शनात्। तथा हि दर्शयति श्रुतिः सर्वशक्तियोगं परस्या देवतायाः 'सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः सत्यकामः सत्यसङ्कल्पो यः सर्वज्ञः सर्वविदेतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' इत्येवंजातीयका॥

विकरणत्वान्नेति चेत् तदुक्तं॥ ३१॥

स्यादेतत्, विकरणां परां देवतां शास्ति शास्त्रं 'अचक्षुष्कमश्रोत्रमवागमनाः' इत्येवंजातीयकं, कथं सा सर्वशक्तियुक्तापि सती कार्याय प्रभवेत्, देवादयो हि चेतनाः सर्वशक्तियुक्ता अपि सन्त आध्यात्मिककार्यकरणसम्पन्ना एव तस्मै तस्मै कार्याय प्रभवन्तो विज्ञायन्ते, कथञ्च 'नेति नेति' इति प्रतिषिद्धसर्वविशेषाया देवतायाः सर्वशक्तियोगः सम्भवेदिति चेत्, यदत्र

गं वदतः समन्वयस्याशरीरस्य न मायेति न्यायेन विरोधोऽस्ति न वेति न्देहे न्यायस्यानाभासत्वादस्तीति पूर्वपक्षे पूर्वोक्तशक्तिमत्त्वसमर्थनादेविषयत्वं सङ्गतिं वदन् सिद्धान्तसूत्रं व्याचष्टे। एकस्येत्यादिना। पूर्वापरपक्षयोर्विरोधाविरोधौ फलमित्युक्तमेवापादसमाप्तेरवगन्तव्यं। अभ्यात्तः अभितो व्याप्तः, अवाकी वागिन्द्रियशून्यः, अनादरो निष्कामः॥

पूर्वपक्षन्यायमनूद्य दूषयति। विकरणत्वादिति। देवादिचेतनानां क्तानामपि देहाभिमाने सत्येव कर्तृत्वं दृष्टं तदभावे सुषुप्ते तन्न ष्टं, अतो ब्रह्मणः शक्तत्वेऽप्यदेहत्वान्न कर्तृत्वं नाप्यदेहस्य शक्तिः

वक्तव्यं तत्पुरस्तादेवोक्तं। अत्यवगाह्यमेवेदमतिगम्भीरं परं ब्रह्म न तर्कावगाह्यं, न च यथैकस्य सामर्थ्यं दृष्टं तथान्यस्यापि सामर्थ्येन भवितव्यमिति नियमोऽस्तीति प्रतिषिद्धसर्वविशेषस्यापि ब्रह्मणः सर्वशक्तियोगः सम्भवतीत्येतदप्यविद्याकल्पितरूपभेदोपन्यासेनोक्तमेव। तथा च शास्त्रं-

"अपाणिपादो जवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः"।

इत्यकरणस्यापि ब्रह्मणः सर्वसामर्थ्ययोगं दर्शयति।

न प्रयोजनवत्त्वात्॥ ३२॥

अन्यथा पुनश्चेतनकर्तृकत्वं जगत आक्षिपति, न खलु चेतनः परमात्मेदं जगद्बिम्बं विरचयितुमर्हति। कुतः प्रयोजनवत्त्वात् प्रवृत्तीनां। चेतनो हि लोके बुद्धिपूर्वकारी पुरुषः प्रवर्तमानो न मन्दोपक्रमामपि तावत् प्रवृत्तिमात्मप्रयोजनानुपयोगिनीमारभमाणो दृष्टः किमुत गुरुतरसंरम्भां। भवति च लोक-

---

सम्भवतीति शङ्कार्थः। विकरणस्य जीवस्य कर्तृत्वासम्भवेऽपीश्वरस्य सम्भवतीति देवादिवदपि लोक इत्यत्रोक्तं, तत्र शरीरस्य कल्पितस्य मायाश्रयत्वायोगात् निर्विशेषचिन्मात्रस्यैव मायाधिष्ठानत्वं युक्तमिति समाधानार्थः॥

न प्रयोजनवत्त्वात्। परिपूर्णात् ब्रह्मणो जगत्सर्गं वदन् समन्वयो विषयः, स किमभ्रान्तश्चेतनो यः स निष्फलं वस्तु न रचयतीति न्यायेन विरुध्यते न वेति सन्देहे पूर्वमदेहस्यापि श्रुतिबलात् शक्तिवा

प्रसिद्ध्यनुवादिनी श्रुतिः 'न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियं भवति' इति। गुरुतरसंरम्भा चेयं प्रवृत्तिः यदुच्चावचप्रपञ्चं जगदिदं विरचयितव्यं। यदीयमपि प्रवृत्तिः चेतनस्य परमात्मन आत्मप्रयोजनोपयोगिनी परिकल्प्येत परितृप्तत्वं परमात्मनः श्रूयमाणं बाध्येत, प्रयोजनाभावे वा प्रवृत्त्यभावोऽपि स्यात्। अथ चेतनोऽपि सन् उन्मत्तो बुद्ध्यपराधादन्तरेणैवात्मप्रयोजनं प्रवर्तमानो दृष्टस्तथा परमात्मापि प्रवर्तिष्यत इत्युच्येत, तथा सति सर्वज्ञत्वं परमात्मनः श्रूयमाणं बाध्येत, तस्मादश्लिष्टा चेतनात् सृष्टिरिति॥

लोकवत्तु लीलाकैवल्यं॥ ३३॥

तुशब्देनाक्षेपं परिहरति। यथा लोके कस्यचिदाप्तैषणस्य राज्ञो राजामात्यस्य वा व्यतिरिक्तं किञ्चित् प्रयोजनम-

---

र्तृत्वमुक्तं तदाक्षेपसङ्गत्या पूर्वपक्षसूत्रं व्याचष्टे। अन्यथेत्यादिना। ईश्वरस्य फलाभावेऽपि परप्रयोजनाय सृष्टौ प्रवृत्तिरस्त्वित्याशङ्क्य श्रुतिमाह। भवति चेति। या प्रेक्षावत्प्रवृत्तिः सा स्वफलार्थेति लोकप्रसिद्धिः। न च दयालुप्रवृत्तौ व्यभिचारस्तस्यापि परदुःखासहनप्रयुक्तस्वचित्तव्याकुलतानिवृत्त्यर्थित्वादिति भावः। किञ्च गुरुत्वादायासस्य फलं वाच्यमित्याह। गुरुतरेति। तर्हि अस्त्वीश्वरस्यापि प्रवृत्तिः स्वार्थैवेत्यत आह। यदीयमपीति। स्वार्थत्वे प्रवृत्त्यभावः पूर्वोक्तः स्यादित्यर्थः। ईश्वरः प्रेक्षावान्न भवतीत्याशङ्क्य श्रुतिविरोधमाह। अथेत्यादिना। बुद्धेरपराधो विवेकाभावः॥

उक्तन्यायस्य राजलीलायां व्यभिचार इति सिद्धान्तसूत्रं व्याचष्टे।

नभिसन्धाय केवलं लीलारूपाः प्रवृत्तयः क्रीडाविहारेषु भवन्ति, यथा चोच्छ्वासप्रश्वासादयोऽनभिसन्धाय बाह्यं किञ्चित् *प्रयोजनान्तरं स्वभावादेव भवन्ति, एवमीश्वरस्याप्यनपेक्ष्य किञ्चित् प्रयोजनान्तरं स्वभावादेव केवलं लीलारूपा प्रवृत्तिर्भविष्यति। न हीश्वरस्य प्रयोजनान्तरं निरूप्यमाणं न्यायतः श्रुतितो वा सम्भवति, न च स्वभावः पर्यनुयोक्तुं शक्यते। यद्यप्यस्माकमियं जगद्बिम्बविरचना गुरुतरसंरम्भेवाभाति तथापि परमेश्वरस्य लीलैव केवलेयं अपरिमितशक्तित्वात्। यदि नाम लोके लीलास्वपि किञ्चित् सूक्ष्मं प्रयोजनं उत्प्रेक्षेत तथापि नैवात्र किञ्चित् प्रयोजनमुत्प्रेक्षितुं शक्यते, आप्तकामश्रुतेः। नाप्यप्रवृत्तिः उन्मत्तप्रवृत्तिर्वा सृष्टिश्रुतेः सर्वज्ञश्रुतेश्च। न चेयं

तुच्छत्वेनेति। व्यतिरिक्तं लीलातिरिक्तं, क्रीडारूपा विहारा येषु रम्यदेशेषु तेष्वित्यर्थः। कदाचिद्राजादीनां लीलाया अपि किञ्चित् फलं सुखोल्लासादिकं सम्भाव्येत तथापि निश्वासादौ प्रेक्षावत्प्रवृत्तित्वमस्ति न तु स्वस्य तत्रोद्देश्यं फलं किञ्चिदस्तीति व्यभिचारस्थलान्तरमाह यथा चेति। प्राणस्य स्वभावश्चलत्वं प्रारब्धं वा उच्छ्वासादिहेतुः, ईश्वरस्य स्वभावः कालकर्मसहितमाया। नन्वीश्वरस्य जगद्रचनायां केवललीलात्वं किमित्युच्यते फलमेव किञ्चित् कल्प्यतां तत्राह। न हीति। आप्तकामत्वव्याघातादित्यर्थः। नन्वीश्वरस्तूष्णीं किमिति न तिष्ठति किमिति स्वस्याफलां परेषां दुःखावहां सृष्टिं करोति तत्राह। न च स्वभाव इति। कालधर्मादिसामग्र्यां सत्यां सृष्टेरपरिहार्यत्वादित्यर्थः यदुक्तं गुरुतरायासत्वात् फलं वाच्यमिति तत्र हेत्वसिद्धिमाह

---

* प्रयोजनमिति वर्ध०।

परमार्थविषया सृष्टिश्रुतिः, अविद्याकल्पितनामरूपव्यवहारगोचरत्वात् ब्रह्मात्मभावप्रतिपादनपरत्वाच्चेत्येतदपि न प्रस्मर्तव्यं॥

वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति ॥ ३४ ॥

पुनश्च जगज्जन्मादिहेतुत्वमीश्वरस्याक्षिप्यते स्थूणानिखननन्यायेन प्रतिज्ञातस्यार्थस्य दृढीकरणाय। नेश्वरो जगतः कारणमुपपद्यते, कुतः वैषम्यनैर्घृण्यप्रसङ्गात्। कांश्चिदत्यन्तसुखभाजः करोति देवादीन्, कांश्चिदत्यन्तदुःखभाजः करोति पश्वादीन् *कांश्चिन्मध्यमभाजो मनुष्यादीनित्येवं विषमां सृष्टिं निर्मिमाणस्येश्वरस्य पृथग्जनस्येव रागद्वेषोपपत्तेः श्रुतिस्मृत्यवधारितस्वच्छत्वादीश्वरस्वभावविलोपः प्रसज्येत। तथा खलजनैरपि जुगुप्सितं निर्घृणत्वमतिक्रूरत्वं दुःखयोगविधानात्

यद्यपीत्यादिना। अल्पप्रवृत्तेरपि फलं वाच्यं लोके तथा दर्शनादित्यादितर्कस्यागमबाधमाह। यदि नामेति। सृष्टिश्रुतेरप्रवृत्तिर्नास्ति, सर्वज्ञत्वश्रुतेरुन्मत्तता नास्तीति विभागः स्वप्नसृष्टिवदस्याः सृष्टेर्मायामात्रत्वान्न फलापेक्षेत्याह। न चेयमिति। न च निष्फलसृष्टिश्रुतीनामानर्थक्यं सफलब्रह्मधीशेषत्वेनार्थवत्त्वादित्युक्तं न विस्मर्तव्यमित्यर्थः॥

वैषम्यनैर्घृण्ये न। निर्दोषाद्ब्रह्मणो जगत्सर्गं ब्रुवन् समन्वयो विषयः, स किं यो विषमकारी स दोषवानिति न्यायेन विरुध्यते न वेति सन्देहे पूर्वत्र लीलया यत्स्रष्टृत्वमुक्तं तदेव कर्मादिसापेक्षस्य न युक्तं अनीश्वरत्वापत्तेः, निरपेक्षत्वे रागादिदोषापत्तेरित्याक्षेपसङ्गत्या पूर्वपक्षयति। पुनश्चेत्यादिना। ब्रह्मैव जगत्कारणमिति जन्मा-

---

*कांश्चिन्मध्यमभोगभाजः इति वर्ध० सो० का०।

सर्वप्रजोपसंहरणाच्च प्रसज्येत, तस्माद्वैषम्यनैर्घृण्यप्रसङ्गान्नेश्वरः कारणमित्येवं प्राप्ते ब्रूमः। वैषम्यनैर्घृण्ये नेश्वरस्य प्रसज्येते, कस्मात् सापेक्षत्वात्। यदि हि निरपेक्षः केवल ईश्वरो विषमां सृष्टिं निर्मिमीते स्यातामेतौ दोषौ वैषम्यं नैर्घृण्यञ्च, न तु निरपेक्षस्य निर्मातृत्वमस्ति, सापेक्षो हीश्वरो विषमां सृष्टिं निर्मिमीते। किमपेक्षत इति चेत्, धर्माधर्मावपेक्षत इति वदामः। अतः सृज्यमानप्राणिधर्माधर्मापेक्षा विषमा सृष्टिरिति नायमीश्वरस्यापराधः। ईश्वरस्तु पर्ज्जन्यवत् द्रष्टव्यः। यथा हि पर्ज्जन्यो व्रीहियवादिसृष्टौ साधारणं कारणं भवति, व्रीहियवादिवैषम्ये तु तत्तद्बीजगतान्येवासाधारणानि सामर्थ्यानि कारणानि भवन्ति, एवमीश्वरो देवमनुष्यादिसृष्टौ साधारणं कारणं भवति, देवमनुष्यादिवैषम्ये तु तत्तज्जीवगतान्येवासाधारणानि कर्माणि कारणानि भवन्ति, एवमीश्वरः सापेक्षत्वान्न वैषम्यनैर्घृण्याभ्यां दूष्यति, कथं पुनरवगम्यते सापेक्ष ईश्वरो

दिसूत्रे प्रतिज्ञातोऽर्थः। पृथग्जनः पामरः, निरवद्यं निरञ्जनमिति श्रुतिः, न मे द्वेष्योऽस्ति न प्रिय इति स्मृतिः, स्वच्छत्वादित्यादिपदेन कूटस्थत्वग्रहः, स्वच्छत्वादिश्चासावीश्वरस्वभावश्चेति विग्रहः, निमित्तमनपेक्ष्य विषमकारित्वे वैषम्यादिदोषः स्यान्न त्वनपेक्षत्वमीश्वरस्यास्तीति सिद्धान्तयति। एवं प्राप्ते इत्यादिना। न च सापेक्षत्वे अनीश्वरत्वं, सेवामपेक्ष्य फलदातरि राज्ञीश्वरत्वानपायात्। ननु तर्हि धर्माधर्माभ्यामेव विचित्रा सृष्टिरस्तु किमीश्वरेणेत्यत आह। ईश्वरस्तु पर्ज्जन्यवदिति। साधारणहेतुसहितस्यैवासाधारणहेतोः कार्यकारित्वान्नेश्वर-

चमध्यमोत्तमं संसारं निर्मिमीत इति। तथा हि दर्शयति तिः, 'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य न्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो निनीषते' ति। 'पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन' इति च। तिरपि प्राणिकर्मविशेषापेक्षमेवेश्वरस्यानुग्रहीतृत्वं निग्रहीतृ- द्म दर्शयति 'ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहं' वंजातीयका ॥

न कर्माविभागादिति चेन्नाऽनादित्वात् ॥ ३५ ॥

'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं' इति प्राक् सृष्टे- भागावधारणान्नास्ति कर्म यदपेक्षा विषमा सृष्टिः स्यात्। त्तरकालं हि शरीरादिविभागापेक्षं कर्म कर्मापेक्षश्च शरी- दिविभाग इति इतरेतराश्रयत्वं प्रसज्येत। अतो विभागदूर्द्धं ापेक्ष ईश्वरः प्रवर्त्ततां नाम, प्राक् तु विभागाद्वैचित्र्यनिमि- य कर्मणोऽभावात्तुल्यैवाद्या सृष्टिः प्राप्नोतीति चेत्, नैष दोषः,

---

यं, अन्यथा पर्ज्जन्यवैयर्थ्यप्रसङ्गादिति भावः। यं जनमुन्निनीषते नेतुमिच्छति तं साधु कारयति, एष ईश्वर इत्यन्वयः। न च ज्जनं साधु कञ्चिदसाधु कर्म कारयतो वैषम्यं तदवस्थमिति , अनादिपूर्वार्जितसाध्वसाधुवासनया स्वभावेन जनस्य तत्त- ु प्रवृत्तावीश्वरस्य साधारणहेतुत्वात्, अतोऽनवद्य ईश्वर इति ॥

थमसर्गस्य वैषम्यहेतुकर्माभावादेकरूपत्वं स्यात् तथा तदुत्तर- नामपीत्याक्षिप्य समाधत्ते सूत्रकारः। न कर्मेति। प्रथमसृष्टेः

अनादित्वात् संसारस्य । भवेदेष दोषो यद्यादिमानयं संसारः स्यात्, अनादौ तु संसारे वीजाङ्कुरवद्धेतुहेतुमद्भावेन कर्मणः सर्गवैषम्यस्य च प्रवृत्तिर्न विरुध्यते। कथं पुनरवगम्यते अनादिरेष संसार इति, अत उत्तरं पठति ॥

उपपद्यते चाप्युपलभ्यते च ॥ ३६ ॥

उपपद्यते च संसारस्यानादित्वं, आदिमत्त्वे हि संसारस्य अकस्मादुद्भूतेर्मुक्तानामपि पुनः संसारोद्भूतिप्रसङ्गः अकृताभ्यागमप्रसङ्गश्च, सुखदुःखादिवैषम्यस्य निर्निमित्तत्वात्। न चेश्वरो वैषम्यहेतुरित्युक्तं। न चाविद्या केवला वैषम्यस्य कारणं एकरूपत्वात्। रागादिक्लेशवासनाक्षिप्तकर्मापेक्षा त्वविद्या वैषम्यकरी स्यात्। न च कर्मान्तरेण शरीरं सम्भवति, न च शरीरमन्तरेण कर्म सम्भवतीतीतरेतराश्रयदोषप्रसङ्गः। अनादित्वे वीजाङ्कुरन्यायेनोपपत्तेर्न कश्चिद्दोषो भवति। उपलभ्यते

पश्चाद्भाविकर्मकृतं वैषम्यमित्याशङ्क्यान्योन्याश्रयमाह। सृष्ट्युत्तरं आद्या सृष्टिरित्युपलक्षणं आदावेकरूपत्वे मध्ये विषमकर्मोत्पत्त्यभावेनोत्तरसृष्टानामपि तुल्यत्वस्य दुर्वारत्वादिति द्रष्टव्यं। परिसुगमः, प्रथमसर्गः कश्चिन्नास्तीत्यत्र प्रमाणं पृच्छति। कथं पुनरिति।

उपपत्तिसहितश्रुत्यादिकं प्रमाणमिति सूत्रव्याख्यया दर्शयति उपपद्यते इति। हेतुं विनैव सर्गाङ्गीकारे ज्ञानकर्मकाण्डवैयर्थ्यादित्यर्थः। ननु सुखादिवैषम्ये ईश्वरोऽविद्या वा हेतुरस्त्वित्याशङ्क्य दूषयति। नचेश्वर इत्यादिना। कस्तर्हि हेतुस्तत्राह। रागादीति। रागद्वेषमोहाः क्लेशास्तेषां वासनाभिराक्षिप्तानि कर्माणि धर्माधर्मरूपाणि, तदपेक्षा त्वविद्या सुखादिसर्गवैचित्र्यहेतुः

सारस्यानादित्वं श्रुतिस्मृत्योः। श्रुतौ तावत् 'अनेन जीवेनात्म-
ना' इति सर्गप्रमुखे शारीरमात्मानं जीवशब्देन प्राणधारणनि-
मित्तेनाभिलपन्ननादिः संसार इति दर्शयति। आदिमत्त्वे तु
न: *प्रागनवधारितः प्राणः स कथं प्राणधारणनिमित्तेन
जीवशब्देन सर्गप्रमुखेऽभिलप्येत। न च धारयिष्यतीत्यतोऽभि-
लप्येत, अनागताद्धि सम्बन्धादतीतः सम्बन्धो बलीयान् भवति
अभिनिष्पन्नत्वात्। 'सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्'
इति च मन्त्रवर्णः पूर्वकल्पसद्भावं दर्शयति। स्मृतावप्यनादित्वं
संसारस्योपलभ्यते। 'न रूपमस्येह तथोपलभ्यते नान्तो नचा-
दिर्न च सम्प्रतिष्ठा' इति। पुराणे चातीतानामनागतानाञ्च
कल्पानां न परिमाणमस्तीति स्थापितं॥

यासहकारित्वेन क्लेशकर्मणामनादिप्रवाहोऽङ्गीकर्तव्य इति भावः।
न सृष्टेः सादित्वे प्रथमशरीरस्योत्पत्तिर्न सम्भवति हेत्वभा-
त्, न च कर्म हेतुः शरीरात् प्राक् कर्मासम्भवात्, तस्मात् कर्मश-
रीरयोरन्योन्याश्रयपरिहाराय सर्वैरेव वादिभिः संसारस्यानादि-
त्वमङ्गीकार्यमित्याह। न चेति। सर्गप्रमुखे सृष्ट्यादौ प्रागधारितप्रा-
णोऽपि सन् प्रत्यगात्मभाविधारणनिमित्तेन जीवशब्देनोच्यतामित्य-
र्थः। न च धारयिष्यतीति। 'गृहस्थः सदृशीं भार्यामुपेयात्' इत्या-
दिवत्त्या भाविवृत्त्याश्रयणमिति भावः। अस्य संसारवृक्षस्य स्वरूपं
मिथ्या वेत्यपदेशं विना नोपलभ्यते, ज्ञानं विनान्तोऽपि नास्ति ना-
दिरप्युपलभ्यते असत्त्वादेव न च सम्प्रतिष्ठा मध्ये स्थितिः दृष्टनष्टस्व-
रूपादिति गीतावाक्यार्थः। संसारस्यानादित्वेऽपि मिथ्यात्वादेका-
द्वितीयमित्यवधारणमुपपन्नं। तस्मान्निरवद्ये ब्रह्मणि समन्वयावि-
रोध इति सिद्धं॥

---

* प्रागधारितेति टी० वर्ध० सो० का०।

सर्वधर्मोपपत्तेश्च ॥ ३७ ॥

चेतनं ब्रह्म जगतः कारणं प्रकृतिश्चेत्यस्मिन्नवधारिते वेदा
परैरुपक्षिप्तान् विलक्षणत्वादीन् दोषान् पर्यहार्षीदाचार्य
इदानीं परपक्षप्रतिषेधप्रधानं प्रकरणमारिप्समाणः स्वपक्ष
परिग्रहप्रधानं प्रकरणमुपसंहरति । यस्मादस्मिन् ब्रह्मणि
कारणे परिगृह्यमाणे प्रदर्शितेन प्रकारेण सर्वे कारणधर्म
उपपद्यन्ते 'सर्वज्ञं सर्वशक्ति महामायञ्च तद्ब्रह्म' इति तस्माद
नातिशङ्कनीयमिदमौपनिषदं दर्शनमिति ॥

इति श्रीमच्छारीरकमीमांसाभाष्ये श्रीमद्गोविन्दपूज्यपाद
शिष्यश्रीमच्छङ्करभगवत्पादकृतौ द्वितीयाध्यायस्य प्रथमपाद
समाप्तः ॥ * ॥

सर्वधर्मोपपत्तेश्च । निर्गुणस्य ब्रह्मणो जगदुपादानत्ववादिवेदान
समन्वयो विषयः, स किं यन्निर्गुणं तन्नोपादानं यथा रूपमि
न्यायेन विरुध्यते नवेति सन्देहे भवत्वीश्वरस्य विषमसृष्टिनिमित्त
तत्प्रयोजकस्य कर्मणः सत्त्वान्नतूपादानत्वं तद्व्यापकस्य सगुणत्व
भावादिति प्रत्युदाहरणेन प्राप्ते सिद्धान्तसूत्रतात्पर्यमाह । चेत
मिति । विवर्तोपादानत्वं निर्गुणस्याप्यविरुद्धं, अज्ञातत्वस्य भ्रमा
ष्ठानत्वप्रयोजकसत्त्वात्, सगुणत्वन्त्वव्यापकं शब्दादिगुणेषु नित्यत्वा
भ्रमदर्शनादिति भावः । यद्यपि सर्वज्ञत्वं सर्वशक्तित्वञ्च लोके कार
धर्मत्वेनाप्रसिद्धं तथापि यो यस्य कर्ता स तस्य सर्वस्य ज्ञाता शक्तश्चे
प्रसिद्धं, ईश्वरस्यापि सर्वकर्तृत्वश्रवणात् प्रसिद्ध्यनुसारेणार्थान्निर्
शयसर्वज्ञत्वं सर्वशक्तित्वञ्च सिध्यतीत्यभिसन्धायाह । सर्वज्ञं सर्व
क्तीति । महामायमिति कर्तृत्वोपादानत्वकथने सर्वशङ्कापङ्कक्षाल
योक्तं । तस्मादौपनिषदसिद्धान्ते न कश्चिद्दोष इति सिद्धं ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीगोविन्दानन्द-भग
त्पादकृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां द्वितीया
ध्यायस्य प्रथमपादः समाप्तः ॥ ※ ॥

ॐ परमात्मने नमः ।

प्राधानिक मतविचारः ।

रचनानुपपत्तेश्चानुमानम् ॥ १ ॥

यद्यपीदं वेदान्तवाक्यानामैदम्पर्यं निरूपयितुं शास्त्रं प्र-
त्तं न तर्कशास्त्रवत् केवलाभिर्युक्तिभिः कञ्चित् सिद्धान्तं
ाधयितुं दूषयितुं वा प्रवृत्तं, तथापि वेदान्तवाक्यानि
ाचक्षाणैः सम्यग्दर्शनप्रतिपक्षभूतानि साङ्ख्यादिदर्शनानि नि-
ाकरणीयानीति तदर्थः परः पादः प्रवर्तते । वेदान्तार्थनि-
यस्य च सम्यग्दर्शनार्थत्वात् तन्निर्णयेन स्वपक्षस्थापनं प्रथमं
तं तद्ध्यभ्यर्हितं परपक्षप्रत्याख्यानादिति । ननु मुमुक्षूणां
ाक्षसाधनत्वेन सम्यग्दर्शननिरूपणाय स्वपक्षस्थापनमेव केवलं
तुं युक्तं किं परपक्षनिराकरणेन परविद्वेषकारणेन । वाढमेवं

ॐ ब्रह्मणे नमः ।

साङ्ख्यतार्किकबौद्धाश्च जैनाः पाशुपतादयः ।
यस्य तत्त्वं न जानन्ति तं वन्दे रघुपुङ्गवं ॥ १ ॥

ब्रह्मणि सर्वधर्मोपपत्तिवत् प्रधानेऽपि तदुपपत्तिमाशङ्क्य निराचष्टे ।
नानुपपत्तेश्च नानुमानं । ननु मुमुक्षूणां वाक्यार्थनिर्णयप्रतिबन्ध-
ासाय वेदान्तानां तात्पर्यं निश्चेतुमिदं शास्त्रमारब्धं तच्च निर्दोष-
 निश्चितं, ततः परपक्षनिरासात्मकोऽयं पादोऽस्मिन् शास्त्रे न
तः, तन्निरासस्य मुमुक्ष्वनपेक्षितत्वादित्याक्षिपति । यद्यपीति । पर-
निराकरणं विना स्वपक्षस्थैर्यायोगात् तत् कर्तव्यमित्याह । तथा-
ि । तर्हि स्वपक्षस्थापनात् प्रागेव परपक्षप्रत्याख्यानं कार्यमित्यत
 । वेदान्तार्थेति । वेदान्ततात्पर्यनिर्णयस्य फलवज्ज्ञानकरणा-

तथापि महाजनपरिगृहीतानि महान्ति साङ्ख्यादितन्त्राणि सम्यग्दर्शनापदेशेन प्रवृत्तान्युपलभ्य भवेत् केषाञ्चिन्मन्दमतीनामेतान्यपि सम्यग्दर्शनायोपादेयानीत्यपेक्षा। तथा *युक्तिगाढत्वसम्भवेन सर्वज्ञभाषितत्वाच्च श्रद्धा च तेष्वित्यतस्तदसारतोपपादनाय प्रयत्यते। ननु 'ईक्षतेर्नाशब्दं' [अ०१।पा०१।सू०५] 'कामाच्च नानुमानापेक्षा' [अ०१।पा०१।सू०१८] 'एतेन सर्वे व्याख्याता व्याख्याताः' [अ०१। पा०४। सू०२८] इति च पूर्वत्रापि साङ्ख्यादिपक्षप्रतिषेधः कृतः किं पुनः कृतकरणेनेति। तदु

न्तर्भावादभ्यर्हितत्वं। ननु रागद्वेषकरणत्वात् परमतनिराकरणं कार्यमिति शङ्कते। नन्विति। तत्त्वनिर्णयप्रधाना खल्वियं कथारब्धा तत्त्वनिर्णयस्य परमतेष्वश्रद्धां विना न सिध्यति, सा च तेषु भ्रान्तित्वनिश्चयं विना न सिध्यति, स च इमं पादं विना नेति स्वसिद्धान्तसंरक्षणार्थत्वात् प्रधानसिद्ध्यर्थत्वादयं पादोऽस्मिन् शास्त्रे सङ्गतः सङ्गतत्वाद्वीतरागेणापि कर्तव्य इत्यभिसन्धायोक्ताङ्गीकारेण समाधत्ते वाढमित्यादिना। अपदेशेन व्याजेन, मन्दमतीनां तेषु श्रद्धानिमित्तानि बहूनि सन्तीति तन्निरासाय यत्नः क्रियत इत्यर्थः। स्वमतश्रद्धापरमतद्वेषौ तु प्रधानसिद्ध्यर्थत्वादङ्गीकृतौ, नाप्ययं †द्वेषः, परपक्षत्वबुद्धि निरासो द्वेषमावहति न तु तत्त्वनिर्णयेच्छया कृत इति मन्तव्यं। पौनरुक्त्यं शङ्कते। नन्वीक्षतेरिति। पूर्वं साङ्ख्यादीनां श्रुत्यर्थग्राहकतर्कनिरासादश्रौतत्वमुक्तं सम्प्रति श्रुत्यनपेक्षास्तदीयाः स्वतन्त्रयुक्तयो निरस्यन्त इत्यर्थभेदान्न पुनरुक्तिरित्याह। तदुच्यत इति। प्रधानमचेतनं जगदुपादानमिति साङ्ख्यसिद्धान्तोऽत्र विषयः, स किं प्रमाणमूलो भ्रान्तिमूलो वेति सन्देहे सर्वधर्मोपपत्तेस्त्वदुक्तधर्माणां प्रध

* युक्तिगाढत्वसम्भावना सर्वज्ञभाषितत्वश्रद्धा चेति वर्ध० का०।

† दोष इति सा० २ पु०।

च्यते। साङ्ख्यादयः स्वपक्षस्थापनाय वेदान्तवाक्यान्यप्युदाहृत्य स्वपक्षानुगुण्येनैव योजयन्तो व्याचक्षते, तेषां यद्व्याख्यानं तद्व्याख्यानाभासं न सम्यग्व्याख्यानमित्येतावत् पूर्वत्र कृतं, इह तु वाक्यनिरपेक्षः स्वतन्त्रस्तद्युक्तिप्रतिषेधः क्रियत इत्येष विशेषः। तत्र साङ्ख्या मन्यन्ते यथा घटशरावादयो भेदा मृदात्मतयाऽन्वीयमाना मृदात्मकसामान्यपूर्वका लोके दृष्टाः, तथा सर्वे एव बाह्याध्यात्मिका भेदाः सुखदुःखमोहात्मतयाऽन्वीयमानाः सुखदुःखमोहात्मकसामान्यपूर्वका भवितुमर्हन्ति। यत्तत्सुखदुःखमोहात्मकं सामान्यं तत् त्रिगुणं प्रधानं मृद्वदचेतनं चेतनस्य

म्भवात् तदेवोपादानमित्यादोषसङ्गत्या प्रमाणमूलत्वं दर्शयन् पूर्वपक्षमाह। तत्र साङ्ख्या इति। स्वसिद्धान्तज्ञानस्य परमतनिरासं त्युपजीव्यत्वात पादयोः सङ्गतिः परमतनिरासात्मकत्वात् सर्वेषाधिकरणानामेतत्पादसङ्गतिः, पूर्वपक्षे प्रमाणमूलमतविरोधादुक्तश्रुर्थसमन्वयासिद्धिः फलं सिद्धान्ते तत्सिद्धिरिति आपादं द्रष्टव्यं लक्ष्यातसमन्वयदार्ढ्यार्थत्वादस्य पादस्य श्रुतिसङ्गतिरिति विवेकः। न्वयन्त इति भेदा विकाराः, ये विकारा येनान्वितास्ते तत्प्रकृतिका ति व्याप्तिमाह। यथेति। सर्वं कार्यं सुखदुःखमोहात्मकवस्तुप्रकृतिकं दन्वितत्वात् घटादिवदित्यनुमानमाह। तथेति। किमर्थं प्रधानं परिमते तत्राह। चेतनस्येति। अर्थो भोगापवर्गरूपः, तदर्थं स्वभावत व प्रवर्तते न तु केनचिच्चेतनेन प्रेर्यते इत्यर्थः। तदुक्तं पुरुषार्थ एव तुः न केनचित् कार्यते करणमित्यनुमानान्तराणि तैरुक्तानि स्मायति। तथेति। उक्तं हि भेदानां परिमाणात् समन्वयात् शक्तितः वृत्तेश्च कार्यकारणविभागादविभागात् वैश्वरूप्यस्येत्यत्र कारिका- समन्वयादिति लिङ्गं व्याख्यातं, शिष्टानि व्याख्यायन्ते। तथा हि त्यादीनां भेदानां कारणं अव्यक्तमस्ति परिमितत्वात् घटवत्, न च ष्टान्ते साध्यवैकल्यं घटोत्पत्तेः प्रागनभिव्यक्तघटादिरूपकार्यविशिष्ट-

पुरुषस्यार्थं साधयितुं *प्रवृत्तं स्वभावभेदेनैव विचित्रेण विकारात्मना प्रवर्तत इति । तथा परिमाणादिभिरपि लिङ्गैस्तदेव प्रधानमनुमिमते । तत्र वदामः, यदि दृष्टान्तबलेनैवैतन्निरूप्यते नाचेतनं लोके चेतनानधिष्ठितं स्वतन्त्रं किञ्चिद्विशिष्टपुरुषार्थनिर्वर्तनसमर्थान् विकारान् विरचयत् दृष्टं । गेहप्रासादशयनासनविहारभूम्यादयो हि लोके प्रज्ञावद्भिः शिल्पिभिर्यथाकालं

त्वेन मृदोऽप्यव्यक्तत्वात् तथा घटादीनां कारणशक्तितः प्रवृत्तेर्महदादिकार्याणामपि कारणशक्तितः प्रवृत्तिर्वाच्या, तच्छक्तिमत्कारणमव्यक्तं किञ्च कारणात् कार्यस्य विभागो जन्म दृश्यते क्षितेर्मृत्तिका जायते तां घट इति । एवमविभागः प्रातिलोम्येन प्रलयो दृश्यते घटस्य मृत्तिकायां लयः तस्याः क्षितौ क्षितेरप्सु अपां तेजसीत्येतौ विभागाविभागौ वैश्वरूप्यस्य विचित्रस्य भावजातस्य दृश्यमानौ पृथक्पक्षीकृतौ क्वचित् कारणे विश्रान्तौ विभागत्वादविभागत्वाच्च मृदि घटविभागाविभागवदित्यर्थः । सिद्धान्तयति । तत्र वदाम इति । किमनुमानैः अचेतनप्रकृतिकत्वं जगतः साध्यते स्वतन्त्राचेतनप्रकृतिकत्वं वा, आद्ये सिद्धसाधनता, अस्माभिरनादित्रिगुणमायाङ्गीकारात्, द्वितीये घटादिदृष्टान्ते साध्याप्रसिद्धिरित्याह । यदीति । स्वतन्त्रमचेतनं प्रकृतिरित्येतत् दृष्टान्तबलेन तदा निरूप्येत यदि दृष्टान्तः †क्वचित् स्यात्, नतु दृष्टः क्वचित्त्यन्वयः । स्वतन्त्रपदार्थमाह । चेतनानधिष्ठितमिति । परकीयस्य साध्यस्याप्रसिद्धिमुक्त्वा सत्प्रतिपक्षं वक्तुं यद्विचित्ररचनात्मकं कार्यं तच्चेतनाधिष्ठिताचेतनप्रकृतिकमिति व्याप्तिमाह । गेहेति । इदं जगच्चेतनाधिष्ठिताचेतनप्रकृतिकं कार्यत्वात् गेहवदिति प्रयोगः । विपक्षे विचित्ररचनानुपपत्तिरूपं सूत्रोक्तं बाधकतर्कं वक्तुं जगतो वैचित्र्यमाह । सर्वेति बाह्यं पृथिव्यादि भोग्यं आध्यात्मिकं शरीरादि च भोगाधिष्ठानमिति विभागः, प्रतिनियतोऽसाधारणोऽवयवानां विन्यासो रचना यस्य तदि

* प्रवृत्तमिति का० वर्ध० पु० नास्ति ।
† कश्चित् इति सो० २ पु० ।

सुखदुःखप्राप्तिपरिहारयोग्या रचिता दृश्यन्ते, तथेदं जगद-खिलं पृथिव्यादिनानाकर्मफलोपभोगयोग्यं वाह्यमाध्यात्मिकं च शरीरादि नानाजात्यन्वितं प्रतिनियतावयवविन्यासमनेककर्म-फलानुभवाधिष्ठानं दृश्यमानं प्रज्ञावद्भिः सम्भावितमैः शि-ल्पिभिर्मनसाप्यालोचयितुमशक्यं सत् कथमचेतनं प्रधानं रच-येत् लोष्टपाषाणादिष्वदृष्टत्वात्। मृदादिष्वपि कुम्भकारा-द्यधिष्ठितेषु विशिष्टाकारा रचना दृश्यते, तद्वत् प्रधानस्यापि

र्थः। इत्थं विचित्रं जगच्चेतनानधिष्ठिता जडप्रकृतिः कथं रचयेन्न क-थमपीत्यर्थः। यच्चेतनानधिष्ठितमचेतनं तन्न कार्यकारीति व्याप्तिमुक्त-र्कमूलभूतामाह। लोष्टेति। चेतनाप्रेरितेषु लोष्टादिषु कार्यका-रित्वादर्शनादित्यर्थः। किञ्चानादिजडप्रकृतिः चेतनाधिष्ठाता परि-णामित्वान्मृदादिवदित्याह। मृदिति। ननु मृदादिदृष्टान्ते द्वयमप्यस्ति अचेतनत्वं चेतनाधिष्ठितत्वञ्चेति, तत्र परिणामित्वहेतोरचेतनत्वमेव व्यापकं मृदादिस्वरूपात्तेनान्तरङ्गत्वात् नतु चेतनाधिष्ठितत्वं व्यापकं, तस्य मृदादिवाह्यकुलालादिसापेक्षत्वेन वहिरङ्गत्वात्, तथा च परि-णामित्वेऽपि मूलप्रकृतेरचेतनत्वधर्मेणैव योगो न चेतनताधिष्ठितत्वेनेत्या-शङ्क्य निषेधति। न चेति। महानसदृष्टान्तेऽन्तरङ्गस्यापि महानसस्व-रूपस्य धूमव्यापकत्वं नास्ति तद्भिन्नस्य वहिरङ्गस्यापि वह्नेस्तदस्तीत्य-न्तरङ्गत्वं व्यापकत्वे प्रयोजकं न भवतीति भावः। किञ्च यदचेतनं चेतनाधिष्ठितमेव परिणमते इत्यङ्गीकारबाधकाभावात् प्रत्युत श्रुत्य-नुग्रहाच्च तथाङ्गीकार्यमित्याह। न चैवं सतीति। सुखदुःखमोहान्व-यादिति हेतोरसिद्धिद्योतनार्थं सूत्रे चकारमाह। अन्वयाद्यनुपपत्ते-रिति। नानुमानं *युक्तमित्यर्थः। आदिशब्दः परिमाणादिग्रहार्थः। शब्दादीनां वाह्यत्वानुभवादान्तरसुखाद्यात्मकत्वमसिद्धं तन्निमित्तत्वाच्च। न हि निमित्तनैमित्तकयोरभेदेन योगोऽस्ति दण्डघटयोरदर्शनादि-

---

* युक्तमित्यन्वयः इति सो० २ पु०।

चेतनान्तराधिष्ठितत्वप्रसङ्गः, न च मृदाद्युपादानस्वरूपव्यपाश्रयेणैव धर्मेण मूलकारणमवधारणीयं, न बाह्यकुम्भकारादिव्यपाश्रयेणेति किञ्चिन्नियामकमस्ति, न चैवं सति किञ्चिद्विरुध्यते प्रत्युत श्रुतिरनुगृह्यते *चेतनकारणत्वसमर्पणात्, अतो रचनानुपपत्तेश्च हेतोः नाचेतनं जगत्कारणमनुमातव्यं भवति अन्वयाद्यनुपपत्तेश्चेति च शब्देन हेतोरसिद्धिं समुच्चिनोति न हि बाह्याध्यात्मिकानां भेदानां सुखदुःखमोहात्मकतया-

---

त्यर्थः । किञ्च यदि घटे मृद्वत् सुखादिकं शब्दादावन्वितं स्यात् तर्हि सर्वैरविशेषेण सुखादिकमुपलभ्येत घटे मृद्वन्न तथोपलब्धिरस्तीति योग्यानुपलब्ध्या हेत्वभावनिश्चय इत्याह । शब्दादीति । विषयस्यैकत्वेऽपि पुरुषवासनावैचित्र्यात् कस्यचित् सुखबुद्धिः कस्यचिद्दुःखबुद्धिः कस्यचिन्मोहबुद्धिर्दृश्यतेऽतो विषयाः सुखाद्यात्मका न भवन्तीत्यर्थः । एव
समन्वयादीति हेतुं दूषयित्वा परिमाणादिहेतून् दूषयति । तथेति
बुद्ध्यादीनां परिमितत्वेन संसर्गपूर्वकत्वसिद्धौ संसृष्टान्यनेकानि स
त्त्वरजस्तमांसि सिध्यन्ति एकस्मिन् संसर्गासम्भवात् न ब्रह्मसि
रिति साङ्ख्यस्य भावः । किमिदं परिमितत्वं, न तावद्देशतः परिच्छेद
पक्षान्तर्गताकाशे तस्याभावेन भावासिद्धेः, नापि कालतः परिच्छेद
साङ्ख्यैः कालस्यानङ्गीकारात् अविद्यागुणसंसर्गेण सिद्धसाधनाच्च, ना
वस्तुतः परिच्छेदः सत्त्वादीनां परस्परं भिन्नत्वे सत्यपि साध्याभा
वेन व्यभिचारादित्याह । सत्त्वेति । यदुक्तं कार्यकारणविभागो यः
समाप्यते तत्प्रधानमिति तन्न ब्रह्मणि मायायां वा समाप्तिसम्भवात्
न च यः कार्यस्य विभागः स चेतनानधिष्ठिताचेतने समाप्त इति व्या
प्तिरस्ति सर्वत्राचेतनेषु चेतनाधिष्ठानदर्शनादित्याह । कार्येति
एतेनाविभागोऽपि व्याख्यातः। यत्तु यत्परिमितं तदव्यक्तप्रकृतिपूर्व

---

* चेतनकारणसमर्पणादिति का० वर्ध० ।

ऽन्वय उपपद्यते, सुखादीनामन्तरत्वप्रतीतेः शब्दादीनाञ्च तद्रूपत्वप्रतीतेः तन्निमित्तत्वप्रतीतेश्च शब्दाद्यविशेषेऽपि च भावनाविशेषात् सुखादिविशेषोपलब्धेः, तथा परिमितानां भेदानां मूलाङ्कुरादीनां संसर्गपूर्वकत्वं दृष्ट्वा बाह्याध्यात्मिकानां भेदानां परिमितत्वात् संसर्गपूर्वकत्वमनुमिमानस्य सत्त्वरजस्तमसामपि संसर्गपूर्वकत्वप्रसङ्गः परिमितत्वाविशेषात्। कार्यकारणभावस्तु प्रेक्षापूर्वनिर्मितानां शयनासनादीनां दृष्ट इति न कार्यकारणभावात् बाह्याध्यात्मिकानां भेदानामचेतनपूर्वकत्वं शक्यं कल्पयितुं॥

प्रवृत्तेश्च॥२॥

आस्तां तावदियं रचना तत्सिद्ध्यर्था या प्रवृत्तिः साम्यावस्थानात् प्रच्युतिः सत्त्वरजस्तमसां अङ्गाङ्गिभावरूपापत्तिर्विशि-

---

मेति व्याप्त्यन्तरं तस्यापि गुणेष्वनादिषु परिमितेषु व्यभिचारः, एतेन सदृशयोरेव प्रकृतिविकारभावादचेतनविकाराणामचेतनमेव प्रकृतिरिति निरस्तं। चेतनाधिष्ठिताचेतनप्रकृतिकत्वेऽपि सादृश्योपपत्तेः न विलक्षणत्वादित्यत्र सादृश्यनियमस्य निरस्तत्वाच्च, एवं चेतनाधीनकारणशक्तितः कार्यप्रवृत्तिसम्भवात् शक्तितः प्रवृत्तिलिङ्गमन्यथासिद्धमिति भावः॥

स्वतन्त्रमचेतनं कारणत्वेन नानुमातव्यं तस्य सृष्ट्यर्थं प्रवृत्तेरनुपपत्तेरिति चकारेणानुपपत्तिपदमनुषज्य सूत्रं योजनीयं। रचनाप्रवृत्त्योः को भेद इत्याशङ्क्य प्रवृत्तिस्वरूपमाह। साम्येति। गुणानां किल साम्यावस्था तत्त्वानां प्रलयः, तदा न किञ्चित् कार्यं भवति प्रलयाभावप्रसङ्गात्

ष्टकार्याभिमुखप्रवृत्तिता सापि नाचेतनस्य प्रधानस्य स्वतन्त्रस्योपपद्यते मृदादिष्वदर्शनात् रथादिषु च। न हि मृदादयो रथादयो वा स्वयमचेतनाः सन्तः चेतनैः कुलालादिभिरश्वादिभिर्वानधिष्ठिता विशिष्टकार्याभिमुखप्रवृत्तये दृश्यन्ते। दृष्टाच्चादृष्टसिद्धिः *अतः प्रवृत्त्यनुपपत्तेरपि हेतोर्नाचेतनं जगत्कारणमनुमातव्यं भवति। ननु चेतनस्यापि प्रवृत्तिः केवलस्य न दृष्टा सत्यमेतत्, तथापि चेतनसंयुक्तस्य †रथादेरचेतनस्य प्रवृत्तिर्दृष्टा, नत्वचेतनसंयुक्तस्य चेतनस्य प्रवृत्तिर्दृष्टा, किं पुनरत्र युक्तं यस्मिन् प्रवृत्तिर्दृष्टा तस्य सा इति

किन्त्वादौ साम्यच्युतिरूपं वैषम्यं भवति ततः कस्यचित् गुणस्याङ्गित्वमुद्भूतत्वेन प्राधान्यं कस्यचिदङ्गत्वं शेषत्वमित्यङ्गाङ्गिभावो भवति, तस्मिन् सति महदादिकार्योत्पादनात्मिका प्रवृत्तिः, तया विविधकार्यविन्यासो रचनेति भेद इत्यर्थः। गुणानां प्रवृत्तिः चेतनाधिष्ठानपूर्विका प्रवृत्तित्वाद्रथादिप्रवृत्तिवदित्याह। सापीति। विपक्षे स्वतन्त्रे प्रवृत्त्यनुपपत्तिरित्यर्थः। केचित्तु भेदानां प्रवृत्तिशक्तिमत्त्वाच्चेतनानधिष्ठिताचेतनप्रकृतिकत्वमिति शक्तितः प्रवृत्तिरिति लिङ्गं व्याचक्षते। अस्यापि गुणे व्यभिचारः कार्यत्वे विशेषणे च विरुद्धताप्रवृत्तिशक्तित्वे सति कार्यत्वात् घटादिषु चेतनाधिष्ठितप्रकृतिकत्वेनोक्तसाध्यविरुद्धेन व्याप्तिदर्शनादिति 'प्रवृत्तेश्च' इति सूत्रेण ज्ञापितं। ननु लोके स्वतन्त्राचेतनानां प्रवृत्त्यदर्शनेऽपि प्रधाने सा प्रवृत्तिः सिध्यतु तत्राह। दृष्टाच्चेति। अनुमानशरणस्य तव दृष्टान्तं विनाऽतीन्द्रियार्थसिद्ध्ययोगादिति भावः। ननु प्रधानस्य प्रवृत्तिं खण्डयता चेतनस्य स्रष्टौ प्रवृत्तिर्वाच्या सा न युक्तेति सांख्यः शङ्कते। नन्विति। शुद्धचेतनस्य प्रवृत्त्ययोगमङ्गीकरोति। सत्यमिति तर्हि केवलस्याचेतनस्य प्रवृत्तिसिद्धिरन्यथा स्वच्छ्ययोगात् तत्राह तथापीति। केवलस्य चेतनस्य प्रवृत्तावपि चेतनाचेतनयोर्मिथः स

* इत्यतः इति का० वर्ध०। † रथादेरिति वर्ध० का० पु० नास्ति

उत यत्संयुक्तस्य दृष्टा तस्यैव सेति। ननु यस्मिन् दृश्यते प्रवृत्तिस्तस्यैव सेति युक्तं उभयोः प्रत्यक्षत्वात्, न तु प्रवृत्त्याश्रयत्वेन केवलस्य चेतनो रथादिवत् प्रत्यक्षः। प्रवृत्त्याश्रयदेहादिसंयुक्तस्यैव तु चेतनस्य सद्भावसिद्धिः केवलाचेतनरथादिवैलक्षण्यं *जीवद्देहस्य दृष्टमिति, अत एव च प्रत्यक्षे देहे सति †चैतन्यस्य दर्शनात्, असति चादर्शनात् देहस्यैव चैतन्यमपीति लोकायतिकाः प्रतिपन्नाः, तस्मादचेतनस्यैव प्रवृत्तिरिति। तदभिधीयते, न ब्रूमो यस्मिन्नचेतने प्रवृत्तिर्दृश्यते न तस्य सेति, भवति तु तस्यैव सा, सापि चेतनाद्भवति इति ब्रूमः, तद्भावे भावात् तदभावे चाभावात्। यथा काष्ठादिव्यपाश्रयापि दाहप्रकाशादिलक्षणा विक्रियाऽनुपलभ्यमानापि च केवले ज्वलने ज्वलनादेव भवति तत्संयोगे दर्श-

---

धात् सृष्टिप्रवृत्तिरिति भावः। इमं वेदान्तसिद्धान्तं सांख्यो दूषय-
न्ति। नन्विति। सर्वा प्रवृत्तिरचेतनाश्रयैव दृष्टा न त्वचेतनसम्बन्धेनापि
तनस्य क्वचित् प्रवृत्तिर्दृष्टा तस्मान्न चेतनात् सृष्टिरित्यर्थः। मत-
यं श्रुत्वा मध्यस्थः पृच्छति। किं पुनरिति। यस्मिन्नचेतने रथादौ
वृत्तिर्दृष्टा तस्यैव सा न चेतनस्तत्र हेतुरिति किं सांख्यमतं साधु
त येन चेतनेनाश्वादिना संयोगादचेतनस्य प्रवृत्तिस्तत्प्रयुक्ता सेति
दान्तिमतं वा साध्विति प्रश्नार्थः। सांख्य आह। नन्विति। उभयोः
वृत्तिस्तदाश्रययोरित्यर्थः; दृष्टाश्रयेणैव प्रवृत्तेरुपपत्तावदृष्टचेतनप्र-
त्तिर्न कल्प्येति भावः। आत्मनोऽप्रत्यक्षत्वे कथं सिद्धिस्तत्राह। प्रवृ-
ीति। जीवद्देहस्य रथादिभ्यो वैलक्षण्यं प्राणादिमत्त्वं लिङ्गं दृष्ट-
ति कृत्वा चेतनस्य सिद्धिरित्यन्वयः। जीवद्देहः सात्मकः प्राणा-
मत्त्वात् व्यतिरेकेण रथादिवदित्यात्मसिद्धिरित्यर्थः। देहप्रवृत्तिः

---

* जीवदेहस्येति का० ब०। † चैतन्येति टीका।

मात् तद्वियोगे चादर्शनात् तद्वत् लोकायतिकानामपि चेतन एव देहोऽचेतनानां रथादीनां प्रवर्तको दृष्ट इत्यविप्रतिषिद्धं चेतनस्य प्रवर्तकत्वं । ननु तव देहादिसंयुक्तस्याप्यात्मनो विज्ञानस्वरूपमात्रव्यतिरेकेण प्रवृत्त्यनुपपत्तेरनुपपन्नं प्रवर्तकत्वमिति चेत्, न, अयस्कान्तवद्रूपादिवच्च प्रवृत्तिरहितस्यापि प्रवर्तकत्वोपपत्तेः । यथाऽयस्कान्तो मणिः स्वयं प्रवृत्तिरहितोऽप्ययसः प्रवर्तको भवति, यथा च रूपादयो विषयाः स्वयं प्रवृत्तिरहिता अपि चक्षुरादीनां प्रवर्तका भवन्ति, एवं प्रवृत्तिरहितोऽपीश्वरः सर्वगतः सर्वात्मा सर्वज्ञः सर्वशक्तिश्च सन् सर्वं प्रवर्तयेदित्युपपन्नं, एकत्वात् प्रवृत्त्यभावे प्रवर्तकत्वानुपपत्ति-

---

स्वाश्रयादन्येन ज्ञानवता सहभूताप्रवृत्तित्वाद्रथप्रवृत्तिवत् इत्यनुमानान्तरसूचनाय प्रवृत्त्याश्रयेत्युक्तं, सद्भावसिद्धिरेव न प्रवर्तकत्वमित्येवकारार्थः । अनुमितस्य सद्भावमात्रेण प्रवृत्तिहेतुत्वे सर्वत्राकाशस्य हेतुत्वप्रसङ्गादिति भावः । आत्मनः प्रत्यक्षत्वे चार्वाकाणां भ्रमोऽलिङ्गमित्याह । अत एवेति, अप्रत्यक्षत्वादेवेत्यर्थः । देहान्यात्मप्रत्यक्षत्वे भ्रमासम्भवादिति भावः । दर्शनात्, प्रवृत्तिचैतन्ययोरिति शेषः । प्रवृत्तिं प्रत्याश्रयत्वमचेतनस्यैवेत्युक्तमङ्गीकृत्य चेतनस्य प्रयोजकत्वं सिद्धान्ती साधयति । तदभिधीयत इति । रथादिप्रवृत्तावश्वादिचेतनस्यान्वयव्यतिरेकौ स्फुटौ, ताभ्यां चेतनस्य प्रवर्तकत्वं बाह्यानामपि सम्मतमित्याह । लोकायतिकानामपीति । यः प्रवर्तकः सः स्वयं प्रवृत्तिमानश्वादिवदिति व्याप्तेरात्मनि व्यापकाभावान्न प्रवर्तकत्वमिति कश्चिच्छङ्कते । नन्विति । मण्यादौ व्यभिचारान्न व्याप्तिरिति परिहरति । नेति । वस्तुतः एकत्वेऽपि कल्पितं द्वैतं प्रवर्त्यमस्तीत्याह नाविद्येति । अविद्यया कल्पिते नामरूपप्रपञ्चे तयैवाविद्यारूप

रिति चेन्न, अविद्याप्रत्युपस्थापितनामरूपमायावेशवशेनासकृत् प्रत्युक्तत्वात्, तस्मात् सम्भवति प्रवृत्तिः सर्वज्ञकारणत्वे न त्वचेतनकारणत्वे ॥

पयोऽम्बुवच्चेत् तत्रापि ॥ ३ ॥

स्यादेतत्, यथा क्षीरमचेतनं स्वभावेनैव वत्सविवृद्ध्यर्थं प्रवर्त्तते, यथा च जलमचेतनं स्वभावेनैव लोकोपकाराय स्यन्दते, एवं प्रधानमप्यचेतनं स्वभावेनैव पुरुषार्थसिद्धये प्रवर्तिष्यत इति। नैतत् साधूच्यते। यतस्तत्रापि पयोऽम्बुनोश्चेतनाधिष्ठितयोरेव प्रवृत्तिरित्यनुमिमीमहे, उभयवादिप्रसिद्धे रथादावचेतने केवले प्रवृत्त्यदर्शनात्। शास्त्रञ्च *"योऽप्सु तिष्ठन्नद्भ्योऽन्तरो योऽपोऽन्तरो यमयति एतस्य वाऽक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्दन्ते" इत्येवंजातीयकं समस्तस्य लोकपरिस्यन्दितस्येश्वराधिष्ठिततां श्रावयति, तस्मात् साध्यपक्षनिक्षिप्तत्वात् पयोऽम्बुवदित्यनुपन्यासः, चेतनायाश्च धेनोः †स्नेहेनेच्छया पयसः प्रवर्तकत्वोपपत्तेः, वत्सचोषणेन च पयस आकृष्य-

मायया य आवेशस्त्विदात्मनः कल्पितः सम्बन्धः तस्य वशः सामर्थ्यं तेनात्सर्वामित्वादिकमीश्वरस्येत्युक्तत्वान्न चोद्यावसर इत्यर्थः ॥

अनादिजडस्य प्रवृत्तिश्चेतनाधीना प्रवृत्तित्वाद्रथादिप्रवृत्तिवदिति स्थितं, तत्र क्षीरादौ व्यभिचारमाशङ्क्य तस्यापि पक्षसमत्वेनोक्तानुमानादागमेन च साध्यसिद्धेर्न व्यभिचार इति सूत्रं व्याचष्टे। स्यादेतदित्यादिना। साध्यपक्षेति। साध्यवता पक्षेण तुल्यत्वादित्यर्थः। अनुपन्यासो न व्यभिचारभूमिरिति यावत्। क्षीरे प्रवर्तकत्वेन धेन्वादेः

* योऽप्सु तिष्ठन् योऽपोऽन्तर इति का० वर्ध०। † स्नेहेच्छयेति का० वर्ध०।

माणत्वात्। न चाम्बुनोऽप्यत्यन्तमनपेक्षा निम्नभूम्याद्यपेक्षत्वात् स्यन्दनस्य। चेतनापेक्षत्वं तु सर्वत्रोपदर्शितं। 'उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि' [२।१।सू०२४।] इत्यत्र तु बाह्यनिमित्तनिरपेक्षमपि स्वाश्रयं कार्यं भवतीत्येतल्लोकदृष्ट्या निदर्शितं, शास्त्रदृष्ट्या पुनः सर्वत्रैवेश्वरापेक्षत्वमापद्यमानं न पराणुद्यते॥

व्यतिरेकानवस्थितेश्चानपेक्षत्वात्॥ ४॥

साङ्ख्यानां त्रयो गुणाः साम्येनावतिष्ठमानाः प्रधानं, न तु तद्व्यतिरेकेण प्रधानस्य प्रवर्तकं निवर्तकं वा किञ्चिद्बाह्यमपेक्ष्यमवस्थितमस्ति, पुरुषस्तूदासीनो न प्रवर्तको न निवर्तक इति, अतोऽनपेक्षं प्रधानं, अनपेक्षत्वाच्च कदाचित् प्रधानं महदाद्याकारेण परिणमते, कदाचिन्न परिणमत इत्येतदयुक्तं, ईश्वरस्य तु सर्वज्ञत्वात् सर्वशक्तिमत्त्वात् महामायत्वाच्च प्रवृत्त्यप्रवृत्ती न विरुध्येते॥

सत्त्वाच्च न व्यभिचार इत्याह। चेतनायाश्चेति। उपदर्शितमनुमानागमाभ्यां इति शेषः। सूत्रकारस्य 'क्षीरवद्धि' 'तत्रापि' इति च वक्तुः पूर्वापरविरोधमाशङ्क्य लोकदृष्ट्या शास्त्रदृष्ट्या च सूत्रद्वयमित्यविरोधमाह। उपसंहारेति॥

अस्तु प्रधानस्यापि धर्मादि कर्म पुरुषो वा प्रवर्तक इत्याशङ्क्य सूत्रं तद्व्याचष्टे। सांख्यानामित्यादिना। प्रधानव्यतिरेकेण कर्मणोऽनवस्थितेः पुरुषस्योदासीनत्वात् कदाचित् सृष्टिप्रवृत्तिः कदाचित् प्रलय इत्ययुक्तमित्यर्थः। कर्मणोऽपि प्रधानात्मकस्याचेतनत्वात् सदाऽसत्त्वात् न कादाचित्कप्रवृत्तिनियामकत्वमिति भावः॥

अन्यत्राभावाच्च न तृणादिवत् ॥ ५ ॥

स्यादेतत्, यथा तृणपल्लवोदकादि निमित्तान्तरनिरपेक्षं स्वभावादेव *क्षीराद्याकारेण परिणमते, एवं प्रधानमपि महदाद्याकारेण परिणंस्यत इति। कथं निमित्तान्तरनिरपेक्षं तृणादीति गम्यते, निमित्तान्तरानुपलम्भात्। यदि हि †किञ्चिन्निमित्तान्तरमुपलभेमहि ततो यथाकामं तेन तेन निमित्तेन तृणाद्युपादाय क्षीरं सम्पादयेमहि, न तु सम्पादयामहे, तस्मात् स्वाभाविकस्तृणादेः परिणामः तथा प्रधानस्यापि स्यादिति। अत्रोच्यते, भवेत् तृणादिवत् प्रधानस्य स्वाभाविकः परिणामो यदि तृणादेरपि स्वाभाविकः परिणामोऽभ्युपगम्येत न त्वभ्युपगम्यते निमित्तान्तरोपलब्धेः। कथं निमित्तान्तरोपलब्धिरन्यत्राभावात्, धेन्वैव ह्युपयुक्तं तृणादि क्षीरीभवति न प्रहीणमनडुहाद्युपयुक्तं वा। यदि हि निर्निमित्तमेतत् स्याद्धेनुशरीरसम्बन्धादन्यत्रापि तृणादि क्षीरीभवेत्। न च यथाकामं मानुषैर्न शक्यं सम्पादयितुमित्येतावता निर्निमित्तं भवति, भवति हि किञ्चित् कार्यं मानुषसम्पाद्यं किञ्चिद्दैवसम्पाद्यं। मनुष्या अपि च शक्नुवन्त्येव स्वोचितेनोपायेन तृणाद्युपादाय क्षीरं

पुनरपि दृष्टान्तबलात् प्रधानस्य स्वत एव कादाचित्कप्रवृत्तित्वमाशङ्क्य निषेधति सूत्रकारः। अन्यत्रेत्यादिना। पृच्छति। कथमिति। उत्तरं। निमित्तान्तरेति। धेन्वादिनिमित्तान्तरमस्तीति सिद्धान्तयति।

---

* क्षीराकारेणेति वर्ध० का०। † किञ्चिन्निमित्तमिति का० वर्ध०।

सम्पादयितुं, प्रभूतं हि क्षीरं कामयमानाः प्रभूतं घासं धेः चारयन्ति, ततश्च प्रभूतं क्षीरं लभन्ते, तस्मान्न तृणादिवत् स्वाभाविकः प्रधानस्य परिणामः ॥

अभ्युपगमेऽप्यर्थाभावात् ॥ ६ ॥

स्वाभाविकी प्रधानस्य प्रवृत्तिर्न भवति इति स्थापितं, अथापि नाम भवतः श्रद्धामनुरुध्यमानाः स्वाभाविकीमेव प्रधानस्य प्रवृत्तिमभ्युपगच्छेम तथापि दोषोऽनुषज्येतैव, कुतः, अर्थाभावात् । यदि तावत् स्वाभाविकी प्रधानस्य प्रवृत्तिः न किञ्चिदन्यदपेक्षत इत्युच्यते ततो यथैव सहकारि किञ्चिन्नापेक्षते एवं प्रयोजनमपि किञ्चिन्नापेक्षिष्यत इत्यतः प्रधानं पुरुषस्यार्थं साधयितुं प्रवर्तत इतीयं प्रतिज्ञा हीयेत । स यदि ब्रूयात् सहकार्येव केवलं नापेक्षते न प्रयोजनमपीति, तथापि प्रधानप्रवृत्तेः प्रयोजनं विवेक्तव्यं भोगो वा स्यादपवर्गो वा उभयं वेति । भो

न्येनोच्यत इति । प्रहीणं नष्टं । यदुक्तं क्षीरस्य स्वेच्छया सम्पादयितुमशक्यत्वात् स्वाभाविकत्वमिति तत्राह । न च यथाकाममिति ॥

प्रधानस्य न स्वतः प्रवृत्तिः, स्वतः प्रवृत्त्यभ्युपगमे पुरुषार्थस्याप्यपेक्षाभावप्रसङ्गादित्येकोऽर्थः, तत्रेष्टापत्तिं निरस्यति । इत्यतः प्रधानमिति उक्तप्रसङ्गस्येष्टत्वे प्रतिज्ञाहानिः स्यादित्यर्थः। अर्थासम्भवान्न स्वतः प्रवृत्तिरित्यर्थान्तरं शङ्कापूर्वकमाह । स यदीत्यादिना । प्रयोजनमपेक्षितं चेद्वक्तव्यमित्याह । तथापीति । कूटस्थे पुरुषे स्वतः सुखादिरूपस्याति शयस्याधातुमशक्यत्वादध्यासानङ्गीकाराच्च भोगो न युक्तः, किञ्च प्रधानप्रवृत्तेर्भोगार्थत्वे मोक्षहेतुविवेकख्यात्यभावादनिर्मोक्षप्रसङ्गश्च, अ

गश्चेत् कीदृशोऽनाधेयातिशयस्य पुरुषस्य भोगो भवेदनिर्मोक्षप्रसङ्गश्च। अपवर्गश्चेत् प्रागपि प्रवृत्तेरपवर्गस्य सिद्धत्वात् प्रवृत्तिरनर्थिका स्यात् शब्दाद्यनुपलब्धिप्रसङ्गश्च। उभयार्थताभ्युपगमेऽपि भोक्तव्यानां प्रधानमात्राणामानन्त्यादनिर्मोक्षप्रसङ्ग एव। न चौत्सुक्यनिवृत्त्यर्था प्रवृत्तिः, न हि प्रधानस्याचेतनस्यौत्सुक्यं सम्भवति, न च पुरुषस्य निर्मलस्य। दृक्शक्तिसर्गशक्तिवैयर्थ्यभयाच्चेत् प्रवृत्तिः तर्हि दृक्शक्त्यनुच्छेदवत् सर्गशक्त्यनुच्छेदात् संसारानुच्छेदादनिर्मोक्षप्रसङ्ग एव, तस्मात् प्रधानस्य पुरुषार्था प्रवृत्तिरित्येतदयुक्तं॥

पुरुषाश्मवदिति चेत् तथापि ॥ ७ ॥

स्यादेतत्, यथा कश्चित् पुरुषो दृक्शक्तिसम्पन्नः प्रवृत्तिशक्तिविहीनः पङ्गुरपरं पुरुषं प्रवृत्तिशक्तिसम्पन्नं दृक्शक्तिवि-

---

र्गार्थत्वे स्वरूपावस्थानरूपमुक्तेः स्वतः सिद्धत्वात् प्रवृत्तिवैयर्थ्यं भोगाभावप्रसङ्गश्चेत्यर्थः। तृतीयं दूषयति। उभयार्थतेति। भोयन्ते भुज्यन्त इति मात्रा भोग्याः। औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तमिति कारिकोक्तं दूषयति। चेति। औत्सुक्यमिच्छाविशेषः केवलजडस्यात्मनो वा न युक्त इत्यर्थः। अस्ति पुरुषस्य दृक्शक्तिः चिद्रूपत्वात्, अस्ति च प्रधानस्य सर्गशक्तिः त्रिगुणत्वात्, तयोः शक्त्योर्दृश्यसृष्टिं विना सार्थक्यायोगात् प्रधानस्य सृष्टौ प्रवृत्तिरिति चेन्न शक्त्योर्नित्यत्वात् सृष्टिनित्यत्वापत्तिरित्याह। दृक्शक्तीति॥

पुरुषस्य प्रवर्तकत्वं निरस्तमपि दृष्टान्तेन पुनराशङ्क्य निषेधति। पुरुषाश्मवदिति। प्रधानस्य स्वातन्त्र्यं पुरुषस्यौदासीन्यञ्चाभ्युपेतं त्यज्यते

चीनं अन्धमधिष्ठाय प्रवर्तयति, यथा वाऽयस्कान्तोऽश्मा स्वय-मप्रवर्तमानोऽप्ययः प्रवर्तयति, एवं पुरुषः प्रधानं प्रवर्तयिष्य-तीति दृष्टान्तप्रत्ययेन पुनः प्रत्यवस्थानं। अत्रोच्यते तथापि नैव दोषान्निर्मोक्षोऽस्ति। अभ्युपेतहानं तावद्दोष आपतति प्र-धानस्य स्वतन्त्रस्य प्रवृत्त्यभ्युपगमात्, पुरुषस्य च प्रवर्तकत्वान-भ्युपगमात्। कथञ्चोदासीनः पुरुषः प्रधानं प्रवर्तयेत्। पङ्गुरपि हि अन्धं पुरुषं वागादिभिः प्रवर्तयति, नैवं पुरुषस्य कश्चित् प्रवर्तनव्यापारोऽस्ति, निष्क्रियत्वात् निर्गुणत्वाच्च। नाप्ययस्कान्त-वत् सन्निधिमात्रेण प्रवर्तयेत्, सन्निधिनित्यत्वेन प्रवृत्तिनि-त्यत्वप्रसङ्गात्। अयस्कान्तस्य तु अनित्यः सन्निधिरस्ति, स्वव्या-पारः सन्निधिः परिमार्जनाद्यपेक्षा चास्यास्तीत्यनुपन्यासः पुरु-षाश्मवदिति। तथा प्रधानस्याचैतन्यात् पुरुषस्य चौदासीन्यात् तृतीयस्य च तयोः *सम्बन्धयितुरभावात् सम्बन्धानुपपत्तिः योग्यतानिमित्ते सम्बन्धे योग्यतानुच्छेदादनिर्मोक्षप्रसङ्गः

इति वदन्तं सांख्यं प्रत्याह। कथञ्चेति। पुरुषस्य परिस्पन्दः प्रय-त्नगुणो वा नास्तीति वक्तुं हेतुद्वयं। प्रधानपुरुषयोर्नित्यत्वात् व्या-पित्वाच्च नित्यः सन्निधिः, अश्मनस्तु परिमार्जनमृजुत्वेन स्थापनम-नित्यसन्निधिश्चेति व्यापारोऽस्तीत्यनुपन्यासः, न समदृष्टान्तोपन्यासो भवतीत्यर्थः। ननु चिज्जडयोर्दृग्दृश्यभावयोग्यताऽस्ति, तया तद्भावः सम्बन्ध इत्यत आह। योग्यतेति। चिज्जडत्वरूपाया योग्यताया नि-त्यत्वात् सम्बन्धनित्यत्वापत्तिरित्यर्थः। यथा स्वतन्त्रप्रधानप्रवृत्तिपक्षे भोगोऽपवर्ग उभयं वा फलमिति विकल्प्य दूषितः, एवं पुरुष

---

*संबद्धुरिति का० वर्ध०।

पूर्ववच्चेहाप्यर्थाभावो विकल्पयितव्यः। *परमात्मनस्तु स्वरूपव्यपाश्रयमौदासीन्यं मायाव्यपाश्रयञ्च प्रवर्तकत्वमित्यस्त्यतिशयः॥

अङ्गित्वानुपपत्तेश्च॥ ८॥

इतश्च न प्रधानस्य प्रवृत्तिरवकल्पते, यद्धि सत्त्वरजस्तमसामन्योन्यगुणप्रधानभावमुत्सृज्य साम्येन स्वरूपमात्रेणावस्थानं सा प्रधानावस्था, तस्यामवस्थायामनपेक्षस्वरूपाणां स्वरूपप्रणाशभयात् परस्परं प्रत्यङ्गाङ्गिभावानुपपत्तेः। बाह्यस्य च कस्यचित् क्षोभयितुरभावाद्गुणवैषम्यनिमित्तो महदाद्युत्पादो न स्यात्॥

अन्यथानुमितौ च ज्ञशक्तिवियोगात्॥ ९॥

अथापि स्यादन्यथा वयमनुमिमीमहे यथा नायमनन्तरो दोषः प्रसज्येत। न ह्यनपेक्षस्वभावाः कूटस्थास्माभिर्गुणा

नप्रधानप्रवृत्तिपक्षोऽपि फलाभावेन दूषणीय इत्याह। पूर्ववति। सिद्धान्ते परमात्मन उदासीनस्य कथं प्रवर्तकत्वमित्याशङ्क्याह। मात्मेति। सांख्यमते उभयं विरुद्धं †त्यक्तत्वात् अस्मन्मते कल्पिताल्पितयोरविरोध इत्यतिशयः॥
किं प्रधानावस्था कूटस्थवन्नित्या उत विकारिणी, आद्ये दोषमाह। गामिति। अङ्गाङ्गिभावे साम्यस्वरूपनाशः स्यात्, ततः कौटस्थ्यभङ्ग भयादङ्गाङ्गित्वानुपपत्तेः सृष्ट्यनुपपत्तिरित्यर्थः। द्वितीयं दूषयति। श्चेति। चिरकालस्थितस्य साम्यस्य च्युतौ निमित्तं वाच्यं तन्नास्तीत्यर्थः। गुणानां मिथोऽनपेक्षस्वभावत्वान्न स्वतो वैषम्यमित्युक्तं, तत्र हेत्वद्धिमाशङ्क्य सूत्रकारः परिहरति। अन्यथेति। अनपेक्षस्वभावा-

---

* परमात्मस्वरूपमिति टी०। † सत्यत्वादिति सो० टी० २।

अभ्युपगम्यन्ते प्रमाणाभावात्। कार्यवशेन तु गुणानां स्वभावोऽभ्युपगम्यते, यथा यथा कार्योत्पाद उपपद्यते तथा तथा एतेषां स्वभावोऽभ्युपगन्तव्यः, चलं गुणवृत्तमिति चास्त्यभ्युपगमः। तस्मात् साम्यावस्थायामपि वैषम्योपगमयोग्या एव गुणा अवतिष्ठन्त इति। एवमपि प्रधानस्य ज्ञशक्तिवियोगाद्रचनानुपपत्त्यादयः पूर्वोक्ता दोषास्तदवस्था एव। ज्ञशक्तिमपि त्वनुमिमानः प्रतिवादित्वान्निवर्तेत, चेतनमेकमनेकप्रपञ्चस्य जगत उपादानमिति ब्रह्मवादप्रसङ्गात्। वैषम्योपगमयोग्या अपि गुणाः साम्यावस्थायां निमित्ताभावान्नैव वैषम्यं भजेरन्, भजमाना वा निमित्ताभावाविशेषात् सर्वदैव वैषम्यं भजेरन् इति प्रसज्यत एवायमनन्तरोऽपि दोषः॥

विप्रतिषेधाच्चासमञ्जसं॥ १०॥

परस्परविरुद्धश्चायं साङ्ख्यानामभ्युपगमः, क्वचित् सप्तेन्द्रियाण्यनुक्रामन्ति क्वचिदेकादश, तथा क्वचिन्महतस्तन्मात्रसर्गमुपदिशन्ति क्वचिदहङ्कारात्, तथा क्वचित् त्रीण्यन्तःकरणानि

दन्यथा सापेक्षत्वेन गुणानामनुमानात् पूर्वसूत्रोक्तो दोषः प्रसज्यते। न चैवमपि सिद्धान्तः कार्यानुसारेण गुणस्वभावकल्पनादित्याह। चलं गुणवृत्तमिति। पूर्वसूत्रोक्ताज्ञत्वानुपपत्तिदोषमङ्गीकृत्य परिहरति। एवमपीति। कार्यार्थं ज्ञानशक्तिकल्पने ब्रह्मवादः स्यादित्यर्थः। अङ्गीकारं त्यजति। वैषम्येति॥
सूत्रं व्याचष्टे। परस्परेति। त्वङ्मात्रमेव ज्ञानेन्द्रियमेकं

वर्णयन्ति क्वचिदेकमिति, प्रसिद्ध एव तु श्रुतीश्वरकारणवादिन्या विरोधः तदनुवर्तिन्या च स्मृत्या, तस्मादप्यसमञ्जसं साङ्ख्यानां दर्शनमिति। अत्राह नन्वौपनिषदानामप्यसमञ्जसमेव दर्शनं, तप्यतापकयोर्जात्यन्तरभावानभ्युपगमात्। एकं हि ब्रह्म सर्वात्मकं सर्वस्य प्रपञ्चस्य कारणमभ्युपगच्छतां, एकस्यैवात्मनो विशेषौ तप्यतापकौ न जात्यन्तरभूतौ इत्यभ्युपगन्तव्यं स्यात्। यदि चैतौ तप्यतापकौ एकस्यात्मनो विशेषौ स्यातां स ताभ्यां तप्यतापकाभ्यां न निर्मुच्येत इति तापोपशान्तये सम्यग्दर्शनमुपदिशत् शास्त्रमनर्थकं स्यात्। न ह्यौष्ण्यप्रकाशधर्मकस्य प्रदीपस्य तदवस्थस्यैव ताभ्यां निर्मोक्ष उपपद्यते। योऽपि जलवीचीतरङ्गफेनाद्युपन्यासस्तत्रापि जलात्मन एकस्य वीच्यादयो विशेषा आविर्भावतिरोभावरूपेण नित्या एवेति समानो जलात्मनो वीच्यादिभिरनिर्मोक्षः। प्रसिद्धश्चायं तप्यतापकयोर्जात्यन्तरभावो लोके। तथा हि अर्थी चार्थश्चान्योन्य-

---

दादिज्ञानकारणं पञ्च कर्मेन्द्रियाणि मनश्चेति सप्तेन्द्रियाणि, ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च मनश्चेत्येकादश, बुद्धिरहङ्कारो इति त्रीणि, एकमिति बुद्धिरेव, एवं पूर्वापरविरोधादिति न्याय श्रुतिस्मृतिविप्रतिषेधाच्चेत्यर्थान्तरमाह। प्रसिद्ध इति। तस्मान्तिमूलत्वात् सांख्यशास्त्रस्य, तेन निर्दोषवेदान्तसमन्वयस्याविइति सिद्धं। स्वमतासामञ्जस्यमसहमानः सांख्यः प्रत्यवति। अत्राहेति। तयो जीवस्तापकः संसारस्तयोर्भेदानङ्गीकाराल्लोके इस्तप्यतापकभावो लुप्येतेत्यर्थः। विवृणोति। एकं हीति। तथा

भिन्नौ लक्ष्येते, यद्यर्थिनः स्वतोऽन्योऽर्थी न स्याद् यस्यार्थिनो यद्विषयमर्थित्वं स तस्यार्थो नित्यसिद्ध एवेति तस्य तद्विषयमर्थित्वं न स्यात्। यथा प्रकाशात्मनः प्रदीपस्य प्रकाशाख्योऽर्थो नित्यसिद्ध एवेति न तस्य तद्विषयमर्थित्वं भवति, अप्राप्ते ह्यर्थेऽर्थिनोऽर्थित्वं स्यादिति, *तथार्थस्याप्यर्थत्वं न स्यात्, यदि स्यात् स्वार्थत्वमेव स्यात्, न चैतदस्ति। सम्बन्धिशब्दौ ह्येतौ अर्थी चार्थश्चेति, द्वयोश्च सम्बन्धिनोः सम्बन्धः स्यान्नैकस्यैव, तस्माद्भिन्नावेतौ अर्थार्थिनौ, तथाऽनर्थानर्थिनावपि। अर्थिनोऽनुकूलोऽर्थः प्रतिकूलोऽनर्थस्ताभ्यामेकः पर्यायेणोभाभ्यां सम्बध्यते, तत्रार्थस्याल्पीयस्त्वात् भूयस्त्वाच्चानर्थस्योभावपि †अर्थावनर्थ एवेति तापकः स उच्यते, तप्यस्तु पुरुषो य एकः पर्यायेणोभाभ्यां सम्बध्यते इति। तयोस्तप्यतापकयोरेकात्मतायां मोक्षानुपपत्तिः। जात्य-

---

च भेदव्यवहारलोप इत्यसमञ्जसमित्यर्थः। ननु तयोरुपादानैक्येऽपि मिथो भेदोऽस्त्येव यथैकवह्न्यात्मकयोरौष्ण्यप्रकाशयोः, अतो न व्यवहारलोप इत्याशङ्क्य वह्नेरिव ताभ्यामात्मनो मोक्षो न स्यादित्याह। यदि चेत्यादिना। ननु सत्यपि धर्मिणि स्वभावनाशो मोक्ष उपपद्यते, सत्येव जले वीच्यादिनाशदर्शनादित्याशङ्क्य दृष्टान्तासिद्धिमाह। योऽपीति। किञ्च भेदाङ्गीकारेऽपि सिद्धान्तः, अनङ्गीकारे लोकप्रसिद्धबाध इत्याह प्रसिद्धश्चेति। अर्थो ह्यर्जनालाभादिनार्थिनं तापयतीति तापकः, अर्थी तप्यस्तयोरभेदे बाधकमाह। यदीति। अर्थिनोऽन्यस्यार्थस्याभावादर्थित्वाभाववदर्थादन्यस्यार्थिनोऽसत्त्वादर्थत्वाभावः प्रसज्येतेत्याह। तथार्थस्यापीति। प्रसङ्गस्येष्टत्वं निराकरोति। न चैतदस्तीति। अर्थत्वं

---

* तथार्थस्याप्यर्थित्वमिति का० वर्ध०।

† अर्थानर्थावनर्थ इति सो० का० वर्ध०।

न्तरभावे तु तत्संयोगहेतुपरिहारात् स्यादपि कदाचिन्मो-क्षोपपत्तिरिति। अत्रोच्यते नैकत्वादेव तप्यतापकभावानुपपत्तेः। भवेदेष दोषो यद्येकात्मतायां तप्यतापकावन्योन्यस्य विषयविषयिभावं प्रतिपद्येयातां नत्वेतदस्ति एकत्वादेव। न ह्यग्निरेकः सन्नात्मानं दहति प्रकाशयति वा, सत्यपौष्ण्य-प्रकाशादिधर्मभेदे परिणामित्वे च किमु कूटस्थे ब्रह्मण्ये-कस्मिन् तप्यतापकभावः सम्भवेत्, क्व पुनरयं तप्यतापकभावः स्यादिति, उच्यते किं न पश्यसि कर्मभूतो जीवद्देहस्तप्यस्ता-पकः सवितेति। ननु तप्तिर्नाम दुःखं सा चेतयितुर्नाचेत-नस्य देहस्य, यदि हि देहस्यैव तप्तिः स्यात् सा देह-नाशे स्वयमेव नश्यतीति तन्नाशाय साधनं नैषितव्यं स्यादिति,

---

मनाविषयत्वं तच्च काम्यादन्यस्य कामयितुरसत्त्वान्न स्यात्, न हि र्थत्वमस्ति काम्यस्यैव कामयितृत्वायोगात् तस्माद्भेदोऽङ्गीकार्य इत्यर्थः। स्य भेद इत्याह। सम्बन्धीति। तथानर्थानर्थिनावपि भिन्नावि-न्वयः। अर्थानर्थयोः स्वरूपोक्तिपूर्वकं तापकत्वं स्फुटयति। अर्थि-ऽनुकूल इति। अद्वैतमते मुक्तेरयोगमुक्त्वा स्वमते योगमाह। जात्व-रीति। तया तप्यया बुद्ध्या पुरुषस्य संयोगः स्वस्वामिभावः तस्य हेतु-ादिरविवेकस्तस्य परिहारो विवेकस्तस्मान्नित्यमुक्तस्यापि पुरुषस्य चिदुपचारान्मोक्षोपपत्तिरित्यर्थः। यथा योधगतौ जयपराजयौ न्युपचर्येते तथा पुरुषादत्यन्तभिन्नबुद्धिगतौ बन्धमोक्षौ पुरुषे उप-ते, तदुक्तं नैव च बध्यते मुच्यत इति, सिद्धान्तयति। अत्रेति। किं ार्थदृष्ट्या तप्यतापकभावानुपपत्तिरुच्यते व्यवहारदृष्ट्या वा नाद्य ह। नैकत्वादेवेति। दोषत्वमिति शेषः। तस्यात्मदोषत्वं विवृणोति। दित्यादिना। एतत्तात्त्विकविषयविषयित्वं न त्वक्तीत्यर्थः। यत्र तप्य-

उच्यते देहाभावे हि केवलस्य चेतनस्य तप्तिर्न दृष्टा, *न च त्वयापि तप्तिर्नाम विक्रिया चेतयितुः केवलस्येष्यते, नापि देहचेतनयोः संहतत्वं अशुद्ध्यादिदोषप्रसङ्गात्। न च तप्तेरेव तप्तिमभ्युपगच्छसीति कथं तवापि तप्यतापकभावः। सत्त्वं तप्यं तापकं रज इति चेत्, न ताभ्यां चेतनस्य संहतत्वानुपपत्तेः। सत्त्वानुरोधित्वाच्चेतनोऽपि तप्यत इवेति चेत्, परमार्थतस्तर्हि नैव तप्यत इत्यापतति, इवशब्दप्रयोगात्, न चेत् तप्यते नेवशब्दो दोषाय। न हि डुण्डुभः सर्प इवेत्येतावता सविषो भवति सर्पो वा डुण्डुभ इवेत्येतावता निर्विषो भवति अतश्चाविद्याकृतोऽयं तप्यतापकभावो न पारमार्थिक इत्यभ्युपगन्तव्यमिति, नैवं सति

तापकभावो दृष्टस्तच्चैवेति व्यवहारपक्षमादाय सिद्धान्ती ब्रूते। किं पश्यसीति। देहस्य तप्यत्वे देहात्मवादापत्तिरिति शङ्कते। नन्विति अचेतनस्यैव देहस्य तप्तिर्नेति वदता साङ्ख्येन वक्तव्यं किं चेतनस्य केवलस्य तप्तिः किं वा देहसंहतस्य उत तप्तेः आहोस्वित् सत्त्वस्य नाद्य इत्याह। उच्यत इति। न द्वितीयतृतीयावित्याह। नापीत्यादिना। चतुर्थं शङ्कते। सत्त्वमिति। सत्त्वरजसोस्तप्यतापकत्वे पुरुषस्य बन्धाभावाच्छास्त्रारम्भवैयर्थ्यमिति परिहरति। न ताभ्यामिति। असङ्गत्वेऽपि पुरुषस्य तप्यसत्त्वप्रतिबिम्बत्वात् तप्तिरिति शङ्कते। सत्त्वेति। तर्हि जलचन्द्रस्य चलनवन्मिथ्यैव तप्तिरित्यस्मत्पक्ष आगत इत्याह। परमार्थ इति। इवशब्दमात्रेण कथं मिथ्या तप्त्यवगम इति चेत्तदुच्यते। इवशब्दस्तप्यबुद्धिसत्त्वसादृश्यं ब्रूते, तच्च सादृश्यं पुरुषस्य तप्यत्वरूपं कल्पितमेव वस्तुतस्तदभावादित्युपपादयति। न चेदिति। पुरुषो वस्तुतस्तप्तिशून्यश्चेदिवशब्दो न दोषाय मिथ्यातप्तिपरत्वादित्यर्थः। मि- सादृश्यमेव दोष इति चेन्नेत्याह। नहीति। सविषत्वं निर्विषत्व-

---

* नापीति टी०।

ममापि किञ्चिद्दुष्यति । अथ पारमार्थिकमेव चेतनस्य तप्यत्व-मभ्युपगच्छसि तवैव सुतरामनिर्मोक्षः प्रसज्येत । नित्यत्वा-भ्युपगमाच्च तापकस्य, तप्यतापकशक्त्योर्नित्यत्वेऽपि सनिमित्त-संयोगापेक्षत्वात् तप्तेः संयोगनिमित्तादर्शननिवृत्तावात्य-न्तिकः संयोगोपरमस्ततश्चात्यन्तिको मोक्ष उपपन्न इति चेत्, नादर्शनस्य तमसो नित्यत्वाभ्युपगमात् । गुणानां चोद्भवाभि-भवयोरनियतत्वादनियतः संयोगनिमित्तोपरम इति वियोग-स्याप्यनियतत्वात् साङ्ख्यस्यैवानिर्मोक्षोऽपरिहार्यः स्यात् । औ-पनिषदस्य त्वात्मैकत्वाभ्युपगमादेकस्य च विषयविषयिभावा-नुपपत्तेः, विकारभेदस्य च वाचारम्भणमात्रत्वश्रवणादनिर्मोक्ष-शङ्का स्वप्नेऽपि नोपजायते । व्यवहारे तु यत्र यथा दृष्ट-

---

रार्थः कल्पित एव द्रष्टव्यः । साङ्ख्यस्याविद्यके तप्यतापकत्वे सति ममापि ञ्चिन्न दुष्यति किन्तु इष्टमेव सम्पन्नमित्यर्थः । यदि मिथ्यातप्यत्वा-कारेऽपसिद्धान्तः स्यादिति भीत्या सत्यं तप्यत्वं पुरुषस्योच्यते तथा-पसिद्धान्तः, कौटस्थ्यहानादनिर्मोक्षश्च, सत्यस्यात्मवन्निवृत्त्ययोगादि-ह । अथेत्यादिना । किञ्च रजसो नित्यत्वात् दुःखसातत्यमित्याह । त्यत्वेति । अत्र साङ्ख्यः शङ्कते । तप्येति । सत्त्वं पुरुषो वा तप्यशक्तिः पकशक्तिस्तु रजः निमित्तमविवेकात्मकमदर्शनं तमः तेन सहितः निमित्तः संयोगः पुरुषस्य गुणस्वामित्वरूपः तदपेक्षत्वादित्यर्थः । त्त्यभावः निमित्तस्य निवृत्त्यभावात् न मोक्ष इति सिद्धान्ती हरति । नेति । तमसो निवृत्त्यभावेऽपि विवेकेनोपरमान्मोक्ष त आह । गुणानाञ्चेति । चलं गुणवृत्तमित्यङ्गीकारादिति भावः । क्ते बन्धमोक्षानुपपत्तिमुक्त्वा स्वपक्षमुपसंहरति । औपनिषदस्य । वस्तुत एकत्वेन बन्धाभावात् न मुक्त्यभावशङ्कावसरः, व्यव-

स्तप्यतापकभावस्तत्र तथैव स इति न चोदयितव्यः परिहर्तव्यो वा भवति। प्रधानकारणवादो निराकृतः, परमाणुकारणवाद इदानीं निराकर्तव्यः। तत्रादौ तावद्योऽणुकारणवादिना ब्रह्मवादिनि दोष उत्प्रेक्ष्यते स प्रतिसमाधीयते। तत्रायं वैशेषिकाणामभ्युगमः,कारणद्रव्यसमवायिनो गुणाः कार्यद्रव्ये समानजातीयं गुणान्तरमारभन्ते शुक्लेभ्यः तन्तुभ्यः शुक्लस्य पटस्य प्रसवदर्शनात् तद्विपर्ययादर्शनाच्च, तस्माच्चेतनस्य ब्रह्मणो जगत्कारणत्वेऽभ्युपगम्यमाने कार्येऽपि जगति चैतन्यं समवेयात् तददर्शनात्तु न चेतनं ब्रह्म जगत्कारणं भवितुमर्हतीति। इममभ्युपगमं तदीययैव प्रक्रियया व्यभिचारयति॥

वैशेषिक मतविचारः।

महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यां॥ ११॥

एषा तेषां प्रक्रिया, परमाणवः किल कञ्चित् कालमनारब्ध

कारस्तु भेदाङ्गीकारात् तप्यतापकभावो बन्धस्तत्त्वज्ञानात् तन्निवृत्तिश्चोपपद्यत इति न चोद्यावसर इत्यर्थः। वृत्तानुवादेन महद्दीर्घवदिति स्वमतस्थापनात्मकाधिकरणस्य सङ्गतिमाह। प्रधानेति। यद्यपि सांख्यमतनिरासानन्तरं परमाणुवादो निराकर्तव्यः स्वमतस्थापनस्य स्मृतिपादे सङ्गतत्वात् तथापि पूर्वत्र प्रधानगुणानां सुखादीनां जगदनन्वयात् प्रधानस्यानुपादानत्वमुक्तं। तथा ब्रह्मगुणचैतन्यानन्वयाद्ब्रह्मणोऽपि नोपादानत्वमिति दोषो दृष्टान्तसङ्गतिलाभादत्र समाधीयत इत्यर्थः॥

चेतनाद्ब्रह्मणो जगत्सर्गवादो वेदान्तसमन्वयो विषयः, स किं समवायिकारणगुणः स कार्यद्रव्ये स्वसमानजातीयगुणारम्भकस्तन्तुशुक्लवदिति न्यायेन विरुध्यते न वेति सन्देहे न्यायस्याव्यभिचाराद्विरोध इति प्राप्ते व्यभिचारान्न विरोध इति सिद्धान्तसूत्रं व्याचष्टे। एषे

कार्या यथायोगं रूपादिमन्तः पारिमाण्डल्यपरिमाणा-स्तिष्ठन्ति, ते च पश्चाददृष्टादिपुरःसराः संयोगसचिवाश्च न्तो द्व्यणुकादिक्रमेण कृत्स्नं कार्यजातमारभन्ते कारणगुणाश्च ार्ये गुणान्तरं। यदा द्वौ परमाणू द्व्यणुकमारभेते तदा परमा-णुगता रूपादिगुणविशेषाः शुक्लादयो द्व्यणुके शुक्लादीनपरा-ारभन्ते। परमाणुगुणविशेषस्तु पारिमाण्डल्यं न द्व्यणुके पारि-ाण्डल्यमपरमारभते, द्व्यणुकस्य परिमाणान्तरयोगाभ्युपग-ात्। अणुत्वह्रस्वत्वे हि द्व्यणुकवर्तिनी परिमाणे वर्णयन्ति। दापि द्वे द्व्यणुके चतुरणुकमारभेते तदापि समानं द्व्यणुक-

---

ना। यद्यपि न विलक्षणत्वादित्यत्र चेतनादचेतनसर्गः साधित-थापि वैशेषिकन्यायस्य तदीयप्रक्रियया व्यभिचारोक्त्यर्थत्वादस्य सू-य न गतार्थता, प्रलयकाले परमाणवो निश्चला असंयुक्तास्तिष्ठन्ति काले चादृष्टवदात्मसंयोगात्तेषु कर्म भवति, तेन संयोगात् द्रव्या-त्पत्तिर्भवति, कारणगुणाः कार्ये गुणान्तरमारभन्त इति सामा-प्रक्रियामुक्त्वा विशेषतस्तामाह। यदा द्वाविति। परमाणुः परिम-:, तद्गतं परिमाणं पारिमाण्डल्यमित्युच्यते, तच्च स्वसमानजातीयगु-म्भकं न भवतीत्युक्तन्यायस्य व्यभिचार इति भावः। व्यभिचारस्थ-रमाह। यदापि द्वे इति। द्वे द्वे इति शब्दद्वयं पठितव्यं, एवं सति भिर्द्व्यणुकैश्चतुरणुकारम्भ उपपद्यते, यथाश्रुते तु द्वाभ्यां द्व्यणुकाभ्यां श्चतुरणुकस्यारम्भो न युज्यते, कारणगतं महत्त्वं बहुत्त्वं वा विना महत्त्वायोगादिति मन्तव्यं। प्रकटार्थकारास्तु यत् द्वाभ्यां द्व्यणुका-रब्धकार्ये महत्त्वं दृश्यते तस्य हेतुः प्रचयो नाम प्रशिथिलावयव- इति रावणप्रणीते भाष्ये दृश्यत इति चिरन्तनवैशेषिकदृष्ट्येदं मित्याहुः। सर्वथापि द्व्यणुकगतह्रस्वत्वाणुत्वपरिमाणयोरनारम्भ-व्यभिचारः। यद्यपि तार्किकाः द्वाभ्यामेव परमाणुभ्यां द्व्यणुकं

समवायिनां शुक्लादीनामारम्भकत्वं। अणुत्वह्रस्वत्वे तु द्व्यणु-
कसमवायिनी अपि नैवारभेते, चतुरणुकस्य महत्त्वदीर्घत्वप-
रिमाणयोगाभ्युपगमात्। यद्यपि बहवः परमाणवो बहूनि वा
द्व्यणुकानि द्व्यणुकसहितो वा परमाणुः *कार्यमारभन्ते तदापि
समानैषा योजना। तदेवं यथा परमाणोः परिमण्डलात् सतो-
ऽणु ह्रस्वञ्च द्व्यणुकं जायते महद्दीर्घञ्च त्र्यणुकादि न परिमण्डलं।
यथा वा द्व्यणुकादणोर्ह्रस्वाच्च सतो महद्दीर्घञ्च त्र्यणुकं जा-
यते नाणु †नोत ह्रस्वं, एवं चेतनाद्ब्रह्मणोऽचेतनं जगज्जनिष्य
इत्यभ्युपगमे किं तव छिन्नं। अथ मन्यसे विरोधिना परिमा
णान्तरेणाक्रान्तं कार्यद्रव्यं द्व्यणुकादीत्यतो नारम्भकाणि कारण
गतानि पारिमाण्डल्यादीनीत्यभ्युपगच्छामि न तु चेतना

त्रिभिर्द्व्यणुकैस्त्र्यणुकमिति कल्पयन्ति तथापि तर्कस्याप्रतिष्ठाना
नियम इति मत्वा ब्रूते। यद्यपि बहव इति। कारणगुणाः शुक्लादयः
समानजातीयगुणारम्भकाः, कार्यद्रव्यपरिमाणन्तु न कारणगुणपरि
माणारभ्यं किन्तु कारणगतसंख्यारभ्यमिति प्रक्रिया तुल्येत्यर्थः
एवं प्रक्रियां दर्शयित्वा सूत्रं योजयन् व्यभिचारमाह। तदेवमिति
परमाणुभ्य एव महद्दीर्घं चेत्यनियतप्रक्रियामाश्रित्योक्तं, नियतप्रक्रि
यामाश्रित्य व्यभिचारमाह। यथा वेति। अणुह्रस्वेभ्यो द्व्यणुकेभ्योऽणुर
न जायते ह्रस्वमपि न जायत इति व्यभिचार इत्यर्थः। सूत्रे वाश
ब्दश्चार्थोऽनुक्ताणुसमुच्चयार्थः। तथा च ह्रस्वपरिमण्डलाभ्यां द्व्यणुकप
रमाणुभ्यां महद्दीर्घाणुवच्चेतनादचेतनं जायत इति सूत्रयोजना
तत्र ह्रस्वान्महद्दीर्घं त्र्यणुकं परिमण्डलादणु द्व्यणुकमिति विभाग
दृष्टान्तवैषम्यं शङ्कते। अथ मन्यस इति। अचेतनैव विरोधिगुण इत्य

---

* कार्यमारभत इति का० वर्ध०।
† नो इति का० वर्ध०।

रोधिना गुणान्तरेण जगत आक्रान्तत्वमस्ति येन कारणगताचेतना कार्ये चेतनान्तरं नारभेत, न ह्यचेतनानामचेतनाविरोधी कश्चिद्गुणोऽस्ति चेतनाप्रतिषेधमात्रत्वात्, तस्मात् पारिमाण्डल्यादिवैषम्यात् प्राप्नोति चेतनाया आरम्भकत्वमिति, मैवं मंस्थाः, यथा कारणे विद्यमानानामपि पारिमाण्डल्यादीनामनारम्भकत्वमेवं चैतन्यस्यापीत्यस्यांशस्य समानत्वात्। न च परिमाणान्तराक्रान्तत्वं पारिमाण्डल्यादीनामनारम्भकत्वे कारणं, प्राक् परिमाणान्तरारम्भात् पारिमाण्डल्यादीनामारम्भकत्वोपपत्तेः। आरब्धमपि कार्यद्रव्यं प्राक् *गुणारम्भात् क्षणमात्रमगुणं तिष्ठतीत्यभ्युपगमात्। न च परिमाणान्तरारम्भे व्यग्राणि पारिमाण्डल्यादीनि, अतः स्वसमानजातीयं परिमाणान्तरं नारभन्ते,† परिमाणान्तरस्यान्यहेतुत्वोपगमात्। कार-

---

ाह। न ह्यचेतनेति। कार्यद्रव्यस्य परिमाणान्तराक्रान्तत्वमङ्गीकृत्य ावच्छिन्तांशसाम्यमाह। मैवमिति। अङ्गीकारं त्यजति। न चेति। उत्पन्नं ह परिमाणान्तरं विरोधि भवति तदुत्पत्तेः प्रागविरोध्यभावात्, ाणुके पारिमाण्डल्यारम्भः किं न स्यादित्यर्थः। ननु विरोधिपरिमाणेन ाहैव द्रव्यं जायत इत्यत आह। आरब्धमपीति। सहोत्पत्तावपसिान्तः अतो विरोध्यभावः सिद्ध इति भावः। अणुत्वाद्यारम्भे व्यग्रत्वात् ारिमाण्डल्यादेः स्वसमानगुणानारम्भकत्वमित्याशङ्क्य निषेधति। न ेति। व्यग्रत्वमन्यथासिद्धिः, तत्र हेतुः परिमाणान्तरस्येति। अन्यतुकत्वे सूत्राण्युदाहरति। कारणेति। कारणानां द्व्यणुकानां बहुत्वात् ्यणुके महत्त्वं मृदो महत्त्वाद्घटे महत्त्वं द्वितूलपिण्डारब्धेति स्थूलतूलपिण्डे ्रचयादवयवसंयोगविशेषान्महत्त्वमित्यर्थः। महत्त्वविरुद्धमणुत्वं पर-

---

* गुणान्तरारम्भादिति वर्ध०। † नारभन्त इति वाच्यमिति वर्ध०।

णबहुत्वात् कारणमहत्त्वात् प्रचयविशेषाच्च महत्। [वै० अ०७। आ०१। सू०९।] *तद्विपरीतमणु [वै०।७।१।१०]। एतेन दीर्घत्व-ह्रस्वत्वे व्याख्याते। [वै०।७।१।१७।] इति हि काणभुजानि सूत्राणि। न च सन्निधानविशेषात् कुतश्चित्कारणबहुत्वादीन्येवारभन्ते न पारिमाण्डल्यादीनीत्युच्येत द्रव्यान्तरे गुणान्तरे वारभ्यमाणे सर्वेषामेव कारणगुणानां स्वाश्रयसमवायाविशेषात् तस्मात् स्वभावादेव पारिमाण्डल्यादीनामनारम्भकत्वं तथ चेतनाया अपीति द्रष्टव्यं। संयोगाच्च द्रव्यादीनां विलक्षणाना मुत्पत्तिदर्शनात् समानजातीयोत्पत्तिव्यभिचारः। द्रव्ये प्रकृते गुणोदाहरणमयुक्तमिति चेत्, न, दृष्टान्तेन विलक्षणारम्भमात्रस्य विवक्षितत्वात्। न च द्रव्यस्य द्रव्यमेवोदाहर्तव्यं गुणस्य वा गुण एवेति कश्चिन्नियमे हेतुरस्ति। सूत्रकारोऽपि भवतां द्रव्यस

माणुगतद्वित्वसंख्यया द्व्यणुके भवतीत्याह। तदिति। यन्महत्त्वस्यासमवायि कारणं तदेव महत्त्वसमानाधिकरणस्य दीर्घत्वस्य यच्चाणुत्वस्यासमवायि कारणं तदेवाणुत्वाविनाभूतह्रस्वत्वस्यासमवायि कारणमित्यतिदिशति। एतेनेति। अतो महत्त्वादौ अहेतुत्वात् पारिमाण्डल्यादीनां व्यग्रत्वमसिद्धमिति भावः। तेषां सन्निधिविशेषाभावान्न समानगुणारम्भकत्वमित्यपि न वाच्यं इत्याह। न चेति। पारिमाण्डल्यादीनामपि बहुत्वादिवत् समवायिकारणगतत्वाविशेषादित्यर्थः। तेषामनारम्भकत्वे कार्यद्रव्यस्य विरोधिगुणाक्रान्तत्वं व्यग्रत्वं सन्निधिर्वा हेतुरित्युक्तिफलमाह। तस्मादिति। यत्तु कारणगुणः स्वसमानगुणारम्भक इति व्याप्तेः सामान्यगुणेषु पारिमाण्डल्यादिषु व्यभिचारेऽपि यो द्रव्यसमवायिकारणगतो विशेषगुणः स स्वसमानजातीयगुणारम्भ इति व्याप्तेश्चैतन्यस्य विशेषगुणत्वादारम्भकत्वं दुर्वारमिति, तन्न

* अतो विपरीतमिति वै० सू० पाठः।

गुणमुदाजहार प्रत्यक्षाप्रत्यक्षाणामप्रत्यक्षत्वात् संयोगस्य पञ्चात्मकत्वं न विद्यत इति [वै० अ०४। आ०२। सू०२।] यथा प्रत्यक्षाप्रत्यक्षयोर्भूम्याकाशयोः समवयन् संयोगोऽप्रत्यक्षः, एवं प्रत्यक्षाप्रत्यक्षेषु पञ्चसु समवयच्छरीरमप्रत्यक्षं स्यात्, प्रत्यक्षं तु शरीरं *दृश्यते,तस्मान्न पाञ्चभौतिकमिति। एतदुक्तं भवति गुणश्च संयोगो द्रव्यं शरीरं, दृश्यते त्विति चात्रापि विलक्षणोत्पत्तिः प्रपञ्चिता। नन्वेवं सति तेनैव तद्गतं, नेति ब्रूमः तत्साङ्ख्यं प्रत्युक्तं एतत्तु वैशेषिकं प्रति। नन्वतिदेशोऽपि समानन्यायतया कृतः, एतेनावशिष्टापरिग्रहा अपि व्याख्याता इति, सत्यमेतत् तस्यैव त्वयं वैशेषिकपरीक्षारम्भे तत्प्रक्रियानुगतेन निदर्शनेन प्रपञ्चः कृतः॥

चित्रपटहेतुतन्तुगतेषु नीलादिरूपेषु विजातीयचित्ररूपहेतुषु व्यभिचाराच्चैतन्यस्यात्मत्वेन गुणत्वाभावाच्चेति मन्तव्यं। तस्माच्चेतनाद्विजातीयारम्भो युक्त इति स्थितं, तत्रोदाहरणान्तरमाह। संयोगाच्चेति। नु चेतनं ब्रह्म कार्योपादानत्वात् द्रव्यं, तन्न, विलक्षणस्योपादानमिति कृते किञ्चिद्द्रव्यमेव विलक्षणकार्यकरमुदाहर्तव्यं न संयोगस्य गुणस्योदाहरणं युक्तमिति शङ्कते। द्रव्य इति। गुणात् द्रव्यवच्चेतनादचेतनारम्भ ति विलक्षणारम्भकत्वांशेऽयं दृष्टान्त इति परिहरति। नेति। नियमः कणादसम्मत इत्याह। सूत्रकारोऽपीति। एतावता कथमनियमस्तत्राह। एतदुक्तमिति। न विलक्षणत्वन्यायेन पुनरुक्त्यभावेऽतिदेशाधिकरणेन पुनरुक्तिरिति शङ्कते। नन्वतिदेश इति। समानारम्भनियमस्य पारिमाण्डल्यादिदृष्टान्तेन भङ्गार्थमस्यारम्भ इत्याह। त्यमिति। तस्यैवातिदेशस्येत्यर्थः॥

---

* दृश्यत इति का० वर्ध० नास्ति।

उभयथापि न कर्मातस्तदभावः ॥ १२ ॥

इदानीं परमाणुकारणवादं निराकरोति। स च वाद इत्थं समुत्तिष्ठति। पटादीनि हि लोके सावयवानि द्रव्याणि स्वानुगतैः संयोगसचिवैस्तन्त्वादिभिर्द्रव्यैरारभ्यमाणानि दृष्टानि तत्सामान्येन यावत् किञ्चित् सावयवं तत्सर्वं स्वानुगतैरेव संयोगसचिवैस्तैस्तैर्द्रव्यैरारब्धमिति गम्यते। स चायमवयवावयविविभागो यतो निवर्तते सोऽपकर्षपर्यन्तगतः परमाणुः, सर्वञ्चेदं गिरिसमुद्रादिकं जगत् सावयवं, सावयवत्वादाद्यन्तवत्, न चाकारणेन कार्येण भवितव्यमित्यतः परमाणवो जगतः कारणमिति* कणभुगभिप्रायः। तानि इमानि चत्वारि भूतानि भूम्यप्तेजःपवनाख्यानि† सावयवान्युपलभ्य चतुर्विधाः परमाणवः परिकल्प्यन्ते। तेषाञ्चापकर्षपर्यन्तगतत्वेन परतो विभागासम्भवाद्विनश्यतां पृथिव्यादीनां परमाणुपर्यन्तो विभागे

वैशेषिकमतपरीक्षामारभते। उभयथापि न कर्मातस्तदभावः। नाम प्रासङ्गिकेन पूर्वाधिकरणेन संगतिरपेक्षितेति मन्वानः प्रधानस्येश्वरानधिष्ठितस्याकारणत्वेऽपि परमाणूनां तदधिष्ठातानां कारणत्वमस्त्विति प्रत्यवस्थानसङ्गत्या सांख्याधिकरणानन्तर्यमस्य वदंस्तात्पर्यमाह। इदानीमिति। द्व्यणुकादिक्रमेण परमाणुभिर्जगदारभ्यत इति वैशेषिकराद्धान्तोऽत्र विषयः, स किं मानमूलो भ्रान्तिमूलो वेति सन्देहे पूर्वपक्षयति। स चेति। तैः पटादिभिः सामान्यं क्षित्यादेः कार्यद्रव्यत्वेनेत्यर्थः। विमतं सावयवं क्षित्यादिकं स्वन्यूनपरिमाणसंयोगसचिवानेकद्रव्यारब्धं कार्यद्रव्यत्वात् पटादिवदिति प्रयोगः स्वेष्टपरमाणु

---

* कणभुगभिप्रायेति का० वर्ध०। † उपलभ्यन्त इति चतुर्विधा इति का०

भवति स प्रलयकालः। ततः सर्गकाले च वायवीयेष्वणुष्व-दृष्टापेक्षं कर्मोत्पद्यते, तत्कर्म स्वाश्रयमणुमण्वन्तरेण संयुनक्ति, ततो द्व्यणुकादिक्रमेण वायुरुत्पद्यते, एवमग्निरेवमापः एवं पृथिवी एवं शरीरं सेन्द्रियं इत्येवं सर्वमिदं जगदणुभ्यः सम्भवति, अणुगतेभ्यश्च रूपादिभ्यो द्व्यणुकादिगतानि रूपादीनि सम्भवन्ति तन्तुपटन्यायेनेति काणादा मन्यन्ते। तत्रेदमभिधीयते विभागावस्थानां तावदणूनां संयोगः कर्मापेक्षोऽभ्युपगन्तव्यः कर्मवतां तन्त्वादीनां संयोगदर्शनात्, कर्मणश्च कार्यत्वान्निमित्तं किमप्यभ्युपगन्तव्यं, अनभ्युपगमे निमित्ताभावात् नाणुष्वाद्यं कर्म स्यादभ्युपगमेऽपि यदि प्रयत्नोऽभिघातादिर्वा *यथादृष्टं किमपि कर्मणो निमित्तमभ्युपगम्येत तस्यासम्भवात् नैवाणुष्वाद्यं कर्म स्यात्, न हि तस्यामवस्थायामात्मगुणः†

सिद्धार्थानि साध्यविशेषणानि। नन्वेतावता कथं परमाणुसिद्धिरत्राह। स चायमिति। विमतं सावयवत्वं पञ्चतावच्छेदकं यतो निवर्तते स न्यूनपरिमाणस्यापकर्षस्य पर्यन्तत्वेनावसानभूमित्वेनावधितः परमाणुरित्यर्थः। यावत् सावयवमनुमानप्रवृत्तेः द्व्यणुकन्यूनत्वं निरवयवं सिद्ध्यतीति भावः। जगन्नित्यत्ववादात् कार्यद्रव्यत्वहेत्वसिद्धिरिति वदन्तं प्रत्याह। सर्वश्चेति। विमतमाद्यन्तवत् सावयवत्वात् पटवदित्यर्थः। हेतोरसिद्धिं निरस्याप्रयोजकत्वं निरस्यति। नेति। ते कतिविधा इत्याकाङ्क्षायामाह। तानीति। प्रलये चैषामपि नाशात् जगत्कारणत्वमित्याशङ्क्याह। तेषाञ्चेति। अवयवानां विभागान्नाशाद्वाऽवयविनो नाशः परमाणूनां निरवयवत्वेनावयवविभागादेर्नाशहेतोरसम्भवान्न नाश इत्यर्थः। तेषां नित्यत्वे फलितं सृष्टिक्रम-

---

* यथादृष्टमिति डी०। † आत्मन इति का०।

प्रयत्नः सम्भवति शरीराभावात्। शरीरप्रतिष्ठे हि मनस्यात्मनः संयोगे सत्यात्मगुणः प्रयत्नो जायते। एतेनाभिघाताद्यपि दृष्टं निमित्तं प्रत्याख्यातव्यं। सर्गोत्तरकालं हि तत्सर्वं नाद्यस्य कर्मणो निमित्तं सम्भवति, अथादृष्टमाद्यस्य कर्मणो निमित्तमित्युच्येत, तत्पुनरात्मसमवायि वा स्यादणुसमवायि वा। उभयथापि नादृष्टनिमित्तमणुषु कर्मावकल्पेत, अदृष्टस्याचेतनत्वात्। न ह्यचेतनं चेतनेनानधिष्ठितं स्वतन्त्रं प्रवर्तते प्रवर्तयति वेति साङ्ख्यपरीक्षायामभिहितं। आत्मनश्चानुत्पन्नचैतन्यस्य तस्यामवस्थायामचेतनत्वात्। आत्मसमवायित्वाभ्युपगमाच्च नादृष्टमणुषु कर्मणो निमित्तं स्यादसम्बन्धात्। अदृष्टवता पुरुषेणास्त्वणूनां सम्बन्ध इति चेत् सम्बन्धसातत्यात् प्रवृत्तिसातत्यप्रसङ्गो नियामकान्तराभावात्। तदेवं नियतस्य कस्यचित् कर्मनिमित्त-

---

माह। तत इति। एवं काणादमतस्य मानमूलत्वात्तेन वेदान्तसमन्वयस्य विरोधादसिद्धिरिति पूर्वपक्षे फलं तस्य भ्रान्तिमूलत्वादविरोध इति सिद्धान्तयति। तच्चेदमिति। प्रलये विभक्तानां परमाणूनां अन्यतरकर्मणोभयकर्मणा वा संयोगो वाच्यः, कर्मणश्च निमित्तं प्रयत्नादिकं दृष्टं, यथा प्रयत्नवदात्मसंयोगाद्देहचेष्टा, वाय्वाद्यभिघाताद्वृक्षादिचलनं, हस्तनोदनादिष्वादिगमनं तद्वदणुकर्मणि दृष्टं निमित्तमभ्युपगम्यते, न वा द्वितीये कर्मानुत्पत्तिः। नाद्यः प्रयत्नादेर्देहाद्युत्तरकालीनत्वादित्युभयथापि न कर्म सम्भवति, अतः कर्मासम्भवात् तस्य संयोगपूर्वकद्व्यणुकातिसर्गस्याभाव इति सूत्रार्थः। स्थिरस्य वेगवद्द्रव्यसंयोगविशेषोऽभिघातः, स एव चलस्य नोदनमिति भेदः। दृष्टनिमित्ताभावेऽपि अदृष्टवदात्मसंयोगादणुषु कर्मेति शङ्कते।

स्याभावात् नाणुष्वाद्यं कर्म स्यात् कर्माभावात् तन्निबन्धनः संयोगो न स्यात् संयोगाभावाच्च तन्निबन्धनं द्व्यणुकादिकार्यजातं न स्यात्। संयोगश्चाणोरण्वन्तरेण सर्वात्मना वा स्यादेकदेशेन वा, सर्वात्मना चेदुपचयानुपपत्तेरणुमात्रत्वप्रसङ्गो दृष्टविपर्ययप्रसङ्गश्च। प्रदेशवतो द्रव्यस्य प्रदेशवता द्रव्यान्तरेण संयोगस्य दृष्टत्वात्। एकदेशेन चेत् सावयवत्वप्रसङ्गः। परमाणूनां कल्पिताः प्रदेशाः स्युरिति चेत् कल्पितानामवस्तुत्वात्, अवस्त्वेव संयोग इति वस्तुनः कार्यस्यासमवायिकारणं न स्यात्, असति चासमवायिकारणे द्व्यणुकादिकार्यद्रव्यं नोत्पद्येत। यथा चादिसर्गे निमित्ताभावात् संयोगोत्पत्त्यर्थं कर्म नाणूनां सम्भ-

---

ादृष्टमिति। विकल्पपुरःसरं दूषयति। तत्पुनरिति। जडात्मवदणोः आश्रयत्वं किं न स्यादिति मत्वा विकल्पः कृत इति मन्तव्यं। अत्रापि सूत्रं ाजयति। उभयथेति। जीवाधिष्ठितमदृष्टं निमित्तमस्त्वित्यत आह। ात्मनश्चेति। अचेतनत्वान्नाधिष्ठातृत्वमिति शेषः, भिन्नेश्वरस्याधिष्ठातृत्वमग्रे निराकरिष्यते, अचेतनत्वमदृष्टस्य कर्म निमित्तत्वाभावे हेतुःक्तिः। हेत्वन्तरमाह। आत्मसमवायित्वेति। गुरुत्ववददृष्टमपि स्वाश्रययुक्ते क्रियाहेतुरिति शङ्कते। अदृष्टवतेति। विभुसंयोगस्याणुषु सदा त्वात् क्रियासातत्ये प्रलयाभावः स्यादिति दूषयति। सम्बन्धेति। काापित्वप्रवृत्तेरदृष्टनियम्यत्वायोगेऽपीश्वरान्नियम इत्यत आह। नियाान्तरेति। यत् ज्ञानं तच्छरीरजन्यमिति व्याप्तिविरोधेन नित्यज्ञासिद्धेस्तद्वान् ईश्वरो नास्ति, अस्तित्वेऽपि सदा सत्त्वान्न नियामकत्वति भावः। सूत्रार्थं निगमयति। तदेवमिति। संयोगस्य हेतुत्वं ङ्गयित्वा स्वरूपं खण्डयति। संयोगश्चाणोरिति। संयोगस्य व्याप्यवृत्तित्वे ःस्मिन्नितरस्यान्तर्भावात् कार्यस्य पृथुत्वायोगात् सर्वं कार्यं पर-

वति एवं महाप्रलयेऽपि विभागोत्पत्त्यर्थं कर्म नैवाणूनां सम्भवेत्। न हि तत्रापि किञ्चिन्नियतं तन्निमित्तं दृष्टमस्ति। अदृष्टमपि भोगप्रसिद्ध्यर्थं न प्रलयप्रसिद्ध्यर्थमित्यतो निमित्ताभावान्न स्यादणूनां संयोगोत्पत्त्यर्थं विभागोत्पत्त्यर्थं वा कर्म, अतश्च संयोगविभागाभावात् तयोः सर्गप्रलययोरभावः प्रसज्येत, तस्मादनुपपन्नोऽयं परमाणुकारणवादः॥

समवायाभ्युपगमाच्च साम्यादनवस्थितेः॥ १३॥

समवायाभ्युपगमाच्च तदभाव इति प्रकृतेनाणुकारणवादनिराकरणेन सम्बध्यते, द्वाभ्यां चाणुभ्यां द्व्यणुकमुत्पद्यमानमत्यन्तभिन्नमणुभ्यामणोः समवैतीत्यभ्युपगम्यते भवता, नचैवमभ्युपगच्छता शक्यतेऽणुकारणवादः समर्थयितुं, कुतः साम्यादनवस्थितेः यथैव द्व्यणुभ्यामत्यन्तभिन्नं सत् द्व्यणुकं समवायलक्षणेन सम्बन्धे

माणुमात्रं स्यादित्यर्थः। किञ्च सांशद्रव्ये संयोगस्यैकांशवृत्तित्वं दृ
तद्विरोधाद्व्याप्यवृत्तित्वं न कल्प्यमित्याह। दृष्टेति। परमाणोः संयो
एकदेशेन चेदिति सम्बन्धः, दिग्भेदेन कल्पितप्रदेशस्य संयोगस्या
कल्पितत्वात् ततः कार्यं नोत्पद्येत, उत्पन्नं वा मिथ्या स्यादित्यपसिद्धा
इत्यर्थः। काणादानां सर्गप्रत्युक्तौ सूत्रं योजयित्वा प्रलयनिरासेऽपि
योजयति। यथा चेति॥

परमाणूनां कर्मणा संयोगात् सर्गः विभागात् प्रलय इति प्रक्रि
न युक्ता युगपदनन्तपरमाणूनां विभागे नियतस्यापि घातादेर्दृ
निमित्तस्यासत्त्वात् धर्माधर्मरूपादृष्टस्य सुखदुःखार्थत्वेन सुखदुःख
न्यप्रलयप्रयोजकत्वायोगाच्चादृष्टनिमित्तेन कर्मणा विभागः सम्भवति

ाभ्यां सम्बध्यते, एवं समवायोऽपि समवायिभ्योऽत्यन्तभिन्नः सन् समवायलक्षणेनान्येनैव सम्बन्धेन समवायिभिः सम्बध्येतात्यन्तभेदसाम्यात्, ततश्च तस्य तस्यान्योऽन्यः सम्बन्धः कल्पयितव्य इत्यनवस्थैव प्रसज्येत। नन्विह प्रत्ययग्राह्यः समवायो *नित्यसम्बद्ध एव समवायिभिर्गृह्यते नासम्बद्धः सम्बन्धान्तरापेक्षो वा, ततश्च न तस्यान्यः सम्बन्धः कल्पयितव्यो येनानवस्था प्रसज्येत। नेत्युच्यते, संयोगोऽप्येवं सति संयोगिभिः नित्यसम्बद्ध एवेति समवायवन्नान्यं सम्बन्धमपेक्षते। अथार्थान्तरत्वात् संयोगः सम्बन्धान्तरमपेक्षेत, समवायोऽपि तर्ह्यर्थान्तरत्वात् सम्बन्धान्तरमपेक्षेत। न च गुणत्वात् संयोगः सम्बन्धान्तरमपेक्षते, न समवायोऽगुणत्वादिति युज्यते वक्तुं, अपेक्षाकार-

---

था च दृष्टादृष्टनिमित्तयोरसत्त्वादुभयथापि संयोगार्थत्वेन विभागार्थत्वेन च कर्म नास्ति. अतः कर्माभावात् तयोः संयोगविभागपूर्वयोः सर्गप्रलययोरभाव इति सूत्रयोजना। समवायाभ्युपगमाच्च ाभावः। अणुवादासम्भव इति योग्यतया सम्बध्यते, द्व्यणुकसमवाय: परमाणुभिन्नत्वसाम्यात् द्व्यणुकवत् समवायस्यापि समवायान्तरमित्यनवस्थितिरित्यर्थः। नन्विह तन्तुषु पट इत्यादिविशिष्टनियामकः समवायो न सम्बन्धान्तरमपेक्षते, स्वरूपेणैव नित्यसम्बन्धादिति शङ्कते। नन्विहेति। संयोगस्यापि स्वरूपसम्बन्धोपपत्तेः ावायो न स्यादिति दूषयति। नेति। सम्बन्धिभिन्नत्वाच्चेदपेक्षा समस्यापि तुल्या। गुणपरिभाषायाश्चेति, गुणत्वाभावेऽपि कर्म्मान्यादीनां समवायाङ्गीकारादगुणत्वं समवायित्वेन व्यापकं नापि ां गुणस्यापि समवायिवत् स्वरूपसम्बन्धसम्भवेन व्याप्त्यनुकूलत-

---

* नित्यसम्बन्ध इति का०।

त्वस्य तुल्यत्वात् गुणपरिभाषायाश्चातन्त्रत्वात्, तस्मादर्थान्तरं समवायमभ्युपगच्छतः प्रसज्येतैवानवस्था। प्रसज्यमानायां चानवस्थायामेकासिद्धौ सर्वासिद्धेर्द्वाभ्यामणुभ्यां द्व्यणुकं नैवोत्पद्येत, तस्मादप्यनुपपन्नः परमाणुकारणवादः ॥

नित्यमेव च भावात् ॥ १४ ॥

अपिचाणवः प्रवृत्तिस्वभावा वा निवृत्तिस्वभावा वा उभयस्वभावा वा अनुभयस्वभावा वाभ्युपगम्येरन् गत्यन्तराभावात्, चतुर्द्धापि नोपपद्यते। प्रवृत्तिस्वभावत्वे नित्यमेव प्रवृत्तेर्भावात् प्रलयाभावप्रसङ्गः। निवृत्तिस्वभावत्वेऽपि नित्यमेव निवृत्तेर्भावात् सर्गाभावप्रसङ्गः। उभयस्वभावत्वञ्च विरोधादसमञ्जसम्। अनुभयस्वभावत्वे तु निमित्तवशात् प्रवृत्तिनिवृत्त्योरभ्युपगम्यमानयोरदृष्टादेर्निमित्तस्य नित्यसन्निधानान्नित्यप्रवृत्तिप्रसङ्गः, अतन्त्रत्वेऽप्यदृष्टादेर्नित्याप्रवृत्तिप्रसङ्गः, तस्मादप्यनुपपन्नः परमाणुकारणवादः ॥

र्काभावात् तस्मात् सम्बन्धिभिन्नत्वमेव सम्बन्धान्तरापेक्षायां कारणं तस्य समवायेऽपि तुल्यत्वादनवस्था दुर्वारा, सा च मूलक्षयकरी तथा समवायासिद्धौ समवेतद्व्यणुकासिद्धिरित्यर्थः ॥

सूत्रं व्याचष्टे। अपि चेति। अनुभयस्वभावत्वे नैमित्तिकप्रवृत्तिर्वाच्या, निमित्तञ्च कालादृष्टादिकं नित्यसन्निहितमिति नित्यप्रवृत्तिप्रसङ्गः, तस्यानित्यत्वे प्रवृत्त्यभाव इत्यर्थः ॥

रूपादिमत्त्वाच्च विपर्य्ययो दर्शनात्॥ १५ ॥

सावयवानां द्रव्याणामवयवशो विभज्यमानानां यतः प-
रो विभागो न सम्भवति ते चतुर्विधा रूपादिमन्तः परमा-
णवः चतुर्विधस्य रूपादिमतो भूतभौतिकस्यारम्भका नित्या-
श्चेति यद्वैशेषिका अभ्युपगच्छन्ति स तेषामभ्युपगमो निरा-
लम्बन एव, यतो रूपादिमत्त्वात् परमाणूनामणुत्वनित्यत्वविप-
र्य्ययः प्रसज्येत परमकारणापेक्षया स्थूलत्वमनित्यत्वञ्च तेषा-
मभिप्रेतविपरीतमापद्येतेत्यर्थः। कुतः, एवं लोके दृष्टत्वात्, यद्धि
लोके रूपादिमद्वस्तु तत् स्वकारणापेक्षया स्थूलमनित्यञ्च दृष्टं,

---

किञ्च परमाणवः समवायिकारणवन्तः कारणापेक्षया स्थूला अनि-
त्याश्च रूपवत्त्वात् रसवत्त्वाद्गन्धवत्त्वात् स्पर्शवत्त्वात् घटवदिति सूत्रं
योजयितुं परप्रक्रियामाह। सावयवानामित्यादिना। नन्वत्र पर-
माणुत्वं पक्षतावच्छेदकं तद्विरुद्धं स्थूलत्वं कथं साध्यते इति चेत् न,
वायुत्वतेजस्त्वादेः पृथगवच्छेदकत्वात्, न चाप्रयोजकता कारणशून्यत्व-
नित्यत्वे चात्मवद्रूपादिमत्त्वायोगात्। न च तर्हि वायुः कारणवानिति
पृथक् साधने रूपादिहेतूनां भागासिद्ध्यभावेऽपि सिद्धसाधनता
स्यादिति वाच्यं, यत्र स्पर्शस्तत् सकारणं यत्र रूपं तत् सकारणमिति
व्याप्तिग्रहकाले वायुत्वाद्यवच्छेदेन साध्यसिद्ध्यभावादिति भावः। परमा-
णवो नित्याः सत्त्वे सत्यकारणवत्त्वादात्मवदिति सत्प्रतिपक्षमुत्थाप्य वि-
शेष्यासिद्ध्या दूषयति। यच्च नित्यत्व इति। सत्त्वं भावत्वं प्रागभावनि-
रासार्थं नित्यत्वप्रतिषेधः सप्रतियोगिकः अभावत्वात् घटाभाववदिति
नित्यत्वस्य क्वचित् सिद्धौ कार्यमनित्यमिति विशेषतः कार्ये नित्यत्व-
प्रतिषेधात् कारणभूतपरमाणुषु नित्यत्वं सिध्यति, अन्यथा प्रतियो-
ग्यभावे प्रतिषेधानुपपत्तिरिति कणादोक्तमनूद्यान्यथासिद्ध्या दूषयति।

तद्यथा पटस्तन्तूनपेक्ष्य स्थूलोऽनित्यश्च भवति, तन्तवश्चां-शूनपेक्ष्य स्थूला अनित्याश्च भवन्ति, तथा चामी परमाणवो रूपादिमन्तस्तैरभ्युपगम्यन्ते, तस्मात्तेऽपि कारणवन्तस्तदपेक्षया स्थूला अनित्याश्च प्राप्नुवन्ति। यच्च नित्यत्वे कारणं तैरुक्तं 'सदकारणवन्नित्यं' [वै० अ० ४। आ० १। सू० १] इति, तद-प्येवं सत्यणुषु न सम्भवति, उक्तेन प्रकारेण कारणवत्त्वो-पपत्तेः, यदपि नित्यत्वे द्वितीयं कारणमुक्तं 'अनित्यमिति च विशेषतः प्रतिषेधाभावः, [वै० अ० ४। आ० १। सू० ४] इति, तद-पि नावश्यं परमाणूनां नित्यत्वं साधयति, असति हि यस्मिन् कस्मिंश्चिन्नित्ये वस्तुनि नित्यशब्देन नञः समासो नोपपद्यते न पुनः परमाणुनित्यत्वमेवापेक्ष्यते, तच्चास्त्येव नित्यं परमकारणं ब्रह्म। न च शब्दार्थव्यवहारमात्रेण कस्यचिदर्थस्य प्रसिद्धिर्भवति,

---

यदपीति। कार्ये नित्यत्वप्रतिषेधव्यवहारमङ्गीकृत्य ब्रह्मणि प्रतियोगि-प्रसिद्धिरुक्ता, वस्तुतस्तु विशेषव्यवहार एवासिद्धः, कारणनित्यत्वस्य प्रमाणान्तरेण ज्ञानं विना कार्यमनित्यमिति व्यवहारायोगादित्याह। न च शब्देति। यदि प्रमाणान्तरं कारणनित्यत्वे स्यात्तदायं व्यवहारः समूलो भवति ततो मूलज्ञानात् प्रागव्यवहारमात्रान्न वस्तुसिद्धिर्वटे यक्षव्यवहारादपि तत्सिद्धिप्रसङ्गान्मूलज्ञाने तु तेनैव विशेषसिद्धेर्व्यवहारोपन्यासवैयर्थ्यमिति भावः। एवं परमाणुनित्यत्वे काणादसूत्रद्वयं निरस्य तृतीयं निरस्यति। यदपीति। सतामणूनां दृश्यमानस्थूलकार्याणां प्रत्यक्षेण कारणाज्ञानमविद्येति यदि सूत्रार्थः तर्हि प्रत्यक्षाकारणत्वं नित्यत्वे हेतुः स्यात् तन्न द्व्यणुके व्यभिचारादित्यर्थः। यद्यारम्भकद्रव्यशून्यत्व हेतुविशेषणं तदा विशेष्यवैयर्थ्यं स्यात् पुनरपि तेत्याह। अथेत्यादिना। परमाणवो नित्याः नाशकानुपलम्भादात्म

प्रमाणान्तरसिद्धयोः शब्दार्थयोर्व्यवहारावतारात्। यदपि नित्यत्वे तृतीयं कारणमुक्तं ‘अविद्या च’ [वै०अ०४।आ०१।सू०५] इति, तद्यद्येवं विशीयेत सतां परिदृश्यमानकार्याणां कारणानां प्रत्यक्षेणाग्रहणमविद्येति, ततो द्व्यणुकनित्यताप्यापद्येत। अथाद्रव्यत्वे सतीति विशेष्येत तथाप्यकारणवत्त्वमेव नित्यतानिमित्तमापद्येत, तस्य च प्रागेवोक्तत्वात् ‘अविद्या च’ इति पुनरुक्तं स्यात्, अथापि कारणविभागात् कारणविनाशाच्चान्यस्य तृतीयस्य विनाशहेतोरसम्भवोऽविद्या सा परमाणूनां नित्यत्वं ख्यापयतीति व्याख्यायेत, नावश्यं विनश्यद्वस्तु द्वाभ्यामेव हेतुभ्यां विनंष्टुमर्हतीति नियमोऽस्ति, संयोगसचिवे हि अनेकस्मिंश्च द्रव्ये द्रव्यान्तरस्यारम्भकेऽभ्युपगम्यमाने एतदेवं स्यात्, यदा त्वपास्तविशेषं

दिति सूत्रार्थमाशङ्कते। अथापीति। तन्त्वाद्यवयवानां विभागान्नाशाद्वा पटादिनाशो दृष्टः तच्च द्वयं निरवयवाणूनां नास्तीति नित्यत्वमित्यर्थः। परिणामवादमाश्रित्याणूनां नाशकं किञ्चित् सम्भवति इति परिहरति। नेति। अवयवानां संयोगेन द्रव्यान्तरोत्पत्तिरारम्भ इति यदि मतं स्यात् तदा द्रव्यविनाशे द्वाभ्यामेवेति नियमः स्यान्नारम्भे मानमस्ति संयुक्ततन्त्वन्यपटादर्शनादतः कारणमेव स्वतो निर्विशेषं विशेषवदवस्थात्मना कार्यमित्यनुभवबलादास्थेयं। तथा चाणूनामप्यवस्थापरिणामरूपाणां प्रलयनिमित्तेन कालादिना पिण्डात्मकस्वरूपतिरोभावेन कारणभावापत्तिर्विनाश उपपद्यते। यथाग्निसम्पर्कात् घृतकाठिन्यमवयवसंयोगस्यावयवनाशं नाशं विनैव लीयते तद्वत्, न च काठिन्यस्य संयोगविशेषत्वेन गुणत्वात् द्रव्यनाशेऽनुदाहरणत्वमिति वाच्यं, गुणवद्द्रव्यस्यापि कुतश्चिद्विनाश इत्यंशेनोदाहरणाद्गुणपरि-

सामान्यात्मकं कारणं विशेषवदवस्थान्तरमापद्यमानं आर-
म्भकमभ्युपगम्यते तदा घृतकाठिन्यविलयनवन्मूर्त्यवस्थाविलय-
नेनापि विनाश उपपद्यते, तस्मात् रूपादिमत्त्वात् स्या-
दभिप्रेतविपर्ययः परमाणूनां, तस्मादप्यनुपपन्नः परमाणु
कारणवादः ॥

उभयथा च दोषात् ॥ १६ ॥

गन्धरसरूपस्पर्शगुणा स्थूला पृथिवी, रूपरसस्पर्शगुणा
सूक्ष्मा आपः, रूपस्पर्शगुणं सूक्ष्मतरं तेजः, स्पर्शगुणः सूक्ष्मतम
वायुरित्येवमेतानि चत्वारि भूतानि उपचितापचितगुणा
स्थूलसूक्ष्मतारतम्योपेतानि च लोके लक्ष्यन्ते, तद्वत् परम
णवोऽप्युपचितापचितगुणाः कल्प्येरन् न वा, उभयथापि
दोषानुषङ्गोऽपरिहार्य एव स्यात्। कल्प्यमाने तावदुपचित
पचितगुणत्वे उपचितगुणानां मूर्त्युपचयादपरमाणुत्वप्रसङ्ग

भाषायास्तात्पर्यत्वात्। वस्तुतस्तु घृतं कठिनं द्रवमित्यनुस्यूतघृतपरि
मविशेषो द्रव्यमेव काठिन्यं। न च द्रव्यत्वेऽपि अवयवविभागादेव
नाश इति वाच्यं, घृतस्य परिणामिन एकत्वेन विभागासम्भव
परमाणुकाठिन्यनाशे तदसम्भवाच्च इति भावः। किञ्च प्रलये
सीदाजा नान्यत् किञ्चनेत्यणूनां नाशसिद्धिः, तस्मान्न तेषां परमका
त्वमित्युपसंहरति। तस्मादिति ॥

यद्यस्मादधिकगुणवत्तत्तस्मात् स्थूलमिति व्याप्तिमुक्त्वा विकल्पय
तद्वदिति। पार्थिवः परमाणुः अधिकगुणस्तत एकैकन्यूनगुणा जल
परमाणव इति कल्प्यते न वा, आद्ये दोषमाह। कल्प्यमान इति।

नचान्तरेणापि मूर्त्त्युपचयं गुणोपचयो भवतीत्युच्येत, कार्य्येषु भूतेषु गुणोपचये मूर्त्त्युपचयदर्शनात्। अकल्प्यमाने तु उपचितापचितगुणत्वे परमाणुत्वसाम्यप्रसिद्धये यदि तावत् सर्व्वे एकैकगुणा एव कल्प्येरन् ततस्तेजसि स्पर्शस्योपलब्धिर्न स्यात् अप्सु रूपस्पर्शयोः पृथिव्याञ्च रसरूपस्पर्शानां, कारणगुणपूर्व्वकत्वात् कार्य्यगुणानां। अथ सर्व्वे चतुर्गुणा एव कल्प्येरन् ततोऽप्स्वपि गन्धस्योपलब्धिः स्यात् तेजसि गन्धरसयोर्वाय्वौ च गन्धरूपरसानां, न चैवं दृश्यते, तस्मादप्यनुपपन्नः परमाणुकारणवादः ॥

अपरिग्रहाच्चात्यन्तमनपेक्षा ॥१७॥

प्रधानकारणवादो वेदविद्भिरपि कैश्चिन्मन्वादिभिः सत्कार्य्यत्वाद्यंशोपजीवनाभिप्रायेणोपनिबद्धः, अयन्तु परमा-

---

वयात् स्थौल्यादित्यर्थः। पार्थिवोऽणुराप्यात् स्थूलः, अधिकगुणत्वात् टवदित्येवं प्रयोक्तव्यः। अप्रयोजकत्वं निरस्यति। न चान्तरेणेति। दृविरोधः स्यादिति भावः। नेति पक्षे सर्व्वेषां अणूनां साम्यार्थमेकैकणवत्त्वं वा स्याच्चतुर्गुणवत्त्वं वा, उभयथापि दोषमाह। अकल्प्यने त्वित्यादिना ॥

न केवलमनुवादस्यायुक्तत्वादुपेक्षा किन्तु शिष्टवहिर्भूतत्वात् ग्रन्थर्थतस्याग्राह्यत्वमित्याह। अपरिग्रहाच्चेति। चकारार्थं प्रपञ्चयितुमते। अपि चेति। अत्यन्तभेदज्ञापकमाह। भिन्नलक्षणानिति। गुणकर्म्मणां द्रव्यत्वगुणत्वकर्म्मत्वजातयो लक्षणानि गुणाश्रयत्वाधयो वा, निर्गुणत्वे सति जातिमदक्रियात्वं गुणलक्षणं, संयोग-

णकारणवादो न कैश्चिदपि शिष्टैः केनचिदप्यंशेन परिगृहीत इत्यत्यन्तमेवानादरणीयो वेदवादिभिः। अपि च वैशेषिकाः तन्त्रार्थभूतान् षट् पदार्थान् द्रव्यगुणकर्मसामान्यविशेषसमवायाख्यानत्यन्तभिन्नान् भिन्नलक्षणानभ्युपगच्छन्ति, यथा मनुष्योऽश्वः शश इति, तथात्वञ्चाभ्युपगम्य तद्विरुद्धं द्रव्याधीनत्वं शेषाणामभ्युप*गच्छन्ति तन्नोपपद्यते कथं, यथा हि लोके शशकुशपलाशप्रभृतीनामत्यन्तभिन्नानां सतां नेतरेतराधीनत्वं भवति, एवं द्रव्यादीनामप्यत्यन्तभिन्नत्वान्नैव द्रव्याधीनत्वं गुणादीनां भवितुमर्हति, अथ च भवति द्रव्याधीनत्वं गुणादीनां। ततो द्रव्यभावे भावात् द्रव्याभावे चाभावात् द्रव्यमेव संस्थानादिभेदादनेकशब्दप्रत्ययभाग्भवति। यथा देवदत्त एक एव सन्नवस्थान्तरयोगादनेकशब्दप्रत्ययभाग्भवति तद्वत्

विभागयोर्निरपेक्षकारणं कर्म नित्यमेकं, अनेकसमवेतं सामान्यं नि
द्रव्यवृत्तयो विशेषाः, नित्यः सम्बन्धः समवायः इति भिन्नानि ल
णानि, तैर्मिथोऽत्यन्तभेदसिद्धिरित्यर्थः। तथात्वमत्यन्तभिन्नत्वं
विरुद्धो यो धर्मधर्मिभावः गुणादयो न द्रव्यधर्माः स्युः ततोऽत्यन्तभि
न्नत्वाच्छशकुशादिवदित्यर्थः। भेदबाधकमुपन्यस्याभेदमाह। अथ
भवतीति। गुणादिषु तदधीनत्वं तावदन्वयव्यतिरेकसिद्धं, तथा
गुणादयो द्रव्याभिन्नाः द्रव्याधीनत्वात् यद्यस्माद्भिन्नं तत् तदधीनं य
शशभिन्नः कुश इत्यर्थः। अभेदे द्रव्यं गुण इति शब्दप्रत्ययभेदः
तत्राह। द्रव्यमिति। कल्पितभेदोऽप्यस्तीत्याशयः। अन्यथात्यन्तभेदवद
न्ताभेदेऽपि धर्मधर्मित्वायोगादिति मन्तव्यं। अस्तु गुणादीनां

---

* गच्छन्ति धर्ममित्यधिकपाठः का० वर्ध०।

तथा सति साङ्ख्यसिद्धान्तप्रसङ्गः स्वसिद्धान्तविरोधश्चापद्येयातां।
नन्वग्नेरन्यस्यापि धूमस्याग्न्यधीनत्वं दृश्यते, सत्यं दृश्यते, भेद-
प्रतीतेस्तु तत्राग्निधूमयोरन्यत्वं निश्चीयते, इह तु शुक्लः
कम्बलो रोहिणी धेनुर्नीलमुत्पलमिति द्रव्यस्यैव तस्य तस्य तेन
तेन विशेषेण प्रतीयमानत्वान्नैव द्रव्यगुणयोरग्निधूमयोरिव भेद-
प्रतीतिरस्ति, तस्माद्द्रव्यात्मकता गुणस्य। एतेन कर्मसामान्य-
विशेषसमवायानां द्रव्यात्मकता व्याख्याता। गुणादीनां द्रव्या-
धीनत्वं द्रव्यगुणयोरयुतसिद्धत्वादिति यदुच्येत तत्पुनरयुतसि-
द्धत्वमपृथक्देशत्वं वा स्यादपृथक्कालत्वं वा अपृथक्स्वभा-
त्वं वा, सर्वथापि नोपपद्यते। अपृथग्देशत्वे तावत् स्वाभ्युपग-
मो विरुध्येत कथं, तन्त्वारब्धो हि पटः तन्तुदेशोऽभ्युपगम्यते
न तु पटदेशः, पटस्य तु गुणाः शुक्लत्वादयः पटदेशा अभ्यु-
पगम्यन्ते न तन्तुदेशाः। तथा चाहुः 'द्रव्याणि द्रव्यान्त-
रमारभन्ते गुणाश्च गुणान्तरं' [वै०अ०१।आ०१।सू०१०]

दात्म्यमिति वदन्तं तार्किकम्मन्यं प्रत्याह। तथा सतीति। साङ्ख्योऽत्र
सिद्धान्तो ग्राह्यः। यद्वा कापिलस्यापि तादात्म्यसिद्धान्त इति साङ्ख्य-
ग्रहणं। यद्यपि तदधीनत्वं तद्धर्मत्वं तच्च धूमे नास्ति अग्निं विनापि
भावात्, तथापि तत्कार्यत्वं तदधीनत्वं मत्वा व्यभिचारं शङ्कते। नन्विति।
कार्यत्वमन्यत्वं चाङ्गीकरोति। सत्यमिति। तथापि तादात्म्येन प्रतीय-
मानत्वस्य हेतोर्विवक्षितत्वान्न व्यभिचार इत्याशयः। अस्य हेतोरन्यथा
सिद्धमाशङ्कते। गुणादीनामिति। गुणादीनां द्रव्येणाभेदाभावेऽपि
अयुतसिद्धत्वेन तादात्म्यप्रतीतिसिद्धिरित्यर्थः। दूषयितुं विकल्पयति।

इति। तन्तवो हि कारणद्रव्याणि कार्यद्रव्यं पटमारभन्ते, तन्तुगताश्च गुणाः शुक्लत्वादयः कार्यद्रव्ये पटे शुक्लत्वादि-गुणान्तरमारभन्ते इति हि तेऽभ्युपगच्छन्ति। सोऽभ्युपगमो द्रव्यगुणयोरपृथग्देशत्वेऽभ्युपगम्यमाने बाध्येत। अथापृथक्-कालत्वं अयुतसिद्धत्वमुच्येत, सव्यदक्षिणयोरपि गोविषा-णयोरयुतसिद्धत्वं प्रसज्येत। *तथाऽपृथक्स्वभावत्वे त्वयुतसि-द्धत्वे न द्रव्यगुणयोरात्मभेदः सम्भवति, तस्य तादात्म्येनैः प्रतीयमानत्वात्। युतसिद्धयोः सम्बन्धः संयोगोऽयुतसिद्ध-योऽस्तु समवाय इत्ययमभ्युपगमो मृषैव तेषां, प्राक् सिद्धत्व कार्यात् कारणस्यायुतसिद्धत्वानुपपत्तेः। †अथान्यतरापेक्ष एवायमभ्युपगमः स्यादयुतसिद्धस्य कार्यस्य कारणेन सम्ब-

---

तत्पुनरिति। शौक्ल्यस्य पटनिष्ठत्वात् पटस्य तन्तुदेशत्वात् पटशौक्ल्-योरपृथक्देशत्वाभावाच्छुक्लः पट इति सामानाधिकरण्यप्रतीति स्यादित्याद्यं दूषयति। अपृथग्देशत्व इति। काणादसूत्रद्वयं व्याचष्टे तन्तवो हीति। स्वभावो हि स्वरूपं तस्यापृथक्त्वेऽस्मदिष्टाऽभे-सिद्धिरित्याह। अपृथक्स्वभावत्व इति। अभेदे युक्तिमाह। तस्येति गुणस्येत्यर्थः। एवं षट् पदार्थाः अत्यन्तभिन्ना इति सिद्धान्तोऽनुभवि-रोधेन दूषितः। सिद्धान्तान्तरं दूषयति। युतेति। अयुतसिद्धत्वं किमु-योरुतान्यतरस्य,नाद्य इत्याह। प्रागिति। द्वितीयमाशङ्क्य दूषयति। अ-थेत्यादिना। कारणस्य पृथक्सिद्धत्वेऽपि कार्यमपृथक्सिद्धमित्युक्तमु-सम्बन्धोऽसिद्धस्य सिद्धस्य वेति विकल्प्याद्यं दूषयित्वा द्वितीयं प्रा-सिद्धं भूत्वेति। सतोरप्राप्तयोः प्राप्तिः संयोग इत्यभ्युपगमात् त-पटयोरपि संयोगापत्तिरित्यपसिद्धान्तः स्यादित्यर्थः। सद्योगा

---

* तथेति का० वर्ध० नास्ति। † अथेति का० वर्ध० नास्ति।

समवाय इति। एवमपि प्रागसिद्धस्यालब्धात्मकस्य कार्यस्य
कारणेन सम्बन्धो नोपपद्यते द्वयायत्तत्वात् सम्बन्धस्य। सिद्धं
भूत्वा सम्बध्येत इति चेत्, प्राक् कारणसम्बन्धात् कार्यस्य सिद्धा-
भ्युपगम्यमानायामयुतसिद्ध्यभावात् कार्यकारणयोः संयोग-
विभागौ न विद्येते इतीदमुक्तं दुरुक्तं स्यात्। यथा चोत्पन्न-
मात्रस्याक्रियस्य कार्यद्रव्यस्य विभुभिराकाशादिभिर्द्रव्यान्तरैः
सम्बन्धः संयोग एवाभ्युपगम्यते न समवायः, एवं कारणद्रव्ये-
णापि सम्बन्धः संयोग एव स्यात् न समवायः, नापि संयोगस्य
समवायस्य वा सम्बन्धस्य सम्बन्धिव्यतिरेकेणास्तित्वे किञ्चित्
प्रमाणमस्ति। सम्बन्धिशब्दप्रत्ययव्यतिरेकेण संयोगसमवाय-

रस्य क्रियाभावात् कथं संयोगस्तत्राह। यथेति। किञ्च सम्बन्ध-
नापि सम्बन्धेनावस्थानादसम्बन्धस्यानियामकत्वात् सम्बन्धोऽपि दुर्नि-
प इत्याह। नापीति। सम्बन्धः सम्बन्धिभिन्नः, तद्विलक्षणशब्दधीग-
म्यत्वादर्थान्तरवदिति शङ्कते। सम्बन्धीति। कल्पितभेदसाधने सिद्धसा-
धनता वस्तुभेदसाधने तु व्यभिचार इति समाधत्ते। नैकत्वेऽपीति। स्व-
रूपेणैव मनुष्यादिशब्दभावे च पुत्राद्यपेक्षया पितेत्यादिविलक्षणशब्द-
गम्यो भवति न च भिद्यत इति व्यभिचार इत्यर्थः। फलित-
ह। इत्युपलब्धीति। विलक्षणशब्दधीगम्यत्वादित्युपलब्धिघटितेन
योग्येन लिङ्गेन प्राप्तस्य वस्त्वन्तरस्य संयोगादेः सम्बन्धिव्यतिरेकेणानुप-
लम्भादभावो निश्चीयत इत्यर्थः। न ह्यङ्गुलिद्वयस्य नैरन्तर्यातिरेकेण सं-
योग उपलभ्यते, समवायस्तु न कस्यापि क्वचिदप्यनुभवमारोहयतीति
भावः। सम्बन्धस्य सम्बन्ध्यभेदे सम्बन्धिनः सदा सत्त्वात् सम्बन्ध-
प्रसङ्ग इति शङ्कां निषेधति। नापीति। परापेक्षया नैरन्तर्या-
द्यागामङ्गुल्याः रूपरूपिणोश्च सम्बन्धधीर्न सत इत्युक्तमित्यर्थः।

शब्दप्रत्ययदर्शनात् तयोरस्तित्वमिति चेत् न, एकत्वेऽपि स्वरूप-
बाह्यरूपापेक्षयाऽनेकशब्दप्रत्ययदर्शनात्। यथैकोऽपि सन् देव-
दत्तो लोके स्वरूपं सम्बन्धिरूपं चापेक्ष्यानेकशब्दप्रत्ययभाग्भ-
वति मनुष्यो ब्राह्मणः श्रोत्रियो वदान्यो बालो युवा स्थविरः
पिता पुत्रः पौत्रो भ्राता जामातेति। यथा चैकापि सती रेखा
स्थानान्यत्वेन निवेश्यमानैकदशशतसहस्रादिशब्दप्रत्ययभेदमनु-
भवति तथा सम्बन्धिनोरेव सम्बन्धिशब्दप्रत्ययव्यतिरेकेण संयो-
गसमवायशब्दप्रत्ययार्हत्वं न व्यतिरिक्तवस्त्वस्तित्वेन इत्युपलब्धि
लक्षणप्राप्तस्यानुपलब्धेरभावो वस्त्वन्तरस्य। नापि सम्बन्धिविष
यत्वे सम्बन्धशब्दप्रत्यययोः सन्ततभावप्रसङ्गः, स्वरूपबाह्यरूपा
पेक्षयेत्युक्तोत्तरत्वात्। तथाण्वात्ममनसामप्रदेशत्वान्न संयोग

पूर्वपरमाण्वोः संयोगनिरासेन द्व्यणुकादिसृष्टिर्निरस्ता, संप्रत्यदृष्ट
दात्मनाणूनां संयोगोऽणुषु क्रियाहेतुरात्ममनसोः संयोगो बुद्ध्याद्यस
मवायिकारणं निरस्यते। तथाण्वात्मेति। निरस्तमपि कल्पितप्रदे
पक्षमतिप्रसङ्गाख्यदोषान्तरं वक्तुं पुनरुद्भावयति। कल्पिता इति
कल्पनमूहः ऊहितार्थाः सन्तोऽसन्तो वा द्वितीयेन संयोगसि
सत्त्वाभावयोरेकत्र वृत्त्यवच्छेदकासत्त्वादाद्ये तूहमात्रेण सर्वार्थसि
प्रसङ्गः, ऊहस्य स्वाधीनत्वात् प्रभूतत्वं निरवधित्वं तत्सम्भवाच्चेत्यर्थ
यद्यूहात् सर्वसिद्धिस्तदा पदार्थबन्धमुक्तिनियमा लुप्येरन्नित्याह।
चेत्यादिना। संयोगं दूषयित्वा समवायं दूषयति। किञ्चान्यदिति। तत्र
दूषणान्तरं उच्यत इत्यर्थः। संश्लेषः संग्रहः। यत एकाकर्षणेनाप
कर्षणं तस्यानुपपत्तिरित्यर्थः। द्व्यणुकं निरवयवासमवेतं सावयव
दाकाशासमवेतभूमिवदिति भावः। ननु द्व्यणुकस्यासमवेतत्वे त

म्भवति, प्रदेशवतो द्रव्यस्य प्रदेशवता द्रव्यान्तरेण संयोगदर्शनात्। कल्पिताः प्रदेशा अणात्ममनसां भविष्यन्तीति चेत् न, अविद्यमानार्थस्य कल्पनायां सर्वार्थसिद्धिप्रसङ्गात्, इयानेवाविद्यमानो विरुद्धोऽविरुद्धो वार्थः कल्पनीयो नातोऽधिक इति नियमे हेत्वभावात्, कल्पनायाश्च स्वायत्तत्वात्, प्रभूतत्वसम्भवाच्च। न च वैशेषिकैः कल्पितेभ्यः षड्भ्यः पदार्थेभ्योऽन्येऽधिकाः शतं सहस्रं वार्था न कल्पितव्या इति निवारको हेतुरस्ति, तस्माद्यस्मै यस्मै यद्यद्रोचते तत्तत् सिध्येत्, कश्चित्कृपालुः प्राणिनां दुःखबहुलः संसार एवं माभूदिति कल्पयेत्, अन्यो वा व्यसनी मुक्तानामपि पुनरुत्पत्तिं कल्पयेत्, कस्तयोर्निवारकः स्यात्। किञ्चान्यद्द्वाभ्यां परमाणुभ्यां निरवयवाभ्यां सावयवस्य द्व्यणुकस्याकाशेनेव संश्लेषानुपपत्तिः, न ह्याकाशस्य पृथिव्यादीनाञ्च जतु-

---

त्वं न स्यात्, सम्बन्धं विना तदयोगात्, न च संयोगादाश्रितत्वं कार्यस्य प्रकृत्य संयोगादिति शङ्कते। कार्येति। प्रकृतिविकारयोरभेदाश्रयाश्रयिभावानुपपत्तिरित्येति परिहरति। नेति। भेदात् तद्भाववदन्तं प्रत्याह। इतरेतराश्रयत्वादिति। कथं तर्हि कार्यस्य कारणाश्रितत्वव्यवहारः कल्पितभेदादित्याह। कारणस्यैवेति। परमाणूनां निरवयवत्वमप्ययुक्तमित्याह। किञ्चेति। परमाणवः सावयवाः अल्प- घटवद्विपक्षे तेषां दिग्भेदावधित्वं न स्यादात्मवदित्यर्थः। ननु माणवपेक्षया योऽयं प्राची दक्षिणेत्यादिदिग्भेदव्यवहारस्तदवधि- येऽवयवास्तयोच्यन्ते त एव परमाणवस्तेऽपि सावयवाश्चेत् तद- ा एवेति, एवं यतः परं न विभागः स एव निरवयवः परमाणुशङ्कते। यांस्त्वमिति। परिहरति। न स्थूलेति। अयमर्थः यत्सर्वा-

काष्ठवत् संश्लेषोऽस्ति, कार्यकारणद्रव्ययोराश्रिताश्रयभावोऽन्य या नोपपद्यत इत्यवश्यं कल्प्यः समवाय इति चेत् न, इतरे तराश्रयत्वात्। कार्यकारणयोर्हि भेदसिद्धावाश्रिताश्रयभावसि द्धिराश्रिताश्रयभावसिद्धौ च तयोर्भेदसिद्धिः कुण्डबदरवदि इतरेतराश्रयता स्यात्। नहि कार्यकारणयोर्भेदः आश्रिता श्रयभावो वा वेदान्तवादिभिरभ्युपगम्यते, कारणस्यैव संस्थानमा कार्यमित्यभ्युपगमात्। किञ्चान्यत् परमाणूनां परिच्छिन्नत्वा यावन्त्यो दिशः षडष्टौ दश वा तावद्भिरवयवैः सावयवास्ते सावयवत्वादनित्याश्चेति नित्यत्वनिरवयवत्वाभ्युपगमो बाध्ये यांस्त्वं दिग्भेदभेदिनोऽवयवान् कल्पयसि त एव मम परमाण इति चेत् न, स्थूलसूक्ष्मतारतम्यक्रमेणापरमकारणाद्विन शोपपत्तेः। यथा पृथिवी द्व्यणुकाद्यपेक्षया स्थूलतमा वस्तु

त्मना विभागायोग्यं वस्तु स परमाणुरिति यद्युच्येत तर्हि ब्रह्मण परमाणुसंज्ञा कृता स्यात्, तदन्यस्याल्पस्य दिग्भावाद्द्वैतेनावयववि णावश्यम्भावात्, यदि पृथिव्यादिजातीयाल्पपरिमाणविश्रान्तिभूमिः परमाणुरित्युच्येत तर्हि तस्य न मूलकारणत्वं विनाशित्वात् घटवत् च हेत्वसिद्धिः, अणवो विनाशिनः पृथिव्यादिजातीयत्वात् घटवदि साधनादिति, सम्प्रति निरवयवद्रव्यस्य नाशहेत्वभावात् आत्मवत् नाश इत्याशङ्क्य पूर्वोक्तं परिहारं स्मारयति। विनश्यन्त इ दिना। ब्रह्मातिरिक्तस्य अज्ञानिकत्वाच्च द्रव्यस्य निरवयवत्वम निमित्तादृष्टादिनाशादिनाशः प्रलये सम्भवति, मुक्तौ ज्ञानाद नाशे तत्कार्यानुनाशसम्भव इति भावः। यदुक्तं यत्कार्यद्रव्यं

तापि विनश्यति ततः सूक्ष्मं सूक्ष्मतरञ्च पृथिव्येकजातीयकं विनश्यति ततो द्व्यणुकं, तथा परमाणवोऽपि पृथिव्येकजातीयकत्वाद्विनश्येयुः। विनश्यन्तोऽप्यवयवविभागेनैव विनश्यन्तीति चेत् नायं दोषः, यतो घृतकाठिन्यविलयनवदपि विनाशोपपत्तिमवोचाम। यथा हि घृतसुवर्णादीनामविभज्यमानावयवानामपि अग्निसंयोगाद्द्रवभावापत्त्या काठिन्यविनाशो भवति, एवं परमाणूनामपि परमकारणभावापत्त्या मूर्त्त्यादिविनाशो भविष्यति, तथा कार्यारम्भोऽपि नावयवसंयोगेनैव केवलेन भवति, चीरजलादीनामन्तरेणापि अवयवसंयोगान्तरं दधिहिमादिकार्यारम्भदर्शनात् तदेवमसारतरतर्कसन्दृब्धत्वादी-

---

गसचिवानेकद्रव्यारब्धमिति तन्नेत्याह। तथा कार्यारम्भोऽपीति। वत्थं प्राधान्यं कार्यद्रव्यस्थितावपि हेतुत्वात् संयोगस्य चीरारकसंयोगाद्दध्यारम्भकं न संयोगान्तरं, तथा च दध्यादौ व्यभिचान व्याप्तिरित्यर्थः। किञ्च यत्कार्यद्रव्यं तद्द्रव्यारभ्यमित्येव व्याप्तिरस्तु घवान्न तु संयोगसचिवस्वन्यूनपरिमाणानेकद्रव्यारभ्यमिति गौरदीर्घविस्तृतदुकूलारब्धरज्जौ न्यूनपरिमाणायां व्यभिचाराच्च। न च गुणं द्रव्यान्तरमिति वाच्यं, अवयविमात्रविप्लवापातात्। किञ्च नियवद्रव्यत्वस्यैकात्मवृत्तित्वे लाघवान्न निरवयवानेकाणुसिद्धिः। यत्त्वतारतम्यविश्रान्तिभूमित्वेन तत्सिद्धिरिति तन्न त्र्यणुकत्वेनोक्तत्रुटिषु प्रान्तेः। न च त एव त्रुटिनामानो जगद्धेतव इति वाच्यं। पृथिव्यादिना सावयवत्वानित्ययोरनुमानात्। न चावयवत्वस्य क्वचित् विश्रान्तौ परमाणुसिद्धिः अविश्रान्तावनवस्थेति वाच्यं। मायायां ब्रह्मणि यवत्वविश्रान्तिसम्भवात्। अतो न किञ्चिदणुसद्भावे प्रमाणं, निरवयवानां संयोगसमवाययोरसम्भवात् समवेतद्व्यणुकाद्यारम्भकत्वायोग

श्वरकारणश्रुतिविरुद्धत्वाच्छ्रुतिप्रवणैश्च शिष्टैर्मन्वादिभिरपरि-
गृहीतत्वादत्यन्तमेवानपेक्षास्मिन् परमाणुकारणवादे कार्याऽऽर्यैः
श्रेयोऽर्थिभिरिति वाक्यशेषः॥

वैनाशिक मतविचारः

समुदाय उभयहेतुकेऽपि तदप्राप्तिः॥ १८॥

वैशेषिकराद्धान्तो दुर्युक्तियोगाद्वेदविरोधाच्छिष्टापरिग्रहाच्च नापेक्षितव्य इत्युक्तं, सोऽर्द्धवैनाशिक इति वैनाशिकत्वसाम्यात् सर्ववैनाशिकराद्धान्तो नितरामनपेक्षितव्य इतीदमिदानीमुपपादयामः। स च बहुप्रकारः प्रतिपत्तिभेदाद्विनेयभेदाद्वा। तत्रैते त्रयो वादिनो भवन्ति, केचित् सर्वास्तित्ववादिनः, केचिद्विज्ञानास्तित्वमात्रवादिनः, अन्ये पुनः सर्व

इत्यादि बाधकमुक्तमेव। सम्यक्परिग्रहाच्चेति सूत्रवाक्यशेषं पूरयन्नधिकरणार्थमुपसंहरति। तदेवमिति। तस्माद्भ्रान्तिमूलेन वैशेषिकमतेन वेदान्ततात्पर्यस्याविरोध इति सिद्धं॥

वैशेषिकं निरस्य वैनाशिकं निरस्यति। समुदाय इति। परिमाणभेदेन देहादेराशुतरविनाशाङ्गीकारादर्द्धवैनाशिको वैशेषिकस्तन्निरासानन्तरं सर्वक्षणिकवादी बुद्धिस्थो निरस्यत इति प्रसङ्गसङ्गतिमाह। वैशेषिकेति। नाभाव उपलब्धेरिति निरसनीयसिद्धान्तं दर्शयन्निरस्यति, सिद्धान्तस्य भेदं वक्तुं तत्सिद्धान्तं विभजते। स चेति। ननु सुगतप्रोक्तागमस्यैक्यात् कुतो बहुप्रकारता तत्राह। प्रतिपत्तीति। एकस्यैवागमव्याख्यातुः शिष्यस्यावस्थाभेदेन बुद्धिभेदात् मन्दमध्यमोत्तमधियां शिष्याणां वा भेदाद्बहुप्रकारतेत्यर्थः। तानेव प्रकारानाह। तत्रेति। सौत्रान्तिको वैभाषिको योगाचारो माध्यमिकश्चे

शून्यत्ववादिन इति। तत्र ये सर्वास्तित्ववादिनो बाह्यमान्तरञ्च वस्त्वभ्युपगच्छन्ति भूतं भौतिकं चित्तं चैत्तञ्च तांस्तावत् प्रतिब्रूमः। तत्र भूतं पृथिवी धात्वादयः, भौतिकं रूपादयश्चक्षुरादयश्च। चतुष्टये च पृथिव्यादिपरमाणवः खरस्नेहोष्णप्रेरणस्वभावास्ते पृथिव्यादिभावेन संहन्यन्त इति मन्यन्ते। तथा रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकाः पञ्च स्कन्धाः, तेऽप्याध्यात्मं र्वव्यवहारास्पदभावेन संहन्यन्त इति मन्यन्ते [सर्वदर्शनसं० पृ० २३। ं० १७]। तत्रेदमभिधीयते। योऽयमुभयहेतुक उभयप्रकारः

त्वारः शिष्याः, तेष्वाद्ययोर्बाह्यार्थानां परोक्षत्वापरोक्षत्वविवादेऽप्यत्वसम्प्रतिपत्तेस्तयोः सिद्धान्तमेकीकृत्य निरस्यत इत्याह। तत्र य र्वास्तित्वेति। भूतं भौतिकं बाह्यं, चित्तश्चैत्तञ्च कामाद्यान्तरमिति भागः। तत्र सन्दिह्यते किं मानमूलो भ्रान्तिमूलो वायं सिद्धान्त ति। तत्र प्रमाणमूल इति पूर्वपक्षयन् सिद्धान्तं तदीयं दर्शयति। भूतमिति। स्थिरः प्रपञ्चो ब्रह्महेतुक इति वेदान्तसिद्धान्तस्य मूलक्षणिकसिद्धान्तविरोधादसिद्धिः पूर्वपक्षफलं सिद्धान्ते तद- ाध इति ज्ञेयं। पृथिव्यादिभूतचतुष्टयं विषयेन्द्रियात्मकं भौति- परमाणुसमुदाय एव नावयव्यन्तर इति मत्वा परमाणून् विभ- । चतुष्टये चेति। चतुर्विधा इत्यर्थः। खरः कठिनः तत्स्वभावाः र्थिवाः परमाणवः स्निग्धा आप्याः उष्णास्तैजसाः ईरणश्चलनस्व- ा वायव्यानामिति। बाह्यसमुदायमुक्ताध्यात्मिकसमुदायमाह। ति। सविषयेन्द्रियाणि रूपस्कन्धः, विषयाणां बाह्यत्वेऽपि देहस्थे- ग्राह्यत्वादाध्यात्मिकत्वं, अहमहमित्यालयविज्ञानप्रवाहो विज्ञा- न्धः, सुखाद्यनुभवो वेदनास्कन्धः, गौरश्व इत्येवं नामविशिष्टसवि- ः प्रत्ययः संज्ञास्कन्धः, रागद्वेषमोहधर्माधर्माः संस्कारस्कन्धः। तत्र

समुदायः परेषामभिप्रेतोऽणुहेतुकस्य भूतभौतिकसंहतिरूपः
स्कन्धहेतुकस्य पञ्चस्कन्धीरूपः, तस्मिन्नुभयहेतुकेऽपि समुदाये-
ऽभिप्रेयमाणे तदप्राप्तिः समुदायभावानुपपत्तिरित्यर्थः। कुतः
समुदायिनामचेतनत्वात्, चित्ताभिज्वलनस्य च समुदायसि-
द्ध्यधीनत्वात्, अन्यस्य च कस्यचिच्चेतनस्य भोक्तुः प्रशासितुर्वा
स्थिरस्य संहन्तुरनभ्युपगमात्, निरपेक्षप्रवृत्त्यभ्युपगमे च प्रवृ-
त्त्यनुपरमप्रसङ्गात्, आशयस्याप्यन्यत्वानन्यत्वाभ्यामनिरूप्यत्वा
त्क्षणिकत्वाभ्युपगमाच्च निर्व्यापारत्वात् तत्प्रवृत्त्यनुपपत्तेः। तस्मा

विज्ञानस्कन्धश्चित्तमात्मेति गीयते, अन्ये चत्वारः स्कन्धाश्चैत्तास्तेषां
ङ्घातः आध्यात्मिकः सकललोकयात्रानिर्वाहक इत्यर्थः। अवयवाति
रिक्तावयव्यनुपलब्धेरवयवाः शिष्यन्ते यत् सत् तत् क्षणिकं, य
विद्युदिति तेषां क्षणिकत्वमिति मानमूलोऽयं सिद्धान्त इति प्रा
सिद्धान्तसूत्रं योजयति। योऽयमिति। सर्गादौ परमाणूनां स्कन्
नाञ्च स्वतः सङ्घातस्तावन्न सम्भवति अचेतनत्वात्। नापि चित्ता
भिज्वलनं विज्ञानं समुदायहेतुः सङ्घाते देहाकारे जाते विज्ञ
विज्ञाने जाते सङ्घात इत्यन्योन्याश्रयात्। न च क्षणिकविज्ञानाद
कश्चिज्जीव ईश्वरो वा त्वयाभ्युपगम्यते यः सङ्घातकर्त्ता भवेत्। न
कर्त्तारमनपेक्ष्याणवः स्कन्धाश्च स्वयमेव सङ्घातार्थं प्रवर्त्यन्त इति वा
अनिर्मोक्षप्रसङ्गात्। नन्वालयविज्ञानसन्तानः संहन्तास्त्वित्यत आ
आशयस्येति। आशेरतेऽस्मिन् रागादय इत्याशयः सन्तानः, स किं
न्तानिभ्यो विज्ञानिभ्योऽन्योऽनन्यो वा, आद्येऽपि स्थिरः क्षणिको वा, न
अस्मदिष्टनित्यात्मवादप्रसङ्गात्। द्वितीये दोषमाह। क्षणिकत्वे
क्षणिकस्य जन्मातिरिक्तव्यापारो नास्ति, तस्मात्तस्य परमाण्वादि
नार्थं प्रवृत्तिरनुपपन्ना क्षणिकत्वव्याघातादित्यर्थः। एतेनानन्यः स

समुदायानुपपत्तिः। समुदायानुपपत्तौ च तदाश्रया लोक-
यात्रा लुप्येत ॥

इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात्॥ १९॥

यद्यपि भोक्ता प्रशासिता वा कश्चिच्चेतनः संहन्ता स्थिरो नाभ्युपगम्यते, तथाप्यविद्यादीनामितरेतरकारणत्वादुपपद्यते लोकयात्रा, तस्यांचोपपद्यमानायां न किञ्चिदपरमपेक्षितव्य-मस्ति। ते चाविद्यादयः अविद्या संस्कारो विज्ञानं नाम रूपं षडायतनं स्पर्शो वेदना तृष्णोपादानं भवो जातिः जरा मरणं

ति पक्षो निरस्तः, क्षणिकस्य मेलकत्वानुपपत्तेः, तस्मात् संहन्तुरस-त्वात् सङ्घातानुपपत्तिरित्यर्थः ॥

संहन्तुरभावेऽपि सङ्घातोपपत्तिमाशङ्क्य निषेधति। इतरेति। र्थं प्रत्ययते गच्छतीति प्रत्ययः कारणं अविद्यादिभिरेवार्थात् स-तसिद्धौ व्यवहारोपपत्तिरित्यर्थः। अविद्यादीनाह। ते चेति। णिकेषु स्थिरत्वबुद्धिरविद्या ततो रागद्वेषमोहाः संस्कारा भवन्ति ो गर्भस्थस्याद्यं विज्ञानं उत्पद्यते तस्माच्चालयविज्ञानात् पृथिव्यादि-ष्टयं नामाश्रयत्वान्नाम भवति। ततो रूपं सितासितात्मकं शुक्र-णितं निष्पद्यते गर्भस्थकललबुद्बुदावस्था नामरूपशब्दार्थ इति नि-ः, विज्ञानं पृथिव्यादिचतुष्टयं रूपञ्चेति षडायतनानि यस्येन्द्रिय-स्य तत् षडायतनं, नामरूपेन्द्रियाणां मिथः संयोगः स्पर्शः, ततः दिका वेदना तया पुनर्विषयतृष्णा तया प्रवृत्तिरुपादानं, तेन यस्माज्जन्मेति भवो धर्मादिस्ततो जातिर्देहजन्म, पञ्चस्कन्धसमुदाय यावत्। जातानां स्कन्धानां परिपाको जरास्कन्धः, नाशो मरणं, मानस्य पुत्रादिस्नेहादन्तर्दाहः शोकस्तेन हा पुत्रेत्यादिप्रलापः

शोकः परिदेवना दुःखं दुर्मनस्तेत्येवंजातीयका इतरेतरहेतुकाः सौगते समये क्वचित् संक्षिप्ता विनिर्दिष्टाः, क्वचित् प्रपञ्चिताः, सर्वेषामप्ययमविद्यादिकलापोऽप्रत्याख्येयः । तदेवमविद्यादिकलापेऽपि परस्परनिमित्तनैमित्तिकभावेन घटीयन्त्रवदनिशमावर्त्तमानेऽर्थाक्षिप्त उपपन्नः सङ्घात इति चेत्, तन्न कस्मादुत्पत्तिमात्रनिमित्तत्वात् । भवेदुपपन्नः सङ्घातो यदि सङ्घातस्य किञ्चिन्निमित्तमवगम्येत, न त्ववगम्यते । यत इतरेतरप्रत्ययत्वेऽप्यविद्यादीनां पूर्वपूर्वमुत्तरोत्तरोऽस्योत्पत्तिमात्रनिमित्तं भवद्भवेत्, न तु सङ्घातोत्पत्तेः किञ्चिन्निमित्तं सम्भवति । नन्वविद्यादिभिरर्थादाक्षिप्यते सङ्घात इत्युक्तं, अत्रोच्यते यदि तावदयमभिप्रायः, अविद्यादयः सङ्घातमन्तरेणात्मानमलभमाना अपेक्षन्ते सङ्घातमिति, ततस्तस्य सङ्घातस्य किञ्चित् निमित्तं वक्तव्यं, तच्च नित्येष्वप्यणुषु अभ्युपगम्यमानेषु

परिदेवना, अनिष्टानुभावो दुःखं, तेन दुर्मनस्ता मानसी व्यथा इ शब्दो मानापमानादिक्लेशसंग्रहार्थः, न केवलं सुगतानामेवावि दयः सम्मताः किन्तु सर्ववादिनामपीत्याह । सर्वेषामिति । अवि दिहेतुका जन्मादयो जन्मादिहेतुकाश्चाविद्यादय इति मिथो हेतुमद्भावादर्थात् सङ्घातसिद्धिरिति शङ्कामुपसंहरति । तदेवमि सिद्धान्तभागं व्याचष्टे । तन्नेति । अविद्यादीनां उत्तरोत्तरहेतु ङ्गीकृत्य सङ्घातहेत्वभावात् सङ्घातो न स्यादित्युक्तो पूर्वोक्तं स्मारय नन्विति । किमविद्यादयः सङ्घातस्य गमका उतोत्पादका इति कल्प्याद्ये सङ्घातस्योत्पादकं किञ्चिद्वाच्यं तन्नास्तीत्याह । अत्र यदीति । आश्रयाश्रयिभूतेष्विति भोक्तृविशेषणं अदृष्टाश्रयेष्वित

श्रयाश्रयिभूतेषु भोक्तृषु सत्सु न सम्भवतीत्युक्तं वैशेषिकपरी-
क्षायां किमङ्ग पुनः क्षणिकेष्वणुषु भोक्तृरहितेष्वाश्रया-
श्रयिशून्येषु वाभ्युपगम्यमानेषु सम्भवेत्। अथायमभिप्रायः
अविद्यादय एव सङ्घातस्य निमित्तमिति। कथं तमेवाश्रित्या-
त्मानं लभमानास्तस्यैव निमित्तं स्युः। अथ मन्यसे सङ्घाता
एवानादौ संसारे सन्तत्यानुवर्त्तन्ते तदाश्रयाश्चाविद्यादय इति
तदापि सङ्घातात् सङ्घातान्तरं उत्पद्यमानं नियमेन वा
सदृशमेवोत्पद्येत अनियमेन वा सदृशं विसदृशं वोत्पद्येत
नियमाभ्युपगमे मनुष्यपुद्गलस्य देवतिर्य्यग्योनिनारकप्राप्त्यभावः
प्राप्नुयात्, अनियमाभ्युपगमेऽपि मनुष्यपुद्गलः कदाचित् क्षणेन
हस्ती भूत्वा देवो वा पुनर्मनुष्यो वा भवेत् इति प्राप्नुयात्,
उभयमप्यभ्युपगमविरुद्धं। अपि च यद्भोगार्थः सङ्घातः स्यात्

। स्थिरेष्वणुषु सङ्घातं योग्येषु कर्तृषु चादृष्टसहायेषु सत्सु ज्ञाना-
मात्रेण संहतिकर्तृत्वायोगात् सङ्घातापत्तेर्निमित्तं नास्तीत्युक्तं
क्षणिकपक्षे तन्नास्तीति किमु वक्तव्यमित्याह। किमिति। आश्र-
यः सङ्घातकर्त्ता तच्छून्येष्वित्यर्थः। आश्रयाश्रयिशून्येष्विति पाठे
ार्थोपकारकत्वशून्येष्वित्यर्थः। द्वितीयं शङ्कते। अथायमिति।
तस्याविद्यादीनां चोत्पत्तौ अन्योन्याश्रयः स्यादिति दूषयति।
मिति। स्वाभाविकः खल्वयं सङ्घातानां हेतुहेतुमद्भावेन प्रवाहो
कर्त्तारमपेक्षते, पूर्वसङ्घाश्रया अविद्यादय उत्तरे सङ्घातप्रवर्त्तका
नान्योन्याश्रयदोषोऽपीत्याशङ्कते। अथ मन्यस इति। स्वभावस्य
ानियमयोरपसिद्धान्तापातः स्यादिति परिहारार्थः। पूर्य्यते
चेति पुद्गलो देहः। किञ्च भोक्तुः क्षणिकत्वपक्षे भोगापवर्गव्यव-

स जीवो नास्ति स्थिरो भोक्तेति तवाभ्युपगमः, ततश्च भोगो भोगार्थ एव स नान्येन प्रार्थनीयः, तथा मोक्षो मोक्षार्थ एवेति मुमुक्षुणा नान्येन भवितव्यं। अन्येन चेत् प्रार्थ्येतोभयं भोगमोक्षकालावस्थायिना तेन भवितव्यं, अवस्थायित्वे क्षणिकत्वाभ्युपगमविरोधः, तस्मादितरेतरोत्पत्तिमात्रनिमित्तत्वमविद्यादीनां यदि भवेत् भवतु नाम न तु सङ्घातः सिध्येत् भोक्त्रभावादित्यभिप्रायः॥

उत्तरोत्पादे च पूर्वनिरोधात्॥ २०॥

उक्तमेतदविद्यादीनामुत्पत्तिमात्रनिमित्तत्वान्न सङ्घातसिद्धिरस्तीति, तदपि तूत्पत्तिमात्रनिमित्तत्वं न सम्भवतीतीदमिदानीमुपपाद्यते। क्षणभङ्गवादिनोऽयमभ्युपगमः उत्तरस्मिन् क्षणे उत्पद्यमाने पूर्वक्षणो निरुध्यत इति। न चैवमभ्युपगच्छता पूर्वोत्तरयोः क्षणयोः हेतुफलभावः शक्यते सम्

ष्कारोऽपि दुर्घट इत्याह। अपि चेति। यो यदिच्छति स तत् नास्ति चेत् इच्छा व्यर्था, अस्ति चेत् क्षणिकत्वभङ्ग इत्यर्थः। प्रकृतं सङ्घातनिरासमुपसंहरति। तस्मादिति॥

द्विविधो हि कार्य्यसमुत्पादः सुगतसम्मतः हेत्वधीनः कारणसमुदायाधीनश्चेति। तत्राविद्यातः संस्कारस्ततो विज्ञानमित्येवं हेत्वधीनः प्रथमः, पृथिव्यादिसमुदायात् कार्यं इत्येवं द्वितीयः, तत्राद्यमङ्गीकृत्य द्वितीयः सङ्घातकर्त्रभावेन दूषितः, सम्प्रत्याद्यं दूषयति सूत्रकारः उत्तरेति। क्षणिकोऽर्थः क्षण इत्युच्यते, निरुध्यमानत्वं विनाशाभिमुख्यं, निरुद्धत्वमतीतत्वं। ननु कार्य्यकाले विनाशप्राप्तत्वेऽपि पू

दयितुं निरुध्यमानस्य निरुद्धस्य वा पूर्वक्षणस्याभावग्रस्तत्वाद्-
त्तरक्षणहेतुत्वानुपपत्तेः। अथ भावभूतः परिनिष्पन्नावस्थः
पूर्वक्षण उत्तरक्षणस्य हेतुरित्यभिप्रायस्तथापि नोपपद्यते,
भावभूतस्य पुनर्व्यापारकल्पनायां क्षणान्तरसम्बन्धप्रसङ्गात्।
अथ भाव एवास्य व्यापार इत्यभिप्रायः, तथापि नैवोपपद्यते
हेतुस्वभावानुपरक्तस्य फलस्योत्पत्त्यसम्भवात्। स्वभावोपरागा-
युपगमे च हेतुस्वभावस्य फलकालावस्थायित्वे सति क्षणभ-
ाभ्युपगमत्यागप्रसङ्गः। विनैव वा स्वभावोपरागेण हेतु-
लभावमभ्युपगच्छतः सर्वत्र तत्प्राप्तेरतिप्रसङ्गः। अपि चो-
ादनिरोधौ नाम वस्तुनः स्वरूपमेव वा स्यातां, अवस्था-
रं वा वस्त्वन्तरमेव वा, सर्वथापि नोपपद्यते। यदि ताव-
स्तुनः स्वरूपमेवोत्पादनिरोधौ स्यातां ततो वस्तुशब्द उत्पा-
निरोधशब्दौ च पर्यायाः प्राप्नुयुः। अथास्ति कश्चिद्विशेष
त मन्यत उत्पादनिरोधशब्दाभ्यां मध्यवर्तिनो वस्तुन आद्य-

ात् क्षणिकार्थस्य हेतुत्वमक्षतमिति शङ्कते। अथ भावेति, सद्रूप
र्थः। किं हेतोरुत्पत्त्यतिरिक्तः कार्योत्पादनाख्यो व्यापारः अनतिरि-
ना, नाद्य इत्युक्त्वा द्वितीयं शङ्कते। अथेति। भाव उत्पत्तिः, उक्तं हि

'भूतिर्येषां क्रिया सैव कारकं सैव चोच्यत' इति।

क्षणिकभावानां या भूतिः सैव क्रिया कारकञ्चेत्यर्थः। नष्टस्यापि
त्तत्वं स्यान्नोपादानत्वं, तथा च मृदादेर्घटादिकालासत्त्वे घटाद्य-
त्तिः सत्त्वे च क्षणिकत्वहानिरिति परिहरति। तथापीत्यादिना।
पक्षोक्तदोषं द्रढयति। विनैवेति। वस्तुनो जन्मध्वंसानिरूपणाच्च
ाणिकत्वमित्याह। अपि चेति। तयोः स्वरूपत्वे वस्तुन्यन्तर्भावात्

न्ताख्ये अवस्थे अभिलप्येते इति, एवमप्याद्यन्तमध्यक्षणत्रयस- म्बन्धित्वाद्वस्तुनः क्षणिकत्वाभ्युपगमहानिः । अथात्यन्तव्यतिरि- क्तावेवोत्पादनिरोधौ वस्तुनः स्यातां अश्वमहिषवत्, ततो वस्तूत्पादनिरोधाभ्यामसंस्पृष्टमिति वस्तुनः शाश्वतत्वप्रसङ्गः। यदि च दर्शनादर्शने वस्तुन उत्पादनिरोधौ स्यातां, एव- मपि द्रष्टृधर्मौ तौ न वस्तुधर्माविति वस्तुनः शाश्वतत्वप्रसङ्ग एव, तस्मादप्यसङ्गतं सौगतं मतं ॥

असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥ २१ ॥

क्षणभङ्गवादे पूर्वक्षणो निरोधग्रस्तत्वान्नोत्तरस्य क्षणस्य हेतुर्भवतीत्युक्तं । अथासत्येव हेतौ फलोत्पत्तिं ब्रूयात्, ततः प्रतिज्ञोपरोधः स्यात्, चतुर्विधान् हेतून् प्रतीत्य चित्तचैत्ता उत्पद्यन्त इतीयं प्रतिज्ञा हीयेत, निर्हेतुकायां चोत्पत्तावप्र

वस्तुनोऽनाद्यनन्तत्वमित्यपि द्रष्टव्यं । द्वितीयं शङ्कते । अथास्तीति । शेषमेवाह । उत्पादेति । दूषयति । एवमपीति । ताभ्यां संसर्गे वस्तु क्षणिकत्वभङ्गः स्यात् । संसर्ग एव नास्तीति तृतीयकल्पमुत्थाप्य दू- यति । अथात्यन्तेति ॥

सूत्रं व्याख्यातुं वृत्तं स्मारयति । क्षणभङ्गेति । किं कार्योत्पत्ति- र्हेतुका सहेतुका वा, आद्ये प्रतिज्ञाहानिरित्याह । अथासत्येवे- दिना । विषयकरणसहकारिसंस्कारास्चतुर्विधा हेतवस्तान् प्रतीत्य चित्तं रूपादिविज्ञानं चैत्ताश्चित्तात्मकाः सुखादयश्च जायन्त इति प्र- त्यार्थः । यथा नीलविज्ञानस्य नीलं वस्तु, आलम्बनप्रत्ययो विषयः, करणमधिपतिप्रत्ययः, सहकारिप्रत्यय आलोकः, समनन्तरपूर्व

तिबन्धात् सर्वं सर्वत्रोत्पद्येत। अथोत्तरक्षणोत्पत्तिं यावत्ता-
वदवतिष्ठते पूर्वक्षण इति ब्रूयात्, ततो यौगपद्यं हेतुफलयोः
स्यात्, तथापि प्रतिज्ञोपरोध एव स्यात्, क्षणिकाः सर्वे संस्कारा
इतीयं प्रतिज्ञोपरुध्येत॥

योगाचार वैज्ञानिक मत विचार:

प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात्॥ २२॥

अपि च वैनाशिकाः कल्पयन्ति 'बुद्धिबोध्यं त्रयादन्यत्
संस्कृतं क्षणिकञ्च' इति। तदपि च त्रयं प्रतिसङ्ख्याऽप्रतिसङ्ख्या-
निरोधावाकाशञ्चेत्याचक्षते। त्रयमपि चैतदवस्तुभावमात्रं
निरुपाख्यमिति मन्यन्ते। बुद्धिपूर्वकः किल विनाशो भावानां
प्रतिसङ्ख्यानिरोधो नाम भाष्यते तद्विपरीतोऽप्रतिसङ्ख्यानि-
रोधः, आवरणाभावमात्रमाकाशमिति। तेषामाकाशं पर-

स्कार इति भेदः। प्रतिज्ञाहानिपुरुषदोषमुक्त्वा वस्तुदोषमप्याह।
हेतुकायाश्चेति। सहेतुकत्वपक्षेऽन्वयिकारणस्य मृदादेः कार्य्यसह-
भावापत्त्या क्षणिकत्वप्रतिज्ञाहानिरिति सूत्रशेषं व्याचष्टे। अथोत्तर-
क्षणेत्यादिना। सम्यक् क्रियन्त इति संस्काराः, आद्यन्तवन्तो भावा
इत्यर्थः॥

एवमाद्यसूत्राभ्यां समुदायो निरस्तः, उत्तरसूत्राभ्यां कार्य्यकारणा-
वक्षणिकत्वे निरस्ते, सम्प्रति तदभिमतं द्विविधं विनाशं दूषयति।
प्रतिसङ्ख्येति। संस्कृतमुत्पाद्यं बुद्धिबोध्यं प्रमेयमात्रं त्रयात्तुच्छरूपादन्य-
दित्यर्थः। किं तत्त्रयं तदाह। तदपीति। निरुपाख्यं निःस्वरूपं, प्र-
तीपा सङ्ख्या सन्तं भावमसन्तं करोमीत्येवंरूपा संख्या बुद्धिः प्रतिसंख्या
तया निरोधः कस्यचिद्भावस्य भवति, अबुद्धिपूर्वकस्तु स्तम्भादीनां
क्षणभङ्गुराणामित्याह। विपरीत इति। परक्रियामुक्त्वा सूत्रं व्या-

स्तात् प्रत्याख्यास्यति, निरोधद्वयमिदानीं प्रत्याचष्टे। प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधयोरप्राप्तिरसम्भव इत्यर्थः। कस्मादविच्छेदात्। एतौ हि प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधौ सन्तानगोचरौ वा स्यातां भावगोचरौ वा, न तावत् सन्तानगोचरौ सम्भवतः, सर्वेष्वपि सन्तानेषु सन्तानिनामविच्छिन्नेन हेतुफलभावेन सन्तानविच्छेदस्यासम्भवात्। नापि भावगोचरौ सम्भवतः, न हि भावानां निरन्वयो निरुपाख्यो विनाशः सम्भवति, सर्वास्वप्यवस्थासु प्रत्यभिज्ञानबलेनान्वय्यविच्छेददर्शनात्। अस्पष्टप्रत्यभिज्ञानास्वप्यवस्थासु क्वचित् दृष्टेनान्वय्यविच्छेदेनान्यत्रापि तदनुमानात्। तस्मात् परपरिकल्पितस्य निरोधद्वयस्यानुपपत्तिः॥

चष्टे। तेषामिति। भावाः सन्तानिनः, सन्तानो नाम भावानां हेतुफलभावेन प्रवाहस्तस्मिन् सन्ताने चरमक्षणः क्षणान्तरं करोति वा नवा, आद्ये चरमत्वव्याघातः सन्तानाविच्छेदात्, द्वितीये चरमस्यासत्त्वप्रसङ्गः, अर्थक्रियाकारित्वं सत्त्वमिति तत्सिद्धान्तात्, चरमस्यासत्त्वे पूर्वेषामप्यसत्त्वप्रसङ्गः अर्थक्रियाशून्यत्वात्, तस्मात् सन्तानस्य विच्छेदासम्भवान्निरोधाप्राप्तिरित्याह। न तावदिति। न द्वितीय इत्याह। नापीति। घटकपालचूर्णाद्यवस्थासु सेयं मृदिति प्रत्यभिज्ञानादन्वयभावस्य मृदादेर्नात्यन्तिकविनाश इत्यर्थः। बीजस्याङ्कुरादिप्रत्यभिज्ञानादर्शनादन्वयिनो विच्छेद इत्यत आह। अस्पष्टेति अङ्कुरादयोऽनुस्यूतान्वयिभावस्थाः कार्यत्वात् पटवदित्यन्वय्यविच्छेदसिद्धिरित्यर्थः। यस्माद्भावानां स्थायित्वं तस्मात् प्रतिक्षणनिरोधासम्भव इत्युपसंहारः॥

उभयथा च दोषात्॥ २३॥

योऽयमविद्यादिनिरोधः प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधान्तःपाती परपरिकल्पितः स सम्यग्ज्ञानाद्वा सपरिकरात् स्यात् स्वयमेव वा, पूर्वस्मिन् विकल्पे निर्हेतुकविनाशाभ्युपगमहानिप्रसङ्गः। उत्तरस्मिंस्तु मार्गोपदेशानर्थक्यप्रसङ्गः। एवमुभयथापि दोषप्रसङ्गादसमञ्जसमिदं दर्शनं॥

आकाशे चाविशेषात्॥ २४॥

यच्च तेषामेवाभिप्रेतं निरोधद्वयमाकाशञ्च निरुपाख्यमिति। तत्र निरोधद्वयस्य निरुपाख्यत्वं पुरस्तान्निराकृतं आकाशस्येदानीं निराक्रियते। आकाशे *चायुक्तो निरुपाख्यत्वाभ्युपगमः, प्रतिसङ्ख्याऽप्रतिसङ्ख्यानिरोधयोरिव वस्तुत्वप्रतिपत्तेरविशेषात्, आगमप्रामाण्यात्तावत् 'आत्मन आकाशः सम्भूतः' इत्यादिश्रुतिभ्य आकाशस्य च वस्तुत्वप्रसिद्धिः। †विप्रतिपन्नानपि प्रति शब्दगुणानुमेयत्वं वक्तव्यं, गन्धादीनां गुणानां

विद्यादीनां प्रतिसंख्यानिरोधं तदभिमतं दूषयति। उभयथेति॥ नियमादयः परिकराः सर्वं दुःखं क्षणिकमिति भावनोपदेशो पदेशः।

आगमप्रामाण्यादिति। तत्राकाशस्य कार्यत्वोक्त्या घटादिवद्व- प्रसिध्यतीत्यर्थः। नन्वागमप्रामाण्ये विप्रतिपन्नान् सुगतान् काशस्य वस्तुत्वं कथं सिध्यतीत्यत आह। विप्रतिपन्नानिति। वस्तुनिष्ठः गुणत्वाद्गन्धादिवदित्यनुमानादाकाशस्य वस्तुत्वं सि- पृथव्याद्यष्टद्रव्याणां श्रोत्रग्राह्यगुणाश्रयत्वायोगादित्यर्थः। आ-

---

त्वानुक्त इति का०। † विप्रतिपन्नान् प्रति तु शब्देत्यादि का० वर्ध० सा०।

पृथिव्यादिवस्त्वाश्रयत्वदर्शनात्। अपि चावरणाभावमात्राका-
शमिच्छतस्तव एकस्मिन् सुपर्णे पतत्यावरणस्य विद्यमानत्वा
सुपर्णान्तरस्या*पित्सतोऽनवकाशत्वप्रसङ्गः। यत्रावरणाभावस्त
पतिष्यतीति चेत्, येनावरणाभावो विशिष्यते तत्तर्हि वस्तु-
भूतमेवाकाशं स्यान्नावरणाभावमात्रं। अपि चावरणाभाव-
मात्रमाकाशं मन्यमानस्य सौगतस्य स्वाभ्युपगमविरोधः प्रस-
ज्येत। सौगते हि समये पृथिवी भगवन् किंसन्निःश्रयेत्यस्मिन
प्रश्नप्रतिवचनप्रवाहे पृथिव्यादीनामन्ते वायुः किंसन्निः-
श्रय इत्यस्य प्रश्नस्य प्रतिवचनं भवति वायुराकाशसन्निःश्र
इति, तदाऽऽकाशस्य वस्तुत्वेन समञ्जसं स्यात्, तस्मादप्ययुक्तम
काशस्यावस्तुत्व। अपि च निरोधद्वयमाकाशञ्च त्रयमप्येत
न्निरुपाख्यमवस्तु नित्यञ्चेति विप्रतिषिद्धं, न ह्यवस्तुनो नित्यत्व
मनित्यत्वं वा सम्भवति, वस्त्वाश्रयत्वात् धर्मधर्मिव्यवहारस्य
धर्मधर्मि†भावे हि घटादिवद्वस्तुत्वमेव स्यान्न निरुपाख्यत्वं॥

काशस्य भावत्वं प्रसाध्याभावत्वं दूषयति। अपि चेति। यथैकघ
सत्त्वेऽपि घटसामान्याभावो नास्ति तथैकपक्षिसत्त्वेऽपि मूर्त्तद्रव्य
मान्याभावात्मकाकाशो नास्त्येवेति पक्ष्यन्तरसञ्चारो न स्यादित्यर्थ
देशविशेषावच्छेदेनावरणाभावोऽस्तीत्याशङ्क्याभावावच्छेदकदेशवि
एवाकाशो नाभाव इत्याह। यत्रेत्यादिना। पतिष्यति पक्षी स
रिष्यतीत्यर्थः। आकाशस्यावस्तुत्वं स्वग्रन्थविरुद्धञ्चेत्याह। अपि चे
किं सम्यक् निश्चय आश्रयोऽस्या इति किंसन्निःश्रया अव
शविषाणस्याश्रयत्वादर्शनादिति भावः। व्याघातान्तरमाह।
चेति। ध्वंसाप्रतियोगिताख्यो धर्मो नित्यत्वं नासति सम्भवति धर्मि
णोऽसत्त्वव्याघातादित्यर्थः॥

* उत्पतत्तोऽनाकाशत्वेति का०। † भावः इति सो० का०।

अनुस्मृतेश्च ॥ २५ ॥

अपि च वैनाशिकः सर्वस्य वस्तुनः क्षणिकतामभ्युपयन्नुप-
*लब्धेरपि क्षणिकतामभ्युपेयात् न च सा सम्भवति, अनुस्मृतेः।
अनुभवमुपलब्धिमनुत्पद्यमानं स्मरणमेवानुस्मृतिः सा चोपल-
ब्ध्र्येककर्तृका सती सम्भवति, पुरुषान्तरोपलब्धिविषये पुरुषा-
न्तरस्य स्मृत्यदर्शनात्। कथं ह्यहमदोऽद्राक्षमिदं पश्यामीति च
पूर्वोत्तरदर्शिन्येकस्मिन्नसति प्रत्ययः स्यात्। अपि च दर्शन-
स्मरणयोः कर्तर्य्येकस्मिन् प्रत्यक्षः प्रत्यभिज्ञाप्रत्ययः सर्वस्य
लोकस्य प्रसिद्धोऽहमदोऽद्राक्षमिदं पश्यामीति। यदि हि
तयोर्भिन्नः कर्ता स्यात्, ततोऽहं स्मराम्यद्राक्षीदन्य इति प्र-
तीयात् न त्वेवं प्रत्येति कश्चित्, यत्रैवं प्रत्ययः तत्र दर्शन-
स्मरणयोर्भिन्नमेव कर्तारं सर्वलोकोऽवगच्छति, स्मराम्यहम-
सावदोऽद्राक्षीदिति। †इह त्वहमदोऽद्राक्षमिति दर्शनस्मरण-

आत्मनः क्षणिकत्वं दूषयति। अनुस्मृतेरिति। अनुभवजन्या स्मृति-
स्मृतिस्तस्यां अनुभवसमानाश्रयत्वात्तदुभयाश्रयात्मनः स्थायित्व-
मर्थः। क्षणिकत्वज्ञानद्वयानुसन्धानञ्च न स्यादित्याह। कथं ह्यह-
ति। पूर्वदर्शनकर्तुरद्राक्षमिति स्मरणकर्त्रैक्यप्रत्यभिज्ञानाच्चात्मनः
स्थायित्वमित्याह। अपि चेति। योऽहमदः पूर्वमद्राक्षं स एवाहमद्य
स्मरामीति प्रत्यभिज्ञानाकारो द्रष्टव्यः, इदं पश्यामीति ज्ञानान्तर-
सम्बन्धकथनं योऽहमद्राक्षं सोऽहं पश्यामीति प्रत्यभिज्ञान्तरद्योत-
नं। विपक्षे बाधकमाह। यदि हीति। द्रष्टृस्मर्त्रोर्भेदेऽहं स्मरामि
अन्योऽद्राक्षीदिति प्रतीतिः स्यादित्यत्र दृष्टान्तमाह। यत्रैवमिति।
...यमाह। स्मरामीति। स्मराम्यहमन्योऽद्राक्षीदिति प्रत्ययो यत्र

* लब्धुरिति सो० का०। † यथेहेति का०।

योर्वैनाशिकोऽप्यात्मानमेवैकं कर्तारमवगच्छति, न नाहमि
त्यात्मनो दर्शनं निर्वृत्तं निह्नुते, यथाग्निरनुष्णोऽप्रकाश इति
वा। तत्रैवं सत्येकस्य दर्शनस्मरणक्षणद्वयसम्बन्धे क्षणिकत्वा
भ्युपगमहानिरपरिहार्य्या वैनाशिकस्य स्यात्, तथानन्तरा
मनन्तरामात्मन एव प्रतिपत्तिं प्रत्यभिजानन्नेककर्तृकामो
त्तमादुच्छासादतीताश्च प्रतिपत्तीराजन्मन आत्मैककर्तृका:
प्रतिसन्दधानः कथं क्षणभङ्गवादी वैनाशिको नापत्रपेत। ।
यदि ब्रूयात् सादृश्यादेतत् सम्पत्स्यत इति, तं प्रतिब्रूयात्
तेनेदं सदृशमिति द्वयायत्तत्वात् सादृश्यस्य क्षणभङ्गवादिन
सदृशयोर्द्वयोर्वस्तुनोर्ग्रहीतुरेकस्याभावात् सादृश्यनिमित्तं प्र

तत्र भिन्नमेव कर्तारं लोकोऽवगच्छतीत्यविवादमित्यर्थः। प्रकृतप्र
भिज्ञायां तादृशभेदप्रत्ययस्य बाधकस्यादर्शनादात्मस्थायित्वं दुर्वारं
त्याह। इह त्वहमद इति। यथाग्नेरौष्ण्यादिकं न बाधते कश्चित्
नाहमद्राक्षमिति पूर्वदर्शनं न निह्नुत इत्यनेन बाधाभावात् प्रत्यभि
प्रमेत्युक्तं भवति। तथा द्रष्टृस्मर्त्रोरैक्ये सति स्थायित्वं फलितमित्या
तत्रैवं सतीति। क्षणद्वयसम्बन्धेऽप्यात्मनस्तृतीयक्षणे भङ्गोऽस्त्विति व
प्रत्याह। तथेति। वर्तमानदशामारभ्योत्तमाच्छासादामरणादनन्त
मनन्तरां स्वस्यैव प्रतिपत्तिमात्मैककर्तृकां प्रत्यभिजानन्नाजन्म
वर्तमानदशापर्यन्तं अतीताः प्रतिपत्तीः स्वकर्तृकाः प्रतिसन्धान
न्निति योजना। दीपज्वालास्विवात्मनि प्रत्यभिज्ञानं सादृश्यदा
दिति शङ्कते। स इति। सादृश्यज्ञानस्य धर्म्मिप्रतियोगिज्ञानाधी
त्वात् स्थिरस्य ज्ञातुरसत्त्वान्न सादृश्यज्ञानं सम्भवति सत्त्वे वाध
द्धान्तः स्यादिति परिहरति। तमित्यादिना। स्यादेतत् न सा
प्रत्ययः पूर्वोत्तरवस्तुद्वयज्ञानजन्यस्तद्द्वयसादृश्यावगाही, किं

तिसन्दधानमिति मिथ्याप्रलाप एव स्यात्, स्याच्चेत् पूर्वोत्तर-
योः *क्षणयोः सादृश्यस्य ग्रहीतैकस्तथा सत्येकस्य क्षणद्वयाव-
स्थानात् क्षणिकत्वप्रतिज्ञा पीड्येत, तेनेदं सदृशमिति प्रत्य-
यान्तरमेवेदं न पूर्वोत्तरक्षणद्वयग्रहणनिमित्तमिति चेत्, न
तेनेदमिति भिन्नपदार्थोपादानात्। प्रत्ययान्तरमेव चेत् सादृ-
श्यविषयं स्यात्, तेनेदं सदृशमिति वाक्यप्रयोगोऽनर्थकः स्यात्,
सादृश्यमित्येव प्रयोगः प्राप्नुयात्। यदा हि लोकप्रसिद्धः
पदार्थः परीक्षकैर्न परिगृह्यते तदा स्वपक्षसिद्धिः पर-
पक्षदोषो वा उभयमप्युच्यमानं परीक्षकाणामात्मनश्च यथा-

स्वदेव विकल्पः स्वाकारमेव वाह्यत्वेन विषयीकुर्वाणः क्षणान्तरा-
र्शी, अतो न स्थिरद्रष्टृपेक्षेति शङ्कते। तेनेदमिति। अत्र वक्तव्यं
दृश्यप्रत्यये तेनेदं सदृशमिति वस्तुत्रयं भासते न वेति। नेति
तः स्वानुभवविरोधः, किञ्चार्थभेदाभावात् पदत्रयप्रयोगो न स्यात्,
त् पदत्रयेण मिथः संसृष्टभिन्नार्थभानादभानमसिद्धमिति परि-
ति। न तेनेति। अथ भासते वस्तुत्रयं तच्च प्रत्ययाभिन्नमेव न
मिति चेन्न त्रयाणामेकप्रत्ययाभेदे मिथोऽप्यभेदापत्तेः। इष्टाप-
र्ति ब्रुवाणं विज्ञानवादिनं प्रत्याह। यदा हीति। वस्तुत्रयं
सादृश्यप्रत्ययाद्भिन्नं सर्वलोकप्रसिद्धं तच्च नाङ्गीक्रियते। स्थायि-
सङ्गभयेन तर्हि तत्तदाकाराणां क्षणिकविज्ञानानां मिथो वा-
भिन्नत्वादेकस्मिन् धर्म्मिणि विरुद्धानेकपक्षस्फुरणात्मकविप्रति-
सम्भवात् स्वपक्षसाधनादिव्यवहारो लुप्येत, अतो यथानुभवं
ज्ञेयभेदोऽङ्गीकार्य्यः। तथा च तेनेदं सदृशमिति वाह्यार्थयोर्ज्ञान-
साद्दश्यं जानत आत्मनः स्थायित्वं दुर्वारमित्यर्थः। ननु सन्त्येव
र्थाः क्षणिकस्वलक्षणा निर्विकल्पकग्राह्याः, सविकल्पाध्यवसेयास्तु
त्वसादृश्यादयो वाह्याः कल्पिता अवभासन्ते, अतो विप्रति-

* द्वयोरिति वर्ध०।

र्थत्वेन न बुद्धिसन्तानमारोढुमर्हति, एवमेवैषोऽर्थ इति निश्चितं
यत्तदेव वक्तव्यं, ततोऽन्यदुच्यमानं बहुप्रलापित्वमात्मनः के-
वलं प्रख्यापयेत्। न चायं सादृश्यात् संव्यवहारो युक्तः
तद्भावावगमात् तत्सदृशभावानवगमाच्च। भवेदपि कदा-
चित् बाह्यवस्तुनि विप्रलम्भसम्भवात् तदेवेदं स्यात् तत्स-
दृशं वेति सन्देहः, उपलब्धरि तु सन्देहोऽपि न कदाचिद्भ-
वति स एवाहं स्यां तत्सदृशो वेति। य एवाहं पूर्वेद्युरद्र-
स एवाहमद्य स्मरामीति निश्चितात् तद्भावोपलम्भात्, तस्मा-
दप्यनुपपन्नो वैनाशिकसमयः ॥

पत्त्यादिव्यवहार इति बाह्यार्थवादमाशङ्क्य निरस्यति। एवमेवेति
यत् प्रमाणसिद्धं तदेवं वक्तव्यं। न हि क्षणिकत्वे किञ्चित् प्रमाणम
न चेदानीं घट इति प्रत्यक्षमवर्त्तमानकालासत्त्वं घटस्य गोचरं य
र्त्तमानक्षणमात्रसत्त्वरूपे क्षणिकत्वे मानमिति वाच्यं; तस्य वर्त्तमा
त्वमात्रगोचरत्वेन कालान्तरासत्त्वासिद्धेः। न च यत् सत्तत् क्ष
मिति व्याप्तिरस्ति, विद्युदादेरपि द्विचित्क्षणस्थायित्वेन दृष्टान्ताभा
न च स्थायिनमनुमातारमन्तरेणानुमानं सम्भवति, तस्मादनु
सिद्धार्थवक्ता तथागतोऽश्रद्धेयवचन इत्यर्थः। किञ्च सादृश्यं प्रत्य
ज्ञायां दोषतया निमित्तं विषयतया वा। आद्येऽपि स्वरूपसत्
वा, नाद्यः मन्दान्धकारे शुक्तिमात्रग्रहे श्वैत्याज्ञानेऽपि रूप्या
भ्रमापत्तेः। न द्वितीयः स्थायिज्ञातारं विना तज्ज्ञानासम्भवस्योक्त
नापि विषयतया निमित्तमित्याह। न चेति। सोऽहमित्युल्लेख
नाहं सदृश इत्यनुल्लेखादित्यर्थः। सोऽहमिति प्रत्यभिज्ञाया
निरस्य संशयत्वं निरस्यति। भवेदिति। जडार्थे प्रत्यभिज्ञा
बाधसम्भावनया संशयः कदाचित् स्यान्नात्मनीत्यर्थः। असन्दि
पर्यन्तप्रत्यभिज्ञाविरोधादात्मक्षणिकत्वमतमत्यन्तासङ्गतमित्युप
वि। तस्मादिति ॥

नासतोऽदृष्टत्वात्॥ २६॥

इतश्चानुपपन्नो वैनाशिकसमयो यतः स्थिरमनुयायि कार-णमनभ्युपगच्छतामभावाद्भावोत्पत्तिरित्येतदापद्यते। दर्शयन्ति चाभावाद्भावोत्पत्तिं 'नानुपमृद्य प्रादुर्भावाद्' इति। विन-ष्टाद्धि किल वीजादङ्कुर उत्पद्यते, तथा विनष्टात् क्षीराद्दधि मृत्पिण्डाच्च घटः, कूटस्थाच्चेत् कारणात् कार्य्यमुत्पद्येत, अविशेषात् सर्वं सर्वत उत्पद्येत, तस्मादभावग्रस्तेभ्यो वीजादि-भ्योऽङ्कुरादीनामुत्पद्यमानत्वात् अभावाद्भावोत्पत्तिरिति मन्य-ते। तत्रेदमुच्यते, 'नासतोऽदृष्टत्वात्' इति। नाभावाद्भाव उत्पद्यते, यद्यभावाद्भाव उत्पद्येत, अभावत्वाविशेषात् कारण-विशेषाभ्युपगमोऽनर्थकः स्यात्। न हि वीजादीनां उपमृदि-

---

अभावः शशविषाणवदत्यन्तासन्नित्यङ्गीकृत्य मृदादिनाशादसतो घटादिकं जायते इति सुगता वदन्ति तद्दूषयति। नासत इति। न केवलं बलादापद्यते किन्तु स्वयं दर्शयन्ति च। द्वौ नञौ प्रकृतार्थं गमयतः। मृदादिकं उपमृद्य घटादेः प्रादुर्भावादितीममर्थमाह। विनष्टादिति। कारणविनाशात् कार्य्यजन्मेत्यत्र युक्तिमाह। कूटस्थादिति। विनाशशून्यादित्यर्थः। नित्यस्य निरतिशयस्य कार्य्यशक्तत्वे तत्-कार्य्याणि सर्वाण्येकस्मिन्नेव क्षणे स्युस्तथा चोत्तरक्षणे कार्य्याभावादसदापत्तिः। न च सहकारिकृतातिशयक्रमात् कार्य्यक्रम इति युक्तं। अतिशयस्यातिशयान्तरापेक्षायां अनवस्थादनपेक्षायां कार्य्यस्याप्यतिशयानपेक्षत्वेन सहकारिवैयर्थ्यात् तस्मान्न स्थायिभावात् कार्य्यजन्मेति। क्षणिकभावस्य हेतुत्वमुत्तरोत्पादे चेत्यत्र निरस्तं। अभावस्य हेतुत्वनिरासार्थं सूत्रं व्याचष्टे। तत्रेदमिति। यदि वीजाभावस्या-भावान्तराद्विशेषः स्यात् तदा विशेषवदभावद्वारा वीजादेवाङ्कुर इति

तानां योऽभावस्तस्य च शशविषाणादीनाञ्च निःस्वभावत्वाविशे-
षादभावत्वे कश्चिद्विशेषोऽस्ति येन वीजादेवाङ्कुरो जायते, चीरा-
देव दधीत्येवंजातीयकः कारणविशेषाभ्युपगमोऽर्थवान् स्यात्।
निर्विशेषस्य त्वभावस्य कारणत्वाभ्युपगमे शशविषाणादिभ्योऽ-
प्यङ्कुरादयो जायेरन्, न चैवं दृश्यते। यदि पुनरभावस्यापि
विशेषोऽभ्युपगम्येत उत्पलादीनामिव नीलत्वादिस्ततो विशेष-
वत्त्वादेवाभावस्य भावत्वमुत्पलादिवत् प्रसज्येत, नाप्यभावः
कस्यचिदुत्पत्तिहेतुः स्यात्, अभावत्वादेव शशविषाणादिवत्
अभावाच्च भावोत्पत्तावभावान्वितमेव सर्वं कार्य्यं स्यात्, नै
दृश्यते, सर्वस्य वस्तुनः स्वेन स्वेन रूपेण भावात्मनैवोपलभ्यमान
त्वात्। न च मृदन्विताः शरावादयो भावास्तन्त्वादिविकारा
केनचिदभ्युपगम्यन्ते। मृद्विकारानेव तु मृदन्वितान् भावा
लोकः प्रत्येति। यत्तूक्तं स्वरूपोपमर्द्दमन्तरेण कस्यचित् कूटस्थ

लोकायतिकानामभ्युपगमोऽर्थवान् स्यान्न सोऽस्तीत्याह। येनेति। द
योजयति। निर्विशेषस्येति। शशविषाणादेः कार्य्यकारित्वस्यादृष्टत
त्राभावस्यासतो हेतुत्वमित्यर्थः। अस्वभावस्यापि विशेष इत्यत आ
यदीति। अभावस्य हेतुत्वेऽतिप्रसङ्ग इति तर्कमुक्तानुमानमाह।
पीति। अभावो न हेतुरसत्त्वात् सम्मतवदित्यर्थः। अभावो न प्र
तिः कार्य्यानन्वितत्वाद् यथा शरावाद्यनन्वितस्तन्तुर्न शरावादिप्र
तिरिति तर्कपूर्वकमाह। अभावाच्चेति। अतोऽन्वितत्वान्मृदादिभ
एव प्रकृतिरित्याह। मृदिति। स्थायिनः कारणत्वायोगमुक्तम
दूषयति। यत्तूक्तमित्यादिना। अनुभवबलात् स्थिरभावानामेव
कारिसन्निधिक्रमेण कार्य्यक्रमहेतुत्वमङ्गीकार्य्यं, न च शक्तस्य

।स्तुनः कारणत्वानुपपत्तेरभावाद्भावोत्पत्तिर्भवितुमर्हतीति, दुक्तं, स्थिरस्वभावानामेव सुवर्णादीनां प्रत्यभिज्ञायमानानां रुचकादिकार्यकारणभावदर्शनात्, येष्वपि वीजादिषु स्वरूपोपमर्द्दो लक्ष्यते तेष्वपि नासावुपमृद्यमाना पूर्वावस्थोत्तरावस्थायाः कारणमभ्युपगम्यते, अनुपमृद्यमानानामेवानुयायिनां वीजाद्यवयवानामङ्कुरादिकारणभावाभ्युपगमात्, तस्मादसद्भ्यः शशविषाणादिभ्यः सदुत्पत्त्यदर्शनात् सद्भ्यश्च सुवर्णादिभ्यः सदुत्पत्तिदर्शनात् अनुपपन्नोऽयमभावाद्भावोत्पत्त्यभ्युपगमः। अपि च चतुर्भिश्चित्तचैत्ता उत्पद्यन्ते परमाणुभ्यश्च भूतभौतिकलक्षणः समुदाय उत्पद्यत इत्यभ्युपगम्य पुनरभावात् भावोत्पत्तिं कल्पयद्भिरभ्युपगममपह्नुवानैर्वैनाशिकैः सर्वो लोक आकुलीक्रियते ॥

ार्य्यपेक्षा न युक्तेति वाच्यं, यतोऽशक्तस्यापि नापेक्षेत्यसहकारिविम्बं ात्। ततः स्वर्णादौ स्वतोऽतिशयशून्येऽग्नितापादिसहकारिकृताशयक्रमाद्रुचकादिकार्य्यक्रमः। न चातिशयस्यातिशयान्तरानपेक्षत्वे ार्य्यस्याप्यनपेक्षेति वाच्यं। घटस्य मृदनपेक्षत्वे कार्य्यत्वाविशेषात् टस्यापि मृदनपेक्षाप्रसङ्गादन्वयव्यतिरेकाभ्यामपेक्षा सहकारिष्वपि ्या। यदुक्तं कार्य्याभावदशायां कारणस्यासत्त्वापत्तिरिति तन्न, ारणस्यापि बाधाभावेन सत्तोपपत्तेः, न ह्यर्थक्रियाकारित्वमेव सत्त्वं सतस्तद्योगेन सत्त्वस्य ततो भेदात् सतो ह्यर्थक्रियाकारित्वं नासतः तः कारणतावच्छेदकमबाधितस्वरूपात्मकं सत्त्वं कारणत्वाद्भिन्नमेव ादणुस्थूलस्थिरभावानां हेतुत्वं उपपन्नमिति भावः। पूर्वापरविधमप्याह। अपि चेति ॥

उदासीनानामपि चैवं सिद्धिः॥ २७॥

यदि चाभावाद्भावोत्पत्तिरभ्युपगम्येत, एवं सत्युदासीनानामनीहमानानामपि जनानामभिमतसिद्धिः स्यात्, अभावस्य सुलभत्वात्। कृषीवलस्य क्षेत्रकर्म्मण्यप्रयतमानस्यापि सस्यनिष्पत्तिः स्यात्, कुलालस्य च मृत्संस्क्रियायामप्रयतमानस्याप्यमत्रोत्पत्तिः। तन्तुवायस्यापि तन्तून् तन्वानस्यापि तन्वानस्येव वस्त्रलाभः। स्वर्गापवर्गयोश्च न कश्चित् कथञ्चित् समीहेत न चैतद् युज्यते ऽभ्युपगम्यते वा केनचित्, तस्मादनुपपन्नोऽयमभावाद्भावोत्पत्त्यभ्युपगमः॥

नाभाव उपलब्धेः॥ २८॥

एवं बाह्यार्थवादमाश्रित्य समुदायाप्राप्त्यादिषु दूषणेषूद्भावितेषु विज्ञानवादी बौद्ध इदानीं प्रत्यवतिष्ठते। केषाञ्चित् किल विनेयानां बाह्यवस्तुन्यभिनिवेशमालक्ष्य तदनुरोधेन बाह्यार्थवादप्रक्रियेयं विरचिता, नासौ सुगताभिप्राय

अभावादुत्पत्तौ शशविषाणादप्युत्पत्तिः स्यादित्युक्तं। अतिप्रसङ्गान्तरमाह। उदासीनानामिति। अनीहमानानां प्रयत्नशून्यानां, अमत्रं घटादिपात्रं। तन्वानस्य व्यापारयतः। तस्माद् भ्रान्तिमूलेन क्षणिकबाह्यार्थवादेन कूटस्थनित्यब्रह्मसमन्वयस्य न विरोध इति सिद्धं॥

नाभाव उपलब्धेः। अखण्डनिर्विशेषब्रह्मविज्ञानं बाह्यार्थापादानं वदतां वेदान्तानां भिन्नं साकारं क्षणिकं विज्ञानं न ततोऽन्योऽर्थोऽस्तीति योगाचारमतेन विरुध्यते न वेति तन्मतस्य मानभ्रान्तिमूलत्वाभ्यां संशये पूर्व्वोक्तबाह्यार्थवादनिरासमुपजीव्य पूर्व्वपक्षमाह

तस्य तु विज्ञानैकस्कन्धवाद एवाभिप्रेतः, तस्मिंश्च विज्ञानवादे बुद्ध्यारूढेन रूपेणान्तःस्थ एव प्रमाणप्रमेयफलव्यवहारः सर्व उपपद्यते, सत्यपि बाह्येऽर्थे बुद्ध्यारोहमन्तरेण प्रमाणादिव्यवहारानवतारात्। कथं पुनरवगम्यते अन्तःस्थ एवायं सर्वव्यवहारो न विज्ञानव्यतिरिक्तो बाह्योऽर्थोऽस्तीति तदसम्भवादित्याह। स हि बाह्योऽर्थोऽभ्युपगम्यमानः परमाणवो वा स्युस्तत्समूहा वा स्तम्भादयः स्युः, तत्र न तावत् परमाणवः स्तम्भादिप्रत्ययपरिच्छेद्या भवितुमर्हन्ति परमाण्वाभासज्ञानानुपपत्तेः, नापि तत्समूहाः स्तम्भादयस्तेषां परमाणुभ्योऽन्यत्वानन्यत्वाभ्यां

एवमित्यादिना। पूर्वोत्तरपक्षयोः विरोधाविरोधौ फलं। नन्वेकस्य सुगतागमस्य कथं बाह्यार्थसत्त्वासत्त्वयोस्तात्पर्य्यं विरोधादित्याशङ्क्याधिकारिभेदादविरोध इति वदन् विज्ञानवादिनः सुगताभिप्रायज्ञत्वेन न्दाधिकारिभ्यो बाह्यार्थवादिभ्यः श्रैष्ठ्यमाह। केषाञ्चिदिति। उक्तञ्च धर्म्मकीर्त्तिना 'देशना लोकनाथानां सत्त्वाशयवशानुगाः' इति [सर्व० पृ०२३।पं०७] सुगतानामुपदेशाः शिष्यमत्यनुसारिण इत्यर्थः। नन्व-ति बाह्यार्थे मानमेयव्यवहारः कथं तत्राह। तस्मिन्निति। विज्ञानव कल्पितनीलाद्याकारत्वेन प्रमेयमवभासात्मना मानफलं शक्त्यात्मना नं शक्त्याश्रयत्वाकारेण प्रमातेति भेदकल्पनया व्यवहार इत्यर्थः। स्य एव भेदः किं न स्यादत आह। सत्यपीति। न हि बुद्ध्यनारूढस्य लादेः प्रमेयत्वव्यवहारोऽस्ति, अतो बुद्ध्यारूढाकार एव प्रमेयं न बाह्यर्थः। बाह्यार्थासत्त्वे प्रश्नपूर्वकं युक्तीरुपन्यस्यति। कथमित्यादिना। यं ज्ञानातिरेकेनासत् तदतिरेकेनासम्भवान्नरशृङ्गवदित्याह। तदभवादिति। असम्भवं विवृणोति। स हीति। परमाणवश्चेदेकस्थूल-

* बोधचित्तविवरणग्रन्थेनेति बोध्यं।

निरूपयितुमशक्यत्वात्। एवं जात्यादीनपि प्रत्याचक्षीत। अपि चानुभवमात्रेण साधारणात्मनो ज्ञानस्य जायमानस्य योऽयं प्रतिविषयं पक्षपातः स्तम्भज्ञानं कुड्यज्ञानं घटज्ञानं पटज्ञानमिति, नासौ ज्ञानगतविशेषमन्तरेण उपपद्यत इत्यवश्यं विषयसारूप्यं ज्ञानस्याङ्गीकर्तव्यं। अङ्गीकृते च तस्मिन् विषयाकारस्य ज्ञानेनैवावरुद्धत्वादपार्थिकार्थसद्भावकल्पना। अपि च सहोपलम्भनियमादभेदो विषयविज्ञानयोरापतति, न ह्यनयोरेकस्यानुपलम्भेऽन्यस्योपलम्भोऽस्ति, न चैतत् स्वभावविवेके युक्तं प्रतिबन्धकारणाभावात्, तस्मादप्यर्थाभावः स्वप्नादिवच्चेदं द्रष्टव्यं। यथा हि स्वप्नमायामरीच्युदकगन्धर्वनगरादिप्रत्यय विनैव वाह्येनार्थेन ग्राह्यग्राहकाकारा भवन्ति एवं जागरि

स्तम्भ इति ज्ञानं न स्यात् समूहस्त्वसन्नित्यर्थः। अवयव्यभावेऽपि त्यादयो वाह्यार्थाः स्युस्तत्राह। एवमिति। जातिगुणकर्मणां धर्मि सकाशादभेदेऽत्यन्तभेदे वा धर्मिवद्धर्म्यन्तरवच्च न धर्मधर्मिभावः दाभेदौ च विरुद्धाविति न सन्ति जात्याद्यर्था इत्यर्थः। किञ्च नस्य ज्ञेयसारूप्यरूपविशेषसम्बन्धाभावे सर्वविषयत्वापत्तेर्विशेषोऽ कार्य्यस्तथा च ज्ञानगतविशेषस्यैव ज्ञानेन विषयीकरणान्न वाह्या सिद्धिर्मानाभावात् गौरवाच्चेत्याह। अपि चेति। पक्षपातो नि विशेषवैशिष्ट्यव्यवहारः, किञ्च ज्ञेयं ज्ञानाभिन्नं ज्ञानोपलम्भक्षणा तोपलम्भग्राह्यत्वात् ज्ञानवदित्याह। अपि चेति। ज्ञानार्थयोर्वा भेदेऽपि सहोपलम्भनं स्यात् ग्राह्यग्राहकभावादित्यत आह। चैतदिति। क्षणिकज्ञानस्यार्थेन सम्बन्धहेत्वभावान्न ग्राह्यग्राहक इत्यर्थः। किञ्च जाग्रद्विज्ञानं न वाह्यालम्बनं विज्ञानत्वात् स्वप्न ज्ञानवदित्याह। स्वप्नेति। विज्ञानानां वैचित्र्यानुपपत्तिबाधित

गोचरा अपि स्तम्भादिप्रत्यया भवितुमर्हन्तीत्यवगम्यते, प्र-
त्ययत्वाविशेषात्। कथं पुनरसति बाह्यार्थे प्रत्ययवैचित्र्यमुप-
पद्येत वासनावैचित्र्यादित्याह। अनादौ हि संसारे बीजा-
ङ्कुरवत् विज्ञानानां वासनानां चान्योन्यनिमित्तनैमित्तिक-
भावेन वैचित्र्यं न विप्रतिषिध्यते। अपि चान्वयव्यतिरेकाभ्यां
वासनानिमित्तमेव ज्ञानवैचित्र्यमित्यवगम्यते, स्वप्नादिष्वन्तरे-
णाप्यर्थं वासनानिमित्तस्य ज्ञानवैचित्र्यस्योभाभ्यामप्यावाभ्याम-
भ्युपगम्यमानत्वादन्तरेण तु वासनां अर्थनिमित्तस्य ज्ञानवैचि-
त्र्यस्य मयानभ्युपगम्यमानत्वात्, तस्मादप्यभावो बाह्यस्यार्थस्ये-
ति प्राप्ते ब्रूमः। नाभाव उपलब्धेरिति। न खल्वभावो
बाह्यस्यार्थस्याध्यवसातुं शक्यते, कस्मादुपलब्धेः। उपलभ्यते हि
प्रतिप्रत्ययं बाह्योऽर्थः स्तम्भः कुड्यं घटः पट इति, न चो-
पलभ्यमानस्यैवाभावो भवितुमर्हति। यथा हि कश्चिद्भुञ्जानो
भुजिसाध्यायां तृप्तौ स्वयमनुभूयमानायामेवं ब्रूयात् नाहं
भुञ्जे न वा तृप्यामीति, तद्वदिन्द्रियसन्निकर्षेण स्वयमुपलभ्यमान

मिति शङ्कते। कथमिति। अन्यथोपपत्त्या परिहरति। वासनेति।
आलयविज्ञानादिसन्तानान्तर्गतपूर्वज्ञानमेव वासना, तद्वशादनेकक्षणव्यवधाने-
ऽपि नीलाद्याकारज्ञानवैचित्र्यं भवति, यथा बीजवासनया कार्पासर-
क्ततावत्तद्वदित्यर्थः। उभयवादिसम्मतत्वाच्च वासना एव ज्ञानवैचि-
त्र्यहेतवो न बाह्यार्था इत्याह। अपि चेति। क्षणिकविज्ञानमात्र-
वादस्य मानमूलत्वात्तेन नित्यविज्ञानवादो विरुध्यते इति प्राप्ते
सिद्धान्तसूत्रं व्याचष्टे। नाभाव इत्यादिना। किं बाह्यार्थस्यानुपलब्धे-
रभावः उत ज्ञानाद्भेदेनानुपलब्धेः, नाद्य इत्युक्तं उपलब्धेरिति। द्वितीयं

एव वाह्यमर्थं नाहमुपलभे न च सोऽस्तीति ब्रुवन् कथमुपा-
देयवचनः स्यात्। ननु नाहमेवं ब्रवीमि न कञ्चिदर्थमुपलभ
इति, किन्तूपलब्धिव्यतिरिक्तं नोपलभ इति ब्रवीमि। वाढ
मेवं ब्रवीषि निरङ्कुशत्वात् ते तुण्डस्य न तु युक्त्युपेतं ब्रवीषि
यत उपलब्धिव्यतिरेकोऽपि बलादर्थस्याभ्युपगन्तव्यः उपलब्धे
रेव। न हि कश्चिदुपलब्धिमेव स्तम्भः कुड्यञ्चेत्युपलभते, उप
लब्धिविषयत्वेनैव तु स्तम्भकुड्यादीन् सर्वे लौकिका उपलभन्ते
अतश्चैवमेव सर्वे लौकिका उपलभन्ते यत् प्रत्याचक्षाणा अपि
वाह्यमर्थमेवमाचक्षते यदन्तर्ज्ञेयरूपं तद्वहिर्वदवभासत इति
ऽपि हि सर्व्वलोकप्रसिद्धां वहिरवभासां संविदं प्रतिलभमाना
प्रत्याख्यातुकामाश्च वाह्यमर्थं वहिर्वदिति वत्कारं कुर्वन्ति इ
रथा हि कस्माद्वहिर्वदिति ब्रूयुः। न हि विष्णुमित्रो वन्ध्या
पुत्रवदवभासत इति कश्चिदाचक्षीत। तस्माद् यथानु
तत्त्वमभ्युपगच्छद्भिर्वहिरेवावभासत इति युक्तमभ्युपगन्तुं न
वहिर्वदवभासत इति। ननु वाह्यस्यार्थस्यासम्भवाद्वहिर्वदव

शङ्कते। ननु नाहमिति। ज्ञानज्ञेययोर्विषयिविषयभावेन भे
साक्षिप्रत्यक्षसिद्धत्वात्, प्रत्यक्षविरुद्धमभेदाभिधानमित्याह। वाढ
मित्यादिना। तद्वचनादपि जनो वाह्यार्थं ज्ञानाद्भेदेनैवोपलभत इ
ह। अतश्चेति। वाह्यार्थस्यात्यन्तासत्त्वे प्रत्यक्षोपलम्भायोगात् ए
न्तत्वासम्भवाच्च वहिर्वच्छब्दो न स्यादित्याह। इतरथेति। अबा
भेदानुभवादेवकारो युक्तो न वत्कार इत्याह। तस्मादिति। ज्ञे
ज्ञानातिरेकेणासम्भवादित्युक्तबाधावत्कारणमिति शङ्कते। नन्वि
कोऽयावसम्भवः असत्त्वं वा असत्त्वनिश्चयो वा अयुक्तत्वं वा उ

मत इत्यध्यवसितं। नायं साधुरध्यवसायो यतः प्रमाणप्रवृत्त्यप्रवृत्तिपूर्वकौ सम्भवासम्भवाववधार्य्येते न पुनः सम्भवासम्भवपूर्वके प्रमाणप्रवृत्त्यप्रवृत्ती। यद्धि प्रत्यक्षादीनामन्यतमेनापि प्रमाणेनोपलभ्यते तत् सम्भवति यत्तु केनचिदपि प्रमाणेनोपलभ्यते तन्न सम्भवति। इह तु यथा स्वं सर्वैरेव प्रमाणैर्वाह्योऽर्थ उपलभ्यमानः कथं व्यतिरेकाव्यतिरेकादिविकल्पैर्न सम्भवतीत्युच्येत उपलब्धेरेव। न च ज्ञानस्य विषयसारूप्याद्विषयनाशो भवति, असति विषये विषयसारूप्यानुपपत्तेः वहिरुपलब्धेश्च विषयस्य,

---

टिकसंशयात्मकसम्भवस्याभावो वा। नाद्यः साध्यभेदात्। न द्वितीयः ौ घटस्तम्भाविति समूहालम्बने स्थूलत्वद्वित्वघटत्वस्तम्भत्वरूपद्धधर्म्मवतोरर्थयोरस्थूलादेकस्मात् इयावगाहिविज्ञानाद्भेदसत्त्वायेनासम्भवासिद्धेरित्याह। नायं साधुरिति। सम्भवः सत्तानिः प्रमाणाधीनः। असम्भवोऽसत्त्वनिश्चयः प्रमाणाभावाधीनः न वैपमिति व्यवस्थामेव स्फुटयति। यद्धीति। उक्तव्यवस्थायाः फलं ार्थस्य प्रत्यक्षादिभिः सम्भवं वदन्नेव तृतीयं दूषयति। इहेति। ानिश्चितवाह्यार्थस्य स्तम्भादेः परमाणुभ्यो भेदविकल्पैरयुक्तत्वासत्त्वनिश्चयो न युक्तस्तवत्यक्षेऽप्ययुक्तत्वस्य तुल्यत्वात्, न ह्यस्थूल। विज्ञानस्य स्थूलानेकसमूहालम्बनस्य विषयाभेदो युक्तः स्थूलत्वप्रसङ्गात्, न चेष्टापत्तिः समूहालम्बनोच्छेदे विज्ञानानां मिथो नभिन्नतया विषयद्वित्वादिव्यवहारलोपापत्तेः, तस्मादयुक्तत्वेयानुभवं व्यवहारयोग्योऽर्थः स्वीकार्य्यः, न चतुर्थः निश्चिते सम्भवस्यानुपयोगात्तस्य क्वचित् प्रमाणप्रवृत्तेः पूर्व्वाङ्गत्वादिति। यच्चोक्तं ज्ञानगतार्थसारूप्यस्यैव ज्ञानालम्बनत्वोपपत्तेर्वाह्यर इति तत्राह। न चेति। यत्तु गौरवमुक्तं तत्र दूषणं प्रमादित्याह। वहिरिति। यत एव ज्ञानार्थयोर्भेदः सर्व्वलोके

अत एव सहोपलम्भनियमोऽपि *प्रत्ययविषययोरुपायोपेय-भावहेतुको नाभेदहेतुक इत्यभ्युपगन्तव्यं। अपि च घटज्ञानं पटज्ञानमिति विशेषणयोरेव घटपटयोर्भेदो न विशेष्यस्य ज्ञानस्य, यथा शुक्लो गौः कृष्णो गौरिति शौक्ल्यकार्ष्ण्ययोरेव भेदो न गोत्वस्य, द्वाभ्याञ्च भेद एकस्य सिद्धो भवति, एकस्माच्च द्वयोः, तस्मादर्थज्ञानयोर्भेदः। तथा घटदर्शनं घटस्मरणमित्यत्रापि प्रतिपत्तव्यं, अत्रापि हि विशेष्ययोरेव दर्शनस्मरणयोर्भेदो न विशेषणस्य घटस्य, यथा क्षीरगन्धः क्षीररस इति विशेष्ययोः गन्धरसयोर्भेदो न विशेषणस्य क्षीरस्य तद्वत्। अपि च द्वयोर्विज्ञानयोः पूर्व्वोत्तरकालयोः स्वसंवेदनेनैवोपक्षीणयोरितरेतर-

---

साक्ष्यनुभवसिद्धः, अत एव सहोपलम्भनियमोऽपि नाभेदसाधक इत्याह। अत एवेति। यथा चाक्षुषद्रव्यरूपस्यालोकोपलम्भनियमलब्धिकत्वेऽपि नालोकाभेदः, तथार्थस्य न ज्ञानाभेदः, भेदेऽपि ग्राह्यग्राहकभावेन नियमोपपत्तेः। न च ज्ञानस्य क्षणिकत्वात् स्वभिन्नग्राह्यसम्बन्धायोगः स्थायित्वादिति भावः। विज्ञानमनेकार्थेभ्यो भिन्नं एकत्वात् गोत्ववदिति सत्प्रतिपक्षमाह। अपि चेति। न च हेत्वसिद्धिः ज्ञानं ज्ञानमित्येकाकारप्रतीतेः ज्ञानैक्यनिश्चयात्। न च सा जातिः यया व्यक्तिभेदानिश्चयादित्याह। न विशेष्यस्येति। घटादेश्चैतन्याद्भेदमुक्त्वा वृत्तिज्ञानाद्भेदमाह। तथेति। घटो द्वाभ्यां भिन्न एकत्वात् क्षीरवदित्यर्थः। ज्ञानाभिन्नार्थानङ्गीकारे स्वपक्षव्यवहारलोपं बाधकमाह। अपि चेति। क्षणिकयोः स्वप्रकाशयोः क्षणिकज्ञानयोर्ग्राह्यग्राहकत्वमयुक्तमभ्युपगतञ्च, तथा च तयोर्भेदप्रतिज्ञा न धर्म्मिप्रतियोगिनोर्मिथः परेण चाग्रहेण भेदग्रहायोगात्, तथा तयोर्भेदग्राहकस्थाय्यात्मा तद्भिन्न एष्टव्यः। एवं पक्षसाध्यहेतुदृ-

---

* अर्थप्रत्यययोरिति सो०।

ग्राह्यग्राहकत्वानुपपत्तिः, ततश्च विज्ञानभेदप्रतिज्ञा क्षणिक-
त्वादिधर्मप्रतिज्ञा स्वलक्षणसामान्यलक्षणवास्यवासकत्वाविद्योप-
प्लवसदसद्धर्मबन्धमोक्षादिप्रतिज्ञाश्च स्वशास्त्रगतास्ते हीयेरन्।
किञ्चान्यद्विज्ञानं विज्ञानमित्यभ्युपगच्छता बाह्योऽर्थः स्तम्भः कु-
ड्यमित्येवंजातीयकः कस्मान्नाभ्युपगम्यत इति वक्तव्यं। विज्ञानम-
नुभूयत इति चेत् बाह्योऽप्यर्थोऽनुभूयत एवेति युक्तमभ्युपगन्तुं।
अथ विज्ञानं प्रकाशात्मकत्वात् प्रदीपवत् स्वयमेवानुभूयते न
तथा बाह्योऽप्यर्थ इति चेत्, अत्यन्तविरुद्धां स्वात्मनि क्रिया-
मभ्युपगच्छसि अग्निरात्मानं दहतीतिवत्। अविरुद्धन्तु लोक-
प्रसिद्धं स्वात्मव्यतिरिक्तेन विज्ञानेन बाह्योऽर्थोऽनुभूयत इति

नभेदाभावे इदं क्षणिकमसदिति प्रतिज्ञा न युक्ता। सर्व्वतो व्या-
वृत्तं व्यक्तिमात्रं स्वलक्षणं अनेकानुगतं सामान्यमतद्व्यावृत्तिरूपमिति
प्रतिज्ञा न युक्ता, सर्व्वानेकार्थानां ज्ञानमात्रत्वेन मिथः परेण वा दुर्ज्ञा-
नत्वात् उत्तरनीलज्ञानं वास्यं पूर्व्वनीलज्ञानं वासकमिति प्रतिज्ञा न
युक्ता, तयोर्भिन्नस्य ज्ञातुरभावात्। किञ्चाविद्योपप्लवोऽविद्यासंसर्गः,तेन
नीलमिति सद्धर्म्मः, नरविषाणमिति असद्धर्म्मः, अमूर्त्तमिति सदस-
द्धर्म्मः, सतो विज्ञानस्यासतो नरविषाणस्य चामूर्त्तत्वादिति प्रतिज्ञा
न लभ्या, अनेकार्थज्ञानसाध्यत्वादज्ञानेनास्य बन्धो ज्ञानेनास्य मोक्ष
इति च प्रतिज्ञा बह्वर्थज्ञानसाध्या, आदिपदेन सामान्यत इष्टं ग्राह्य-
मनिष्टं त्याज्यमिति शिष्यहितोपदेशोऽनेकज्ञानसाध्यो गृहीतः, तस्मात्
प्रतिज्ञादिव्यवहाराय ग्राहकभेदोऽङ्गीकार्य्य इत्यर्थः। ज्ञानार्थयोर्भेदे
दूषणान्तरमस्तीत्याह। किञ्चान्यदिति। ज्ञानवदर्थस्याप्यनुभवाविशेषात्
स्वीकारो युक्त इत्यर्थः। स्वविषयत्वाद्विज्ञानं स्वीक्रियते नार्थः परग्राह्य-
त्वादिति शङ्कते। अथ विज्ञानमिति। विरुद्धं स्वीकृत्याविरुद्धत्यजता
त्वयाद्भुतनयन सौरथ्यं दर्शितमित्याह। अत्यन्तेति। ज्ञानं स्ववेद्यमित्यङ्गी-

नेच्छस्यहो पाण्डित्यं महद्दर्शितं। न चार्थव्यतिरिक्तमपि विज्ञानं स्वयमेवानुभूयते स्वात्मनि क्रियाविरोधादेव। ननु विज्ञानस्य स्वरूपव्यतिरिक्तग्राह्यत्वे तदप्यन्येन ग्राह्यं तदप्यन्येनेत्यनवस्था प्राप्नोति। अपि च प्रदीपवदवभासात्मकत्वात् ज्ञानस्य ज्ञानान्तरं कल्पयतः समत्वादवभास्यावभासकभावानुपपत्तेः कल्पनानर्थक्यमिति। तदुभयमप्यसत् विज्ञानग्रहणमात्र एव विज्ञानसाक्षिग्रहणाकाङ्क्षानुत्पादादनवस्थाशङ्कानुपपत्तेः, साक्षिप्रत्यययोश्च स्वभाववैषम्यादुपलब्ध्रुपलभ्यभावोपपत्तेः, स्वयंसिद्धस्य साक्षिणोऽप्रत्याख्येयत्वात्। किञ्चान्यत् प्रदीपवद्विज्ञानमवभासकान्तरनिरपेक्षं स्वयमेव प्रथत इति ब्रुवता प्रमाणागम्यं विज्ञानमनवगन्तृकमित्युक्तं स्यात् शिलाघनमध्यस्थप्रदीपसहस्रप्रथनवत्। वाढमेवमनुभवरूपत्वात्तु विज्ञानस्येष्टो नः

इत्य मौर्ख्यमापादितं वस्तुतः स्ववेद्यत्वमयुक्तमित्याह। न चेति। कर्त्तरि
क्रियां प्रति गुणभूते प्रधानत्वाख्यकर्म्मत्वायोगात् सकर्टकवेदनकर्म-
त्वमसदित्यर्थः। न च स्वविषयत्वमात्रं स्ववेद्यत्वमिति वाच्यं। अभेद
विषयित्वस्याप्यसम्भवादिति भावः। ज्ञानस्य स्ववेद्यत्वाभावे दोष
द्वयं स्यादिति शङ्कते। नन्विति। अनवस्था च साम्यञ्चेति दोषद्व
परिहरति। तदुभयमपीति। अनित्यज्ञानस्य जन्मादिमत्त्वेन घटव
ज्जडस्य स्वेन स्वीयजन्मादिग्रहायोगादस्ति ग्राहकाकांक्षा साक्षिण
सत्त्वायां स्फूर्त्तौ च निरपेक्षत्वान्नानवस्था नापि साम्यञ्चिज्जडत्ववै
म्यादित्यर्थः। साक्षी क इत्यत आह। स्वयं सिद्धस्येति। निर
पेक्षस्य साक्षिणोऽसत्त्वे क्षणिकविज्ञानभेदासिद्धेः सोऽङ्गीकार्य्य इत्यर्थ
अनित्यज्ञानस्वरूपसाधकत्वाच्च साक्षी स्वीकार्य्य इत्याह। किञ्चेति

पक्षस्त्वयानुज्ञात इति चेत्, न, अन्यस्यावगन्तुश्चक्षुरादिसाधनस्य प्रदीपादिप्रथनदर्शनात्, अतो विज्ञानस्याप्यवभास्यत्वाविशेषात् सत्येवान्यस्मिन्नवगन्तरि प्रथनं प्रदीपवदवगम्यते। साक्षिणोऽवगन्तुः स्वयंसिद्धतामुपक्षिपता स्वयं प्रथते विज्ञानमित्येष एव मम पक्षस्त्वया वाचोयुक्त्यन्तरेणाश्रित इति चेत्, न, विज्ञानस्योत्पत्तिप्रध्वंसानेकत्वादिविशेषवत्त्वाभ्युपगमात्। अतः प्रदीपवद्विज्ञानस्यापि व्यतिरिक्तावगम्यत्वमस्माभिः प्रसाधितं॥

वैधर्म्याच्च न स्वप्नादिवत्॥ २९॥

यदुक्तं बाह्यार्थापलापिना स्वप्नादिप्रत्ययवज्जागरितगोचरा अपि स्तम्भादिप्रत्यया विनैव बाह्येनार्थेन भवेयुः प्रत्यय-

---

विज्ञानं ज्ञानान्तरानपेक्षमिति ब्रुवता तस्याप्रामाणिकत्वमुक्तं स्यात् स्वयं प्रथनमिति ब्रुवता ज्ञातृशून्यत्वञ्चोक्तं स्यात्तथा च ज्ञातृज्ञानाविषयत्वाच्छिलास्थप्रदीपवदसदेव विज्ञानं स्यादतस्तत्साक्ष्येष्टव्यमित्यर्थः। विज्ञानस्य स्वान्यज्ञातृशून्यत्वमिष्टमेव त्वयाऽऽपाद्यते, न चासत्त्वापत्तिः ज्ञानभावादिति वाच्यं। स्वस्यैव ज्ञातृत्वादिति शाक्यः शङ्कते। बाढमिति। अभेदे ज्ञातृज्ञेयत्वायोगात् ज्ञानान्तरमावश्यकमिति परिहरति। नेति। विमतं विज्ञानं स्वातिरिक्तवेद्यं वेद्यत्वाद्देहवदित्यर्थः। अतिरिक्तः साक्षी किमन्यवेद्यः स्ववेद्यो वा आद्येऽनवस्था द्वितीये विज्ञानवाद एव भङ्ग्यन्तरेणोक्तः स्यादिति शङ्कते। साक्षिण इति। त्वया विज्ञानं जन्मविनाशयुक्तमुच्यते। अतः कार्यस्य जडत्वनियमात् स्वातिरिक्तवेद्यमस्माभिः साधितं कूटस्थचिदात्मनो ग्राहकानपेक्षत्वान्नानवस्थेति चोक्तमतो महद्वैलक्षण्यमावयोरिति परिहरति। न विज्ञानस्येति॥

एवं वेद्यविज्ञानवदर्थस्याप्युपलब्धेर्न ह्यर्थाभाव इत्युक्तं, संप्रति जा-

त्वाविशेषादिति, तत् प्रति वक्तव्यं, अत्रोच्यते, न स्वप्नादिप्रत्ययवज्जाग्रत्प्रत्यया भवितुमर्हन्ति। कस्मात् वैधर्म्यात्। वैधर्म्यं हि भवति स्वप्नजागरितयोः किं पुनर्वैधर्म्यं बाधाबाधाविति ब्रूमः। बाध्यते हि स्वप्नोपलब्धं वस्तु प्रबुद्धस्य मिथ्या मयोपलब्धो महाजनसमागम इति। न ह्यस्ति महाजनसमागमो निद्राग्लानन्तु मे मनो बभूव, तेनैषा भ्रान्तिरुद्बभूवेति। एवं मायादिष्वपि भवति यथायथं बाधः। न चैवं जागरितोपलब्धं वस्तु स्तम्भादिकं कस्याञ्चिदप्यवस्थायां बाध्यते, अपि च स्मृतिरेषा यत् स्वप्नदर्शनं, उपलब्धिस्तु जागरितदर्शनं स्मृत्युपलब्ध्योश्च प्रत्यक्षमन्तरं स्वयमनुभूयते, अर्थविप्रयोगसम्प्रयोगात्मकं इष्टं पुत्रं स्मरामि नोपलभे उपलब्धुमिच्छामि इति।

— — — —

यद्विज्ञानं स्वप्नादिविज्ञानवन्न बाह्यालम्बनमित्यनुमानं दूषयति। वैधर्म्याच्चेति। किमत्र निर्विषयत्वं साध्यमुत पारमार्थिकविषयशून्यत्वं, अथ वा व्यवहारिकविषयशून्यत्वं, नाद्यः स्वप्नादिविभ्रमाणामप्यर्थालम्बनत्वेन दृष्टान्ते साध्यवैकल्यात्। न द्वितीयः सिद्धसाधनात्, इति सूत्रस्थचकारार्थः। तृतीये तु व्यवहारदशायां बाधितार्थग्राहित्वं उपाधिरित्याह। बाध्यते हीत्यादिना। निद्राग्लानमिति करणदोषोक्तिः। साधनव्यापकत्वमित्याह। न चैवमिति। किञ्च प्रमाणजानुभव उपलब्धिः पक्षो प्रमाणजं स्वप्नज्ञानदृष्टान्त इति वैधर्म्यान्तरं परमतेन स्वप्नस्य स्मृतित्वमङ्गीकृत्याह। अपि चेति। स्मृतिप्रत्यक्षोपलब्ध्योर्वैधर्म्यान्तरमाह। अर्थविप्रयोगेति। असम्बन्धस्यावर्त्तमानस्य स्मृतेरर्थो विषय इति निरालम्बनत्वमप्यस्याः कदाचिद्भवेत् न संप्रयुक्तवर्त्तमानार्थमात्रग्राहिण्या उपलब्धेरिति भावः। पूर्व्वोक्तप्रमाणाप्रमा

तन्नैवं सति न शक्यते वक्तुं मिथ्या जागरितोपलब्धिरुपलब्धित्वात् स्वप्नोपलब्धिवदित्युभयोरन्तरं स्वयमनुभवता। न च स्वानुभवापलापः प्राज्ञमानिभिर्युक्तः कर्तुं। अपि चानुभवविरोधप्रसङ्गात् जागरितप्रत्ययानां स्वतो निरालम्बनतां वक्तुमशक्नुवता स्वप्नप्रत्ययसाधर्म्याद्वक्तुमिष्यते। न च यो यस्य स्वतो धर्मो न सम्भवति सोऽन्यस्य साधर्म्यात्तस्य सम्भविष्यति। न ह्यग्निरुष्णोऽनुभूयमान उदकसाधर्म्याच्छीतो भविष्यति। दर्शितन्तु वैधर्म्यं स्वप्नजागरितयोः ॥

न भावोऽनुपलब्धेः ॥ ३० ॥

यदप्युक्तं विनाप्यर्थेन ज्ञानवैचित्र्यं वासनावैचित्र्यादेवावकल्प्यत इति तत् प्रति वक्तव्यं। अत्रोच्यते न भावो वासनानामुपपद्यते त्वत्पक्षेऽनुपलब्धेर्बाह्यानामर्थानां। अर्थोपलब्धि-

---

बाजत्ववैधर्म्योक्तिफलमाह। तन्नैवं सतीति। वैधर्म्ये सतीत्यर्थः। अप्रमाणजत्वोपाधेर्निरालम्बनत्वानुमानं न युक्तमिति भावः। वैधर्म्यासिद्धिं निरस्यति। न चेति। बाधमप्याह। अपि चेति। वस्तुनो घटाद्यनुभवस्य निरालम्बत्वं धर्मो यदि स्यात्तदा किं दृष्टान्ताग्रहेण, प्रत्यक्षतोऽपि वक्तुं शक्यत्वात्, न हि वह्नेरौष्ण्यदृष्टान्तेन वक्तव्यं, यदि न वस्तुतो धर्मोऽस्ति तदा किं दृष्टान्तेन, बाधितस्य दृष्टान्तसहस्रेणापि दुःसाध्यत्वादतः स्वतो निरालम्बनत्वोक्तौ सालम्बनत्वानुभवबाधभिया त्वयाऽनुमातुमारब्धं तथापि बाधो न मुच्यतीत्यर्थः। उक्तोपाधिरपि न विस्मर्तव्य इत्याह। दर्शितन्त्विति ॥

सूत्रव्यावर्त्त्यं स्मारयित्वा दूषयति। यदप्युक्तमित्यादिना। भाव उत्पत्तिः सत्ता वा। ननु बाह्यार्थानुपलब्धावपि पूर्वपूर्ववासनाब-

निमित्ता हि प्रत्यर्थं नानारूपा वासना भवन्ति, अनुपलभ्यमानेषु त्वर्थेषु किंनिमित्ता विचित्रा वासना भवेयुः, अनादित्वेऽप्यन्धपरम्परान्यायेनाप्रतिष्ठैवानवस्था व्यवहारविलोपिनी स्यान्नाभिप्रायसिद्धिः । यावप्यन्वयव्यतिरेकावर्थापलापिनोपन्यस्तौ वासनानिमित्तमेवेदं ज्ञानजातं नार्थनिमित्तमिति तावप्येवं सति प्रत्युक्तौ द्रष्टव्यौ, विनार्थोपलब्ध्या वासनानुत्पत्तेः । अपि च विनापि वासनाभिरर्थोपलब्ध्युपगमात् विना त्वर्थोपलब्ध्या वासनोत्पत्त्यनभ्युपगमात् अर्थसद्भावमेवान्वयव्यतिरेकावपि प्रतिष्ठापयतः । अपि च वासना नाम संस्कारविशेषाः, संस्काराश्च नाश्रयमन्तरेणावकल्पन्ते, एवं लोके दृष्टत्वात्, न च तव वासनाश्रयः कश्चिदस्ति प्रमाणतोऽनुपलब्धेः ॥

त्वादुत्तरोत्तरविज्ञानवैचित्र्यमस्तु बीजाङ्कुरवदनादित्वादित्यत आह अनादित्वेऽपीति । बीजादङ्कुरो दृष्ट इति, अदृष्टेऽपि तज्जातीययोः कार्यकारणभावकल्पना युक्ता, इह त्वर्थानुभवनिरपेक्षवासनोत्पत्तेरादावेव कल्प्यत्वादनादित्वकल्पना निर्मूलेति नाभिप्रेतधीवैचित्र्यसिद्धिरित्यर्थः। ननु निरपेक्षवासनानां सत्त्वे धीवैचित्र्यमसत्त्वे तु नेति स्वप्ने दृष्टमिति समूलाऽनवस्थेत्यत आह । याविति। वासनाना वाह्यार्थानुभवकार्य्यत्वे सति नैरपेक्ष्यासिद्धिर्न त्वयापि दृष्टेत्यर्थः । कार्य्यत्वग्राहकव्यतिरेकमाह । विनेति । अर्थानुभवकार्य्याणां वासनानां तदनपेक्षत्वयोगान्न त्वदुक्तान्वयादिदृष्टिरित्युक्तमभिनवार्थोपलब्धिवैचित्र्यस्य वासनानां विनापि भावेन व्यतिरेकव्यभिचाराच्च न क्वापि वासनामात्रकृतं धीवैचित्र्यं किन्त्वर्थानुभवे सति वासनाऽसति नेत्यन्वयव्यतिरेकाभ्यां वासनामूलानुभवावच्छेदकार्थवृत्तमेवेति वाह्यार्थसद्भावसिद्धिरित्याह । अपि चेति । यः संस्कारः समाश्रयो लोके दृष्टः, यथा वेगादिस्तद्वदाश्रयः, अतो विज्ञानसंस्काराणां न भावः । आश्रयानुपलब्धेरित्यर्थान्तरमाह । अपि चेति ॥

क्षणिकत्वाच्च ॥ ३१ ॥

यदप्यालयविज्ञानं नाम वासनाश्रयत्वेन परिकल्पितं तदपि क्षणिकत्वाभ्युपगमादनवस्थितरूपं *सत्प्रवृत्तिविज्ञानवन्न वासनानामधिकरणं भवितुमर्हति। न हि कालत्रयसम्बन्धिन्येकस्मिन्नन्वयिन्यसति कूटस्थे वा सर्वार्थदर्शिनि देशकालनिमित्तापेक्षवासनाधीनस्मृतिप्रतिसन्धानादिव्यवहारः सम्भवति। स्थिररूपत्वे त्वालयविज्ञानस्य सिद्धान्तहानिः। अपि च विज्ञानवादेऽपि क्षणिकत्वाभ्युपगमस्य समानत्वाद् यानि बाह्यार्थवादे क्षणिकत्वनिबन्धनानि दूषणान्युद्भावितानि उत्त-

---

अस्त्वालयविज्ञानं आश्रय इत्यत आह। क्षणिकत्वाच्चेति। सूत्रं व्याचष्टे। यदपीति। सहोत्पन्नयोः सव्येतरविषाणवदाश्रयाश्रयिभा॰ ॰ायोगात् पौर्व्वापर्य्ये चाधेयक्षणे सत आधारत्वायोगात् सत्त्वे क्षणि॰ ॰त्वव्याघातान्नाधारत्वमालयविज्ञानस्य क्षणिकत्वान्नीलादिविज्ञानव॰ ॰दित्यर्थः। अस्तु तर्हि आलयविज्ञानसन्तानाश्रया वासना इत्यत ॰आह। न हीति। सविकारः कूटस्थो वा स्थाय्यात्मा यदि नास्ति तदा ॰सन्तानस्यावस्तुत्वाद्देशाद्यपेक्षया यद्वासनानामाधानं निक्षेपो यस्य स्मृ॰ ॰तिप्रत्यभिज्ञेयस्य तन्मूलो व्यवहारः, तत् सर्व्वं न सम्भवतीत्यर्थः। ॰दि व्यवहारार्थं आत्मस्थायित्वं तदापसिद्धान्त इत्याह। स्थिरेति। ॰त्रमतदेशार्थत्वेनापि व्याचष्टे। अपि चेति। मतद्वयनिरासमुपसं॰ ॰रति। एवमिति। ज्ञानज्ञेयात्मकस्य सर्व्वस्य सत्त्वासत्त्वाभ्यां विचा॰ ॰सहत्वाच्छून्यतावशिष्यत इति माध्यमिकपक्षस्यापि मानमूलमाशङ्क्य ॰नकारः किमिति न निराचकारेत्यत आह। शून्येति। आदरः ॰थक्सूत्रारम्भो न क्रियते एतान्येव तन्मतनिरासार्थत्वेनापि योज्यन्त ॰र्थः। तथा हि ज्ञानार्थयोर्नाभावः प्रमाणत उपलब्धेः। ननु जा॰ ॰स्वप्नौ ज्ञानार्थशून्यौ अवस्थात्वात् सुषुप्तिवदित्यत आह। वैधर्म्याच्च

---

* स्वप्रवृत्तीति का० वर्धं०।

रोत्पादेव पूर्व्वनिरोधादित्येवमादीनि तानीहाप्यनुसन्धातव्यानि। एवमेतौ द्वावपि वैनाशिकपक्षौ निराकृतौ वाह्यार्थवादिपक्षो विज्ञानवादिपक्षश्च। शून्यवादिपक्षस्तु सर्व्वप्रमाणविप्रतिषिद्ध इति तन्निराकरणाय नादरः क्रियते। न ह्ययं सर्वप्रमाणसिद्धो लोकव्यवहारोऽन्यत्तत्त्वमनधिगम्य शक्यतेऽपह्नोतुं अपवादाभावे उत्सर्गप्रसिद्धेः॥

सर्वशून्यवादः

सर्व्वथानुपपत्तेश्च ॥ ३२ ॥

किं बहुना सर्वप्रकारेण यथा यथायं वैनाशिकसमय उपपत्तिमत्त्वाय परीक्ष्यते तथा तथा सिकताकूपवद्विदीर्य्य एव न काञ्चिदप्यत्रोपपत्तिं पश्यामः, अतश्चानुपपन्नो वैनाशिकतन्त्रव्यवहारः। अपि च वाह्यार्थविज्ञानशून्यवादत्रय-

---

न स्वप्नादिवत् स्वप्नः आदिर्यस्याः सुषुप्तेः तदन्नेतरावस्थयोः शून्यत्वमु पलब्ध्यनुपलब्धिवैधर्म्यलक्षणबाधितज्ञानार्थोपलब्धिबाधात् सुषुप्तावप्या-त्मज्ञानसत्त्वेन साध्यवैकल्याच्च नानुमानमित्यर्थः। किञ्च निरधिष्ठा-ननिषेधायोगादधिष्ठानमेव तत्त्व वाच्य, तस्य त्वन्मते न भावः। मान तोऽनुपलब्धेरित्याह। न भावोऽनुपलब्धेः। उपलब्ध्यनुपलब्धिलक्ष यद्वैधर्म्यं तल्लक्ष्यतेऽनयेति सा चासौ बाधितज्ञानार्थोपलब्धिस्तदुप बाधात् इत्यर्थः। तदर्थम ह। न ह्ययमिति। यद्भाति तन्नासदित्युत्सर्ग प्रपञ्चस्य न शून्यत्वं बाधाभावादित्यर्थः। न च सत्त्वासत्त्वाभ्यां विचार सहत्वा*च्छून्यत्वं मिथ्यात्वसम्भवादिति भाव। क्षणिकत्वाच्चेति क्ष क्षणिकत्वोपदेशाच्चेति पठनीयं। शून्यत्वविरुद्धक्षणिकत्वोपदेशाद कृतप्रलापो सुगत इत्यर्थः॥

सुगतमतासाङ्गत्यमुपसंहरति। सर्व्वथेति। सर्व्वस्य कथं वि

---

* असत्त्वमिति सो० २।

मितरेतरविरुद्धमुपदिशता सुगतेन स्पष्टीकृतमात्मनोऽसम्बन्धप्रलापित्वं, प्रद्वेषो वा प्रजासु विरुद्धार्थप्रतिपत्त्या विमुह्येयुरिमाः प्रजा इति। सर्वथाप्यनादरणीयोऽयं सुगतसमयः श्रेयस्कामैरित्यभिप्रायः॥ जैन मत विचार;

नैकस्मिन्नसम्भवात्॥ ३३॥

निरस्तः सुगतसमयः, विवसनसमय इदानीं निरस्यते। सप्त चैषां पदार्थाः सम्मता जीवाजीवास्रवसंवरनिर्जरबन्धमोक्षा नाम। संक्षेपतस्तु द्वावेव पदार्थौ जीवाजीवाख्यौ यथायोगं तयो-

---

प्रलापस्तत्राह। प्रद्वेषो वेति। वेदवाह्या अत्र प्रजा ग्राह्याः, अतो भ्रान्त्येकमूलसुगतसिद्धान्तेन वेदसिद्धान्तस्य विरोध इति सिद्धं॥

नैकस्मिन्नसम्भवात्। मुक्तकच्छमते निरस्ते मुक्ताम्बराणां मतं बुद्धिस्थं भवति तन्निरस्यत इति प्रसङ्गसङ्गतिमाह। निरस्त इति। एकरूपं ब्रह्मेति वैदिकसिद्धान्तस्यानेकान्तवादेन विरोधोऽस्ति न वेति तद्वादस्य मानभ्रान्तिमूलत्वाभ्यां सन्देहे मानमूलत्वात् विरोध इति पूर्वपक्षफलमभिसन्धाय तन्मतमुपन्यस्यति। सप्त चेति। जीवाजीवौ भोक्तृभोग्यौ, विषयाभिमुख्येन इन्द्रियाणां प्रवृत्तिरास्रवः, तां संवृणोति इति संवरो यमनियमादिः, निर्जरयति नाशयति कल्मषमिति निर्जरस्तप्तशिलारोहणादिः, बन्धः कर्म्म, मोक्षः कर्म्मपाशनाशे सत्यलोकाकाश*प्रतिष्ठस्य सततोर्द्ध्वगमनं। नन्वास्रवादीनां भोग्यान्तर्भावात् कथं सप्तत्वमित्यत आह। संक्षेपतस्त्विति। संक्षेपविस्तराभ्यामुक्तार्थेषु मध्यमरीत्या विस्तारान्तरमाह। तयोरिति। अस्ति कायशब्दः साङ्केतिकः पदार्थवाची। जीवश्चासावस्तिकायश्चेत्येवं विग्रहः। पूरयन्ति गलन्तीति पुद्गलाः परमाणुसङ्घाः कायाः, सम्यक् प्रवृत्त्यनुमेयो धर्मः, ऊर्द्ध्वगमनशीलस्य जीवस्य देहे स्थितिहेतुरधर्मः, आवरणाभाव आकाश इत्यर्थः। पञ्चपदार्थानामवान्तरभेदमाह। सर्व्वेषामिति। अयमर्थः।

---

* प्रविष्टस्येति सो० १।

ष्वेवेतरान्तर्भावादिति मन्यन्ते, तयोरिममपरं प्रपञ्चमाचक्षते, पञ्चास्तिकाया नाम जीवास्तिकायः पुद्गलास्तिकायः धर्मास्तिकायः अधर्मास्तिकायः आकाशास्तिकायश्चेति। सर्वेषामप्येषामवान्तरप्रभेदान् बहुविधान् स्वसमयपरिकल्पितान् वर्णयन्ति। सर्वत्र चेमं सप्तभङ्गीनयं नाम न्यायमवतारयन्ति। स्यादस्ति

जीवास्तिकायस्त्रिविधः कश्चिज्जीवो नित्यसिद्धः अर्हन्मुख्यः केचित् साम्प्रतिकमुक्ताः केचिद्बद्धा इति। पुद्गलास्तिकायः षोढा पृथिव्यादीनि चत्वारि भूतानि स्थावरं जङ्गमञ्चेति। प्रवृत्तिस्थितिलिङ्गौ धर्माधर्मौ उक्तौ। आकाशास्तिकायो द्विविधः लोकाकाशः सांसारिकः, अलोकाकाशः मुक्ताश्रय इति। बन्धाख्यं कर्माष्टविधं चत्वारि घातिकर्माणि चत्वार्यघातीनि। तत्र ज्ञानावरणीयं दर्शनावरणीयं मोहनीयमान्तर्य्यञ्चेति घातिकर्माणि। तत्त्वज्ञानान्न मुक्तिरिति ज्ञानमाद्यं कर्म, आर्हततन्त्रश्रवणान्न मुक्तिरिति ज्ञानं द्वितीयं, बहुषु तीर्थकरप्रदर्शितेषु मोक्षमार्गेषु विशेषानवधारणं मोहनीयं, मोक्षमार्गप्रवृत्तिविघ्नकरणमान्तर्य्यं, इमानि चत्वारि श्रेयोहन्तृत्वात् घातिकर्माणि। अथाघातीनि चत्वारि कर्माणि वेदनीयं नामिकं गोत्रिकमायुष्कमिति। मम वेदितव्यं तत्त्वमस्तीत्यभिमानो वेदनीयं, एतन्नामाहमस्मीत्यभिमानो नामिकं, अहमत्र भगवतो देशिकस्यार्हतः शिष्यवंशे प्रविष्टोऽस्मीत्यभिमानो गोत्रिकं, शरीरस्थित्यर्थं कर्म आयुष्कं। अथवा शुक्रशोणितमिश्रितमायुष्कं, तस्य तत्त्वज्ञानानुकूलदेहपरिणामशक्तिर्गोत्रिकं, शक्तस्य तस्य द्रवीभावात्मककललावस्थाया बुद्बुदावस्थायाश्चारम्भकः क्रियाविशेषो नामिकं, सक्रियस्य जाठराग्निवायुभ्यामीषद्घनीभावो वेदनीयं। तत्त्ववेदनानुकूलत्वात्तान्येतानि तत्त्वावेदकशुक्लपुद्गलार्थत्वादघातीनि। तदेतत् कर्माष्टकं जन्मार्थत्वाद्बन्धः, आस्रवादिद्वारेति इयं प्रक्रिया मानशून्येति द्योतयति। स्वसमयपरिकल्पितानिति। स्वीयतन्त्रसङ्केत*मात्रकल्पितानित्यर्थः। पदार्थानामुक्तानामनेकान्तत्वं वदन्तीत्याह। सर्वत्रेति। अस्तित्वनास्तित्वविरुद्धधर्मद्वयमादाय वस्तुमात्रे

---

* मानेति सो० २।

स्यान्नास्ति स्यादस्ति च नास्ति च स्यादवक्तव्यः स्यादस्ति चावक्तव्यश्च स्यान्नास्ति चावक्तव्यश्च स्यादस्ति च नास्ति चावक्तव्यश्चेत्येवमेवैकत्वनित्यत्वादिष्वपीमं सप्तभङ्गीनयं योजयन्ति, अत्राचक्ष्महे, नायमभ्युपगमो युक्त इति। कुतः एकस्मिन्नसम्भवात्। न ह्येकस्मिन् धर्म्मिणि युगपत् सदसत्त्वादिविरुद्धधर्मसमावेशः सम्भवति शीतोष्णवत्। ये एते सप्त पदार्था निर्धारिता एतावन्त

न्यायं योजयन्ति। सप्तानामस्तित्वादीनां भङ्गानां समाहारः सप्तभङ्गी तस्या नयो न्यायः घटादेर्हि सर्व्वात्मना सदेकरूपत्वे प्राण्यात्मनाप्यस्त्येव स इति तत्प्राप्तये यत्नो न स्यादतो घटत्वादिरूपेण कथञ्चिदस्ति, प्राप्यत्वादिरूपेण कथञ्चिन्नास्तीत्येवमनेकरूपत्वं वस्तुमात्रस्यास्थेयमिति भावः। किं ते सप्तभङ्गास्तानाह। स्यादस्तीति। स्यादित्यव्ययं तिङन्तप्रतिरूपकं कथञ्चिदर्थकं. स्यादस्ति कथञ्चिदस्तीत्यर्थः, एवमग्रेऽपि। तत्र वस्तुनोऽस्तित्ववाञ्छायां स्यादस्तीत्याद्यो भङ्गः। प्रवर्त्तनास्तित्ववाञ्छायां स्यान्नास्तीति द्वितीयो भङ्गः। क्रमेणोभयवाञ्छायां स्यादस्ति नास्ति चेति तृतीयो भङ्गः। युगपदुभयवाञ्छायां अस्ति नास्तीति शब्दद्वयस्य सकृद्वक्तुमशक्यत्वात् स्यादवक्तव्यत्वं चतुर्थो भङ्गः। आद्यचतुर्थभङ्गयोर्वाञ्छायां स्यादस्ति चावक्तव्यश्चेति पञ्चमो भङ्गः। द्वितीयचतुर्थेच्छायां स्यान्नास्ति चावक्तव्यश्चेति षष्ठो भङ्गः। तृतीयचतुर्थेच्छायां स्यादस्ति नास्ति चावक्तव्यश्चेति सप्तमो भङ्ग इति विभागः। वमेकत्वमनेकत्वं चेति द्वयमादाय स्यादेकः स्यादनेकः स्यादेकोऽनेश्च स्यादवक्तव्यः स्यादेको वक्तव्यः स्यादनेकोऽवक्तव्यः स्यादेकोऽनेकावक्तव्यश्चेति, तथा स्यान्नित्यः स्यादनित्य इत्याद्यूह्यं। एवमनेकरूपन वस्तुनि प्राप्तित्यागादिव्यवहारः सम्भवति एकरूपत्वे सर्व्वं सन सर्व्वदास्त्येवेति व्यवहारविलोपापत्तिः स्यात्,तस्मादनेकान्तं सर्व्वत्येकरूपब्रह्मवादबाध इति प्राप्ते सिद्धान्तयति। अत्रेति। यदस्ति सर्व्वत्र सर्व्वदास्त्येव यथा ब्रह्मात्मा। न चैवं तत्प्राप्तये यत्नो न

एवंरूपाश्चेति ते तथैव वा स्युः नैव वा तथा स्युः इतरथा हि तथा वा स्युः अतथा वेत्यनिर्धारितरूपं ज्ञानं संशयज्ञानवदप्रमाणमेव स्यात् । नन्वनेकात्मकं वस्त्विति निर्द्धारितरूपमेव ज्ञानमुत्पद्यमानं संशयज्ञानवन्नाप्रमाणं भवितुमर्हति, नेति ब्रूमः । निरङ्कुशमनेकान्तं सर्ववस्तुषु प्रतिजानानस्य निर्द्धारणस्यापि वस्तुत्वाविशेषात् स्यादस्ति स्यान्नास्तीत्यादिविकल्पोपनिपातादनिर्धारणात्मकतैव स्यात्, एवं निर्द्धारयितुर्निर्द्धारणफलस्य च स्यात् पक्षेऽस्तिता स्याच्च पक्षे नास्तितेति, एवं सति कथं प्रमाणभूतः संस्तीर्थकरः प्रमाणप्रमेयप्रमातृप्रमितिष्वनिर्द्धारितासूपदेष्टुं

स्यादिति वाच्यं, अप्राप्तिभ्रान्त्या यत्नसम्भवात् । यन्नास्ति तन्नास्त्येव यथा शशविषाणादि, प्रपञ्चस्तु उभयविलक्षण एवेत्येकान्तवाद एव युक्तो नानेकान्तवादः । तथा हि किं येनाकारेण वस्तुनः सत्त्वं तेनैवाकारेणासत्त्वमुताकारान्तरेण, द्वितीये वस्तुन आकारान्तरमेवासदिति वस्तुनः सदेकरूपत्वमेव, न हि दूरस्थग्रामस्य प्राप्तेरसत्त्वे ग्रामोऽप्यसन्न भवति, प्राप्यासत्त्वे प्राप्तियत्नानुपपत्तेः, अतो यथा व्यवहारं प्रपञ्चस्यैकरूपत्वमास्थेयं नाद्य इत्याह । नायमिति । ननु विमतमनेकात्मकं वस्तुत्वान्नारसिंहवदिति चेत्, न, घट इदानीमस्त्येवेत्यनुभवबाधात् । किं जीवादिपदार्थानां सप्तत्वं जीवत्वादिरूपं चास्त्येव नास्त्येवेति च नियतमुतानियतं,आद्ये व्यभिचार इत्याह । य इति । द्वितीये पदार्थनिश्चयो न स्यादित्याह । इतरथेति । अनेकान्तं सर्वमित्येव निश्चय इति शङ्कते नन्विति । तस्य निश्चयरूपत्वं नियतमनियतं वा आद्ये वस्तुत्वस्य तस्मिन्नेवैकरूपनिश्चये व्यभिचारः, द्वितीये तस्य संशयत्वं स्यादित्याह नेति ब्रूम इति । प्रमायामुक्तन्यायं प्रमात्रादावतिदिशति । एवमिति निर्धारणं फलं यस्य प्रमाणादेस्तस्येत्यर्थः । इत्येवं सर्वत्रानिर्धारणे वस्तूपदेशो निष्कम्पप्रवृत्तिश्च न स्यादित्याह । एवं सतीति । अनेका

प्रकुर्यात्, कथं वा तदभिप्रायानुसारिणस्तदुपदिष्टेऽर्थेऽनिर्धारितरूपे प्रवर्त्तेरन्। ऐकान्तिकफलत्वनिर्धारणे हि सति तत्साधनानुष्ठानाय सर्वो लोकोऽनाकुलः प्रवर्त्तते नान्यथा, अतश्चानिर्धारितार्थं शास्त्रं *प्रलपन् मत्तोन्मत्तवदनुपादेयवचनः स्यात्। तथा पञ्चानामस्तिकायानां पञ्चत्वसङ्ख्याऽस्ति वा नास्ति वेति विकल्प्यमाना स्यात् तावदेकस्मिन् पक्षे पक्षान्तरे तु न स्यादित्यतो न्यूनसङ्ख्यात्वमधिकत्वं वा प्राप्नुयात्। न चैषां पदार्थानामवक्तव्यत्वं सम्भवति अवक्तव्याश्चेन्नोच्येरन् उच्यन्ते चावक्तव्याश्चेति विप्रतिषिद्धं। उच्यमानाश्च तथैवावधार्यन्ते नावधार्यन्त इति च, तथा तदवधारणफलं सम्यग्दर्शनमस्ति नास्ति वा, एवं तद्विपरीतमसम्यग्दर्शनमप्यस्ति नास्ति वा, एवं तद्विपरीतमसम्यग्दर्शनमप्यस्ति वा नास्ति वेति प्रलपन्मत्तोन्मत्तपक्षस्यैव स्यात्। न प्रत्ययितव्यपक्षस्य स्वर्गापवर्गयोश्च पक्षे भावः पक्षे चाभावस्तथा

ादे अस्तिकायपञ्चत्वमपि न स्यादित्याह। तथा पञ्चानामिति। यदु-
मवक्तव्यत्वं तत् किं केनापि शब्देनावाच्यत्वं उत सकृदनेकशब्दावा-
च्यत्वं, नाद्यः व्याघातादित्याह। न चैषामिति। उच्यन्ते चावक्तव्या-
देपदैरिति शेषः। न द्वितीयः सकृदेकवक्तृमुखजानेकशब्दानामप्रसि-
र्निषेधायोगात् शेषस्यापि मुखभेदात्। न चार्थस्य युगपद्विरुद्धधर्म्म-
ङ्कायां वक्तुर्मूकत्वमात्रमवक्तव्यपदेन विवक्षितमिति वाच्यं, तादृश-
ङ्काया एवानुत्पत्तेरिति। किञ्च विरुद्धानेकप्रलापित्वादर्हन्ननाप्त
त्याह। उच्यमानाश्चेत्यादिना। इति च प्रलपन्नित्यन्वयः। अर्हन्निति
षः। अनाप्तपक्षस्यैवान्तर्गतः स्यान्नाप्तपक्षस्येत्यर्थः। इतश्चासङ्गतो-
नेकान्तवाद इत्याह। स्वर्गेति। किञ्चानादिसिद्धोऽर्हन्मुनिः। अन्ये तु

---

* प्रणयन्निति वर्ध० का०।

पक्षे नित्यता पक्षे चानित्यतेत्यनवधारणायां प्रवृत्त्यनुपपत्तिः अनादिसिद्धजीवप्रभृतीनाञ्च स्वशास्त्रावधृतस्वभावानामयथावधृतस्वभावत्वप्रसङ्गः। एवं जीवादिषु पदार्थेष्वेकस्मिन् धर्म्मिणि सत्त्वासत्त्वयोर्विरुद्धयोर्धर्मयोरसम्भवात् सत्त्वे चैकस्मिन् धर्मेऽसत्त्वस्य धर्मान्तरस्यासम्भवात् असत्वे चैवं सत्त्वस्यासम्भवादसङ्गतमिदमार्हतं मतं। एतेनैकानेकनित्यानित्यव्यतिरिक्ताव्यतिरिक्ताद्यनेकान्ताभ्युपगमा निराकृता मन्तव्याः। यत्तु पुद्गलसंज्ञकेभ्योऽणुभ्यः सङ्घाताः सम्भवन्तीति कल्पयन्ति तत् पूर्वेणैवाणुवादनिराकरणेन निराकृतं भवतीत्यतो न पृथक् तन्निराकरणाय प्रयत्यते॥

एवञ्चात्माऽकार्त्स्न्यं ॥ ३४ ॥

यथैकस्मिन् धर्मिणि विरुद्धधर्मासम्भवो दोषः स्याद्वादिप्रसक्तः एवमात्मनोऽपि जीवस्याकार्त्स्न्यमपरो दोषः प्रसज्येत कथं शरीरपरिमाणो हि जीव इत्यार्हता मन्यन्ते। शरीर

हेत्वनुष्ठानान्मुच्यन्ते, अननुष्ठानाद्बध्यन्त इत्यार्हततन्त्रावधृतस्वभावानां त्रिविधजीवानां त्रैविध्यनियमोऽपि न स्यादित्याह। अनादीति प्रपञ्चितं सूत्रार्थं निगमयति। एवमिति। एतेनेति सत्त्वासत्त्वैकत्र निरासेनेत्यर्थः। परमाणुसंघाताः पृथिव्यादय इति दिगम्बरसिद्धान्तः किमिति सूत्रकृतोपेक्षितस्तत्राह। यत्त्विति॥

जीवस्य देहपरिमाणतां दूषयति। एवञ्चेति। अकार्त्स्न्यं मध्यमपरिमाणत्वं तेनानित्यं स्यादित्यर्थः। अर्थान्तरमाह। शरीराणां वैविपाकः कर्म्मणामभिव्यक्तिर्जीवस्य कृत्स्नगजशरीराव्यापित्वमकात्र्स्न्यं शरीरैकदेशो निर्जीवः स्यादित्यर्थः। पुत्तिकादेहे कृत्स्नो जीवो

परिमाणतायां च सत्यामकृत्स्नोऽसर्वगतः परिच्छिन्न आत्मेत्यतो घटादिवदनित्यत्वमात्मनः प्रसज्येत। शरीराणाञ्चानवस्थितपरिमाणत्वान्मनुष्यजीवो मनुष्यशरीरपरिमाणो भूत्वा पुनः केनचित् कर्मविपाकेन हस्तिजन्म प्राप्नुवन्न कृत्स्नं हस्तिशरीरं व्याप्नुयात्, पुत्तिकाजन्म च प्राप्नुवन्न कृत्स्नपुत्तिकाशरीरे संमीयेत। समान एष एकस्मिन्नपि जन्मनि कौमारयौवनस्थाविरेषु दोषः। स्यादेतत्, अनन्तावयवो जीवस्तस्य त एवावयवा अल्पे शरीरे सङ्कुचेयुर्महति च विकाशेयुरिति। तेषां पुनरनन्तानां जीवावयवानां समानदेशत्वं प्रतिविहन्येत वा न वेति वक्तव्यं। प्रतिघाते तावन्नानन्तावयवाः परिच्छिन्ने देशे संमीयेरन्। अप्रतिघातेऽप्येकावयवदेशत्वोपपत्तेः सर्वेषामवयवानां प्रथिमानुपपत्तेः जीवस्याणुमात्रप्रसङ्गः स्यात्। अपि च शरीरमात्रपरिच्छिन्नानां जीवावयवानामानन्त्यं नोत्प्रेक्षितुमपि शक्यं। अथ पर्य्यायेण बृहच्छरीरप्रतिपत्तौ च केचिज्जीवा-

---

प्रविशेत् देहाद्बहिरपि जीवः स्यादित्यर्थः। किञ्च बालदेहमात्र आत्मा
तः स्थूले युवदेहे क्वचित् स्यादिति कृत्स्नदेहः सजीवो न स्यादित्याह।
समान इति। यथा दीपावयवानां घटे सङ्कोचो गेहे विकाशस्तथा जी-
वावयवानामिति। देहमानत्वनियमं शङ्कते। स्यादिति। दीपांशवज्जी-
शा भिन्नदेशा एकदेशा वेति विकल्प्याद्येऽल्पदेहाद्बहिरपि जीवः
स्यादिति दूषयति। तेषामित्यादिना। दीपस्य तु न घटाद्बहिः सत्त्वं
धिकावयवानां विनाशात्। द्वितीयं दूषयति। अप्रतिघात इति।
वयवानां नित्यत्वञ्चासिद्धं अल्पत्वाद्दीपांशवदित्याह। अपि चेति।
वं जीवावयवा नित्या इति मते देहमानत्वं निरस्तं, सम्प्रति जीवस्य

वयवा उपगच्छन्ति तनुशरीरप्रतिपत्तौ च केचिदपगच्छन्ति इत्युच्येत तत्राप्युच्यते ॥

न च पर्य्यायादप्यविरोधो विकारादिभ्यः ॥ ३५ ॥

न च पर्य्यायेणाप्यवयवोपगमापगमाभ्यामेतद्देहपरिमाणत्वं जीवस्याविरोधेनोपपादयितुं शक्यते। कुतः विकारादिदोषप्रसङ्गात्। अवयवोपगमापगमाभ्यां ह्यनिशमापूर्य्यमाणस्यापचीयमानस्य च जीवस्य विक्रियावत्त्वं तावदपरिहार्यं, विक्रियावत्त्वे च चर्मादिवदनित्यत्वं प्रसज्येत, ततश्च बन्धमोक्षाभ्युपगमो बाध्येत, कर्माष्टकपरिवेष्टितस्य जीवस्यालाबुवत् संसारसागरे निमग्नस्य बन्धनोच्छेदादूर्द्ध्वगामित्वं भवतीति। किञ्चान्यदागच्छतामपगच्छताञ्चावयवानामागमापायिधर्मवत्त्वादेवानात्मत्वं शरीरादिवत्। ततश्चावस्थितः कश्चिदवयव

केचिदेव कूटस्था अवयवा अन्ये त्वागमापायिन इति शङ्कते। अथेति। वृहत्तनुकायामौ जीवस्यावयवागमोपायाभ्यां देहमानत्वमित्यर्थः॥

सूत्रेण परिहरति। न चेति। आगमापायौ पर्य्यायः। किमागमापायिनामवयवानामात्मत्वमस्ति न वा, आद्ये आह। विकारादिदोषेति कोऽसौ बन्धमोक्षाभ्युपगम इत्यत आह। कर्माष्टकेति। व्याख्यातमेतत् आद्यकल्पे दोषं वदन् कल्पान्तरमादाय दूषयति। किञ्चेति। अवशिष्ट कूटस्थावयवस्य दुर्ज्ञानत्वादात्मज्ञानाभावान्न मुक्तिरित्यर्थः। यथा दीपावयवानां आकारस्तेजस्तथात्मावयवानामाकारकारणाभावान्नागमपायौ युक्ताविन्याह। किञ्चेति। सर्वजीवसाधारणः प्रतिजीवमसाधरणो वेत्यर्थः। किञ्चात्मन आगमापायिशीलावयवत्वे सति कियन्त स्थान्यवयवाः कियन्तोऽपयन्तीत्यज्ञानादात्मनिश्चयाभावादनिर्मोक्षः स

आत्मेति स्यात्, न च स निरूपयितुं शक्यते अयमसाविति। किञ्चान्यदागच्छन्तश्चैते जीवावयवाः कुतः प्रादुर्भवन्ति अपगच्छन्तश्च क्व वा लीयन्त इति वक्तव्यं। न हि भूतेभ्यः प्रादुर्भवेयुः भूतेषु च लीयेरन् अभौतिकत्वाज्जीवस्य। नापि कश्चिदन्यः साधारणोऽसाधारणो वा जीवानामवयवाधारो निरूप्यते प्रमाणाभावात्। किञ्चान्यदनवधृतस्वरूपश्चैवं सत्यात्मा स्यात् आगच्छतामपगच्छताञ्चावयवानामनियतपरिमाणत्वात्, अत एवमादिदोषप्रसङ्गात् न पर्य्यायेणाप्यवयवोपगमापगमावात्मन आश्रयितुं शक्येते। अथ वा पूर्वेण सूत्रेण शरीरपरिमाणस्यात्मन उपचितापचितशरीरान्तरप्रतिपत्तावकार्त्स्न्यप्रसञ्जनद्वारेणानित्यतायां चोदितायां पुनः पर्य्यायेण परिमाणानवस्थानेऽपि स्रोतःसन्ताननित्यतान्यायेनात्मनो नि-

---

दित्याह। किञ्चेति। अपि चावयवारब्धावयवित्वे जीवस्यानित्यत्वं अवयवसमूहत्वेनासत्त्वं आत्मत्वस्य यावदवयववृत्तित्वे यत्किञ्चिदवयवापायेऽपि सद्यः शरीरस्याचेतनत्वं गोत्ववत् प्रत्येकसमाप्तौ एकस्मिन् शरीर आत्मनानात्वं स्यादतो न देहपरिमाणत्वसावयवत्वे आत्मन इत्युपसंहरति। अत इति। सूत्रस्यार्थान्तरमाह। अथवेति। स्थूलसूक्ष्मशरीराणामवकार्त्स्न्योक्तिद्वारेणात्मानित्यतायामुक्तायां सुगतवत् सन्तानरूपेणात्मनित्यतामाशङ्क्यानेनोत्तरमुच्यत इत्यन्वयः। पर्य्यायेणेत्यस्य व्याख्यानं इति देहभेदेन परिमाणस्यात्मनः स्थानवस्थानेऽपि नाशेऽपि स्रोतःप्रवाहस्तदात्मकस्यात्मव्यक्तिसन्तानस्य नित्यत्वात्मनित्यता स्यादित्यत्र दृष्टान्तमाह। यथेति। सिगवस्त्रं विगतं येभ्यस्ते विसिचो दिगम्बराः तेषामित्यर्थः। पर्य्यायात् सन्तानादप्यात्मनित्यत्वस्याविरोध इति न

स्थता स्यात्, यथा रक्तपटादीनां विज्ञानानवस्थानेऽपि तत्-सन्तानमित्यता तद्वदिमिचामपीत्याशङ्कानेन सूत्रेणोत्तरमुच्यते। सन्तानस्य तावदवस्तुत्वे नैरात्म्यवादप्रसङ्गः, वस्तुत्वेऽप्यात्मनो विकारादिदोषप्रसङ्गादस्य पक्षस्यानुपपत्तिरिति ॥

अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥ ३६ ॥

अपि चान्त्यस्य मोक्षावस्थाभाविनो जीवपरिमाणस्य नित्यत्वमिष्यते जैनैस्तद्वत् पूर्वयोरप्याद्यमध्यमयोर्जीवपरिमाणयोर्नित्यत्वप्रसङ्गात् अविशेषप्रसङ्गः स्यात् इत्युक्ते एकशरीरपरिमाणतैव स्यात् नोपचितापचितशरीरान्तरप्राप्तिः । अथ वान्त्यस्य

च कुतः, विकारादिभ्यः सन्तानस्यावस्तुन आत्मत्वे शून्यवादः सन्तानस्य वस्तुत्वे सन्तानव्यतिरेके च कूटस्थात्मवादः, अनतिरेके जन्मादिविकारो विनाशो मुक्त्यभावदोष इत्युक्तप्रसङ्गात् सन्तानात्मपक्षोऽनुपपन्न इति सूत्रार्थः ॥

यं स्थूलं सूक्ष्मं वा देहं गृह्णाति तद्देहपरिमाण एव जीव इति नियमं दूषयति। अन्त्येति। अन्त्यशरीरपरिमाणस्यावस्थितेर्नित्यत्वदर्शनादुभयोराद्यमध्यमपरिमाणयोर्नित्यत्वप्रसङ्गादविशेषस्त्रयाणां नित्यपरिमाणानां साम्यं स्यात्, विरुद्धपरिमाणानामेकत्रायोगादिति सूत्रयोजना। आद्यमध्यमपरिमाणे नित्ये आत्मपरिमाणत्वादन्त्यपरिमाणवत्। न चाप्रयोजकता, परिमाणनाशे सत्यात्मनोऽपि नाशादन्यपरिमाणनित्यत्वायोगादिति भावः। परिमाणत्रयसाम्यापादानफलमाह। एकेति। अन्त्यशरीरसमान्येव पूर्वशरीराणि स्युः विषमशरीरप्राप्तावात्मनस्तत्परिमाणत्वे परिमाणत्रयसाम्यानुमानविरोधादित्यर्थः। पूर्वं कालत्रये परिमाणत्रयमङ्गीकृत्यान्त्यदृष्टान्तेन नित्यत्वमनुमाय साम्यमापादितं, सम्प्रत्यन्त्यस्य मुक्तपरिमाणस्याणुत्वस्थूलत्व

जीवपरिमाणस्यावस्थितत्वात् पूर्वयोरप्यवस्थयोरवस्थितपरिमाण एव जीवः स्यात्। ततश्चाविशेषेण सर्वदैवाणुर्महान् वा जीवोऽभ्युपगन्तव्यो न शरीरपरिमाणः, अतश्च सौगतवदार्हतमपि मतमसङ्गतमित्युपेक्षितव्यं ॥

माहेश्वरमतविचारः

पत्युरसामञ्जस्यात् ॥ ३७ ॥

इदानीं केवलाधिष्ठात्रीश्वरकारणवादः प्रतिषिध्यते। तत् कथमवगम्यते, प्रकृतिश्च प्रतिज्ञा दृष्टान्तानुपरोधादभिध्योपदेशाच्चेत्यत्र प्रकृतिभावेनाधिष्ठातृभावेन चोभयस्वभावस्येश्वरस्य स्वयमेवाचार्येण प्रतिष्ठापितत्वात्। यदि पुनरविशेषेणेश्वरकारणवादमात्रमिह प्रतिषिध्येत पूर्वोत्तरविरोधाद्व्याहताभिव्याहारः सूत्रकार इत्येतदापद्येत। तस्मादप्रकृतिरधिष्ठाता केवलं निमित्तकारणमीश्वर इत्येष पक्षो वेदान्तविहितब्रह्मै-

---

रन्यतरत्वेनावस्थितेस्तदेवान्त्यमाद्यमध्यमकालयोरपि नित्यत्वात् स्यात् प्रागसतोऽनित्यत्वायोगात्, तथा चाविशेषः कालत्रयेऽपि जीवपरिमाणाभेद इत्याह। अथ वेति। तस्माद् भ्रान्त्यैकशरणाह्तपक्षकसिद्धान्तेनाविरोधः समन्वयस्येति सिद्धं ॥

पत्युरसामञ्जस्यात्। लुञ्चितकेशमतनिरासानन्तरं जटाधारिशैवमतं [विरु]द्धत्वं निराक्रियते इति प्रसङ्गसङ्गतिमाह। इदानीमिति। सा[मा]न्य ईश्वरनिरास एवात्र किं न स्यादिति शङ्कते। तदिति। स्वोक्ति[वि]रोधान्नैवमित्याह। प्रकृतिश्चेत्यादिना। प्रतिष्ठापितत्वात् फलनि[मित्त]ेश्वरप्रतिषेधोऽवगम्यत इत्यन्वयः। व्याहतो विरुद्धोऽभिव्याहार [उ]क्तिर्यस्य स तथा। अद्वितीयब्रह्मप्रकृतिकं जगदिति वदतो वेदान्तसमन्वयस्य कर्त्तैवेश्वरो न प्रकृतिरिति शैवादिमतेन विरोधोऽस्ति न

कत्वप्रतिपत्तत्वात् यत्नेनात्र प्रतिषिध्यते। सा चेयं वेदवाह्येश्वर-कल्पनाऽनेकप्रकारा। केचित्तावत् साङ्ख्ययोगव्यपाश्रयाः कल्प-यन्ति प्रधानपुरुषयोरधिष्ठाता केवलं निमित्तकारणमीश्वरः इतरेतरविलक्षणाः प्रधानपुरुषेश्वरा इति। माहेश्वरास्तु मन्यन्ते कार्य्यकारणयोगविधिदुःखान्ताः पञ्च पदार्थाः पशु-पतिनेश्वरेण पशुपाशविमोक्षायोपदिष्टाः, पशुपतिरीश्वरो निमित्तकारणमिति वर्णयन्ति। तथा वैशेषिकादयोऽपि के-चित् कथञ्चित् स्वप्रक्रियानुसारेण निमित्तकारणमिति। अत उत्तरमुच्यते। पत्युरसामञ्जस्यादिति। पत्युरीश्वरस्य प्रधान-पुरुषयोरधिष्ठातृत्वेन जगत्कारणत्वं नोपपद्यते, कस्मादसाम-

---

वेति सन्देहे तन्मतस्य मानमूलत्वाविरोधे सति वेदान्तोक्तादयब्रह्म-सिद्धिरिति फलमभिप्रेत्य सत्त्वासत्त्वयोरैकत्रासम्भवात् कर्तृत्वोपा-दानत्वयोरप्येकत्रासम्भवात् कर्त्तैवेश्वर इति पूर्वपक्षं कुर्वन्नवान्तर-मतभेदमाह। सा चेति। सेश्वराः साङ्ख्याः, साङ्ख्यशब्दार्थः चत्वारो माहेश्वराः शैवाः पाशुपताः कारुकसिद्धान्तिनः कापालिकाश्चेति सर्वेऽप्यमी महेश्वरप्रोक्तागमानुगामित्वान्माहेश्वरा उच्यन्ते। कार्य्यं महदादिकं, कारणं प्रधानं ईश्वरश्च, योगः समाधिः, विधिः त्रिसवन-स्नानादिः, दुःखान्तो मोक्षः इति पञ्च पदार्थाः। पशवो जीवास्तेषां पाशो बन्धस्तन्नाशायेत्यर्थः। पाशुपतागमप्रामाण्यात् पशुपतिर्निमित्तमेवेति मतमुक्त्वाऽऽनुमानिकेश्वरमतमाह। तथेति। विमतं सकर्तृकं कार्य्यत्वात् घटवदिति वैशेषिकाः कर्त्तारमीश्वरं साधयन्ति, कर्मफलं सपरि-कराभिज्ञदातृकं कालान्तरभावि फलत्वात् सेवाफलवदिति गौतमा दिगम्बराश्च। ज्ञानैश्वर्य्यातिशयः क्वचिद्विश्रान्तः सातिशयत्वात् परि-माणवदिति साङ्ख्यसौगतमातङ्गला इति मत्वोक्तं केचित् कथञ्चिदिति सिद्धान्तयति। अत इति। आगमादिना निर्दोषेश्वरसिद्धेः कथं दे-

ञ्जस्यात्। किं पुनरसामञ्जस्यं। हीनमध्यमोत्तमभावेन हि प्राणिभेदान् विदधत ईश्वरस्य रागद्वेषादिदोषप्रसक्तेरस्मदादिवदनीश्वरत्वं प्रसज्येत। प्राणिकर्मापेक्षितत्वाददोष इति चेत्, न, कर्मेश्वरयोः प्रवर्त्यप्रवर्त्तयितृत्वे इतरेतराश्रयदोषप्रसङ्गात्। अनादित्वादिति चेत्, न, वर्त्तमानकालवदतीतेष्वपि कालेष्वितरेतराश्रयदोषाविशेषादन्धपरम्परान्यायापत्तेः। अपि च

वत्त्वमित्याह। किमिति। न तावत् स्वस्वागमादीश्वरनिर्णयः, आगमाना निर्मूलत्वेनाप्रामाण्यात्। न च सर्वज्ञज्ञानं मूलं तत्र मानाभावात्। न चागम एव मानं, आगममानत्वनिश्चये मूलनिश्चयस्तन्निश्चये तन्निश्चय इत्यन्योऽन्याश्रयात्। न च पुरुषवचसां स्वतो मानत्वं युक्तं, मिथो विरोधेन तत्त्वाव्यवस्थानाच्च, नाप्यनुमानादीश्वरः सर्वज्ञः कर्त्तैवेति निर्णयः सम्भवति, अनुमानस्य दृष्टानुसारित्वेन दृष्टविपरीतार्थासाधकत्वात्। तथा च लोके यादृशाः कर्त्तारो दृष्टास्तादृशा एव जगत्कर्त्तारो रागद्वेषादिमन्तः सिध्येयुः। यदि लोके विचित्रप्रासादादिकर्त्तुरेकत्वाद्यदर्शनेऽपि जगत्कर्त्तरि लाघवादेकत्वं नित्यज्ञानं निर्दोषत्वञ्च कल्प्येत, तर्हि द्रव्योपादानत्वमपि कल्प्यतां, कर्त्तुरेवोपादानत्वेन लाघवात्, अन्यथा स्वतन्त्रप्रधानपरमाण्वाद्युपादानकल्पनागौरवात्, अदृष्टत्वाच्चेत् कर्त्तुर्द्रव्योपादानत्वासिद्धेरेकत्वादिकमपि न सिध्येत्। अस्माकन्त्वपौरुषेयतया स्वतःसिद्धप्रामाभावया श्रुत्या स्वप्रमेयबोधने दृष्टान्तानपेक्षया भवत्येव लौकिकदृष्टविपरीताद्वितीयकर्त्त्रुपादानात्मकसर्वज्ञनिर्दोषेश्वरनिर्णयः। निर्णीते च तस्मिन् धर्मिग्राहकमानाबाधान्न रागादिदोषापादानस्यावकाशः इत्यानुमानिकेश्वरादिभ्यो वैषम्यं, तदभिप्रेत्याश्रौतस्येश्वरस्यासामञ्जस्यमाह। हीनेति। यदि कर्तुरुपादानत्वमदृष्टत्वान्न कल्प्यते तर्हि निर्दोषत्वस्याप्यदृष्टत्वात् यो विषमकारी स दोषवानिति व्याप्तिदृष्टेश्च जगत्कर्त्ता दोषवान् स्यात्। न चात्र धर्म्मिग्राहकानुमानबाधः कार्य्यत्वलिङ्गस्य कर्तृमात्रसाधकत्वेन निर्दोषत्वादावुदासीनत्वात। न चात्ममा जातिर्व्यापकधर्म्मोपादाना दोषाभावे तद्वाप्यविषमकर्तृकत्वायो-

प्रवर्त्तनालक्षणा दोषा इति न्यायवित्समयः। न हि कश्चिद् दोषप्रयुक्तः स्वार्थे परार्थे वा प्रवर्त्तमानो दृश्यते। स्वार्थे प्रयुक्त एव च सर्वो जनः परार्थेऽपि प्रवर्त्तत इत्येवमप्यसामञ्जस्यं, स्वार्थवत्त्वादीश्वरस्यानीश्वरत्वप्रसङ्गात्। पुरुषविशेषत्वाभ्युपगमाच्चेश्वरस्य पुरुषस्य चौदासीन्याभ्युपगमादसामञ्जस्यं॥

गाच्च, दृष्टान्तस्याव्यापकधर्म्माणां पक्षे आपादनं ह्युत्कर्षसमा जातिर्यथा शब्दो यदि कृतकत्वेन हेतुना घटवदनित्यः स्यात् तर्हि तेनैव हेतुना सावयवोऽपि स्यादिति। न ह्यत्रानित्यत्वस्य व्यापकं सावयवत्वं गन्धादौ व्यभिचारादिति भावः। ननु प्राणिकर्मप्रेरित ईश्वरो विषमफलान् प्राणिनः करोति न स्वेच्छयेति शङ्कते। प्राणीति। जडस्य कर्मणः प्रेरकत्वायोगान्नैवमित्याह। नेति। न चेश्वरप्रेरितं कर्मेश्वरस्य प्रेरकमिति वाच्यमित्याह। कर्मेति। अतीतकर्मणा प्रेरित ईश्वरो वर्त्तमानं कर्म तत्फलाय प्रेरयतीत्यनादित्वात् प्रेर्यप्रेरकभावस्य नानुपपत्तिरिति शङ्कते। अनादित्वादिति। अतीतकर्मणोऽपि जडत्वानीश्वरप्रेरकता न च तदपीश्वरेण प्रेरितं सदीश्वरं प्रेरयति उक्तान्योन्याश्रयात्ततोऽप्यतीतकर्मप्रेरितेश्वरप्रेरितं तदेवेश्वरं वर्त्तमाने कर्मणि फलदानाय प्रेरयतीति चेन्न मानहीनाया मूलक्षयावहाया अनवस्थायाः प्रसङ्गादतः कर्मनिरपेक्ष एवेश्वरो विषमसृष्टेत्यसामञ्जस्यं दुर्वारमित्यर्थः। यत्तु फलदानं ईश्वरस्य कर्मनिमित्तमात्रं न प्रेरकमिति नाक्षदोष इति, तन्न, विषमकर्म कारयितुरीश्वरस्य दोषवत्त्वानपायात्, पूर्वकर्मापेक्षया कर्मकारयितृत्वे चोक्ताप्रामाणिकानवस्थानात्, अस्माकन्त्वेष ह्येव साध्वसाधु कारयतीति निरवद्यमिति च श्रुतिमूलं पूर्वकर्मापेक्षत्वकल्पनमिति वैषम्यं। किञ्च परमतानुसारेणापीश्वरस्य रागादिमत्त्वं प्राप्नोतीत्याह। अपि चेति। प्रवर्त्तकत्वलिङ्गा दोषा इति तार्किकाणां स्थितिः, तथा चेश्वरः स्वार्थरागादिमान् प्रवर्त्तकत्वात् सम्मतवत्। न कारुणिके व्यभिचारः परदुःखप्रयुक्तस्वदुःखनिवृत्त्यर्थित्वात्तस्येत्यर्थः। उदासीनः प्रवर्त्तक इति च व्याहतमिति योगान् प्रत्याह। पुरुषेति।

सम्बन्धानुपपत्तेश्च॥३८॥

पुनरप्यसामञ्जस्यमेव, न हि प्रधानपुरुषव्यतिरिक्त ईश्वरोऽन्तरेण सम्बन्धं प्रधानपुरुषयोरीशिता। न तावत् संयोगलक्षणः सम्बन्धः सम्भवति, प्रधानपुरुषेश्वराणां सर्वगतत्वान्निरवयवत्वाच्च। नापि समवायलक्षणः आश्रयाश्रयिभावानिरूपणात्। नाप्यन्यः कश्चित् कार्य्यगम्यः सम्बन्धः शक्यते कल्पयितुं, कार्य्यकारणभावस्यैवाद्याप्यसिद्धत्वात्। ब्रह्मवादिनः कथमिति चेत्, न, तस्य तादात्म्यलक्षणसम्बन्धोपपत्तेः। अपि चागमबलेन ब्रह्मवादी कारणादिस्वरूपं निरूपयति नावश्यं तस्य यथादृष्टमेव सर्वमभ्युपगन्तव्यं। परस्य तु दृष्टान्तबलेन कारणादिस्वरूपं निरूपयतो यथादृष्टमेव सर्वमभ्युपगन्तव्यमित्ययमस्त्यतिशयः। पर स्यापि सर्वज्ञप्रणीतागमसद्भावात् समानमागमबलमिति चेत्, न, तरेतराश्रयप्रसङ्गात् आगमप्रत्ययात् सर्वज्ञत्वसिद्धिः सर्वज्ञत्व-

---

प्रधानवादे दोषान्तरमाह सूत्रकारः। सम्बन्धेति। ईश्वरेणास-न्धस्य प्रधानादेः प्रेर्य्यत्वायोगात् सम्बन्धो वाच्यः, स च संयोगः मवायो वाऽस्तीत्यर्थः। कार्य्यबलात् प्रेरणायोग्यत्वाख्यः सम्बन्धः ल्प्यतामित्यत आह। नाप्यन्य इति। ईश्वरप्रेरितप्रधानकार्य्यं जग-ति सिद्धञ्चेत् सम्बन्धकल्पना स्यात्, तच्चाद्याप्यसिद्धमित्यर्थः। माया-णोस्त्वनिर्वाच्यतादात्म्यसम्बन्धः, देवात्मशक्तिमिति श्रुतेः। किञ्च वेद-ापूर्वार्थत्वान्न लोकदृष्टस्मृतकुलालसम्बन्धो वैदिकेनानुसर्त्तव्यः। आनु-निकेन त्वनुसर्त्तव्यः इति विशेषमाह। अपि चेति। सर्वज्ञस्यागम-माण्यस्य च प्रामाण्यान्योन्याश्रयः अनुमानात् सर्वज्ञसिद्धेर्निरस्त-त्, न ह्यमनस्कस्य ज्ञानं मनोजन्यमिति व्याप्तिविरोधान्निश्चयानक-

प्रत्ययाच्चागमसिद्धिरिति, तस्मादनुपपन्ना साङ्ख्ययोगवादिनामीश्वरकल्पना । एवमन्यास्वपि वेदबाह्यास्वीश्वरकल्पनासु यथासम्भवमसामञ्जस्यं योजयितव्यं ॥

अधिष्ठानानुपपत्तेश्च ॥ ३९ ॥

इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य । स हि परिकल्प्यमानः कुम्भकार इव मृदादीनि प्रधानान्यधिष्ठाय प्रवर्त्तयेत् । न चैवमुपपद्यते । न ह्यप्रत्यक्षं रूपादिहीनञ्च प्रधानमीश्वरस्याधिष्ठेयं सम्भवति, मृदादिवैलक्षण्यात् ॥

करणवच्चेन्न भोगादिभ्यः ॥ ४० ॥

स्यादेतत्, यथा करणग्रामं चक्षुरादिकमप्रत्यक्षं रूपादिहीनञ्च पुरुषोऽधितिष्ठति, एवं प्रधानमीश्वरोऽधिष्ठास्यतीति, तथापि नोपपद्यते । भोगादिदर्शनाद्धि करणग्रामस्याधिष्ठितत्वं गम्यते, न चात्र भोगादयो दृश्यन्ते । करणग्रामसाम्ये चाभ्युपगम्यमा-

---

ल्पनाऽनवकाशादिति भावः । प्रधानवत् परमाणूनामपि निरवयवेश्वरेण संयोगाद्यसत्त्वात् प्रेर्यत्वायोगः, प्रेरकत्वे चेश्वरस्य दोषवत्त्वमित्याह । एवमन्यास्वपीति ॥

ईश्वरस्य प्रधानादिप्रेरणानुपपत्तेश्च सामञ्जस्यमित्याह सूत्रकारः अधिष्ठानेति । प्रधानादिकं चेतनस्यानधिष्ठेयं प्रत्यक्षत्वादीश्वरवद्यद्विरेकेण मृदादिवच्चेत्यर्थः ॥

चक्षुरादौ व्यभिचारमाशङ्क्य निषेधति । करणवदिति । रूपमस्मात्तीत्यप्रत्यक्षत्वं स्फुटयति । रूपेति । स्वभोगाहेतुत्वे सतीति विशेषणान्न व्यभिचार इत्याह । तथापीति । भोगः सुखदुःखानुभवः, आदि

संसारिणामिवेश्वरस्यापि भोगादयः प्रसज्येरन्। अन्यथा वा सूत्रद्वयं व्याख्यायते। अधिष्ठानानुपपत्तेश्च। इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य। साधिष्ठानो हि लोके सशरीरो राजा राष्ट्रस्येश्वरो दृश्यते न निरधिष्ठानः, अतश्च तद्दृष्टान्तवशेनादृष्टमीश्वरं कल्पयितुमिच्छत ईश्वरस्यापि किञ्चिच्छरीरं करणायतनं वर्णयितव्यं स्यात्, न च तद्वर्णयितुं शक्यते। सृष्ट्युत्तरकालभावित्वाच्छरीरस्य प्राक् सृष्टेस्तदनुपपत्तेः निरधिष्ठानत्वे चेश्वरस्य प्रवर्त्तकत्वानुपपत्तिः, एवं लोके दृष्टत्वात्। करणवच्चेन्न भोगादिभ्यः। अथ लोकदर्शनानुसारेणेश्वरस्यापि

दात् विषयानुभवग्रहः। न च यत् येनाधिष्ठेयं तत्तदीयभोगहेतुत्वे सति प्रत्यक्षमिति व्यतिरेकव्याप्तौ करणेषु व्यभिचारतादवस्थ्यमिति वाच्यं, भोगहेतुत्वविशिष्टाप्रत्यक्षत्वस्य हेतुत्वात्, करणेषु च विशेषणाभावेन विशिष्टस्य हेतोरभावात्। न च विशेष्यवैयर्थ्यं परार्थपाचकाधिष्ठेयकाष्ठादौ व्यभिचारात्। न च प्रधानादेरीश्वरप्रत्यक्षत्वाद्विशेष्यासिद्धिः, अतीन्द्रियत्वरूपाप्रत्यक्षत्वस्य सत्त्वादित्यभिप्रायः। जीवे करणकृता भोगादयो दृश्यन्ते, ईश्वरे तु प्रधानकृतास्ते न दृश्यन्त इत्यक्षरार्थः। विपक्षे दोषं वदन् अप्रयोजकत्वं हेतोर्निरस्यति। करणेति। प्रधानादेः प्रेर्यत्वाङ्गीकारे प्रेरकभोगहेतुत्वं स्यादतीन्द्रियस्य प्रेर्यस्य भोगहेतुत्वनियमादित्यर्थः। सूत्रद्वयस्यार्थान्तरमाह। अन्यथा वेति। यः प्रवर्त्तकश्चेतनः स शरीरीति लोके व्याप्तिर्दृष्टा। ईश्वरस्य च शरीरानुपपत्तेर्न प्रवर्त्तकत्वमिति सूत्रार्थमाह। इतश्चेति। विमतं सेश्वरं कार्य्यत्वाद्राष्ट्रवदिति कल्पयतो राजवत् सशरीर एवेश्वरः स्यादित्युक्तं, तन्नेष्टापत्तिं निरस्यति। न च तद्वर्णयितुमिति। न च नित्यं शरीरं सर्गात् प्रागपि सम्भवतीति वाच्यं, शरीरस्य भौतिकत्वनियमादित्यर्थः। अतस्त्वशरीर एवेश्वर इत्यत आह। निरधिष्ठानत्वे चेति। जीवस्येव शरीरं भौतिकं ईश्वरस्य

किञ्चित् करणानामायतनं शरीरं कामेन कल्प्येत, एवमपि नोपपद्यते। सशरीरत्वे हि सति संसारिवद्भोगादिप्रसङ्गादीश्वरस्याप्यनीश्वरत्वं प्रसज्येत ॥

अन्तवत्त्वमसर्वज्ञता वा ॥ ४१ ॥

इतश्चानुपपत्तिस्तार्किकपरिकल्पितस्येश्वरस्य। स हि सर्वज्ञस्तैरभ्युपगम्यते अनन्तश्च, अनन्तं च प्रधानं अनन्ताश्च पुरुषा मिथो भिन्ना अभ्युपगम्यन्ते। तत्र सर्वज्ञेनेश्वरेण प्रधानस्य पुरुषाणामात्मनश्चेयत्ता परिच्छिद्येत वा नवा परिच्छिद्येत, उभयथापि दोषोऽनुषक्त एव। कथं पूर्वस्मिंस्तावद्विकल्पे इयत्ता परिच्छिन्नत्वात् प्रधानपुरुषेश्वराणामन्तवत्त्वमवश्यम्भावि, एवं लोके दृष्टत्वात्। यद्धि लोके इयत्तापरिच्छिन्नं वस्तु घटादि तदन्तवद्दृष्टं, तथा प्रधानपुरुषेश्वरत्रयमपीयत्तापरिच्छिन्नत्वादन्तवत्स्यात्। सङ्ख्यापरिमाणं तावत् प्रधानपुरुषेश्वरत्रयरूपेण परिच्छिन्नं, स्वरूप-

---

तु स्वेच्छानिर्मितं प्रागपि स्यादित्याशङ्कां निरस्यति। करणवदिति। करणान्यत्र सन्तीति करणवच्छरीरं, इच्छामयशरीरकल्पनैवानुपपन्ना मानाभावात् दृष्टभौतिकत्वनियमविरोधाच्च इति मन्तव्यं ॥

एवमीश्वरस्य शुष्कतर्केण कर्तृत्वनिर्णयो नेत्युपपाद्य नित्यत्वसर्वज्ञत्वनिर्णयोऽपि न सम्भवतीत्याह सूत्रकारः। अन्तवत्त्वमिति। प्रधानपुरुषेश्वरत्रयमनित्यं इयत्तापरिच्छिन्नत्वात् घटवदित्याह। पूर्वस्मिन्निति। सङ्ख्या वा परिमाणं वेयत्ता। तथा च निश्चितसङ्ख्यत्वान्निश्चितपरिमाणत्वाच्चेति हेतुद्वयं। यद्यपि सङ्ख्यावत्त्वमात्रं हेतुः सम्भवति तथापि सर्वज्ञत्वनिश्चयेन हेत्वसिद्धिनिरासं द्योतयितुं निश्चितपदं, तत्राद्य हेतोरसिद्धिर्नास्तीत्याह। सङ्ख्यापरिमाणमिति। सङ्ख्यास्वरूपमित्यर्थः

परिमाणमपि तद्गतमीश्वरेण परिच्छिद्येतेति। पुरुषगता च महासङ्ख्या, ततश्च इयत्तापरिच्छिन्नानां मध्ये ये संसारान्मुच्यन्ते तेषां संसारोऽन्तवान् संसारित्वञ्च तेषामन्तवत्, एवमितरेष्वपि क्रमेण मुच्यमानेषु संसारस्य संसारिणां चान्तवत्त्वं स्यात्। प्रधानञ्च सविकारं पुरुषार्थमीश्वरस्याधिष्ठेयं संसारवत्त्वेनाभिमतं तच्छून्यतायामीश्वरः किमधितिष्ठेत्, किंविषये वा सर्वज्ञतेश्वरते स्यातां। प्रधानपुरुषेश्वराणां चैवमन्तवत्त्वे सत्यादिमत्त्वप्रसङ्गः, आद्यन्तवत्त्वे च शून्यवादप्रसङ्गः। अथ मा भूदेष दोष इत्युत्तरो विकल्पोऽभ्युपगम्येत न प्रधानस्य पुरुषाणामात्मनश्चेयत्तेश्वरेण परिच्छिद्यत इति। तत ईश्वरस्य सर्वज्ञत्वाभ्युपगमहानिरपरो दोषः प्रसज्येत, तस्मादप्यसङ्गतस्तार्किकपरिगृहीत ईश्वरकारणवादः॥

द्वितीयहेतुं साधयति। स्वरूपेति। प्रधानादयो निश्चितपरिमाणाः वस्तुतोऽभिन्नत्वात् घटवदित्यर्थः। ननु प्रधानपुरुषेश्वरास्त्रय इति ज्ञातेऽपि जीवानामानन्त्यात् कथं सङ्ख्यानिश्चयस्तत्राह। पुरुषेति। जीवसङ्ख्या-ईश्वरेण निश्चीयेत अनिश्चये सर्वज्ञत्वायोगादित्यर्थः। हेतुसिद्धेः फलमाह। ततश्चेति। माषराशिवत् केषाञ्चिज्जीवानां सङ्ख्यातद्बन्धस्य-च्छेदित्येवं सर्वमुक्तौ इदानीं शून्यं जगत् स्यादित्यर्थः। नित्यस्यानवच्छे-दादिति भावः। ननु ईश्वरः शिष्यतामिति चेन्न तस्यापि भिन्नत्वेनान्त-त्वात्। किञ्चेशितव्याभावादीश्वराभावः स्यादित्याह। प्रधानमिति। दोषान्तरमाह। प्रधानेति। इयत्तानिश्चयाभावान्न शून्यतेति द्वितीयं शङ्कते। अथेति। इयत्ता नास्ति न निश्चीयते चेत्यर्थः। प्रधानादयः सङ्ख्यापरिमाणवन्तः द्रव्यत्वान्माषादिवदित्यनुमानादस्तीयत्ता, तदज्ञाने चेदसर्वज्ञता, इयत्तायां चान्तवत्त्वमप्युक्तमिति परिहरति। तत इति। तस्मात् केवलकर्त्रीश्वरवादस्य निर्मूलत्वान्न कर्तुपादानाद्वये-ऽस्मदन्वयविरोध इति सिद्धं॥

भागवत मतविचारः।

उत्पत्त्यसम्भवात् ॥ ४२ ॥

येषामप्रकृतिरधिष्ठाता केवलनिमित्तकारणं ईश्वरोऽभिमतस्तेषां पक्षः प्रत्याख्यातः, येषां पुनः प्रकृतिश्चाधिष्ठाता चोभयात्मकं कारणमीश्वरोऽभिमतस्तेषां पक्षः प्रत्याख्यायते। ननु श्रुतिसमाश्रयणेनाप्येवंरूप एवेश्वरः प्राक् निर्धारितः प्रकृतिश्चाधिष्ठाता चेति, श्रुत्यनुसारिणी च स्मृतिः प्रमाणमिति स्थितिः, तत् कस्य हेतोरेष पक्षः प्रत्याचिख्यासित इति। उच्यते। यद्यप्येवंजातीयकोऽंशः समानत्वान्न विसंवादगोचरो भवत्यस्ति त्वंशान्तरं विसंवादस्थानमिति, अतस्तत्प्रत्याख्यानायारम्भः तत्र भागवता मन्यन्ते भगवानेवैको वासुदेवः निरञ्जनज्ञानस्वरूपः परमार्थतत्त्वं, स चतुर्धाऽऽत्मानं प्रविभज्य प्रतिष्ठितः वासुदेवव्यूहरूपेण सङ्कर्षणव्यूहरूपेण प्रद्युम्नव्यूहरूपेण अनिरुद्धव्यूहरूपेण च। वासुदेवो नाम परमात्मोच्यते, सङ्कर्षणो नाम जीवः, प्रद्युम्नो नाम मनः, अनिरुद्धो नामाहङ्कारः, तेषां

पञ्चपदार्थवादिमाहेश्वरमतनिरासानन्तरं चतुर्व्यूहवादं बुद्धिस्थं निरस्यति। उत्पत्त्यसम्भवात्। अधिकरणतात्पर्य्यमाह। येषामिति। अधिकरणारम्भमाक्षिपति। नन्विति। वेदाविरुद्धांशमङ्गीकृत्य वेदविरुद्धं जीवोत्पत्त्यंशं निराकर्त्तुमधिकरणारम्भ इत्याह। उच्यत इति। अत्र भागवतपञ्चरात्रागामो विषयः स किं जीवोत्पत्त्याद्यंशे मानं नवेति सन्देहे बाधानुपलम्भान्मानमिति पूर्वपक्षयति। तत्रेति। पूर्वपक्षे तदागमविरोधाज्जीवाभिन्नब्रह्मसमन्वयासिद्धिः, सिद्धान्ते तदंशे तस्यामानत्वादविरोधात्तत्सिद्धिरिति फलभेदः। सावयवत्वं निरस्यति। निरञ्जनेति। कथं तर्ह्यद्वितीये वासुदेवे मूर्त्तिभेदस्तत्राह। स इति। चतु

वासुदेवः परा प्रकृतिः, इतरे सङ्कर्षणादयः कार्य्यं, तमित्थम्भूतं भगवन्तमभिगमनोपादानेज्यास्वाध्याययोगैर्वर्षशतमिष्ट्वा क्षीणक्लेशो भगवन्तमेव प्रतिपद्यत इति। तत्र यत्तावदुच्यते योऽसौ नारायणः परोऽव्यक्तात् प्रसिद्धः परमात्मा सर्वात्मा स आत्मनाऽऽत्मानमनेकधा व्यूह्यावस्थित इति, तन्न निराक्रियते, 'स एकधा भवति त्रिधा भवति' इत्यादिश्रुतिभ्यः परमात्मनोऽनेकधा भवस्याधिगतत्वात्। यदपि तस्य भगवतोऽभिगमनादिलक्षणमाराधनं अजस्रमनन्यचित्ततयाऽभिप्रेयते तदपि न प्रतिषिध्यते श्रुतिस्मृत्योरीश्वरप्रणिधानस्य प्रसिद्धत्वात्। यत् पुनरिदमुच्यते वासुदेवात् सङ्कर्षण उत्पद्यते सङ्कर्षणाच्च प्रद्युम्नः प्रद्युम्नाच्चानिरुद्ध इति। अत्र ब्रूमः, न वासुदेवसंज्ञकात् परमात्मनः सङ्कर्षणसंज्ञस्य जीवस्योत्पत्तिः सम्भवति, अनित्यत्वादिदोषप्रसङ्गात्। उत्पत्तिमत्त्वे हि जीवस्यानित्यत्वादयो दोषाः प्रसज्येरन्, ततश्च नैवास्य भगवत्प्राप्तिर्मोक्षः स्यात्, कारणप्राप्तौ कार्य्यस्य प्रवि-

---

त्तिः। सविशेषं शास्त्रार्थमुक्त्वा सहेतुं पुरुषार्थमाह। तमित्थम्भूत-
ति। यथोक्तव्यूहवन्तं सर्वप्रकृतिं निरञ्जनं विज्ञानरूपं परमा-
ानमिति यावत्। वाक्कायचेतसामवधानपूर्वकं देवतागृहगमनम
गमनं, पूजाद्रव्याणामर्ज्जनमुपादानं, इज्या पूजा, स्वाध्यायोऽष्टाक्ष-
ादिजपः, योगो ध्यानं। तत्राविरुद्धांशमुपादत्ते। तत्रेति। समाहितः
द्धावित्तो भूत्वेति 'तं यथा यथोपासते' इत्याद्या च श्रुतिः। सत्कर्म-
मत्परमः' इत्याद्या स्मृतिः। विरुद्धांशमनूद्य दूषयति। यत् पुनरिति।
त्यान्यादिदोष आदिशब्दार्थः। न्यायोपेतया 'अज आत्मा' इत्यादि-
ा पञ्चरात्रागमस्योत्पत्त्यंशे मानत्वाभावनिश्चयाज्जीवाभिन्नब्रह्मसम-
श्वैर्य्यमिति भावः। जीवस्योत्पत्तिं निरस्य जीवान्मनस उत्पत्तिं निर-

लयप्रसङ्गात्। प्रतिषेधिष्यति चाचार्यो जीवस्योत्पत्तिं 'नात्मा-श्रुतेर्नित्यत्वाच्च ताभ्यः' [अ०२।पा०३।सू०१७] इति। तस्मा-दसङ्गतैषा कल्पना॥

न च कर्त्तुः करणं॥४३॥

इतश्चासङ्गतैषा कल्पना, यस्मान्न हि लोके कर्त्तुर्देवदत्तादेः करणं परश्वाद्युत्पद्यमानं दृश्यते। वर्णयन्ति च भागवताः 'कर्त्तु-र्जीवात् सङ्कर्षणसंज्ञकात् करणं मनः प्रद्युम्नसंज्ञकमुत्पद्यते कर्तृजाच्च तस्मादनिरुद्धसंज्ञकोऽहङ्कार उत्पद्यते' इति। न हि तद्दृष्टान्तमन्तरेणाध्यवसातुं शक्नुमः। न चैवम्भूतां श्रुतिमुपलभामहे॥

विज्ञानादिभावे वा तदप्रतिषेधः॥४४॥

अथापि स्यान्न* चैते सङ्कर्षणादयो जीवादिभावेनाभिप्रेयन्ते किं तर्हि ईश्वरा एवैते सर्वे ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिरैश्वर्यधर्मैरन्विता अभ्युपगम्यन्ते वासुदेवा एवैते सर्वे निर्दोषा निर-

---

स्यति। न च कर्त्तुरिति। यस्मात् कर्त्तुः करणोत्पत्तिर्न दृश्यते तस्मादसङ्गता कल्पनेत्यन्वयः॥

सिद्धानां करणानां प्रयोक्ता कर्त्तेति प्रसिद्धार्थो हिशब्दः। वर्णनं नि-र्मूलमित्याह। न चेति। ननु लोके कश्चिच्छिल्पिवरः कुठारं निर्मा-तेन वृक्षं छिनत्तीति दृष्टमिति चेत्सत्यं, शिल्पिनो हस्तादिकरणान्तर-सत्त्वात् कुठारकर्तृत्वं युक्तं, जीवस्य तु करणान्तरासत्त्वान्न मनसः कर्तृ-विनैव करणं कर्तृत्वे वा मनोवैयर्थ्यमिति भावः॥

सङ्कर्षणादीनामुत्पत्त्यसम्भवेऽपि व्यूहचतुष्टयं स्यादिति सूत्रव्याव-

---

* नैवैते इति का० वर्ध०।

धिष्ठाना निरवद्याश्चेति, तस्मान्नायं यथावर्णित उत्पत्त्यसम्भवो दोषः प्राप्नोतीति। अत्रोच्यते, एवमपि तदप्रतिषेध उत्पत्त्यसम्भवस्याप्रतिषेधः प्राप्नोत्येव, अयमुत्पत्त्यसम्भवो दोषः प्रकारान्तरेणेत्यभिप्रायः, कथं यदि तावदयमभिप्रायः परस्परभिन्ना एवैते वासुदेवादयश्चत्वार ईश्वरास्तुल्यधर्माणो नैषामेकात्मकत्वमस्तीति, ततोऽनेकेश्वरकल्पनानर्थक्यं, एकेनैवेश्वरेणेश्वरकार्य्यसिद्धेः। सिद्धान्तहानिश्च भगवानेको वासुदेवः परमार्थतत्त्वमित्यभ्युपगमात्। अथायमभिप्रायः एकस्यैव भगवत एते चत्वारो व्यूहास्तुल्यधर्माण इति, तथापि तदवस्थ एवोत्पत्त्यसम्भवः। न हि वासुदेवात् सङ्कर्षणस्योत्पत्तिः सम्भवति सङ्कर्षणाच्च प्रद्युम्नस्य, प्रद्युम्नाच्चानिरुद्धस्य, अतिशयाभावात्। भवितव्यं हि कार्यकारणयोरतिशयेन यथा मृद्घटयोः। न ह्यसत्यतिशये कार्यं कारणमित्यवकल्पते। न च पञ्चरात्रसिद्धान्तिभिर्वासुदेवादिषु* एकैकस्मिन् सर्वेषु वा ज्ञानैश्वर्यादितारतम्यकृतः कश्चिद्भेदोऽभ्युपगम्यते,

---

ाशङ्कते। अथापि स्यादिति। ज्ञानैश्वर्य्ययोः शक्तिरान्तरं सामर्थ्यं बलं शरीरसामर्थ्यं वीर्य्यं शौर्य्यं तेजः प्रागल्भ्यं एतैरन्विता यस्मात् सङ्कर्षणादयः तस्मादीश्वरा एवेत्यर्थः। सर्वेषामीश्वरत्वे पञ्चरात्रोक्तिमाह। सुदेवा एवेति। निर्द्दोषा रागादिशून्या निरधिष्ठानाः प्रकृत्यजन्या रवद्या नाशादिरहिता इत्यर्थः। ईश्वरत्वाज्जन्मासम्भवो गुणा त्वाच्च। तस्मादिति। सूत्रेण सिद्धान्तयति। अत्रेति। एवमपि तुर्व्वेषामीश्वरत्वेन विज्ञानशक्त्यादिभावेऽपीत्यर्थः। प्रकारान्तरं पृच्छ-। कथमिति। किं चत्वारः स्वतन्त्रा भिन्ना एव उतैकस्य विकाराभिन्नाः आद्यमनूद्य दूषयति। यदीत्यादिना। द्वितीये विकाराः

---

* एकस्मिन्निति का० वर्ध०।

4 H 2

वासुदेवा एव हि सर्वे व्यूहा निर्विशेषा इष्यन्ते। न चैते भगवद्व्यूहाश्चतुःसङ्ख्यायामेवावतिष्ठेरन्, ब्रह्मादिस्तम्बपर्यन्तस्य समस्तस्यैव जगतो भगवद्व्यूहत्वावगमात्॥

विप्रतिषेधाच्च ॥ ४५ ॥

विप्रतिषेधश्चास्मिन् शास्त्रे बहुविध उपलभ्यते गुणगुणित्वकल्पनादिलक्षणः। ज्ञानैश्वर्यशक्तिबलवीर्यतेजांसि गुणाः, आत्मान एवैते भगवन्तो वासुदेवा इत्यादिदर्शनात्। वेदविप्रतिषेधश्च भवति, चतुर्षु वेदेषु परं श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रं अधिगतवान् इत्यादिवेदनिन्दादर्शनात्, तस्मादसङ्गतैषा कल्पनेति सिद्धं॥

इति श्रीशारीरकमीमांसाभाष्ये शङ्करभगवत्पादकृतौ द्वितीयाध्यायस्य द्वितीयः पादः॥ ० ॥

प्रकृतितुल्या वा न्यूना वा आद्यमुत्थाप्य निषेधति। अथेत्यादिना न्यूनत्वपक्षेऽपसिद्धान्तमाह। न च पक्षेति। यदि न्यूना अपि भगवतो व्यूहास्तदा चतुर्षु व्याघात इत्याह। न चैत इति॥

इतश्च जीवोत्पत्तिवाद उपेक्ष्य इत्याह सूत्रकारः। विप्रतिषेधाच्चेति स्वस्यैव गुणत्वं गुणित्वञ्च विरुद्धं आदिपदात् प्रद्युम्नानिरुद्धौ भिन्नावात्मन इत्युक्तात्मन एवैते इति विरुद्धोक्तिग्रहः। पूर्वापरविरोधादासत्यमिति सूत्रार्थमुक्तार्थान्तरमाह। वेदेति। एकस्यापि तन्त्रोक्तरस्य ध्येता चतुर्वेदिभ्योऽधिक इति निन्दाऽऽदिपदार्थः, तस्मान्मिथो विरुद्धभिः पौरुषेयकल्पनाभिर्नापौरुषेयवेदान्तसमन्वयविरोध इति सिद्धं।

इति श्रीपरमहंसपरिव्राजकाचार्य्य श्रीगोविन्दानन्दभगवत्पादकृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां द्वितीयाध्यायस्य द्वितीयः पादः॥

ॐ परमात्मने नमः।

आकाशविषया विप्रतिपत्तिः

न वियदश्रुतेः ॥ १ ॥

वेदान्तेषु तत्र तत्र भिन्नप्रस्थाना उत्पत्तिश्रुतय उपलभ्यन्ते। केचिदाकाशस्योत्पत्तिमामनन्ति केचिन्न। तथा केचिद्वायोरुत्पत्तिमामनन्ति केचिन्न। एवं जीवस्य प्राणानाञ्च। एवमेव क्रमादिद्वारकोऽपि विप्रतिषेधः श्रुत्यन्तरेषूपलक्ष्यते। विप्रतिषेधाच्च परपक्षाणामनपेक्षितत्वं स्थापितं तद्वत् स्वपक्षस्यापि विप्रतिषेधादेवानपेक्षितत्वमाशङ्क्येतेत्यतः सर्ववेदान्तगतसृष्टिश्रुत्यर्थनिर्मलत्वाय परः प्रपञ्च आरभ्यते। तदर्थनिर्मलत्वे च फलं यथोक्ताशङ्कानिवृत्तिरेव, तत्र प्रथमं तावदाकाशमाश्रित्य

ॐ ब्रह्मणे नमः।

वियदादिविधातारं सीतास्याब्जमधुव्रतं।
नित्यचिद्विश्वकर्त्रात्माभिन्नं सर्वेश्वरं भजे ॥ १ ॥

जीवस्यानुत्पत्तिप्रसङ्गेनाकाशस्याप्युत्पत्त्यसम्भवमाशङ्क्य परिहरन्नाविकदेशिमतमाह। न वियदश्रुतेः। वियत्प्राणपादयोरर्थं सङ्गिन् पूर्वपादेन सङ्गतिमाह। वेदान्तेष्विति। भिन्नोपक्रमत्वमेवाह। चिदित्यादिना। भूतभोक्तृश्रुतीनां मिथोविरोधशङ्कानिरासो वियदार्थः। लिङ्गशरीरश्रुतीनां तन्निरासः प्राणपादार्थः। यथा मिथोराधात् पूर्वापरविरोधाच्च परपक्षा उपेक्ष्याः तथा श्रुतिपक्षोऽपि उपेक्ष्य इति शङ्कोत्थाने पादद्वयस्यारम्भात् पूर्वपादेन दृष्टान्तसङ्गतिरिति समुदायार्थः। आकाशवाय्वोरुत्पत्तिमामनन्ति तैत्तिरी

चिन्त्यते किमस्याकाशस्योत्पत्तिरस्त्युत नास्तीति। तत्र तावत् प्रतिपद्यते। न वियदश्रुतेरिति। न खल्वाकाशमुत्पद्यते। कस्मात् अश्रुतेः, न ह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति। छान्दोग्ये हि 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं' इति सच्छब्दवाच्यं ब्रह्म प्रकृत्य 'तदैक्षत तत्तेजोऽसृजत' इति च पञ्चानां महाभूतानां मध्यमं तेज आदिं कृत्वा त्रयाणां तेजोऽबन्नानामुत्पत्तिः श्राव्यते। श्रुतिश्च नः प्रमाणमतीन्द्रियार्थविज्ञानोत्पत्तौ न चात्र श्रुतिरस्त्याकाशस्योत्पत्तिप्रतिपादिनी तस्मान्नाकाशस्योत्पत्तिरिति॥

अस्ति तु॥२॥

तुशब्दः पक्षान्तरपरिग्रहे। मा नामाकाशस्य छान्दोग्येऽभूदुत्पत्तिः श्रुत्यन्तरे त्वस्ति। तैत्तिरीयकाः समामनन्ति

यकाः, नामनन्ति छन्दोगाः, जीवस्य प्राणानाञ्चोत्पत्तिं सर्व एत आत्मनो व्युच्चरन्तीति वाजिनः, एतस्माज्जायते प्राण इत्याथर्वणिकाश्चामनन्ति। नन्वेवमाकाशपूर्विका क्वचित् सृष्टिः क्वचित्तेजःपूर्विकेति क्रमविरोधः। आदिपदात् 'स इमाँल्लोकानसृजतेत्यक्रमः' क्वचित् सप्त प्राणाः क्वचिदष्टावित्यादिसङ्ख्याद्वारकश्च विरोधो ग्राह्यः, प्रपञ्चः पादद्वयं, तथा च पादद्वयस्य श्रुतीनां मिथोविरोधनिरासार्थत्वाच्छ्रुतिशास्त्राध्यायसङ्गतयः सिद्धाः। अत्राकाशस्योत्पत्त्यनुपपत्तिश्रुत्योर्मिथो विरोधोऽस्ति न वेति वाक्यभेदैकवाक्यत्वाभ्यां सन्देहे यद्युत्पत्तिस्तदा वाक्यभेदेन विरोधादप्रामाण्यं अनयोः श्रुत्योरिति पूर्वपक्षयिष्यन्नादावनुत्पत्तिपक्षमेकदेशी गृह्णातीत्याह तत्र तावदिति॥

उत्पत्तिश्रुतिर्मुख्या नास्तीति गूढाभिसन्धिः सम्प्रति पूर्वपक्षयति चकारः। अस्ति त्विति। एकवाक्यत्वेन प्रामाण्यसम्भवे किमिति श्रु

'सत्यं ज्ञानमनन्तं ब्रह्म' इति प्रकृत्य 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इति। ततश्च श्रुत्योर्विप्रतिषेधः क्वचित्तेजःप्रमुखा सृष्टिः क्वचिदाकाशप्रमुखेति। नन्वेकवाक्यताऽनयोः श्रुत्योर्युक्ता। सत्यं सा युक्ता न तु सावगन्तुं शक्यते, कुतः तत्तेजोऽसृजतेति सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयेन सम्बन्धानुपपत्तेः 'तत्तेजोऽसृजत तदाकाशमसृजत' इति। ननु सकृच्छ्रुतस्यापि कर्तुः कर्तव्यद्वयेन सम्बन्धो दृश्यते *यथा स सूपं पक्त्वौदनं पचतीति। एवं तदाकाशं सृष्ट्वा तत्तेजोऽसृजतेति योजयिष्यामः। नैवं युज्यते, प्रथमजत्वं हि छान्दोग्ये तेजसोऽवगम्यते, तैत्तिरीयके चाकाशस्य, न चोभयोः प्रथमजत्वं सम्भवति। एतेनेतरश्रुत्यन्तरविरोधोऽपि व्याख्यातः। 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इत्यत्रापि तस्मात् आकाशः सम्भूतस्तस्मात्तेजः सम्भूतमिति सकृच्छ्रुतस्यापादानस्य सम्भवनस्य च वियत्तेजोभ्यां यु-

---

रप्रामाण्यमिति शङ्कते। नन्वेकवाक्यतेति। एकवाक्यत्वासम्भवादप्रामाण्यं युक्तमित्याह। सत्यमित्यादिना। एकस्य युगपत् कार्यद्वयासम्बन्धेऽपि क्रमेण सम्बन्धसम्भवादेकवाक्यतेति मुख्यसिद्धान्ती शङ्कते। ननु सकृदिति। अप्रामाण्यवादी दूषयति। नैवमिति। क्रमो न युज्यते द्वयोः श्रुतप्राथम्यभङ्गापत्तेरित्यर्थः। एकस्माद्विदलबीजाद्दलद्वयवद्युभयं प्रथममित्यत आह। न चेति। वायोरग्निरिति क्रमश्रुतिभङ्गादिति शेषः। छान्दोग्यश्रुतेस्तित्तिरिश्रुतिविरुद्धार्थत्वमुक्त्वा तित्तिरिश्रुतेस्तद्विरुद्धार्थत्वमाह। एतेनेति। एतत्पदार्थमाह। तस्मादिति। छान्दोग्ये श्रुतं तेजसः प्राथम्यं अत्र दुर्योज्यमित्यर्थः। किञ्च सत्पदार्थः आत्मा छान्दोग्ये तेजस उपादानं श्रूयते अत्र तु वायुरिति नैकवाक्यते-

---

* यथेति वर्ध० का० पु० नास्ति।

गपत् सम्बन्धानुपपत्तेः, वायोरग्निरिति च पृथगाम्नानात्। अस्मिन् विप्रतिषेधे कश्चिदाह ॥

गौण्यसम्भवात् ॥ ३ ॥

नास्ति वियदुत्पत्तिः अश्रुतेरेव। या त्वितरा वियदुत्पत्तिवादिनी श्रुतिरुदाहृता सा गौणी भवितुमर्हति। कस्मात् असम्भवात्। न ह्याकाशस्योत्पत्तिः सम्भावयितुं शक्या श्रीमत्कणभुगभिप्रायानुसारिषु जीवत्सु। ते हि कारणसामग्र्यसम्भवादाकाशस्योत्पत्तिं वारयन्ति। समवाय्यसमवायिनिमित्तकारणेभ्यो हि किल सर्वमुत्पद्यमानं समुत्पद्यते। द्रव्यस्य चैकजातीयकमनेकञ्च द्रव्यं समवायिकारणं भवति। न चाकाशस्यैकजातीयकमनेकञ्च द्रव्यमारम्भकमस्ति यस्मिन् समवायिकारणे सति असमवायिकारणे च तत्संयोगे आकाश उत्पद्येत। तदभावा

त्याह। वायोरिति। एवं श्रुत्योर्विरोधादप्रामाण्यमिति पूर्वपक्षे प्राप्ते स एव वियदनुत्पत्तिवादी स्वमतेन प्रामाण्यं ब्रूत इत्याह। अस्मिन्निति

एवमध्यायसमाप्तेरधिकरणेषु प्रथमं विरोधात् श्रुत्यप्रामाण्यमिति पूर्वपक्षफलं तत एकदेशिसिद्धान्तः पश्चान्मुख्यसिद्धान्ते श्रुतीनामविरोधेनैकवाक्यतया ब्रह्मणि समन्वयसिद्धिरिति फलं क्वचिदेवमवगन्तव्यं तत्र श्रुत्योर्विरोधे सत्यध्ययनविध्युपात्तयोरप्रामाण्ययोगाद्वियदुत्पत्त्यसम्भवरूपतर्कानुगृहीतछान्दोग्यश्रुतिर्मुख्यार्था गगने गौणीत्यविरोध इत्येकदेशिमतं विवृणोति। नास्तीत्यादिना। आकाशो नोत्पद्यते सामग्रीशून्यत्वादात्मवत्, न चाविद्याब्रह्मणोः सत्त्वात् सिद्धिः विजातीयत्वेनानयोरारम्भकत्वायोगादसंयुक्तत्वाच्च संयोग

तदनुग्रहप्रवृत्तं निमित्तकारणं दूरापेतमेवाकाशस्य भवति। उत्पत्तिमताञ्च तेजःप्रभृतीनां पूर्वोत्तरकालयोर्विशेषः सम्भाव्यते प्रागुत्पत्तेः *प्रकाशादिकार्य्यं न बभूव पश्चाच्च भवतीति। आकाशस्य पुनर्न पूर्वोत्तरकालयोर्विशेषः सम्भावयितुं शक्यते। किं हि प्रागुत्पत्तेरनवकाशमसुषिरमच्छिद्रं बभूवेति शक्यते ऽध्यवसातुं। पृथिव्यादिवैधर्म्याच्च विभुत्वादिलक्षणादाकाशस्याजत्वसिद्धिः। तस्माद् यथा लोके आकाशं कुरु आकाशो जात इत्येवंजातीयको गौणः प्रयोगो भवति, यथा च घटाकाशः करकाकाशो गृहाकाश इत्येकस्याप्याकाशस्यैवंजातीयको भेदव्यपदेशो भवति। वेदेऽपि 'आरण्यानाकाशेष्वालभेरन्' इत्येवमुत्पत्तिश्रुतिरपि गौणी द्रष्टव्या॥

ह द्रव्यस्यासमवायिकारणमतः समवाय्यसमवायिनोरभावान्न हेतुसिद्धिरित्यर्थः। प्रागभावशून्यत्वाच्चात्मवदाकाशो नोत्पद्यते इत्याह। त्पत्तिमताञ्चेति। प्रकाशस्याद्युपानुभवः आदिपदात्तमोध्वंसपाकयोर्हणं। मूर्तद्रव्याश्रयत्वं ह्याकाशस्य कार्यं, तच्च प्रलयेऽप्यस्ति परमाणवायत्वात् अतो न प्रागभाव इत्यर्थः। प्रागभावासत्त्वं स्फुटयति। किं ीति। स्थूलाश्रयोऽवकाशः सूक्ष्माश्रयः छिद्रमणवाश्रयः सुषिरमिति ः। किञ्चात्मवदाकाशो न जायते विभुत्वादस्पर्शद्रव्यत्वाच्चेत्याह। थिव्यादीति। तस्मादुक्ततर्कबलाद्गौणी द्रष्टव्येत्यन्वयः। भेदोक्तौ गौणत्वे ष्टकोदाहरणमाह। वेदेऽप्यारण्यानिति। आकाशेष्विति भेदव्यपो गौण इति सम्बन्धः॥

---

* प्रकाशेति टी० सम्मतः पाठः।

शब्दाच्च ॥ ४ ॥

शब्दः खल्वप्याकाशस्याजत्वं ख्यापयति। यत आह 'वायुश्चान्तरिक्षञ्चैतदमृतम्' इति न ह्यमृतस्योत्पत्तिरुपपद्यते। 'आकाशवत् सर्वगतश्च नित्यः' इति च। आकाशेन ब्रह्मसर्वगतत्वनित्यत्वाभ्यां धर्माभ्यामुपमिमान आकाशस्यापि तौ धर्मौ सूचयति, न च तादृशस्योत्पत्तिरुपपद्यते। स यथानन्तोऽयमाकाश एवमनन्त आत्मा वेदितव्य इति चोदाहरणं, आकाशशरीरं ब्रह्म आकाश आत्मेति च। न ह्याकाशस्योत्पत्तिमत्त्वे ब्रह्मणस्तेन विशेषणं सम्भवति नीलेनेवोत्पलस्य। तस्मान्नित्यमेवाकाशेन साधारणं ब्रह्मेति गम्यते ॥

स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ५ ॥

इदं परोत्तरं सूत्रं। स्यादेतत् कथं पुनरेकस्य सम्भूतशब्दस्य 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इत्यस्मिन्नधिकारे परेषु तेजःप्रभृतिष्वनुवर्तमानस्य मुख्यत्वं सम्भवति अ

न केवलं तर्कादाकाशस्यानुत्पत्तिः किन्तु श्रुतितोऽपीत्याह सूत्रकार शब्दाच्चेति। नित्यभावस्यानादित्वादिति भावः। आत्मेति च शब्द इहो दाहरणमित्यन्वयः। आकाशः शरीरमस्येति बहुव्रीहिणात्यन्तसाम्यमा नात् ब्रह्मवदाकाशस्यानादित्वमित्यर्थः ॥

परोत्तरमिति। शङ्कोत्तरमिति यावत्। तान्येव शङ्कापदानि पठ स्यादेतदिति। अधिकारे प्रकरणे, यथैकस्मिन् ब्रह्मप्रकरणे अन्नं ब्र नन्दो ब्रह्मेति वाक्ययोर्ब्रह्मशब्दस्यान्ते गौणत्वमानन्दे मुख्यता तथैक

काशे च गौणत्वमिति। अत उत्तरमुच्यते। स्याच्चैकस्यापि सम्भूतशब्दस्य विषयविशेषवशाद्गौणो मुख्यश्च प्रयोगो ब्रह्म-शब्दवत्। यथैकस्यापि ब्रह्मशब्दस्य 'तपसा ब्रह्म विजिज्ञासस्व तपो ब्रह्म' इत्यस्मिन्नधिकारेऽन्नादिषु गौणः प्रयोगः आनन्दे च मुख्यः, यथा च तपसि ब्रह्मविज्ञानसाधने ब्रह्मशब्दो भक्त्या प्रयुज्यते अञ्जसा तु विज्ञेये ब्रह्मणि तद्वत्। कथं पुनरनुत्पत्तौ नभसः 'एकमेवाद्वितीयम्' इतीयं प्रतिज्ञा समर्थ्यते। ननु नभ-सा द्वितीयेन सद्वितीयं ब्रह्म प्राप्नोति कथञ्च ब्रह्मणि विदिते सर्वं विदितं स्यादिति। तदुच्यते। एकमेवेति तावत् स्वका-र्यापेक्षयोपपद्यते। यथा लोके कश्चित् कुम्भकारकुले पूर्वे-द्युर्मृद्दण्डचक्रादीनि चोपलभ्यापरेद्युश्च नानाविधान्यमत्राणि प्रसारितान्युपलभ्य ब्रूयात् मृदेवैकाकिनी पूर्वेद्युरासीदिति। स च तयावधारणया मृत्कार्य्यजातमेव पूर्वेद्युर्नासीदित्यभि-प्रेयात् न दण्डचक्रादि तद्वत्। अद्वितीयश्रुतिरधिष्ठात्रन्तरं वारयति यथा मृदोऽमत्रप्रकृतेः कुम्भकारोऽधिष्ठाता दृश्यते नैवं ब्रह्मणो जगत्प्रकृतेरन्योऽधिष्ठातास्तीति। न च नभसाऽपि द्वितीयेन सद्वितीयं ब्रह्म प्रसज्यते। लक्षणान्यत्वनिमित्तं हि

यस्यैकस्याऽपि सम्भूतशब्दस्य गुणमुख्यार्थभेदो योग्यताबलादित्याह। याचेति। उदाहरणान्तरमाह। यथा चेति। अभेदोपचारो भक्तिः। ख्यसिद्धान्त्याक्षिपति। कथं पुनरिति। स एवाक्षेपद्वयं स्फुटयति। निति। अद्वितीयत्वश्रुतिबाधः सर्वविज्ञानप्रतिज्ञाबाधश्चेत्यर्थः। यमाक्षेपं दृष्टान्तेन परिहरति। एकमेवेति। कार्यरूपद्वितीय-

नानात्वं, न च प्रागुत्पत्तेर्ब्रह्मनभसोर्लक्षणान्यत्वमस्ति। क्षीरो-
दकयोरिव संसृष्टयोर्व्यापित्वामूर्त्तत्वादिधर्मसामान्यात्। सर्ग-
काले तु ब्रह्म जगदुत्पादयितुं यतते स्तिमितमितरत्तिष्ठति
तेनान्यत्वमवसीयते। तथाचाकाशशरीरं ब्रह्मेत्यादिश्रुतिभ्यो-
ऽपि ब्रह्माकाशयोरभेदोपचारसिद्धिः। अत एव च ब्रह्म-
विज्ञानेन सर्वविज्ञानसिद्धिः। अपि च सर्वं कार्यमुत्पद्यमान-
माकाशेनाव्यतिरिक्तदेशकालमेवोत्पद्यते ब्रह्मणा चाव्यतिरिक्त
देशकालमेवाकाशं भवति इत्यतो ब्रह्मणा तत्कार्येण च
विज्ञातेन सह विज्ञातमेवाकाशं भवति। यथा क्षीरपूर्णे घ
कतिचिदब्बिन्दवः प्रक्षिप्ताः सन्तः क्षीरग्रहणेनैव गृहीत
भवन्ति। न हि क्षीरग्रहणादब्बिन्दुग्रहणं परिशिष्यते। ए
ब्रह्मणा तत्कार्यैश्चाव्यतिरिक्तदेशकालत्वात् गृहीतमेव ब्रह्म
ग्रहणेन नभो भवति तस्माद्भाक्तं नभसः सम्भवश्रवणमित्ये
प्राप्त इदमाह॥

शून्यत्वं प्रागवस्थायामवधारणश्रुत्यर्थः। कुले गृहे, अमत्राणि घटादीनि
पात्राणि। एकमेवेत्यवधारणव्यावर्त्यं कार्यमिति व्याख्याय द्वितीयपद-
व्यावर्त्यमाह। अद्वितीयश्रुतिरिति। आकाशस्य द्वितीयत्वमङ्गीकृत्याद्वि-
तीयादिपदसङ्कोचः कृतस्तदपि नास्तीत्याह। न च नभसापीति। धर्म-
साम्ये ब्रह्मनभसोः कथं भेदस्तत्राह। सर्गकाले त्विति। धर्मसाम्याद
द्वितीयत्वोपचार इत्यर्थे श्रुतिमाह। तथा चाकाशेति। द्वितीयमा
क्षेपं परिहरति। अत एवेति। अभेदोपचारादेवेत्यर्थः। नभसो
ब्रह्मतत्कार्याभ्यामभिन्नदेशकालत्वाच्च तज्ज्ञाने ज्ञानमित्याह। अपि
चेति॥

प्रतिज्ञाऽहानिरव्यतिरेकाच्छब्देभ्यः ॥ ६ ॥

'येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति' 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्' इति 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' इति न काचन *सद्बहिर्धा विद्यास्तीति चैवंरूपा प्रति वेदान्तं प्रतिज्ञा विज्ञायते। तस्याः प्रतिज्ञाया एवमहानिरनुपरोधः स्यात् यद्यव्यतिरेकः कृत्स्नस्य वस्तुजातस्य विज्ञेयाद्ब्रह्मणः स्यात्। व्यतिरेके हि सति एकविज्ञानेन सर्वं विज्ञायत इतीयं प्रतीज्ञा हीयेत। स चाव्यतिरेक एवमुपपद्यते यदि कृत्स्नं वस्तुजातमेकस्माद्ब्रह्मण ात्पद्येत। शब्देभ्यश्च प्रकृतिविकाराव्यतिरेकन्यायेनैव प्रतिज्ञाद्धिरवगम्यते। तथा हि येनाश्रुतं श्रुतं भवतीति प्रतिज्ञाय

एवमाकाशस्यानुत्पत्तौ सर्वश्रुतीनामविरोध इत्येकदेशिसिद्धान्तः ाप्तः, तं मुख्यसिद्धान्ती दूषयति। प्रतिज्ञेति। अहानिरबाधः सामजुराथर्वणशाखाभेदज्ञानशब्दार्था इति शब्दाः। न काचनेति। आत्मभिन्नं ज्ञेयं नास्तीत्यर्थः। ननु सर्वस्य ब्रह्माव्यतिरेकात् प्रतिज्ञाया अहानिरित्यस्तु तथापि जीवादिवदनुत्पन्नस्याऽपि नभसो ब्रह्मणि कल्पितत्वेनाव्यतिरेकात् प्रतिज्ञासिद्धिः किं न स्यात् किमुत्पत्त्येत्यत आह। ब्देभ्यश्चेति। अव्यतिरेक एव न्यायस्तेनेत्यर्थः। अयं भावः जीवस्य वदात्मत्वात् ब्रह्माव्यतिरेकः अज्ञानतत्सम्बन्धयोः कल्पितत्वेनाव्यरेकः स्वतन्त्राज्ञानायोगादज्ञानान्यजडद्रव्यस्य तु कार्यत्वेनैवाव्यतिरेसिद्धिस्तस्याकार्यत्वे प्रधानवत् स्वातन्त्र्यादव्यतिरेकायोगात्। तथाऽऽयविदः 'नित्यद्रव्याणि स्वतन्त्राणि भिन्नान्यनाश्रितानि' इति, तत् प्रतिज्ञासिद्ध्यं आकाशस्य कार्यत्वेनैवाव्यतिरेको वाच्य इति

---

* सद्बहिर्धेति वर्ध० का०।

मृदादिदृष्टान्तैः कार्यकारणाभेदप्रतिपादनपरैः प्रतिज्ञैषा समर्थ्यते तत्साधनायैव चोत्तरे शब्दाः 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत तत्तेजोऽसृजत' इति, एवं कार्यजातं ब्रह्मणः प्रदर्श्याव्यतिरेकं प्रदर्शयन्ति 'ऐतदात्म्यमिदं सर्वम्' इत्यारभ्याप्रपाठकसमाप्तेः, तद्यद्याकाशं न ब्रह्मकार्यं स्यात् न ब्रह्मणि विज्ञाते आकाशं विज्ञायेत ततश्च प्रतिज्ञाहानिः स्यात्, न च प्रतिज्ञाहान्या वेदस्याप्रामाण्यं युक्तं कर्तुं। तथा च प्रति वेदान्तं ते ते शब्दास्तेन तेन दृष्टान्तेन तामेव प्रतिज्ञां ज्ञापयन्ति 'इदं सर्वं यदयमात्मा' 'ब्रह्मैवेदममृतं पुरस्ताद्' इत्येवमादयः, तस्मात् ज्वलनादिवदेव गगणमप्युत्पद्यते। यदुक्तं अश्रुतेर्न वियदुत्पद्यते इति तदयुक्तं वियदुत्पत्तिविषयश्रुत्यन्तरस्य दर्शितत्वात् 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इति, सत्यं दर्शितं, विरुद्धन्तु 'तत्तेजोऽसृजत' इत्यनेन श्रुत्यन्तरेण नैकवाक्यत्वात् सर्वश्रुतीनां भवति एकवाक्यत्वमविरुद्धानामिह तु विरोध उक्तः। सकृच्छ्रुतस्य

दृष्टान्तदृष्टिसावर्ण्यशब्दानाह। तथा चेति। तेन तेन दृष्टान्तेनेति यजुषि दुन्दुभ्यादिदृष्टान्तेनाथर्वणे ऊर्णनाभ्यादिदृष्टान्तेनेत्यर्थः यजुषि प्रतिज्ञासाधका इदं सर्वमितिशब्दाः आथर्वणे ब्रह्मैवेदमिति शब्दा इति भागः। एवमाकाशोत्पत्तिकथनादेकदेशिमते दूषिते श्रुत्यप्रामाण्यवादिनोक्तं स्मारयति। सत्यं दर्शितमिति। मुख्यसिद्धान्त्याह। नैकेति। तत्तेजोऽसृजतेति सकृच्छ्रुतस्य स्रष्टुराकाशतेजोभ्यां युगपत् सम्बन्धे तित्तिरिक्रमबाधात् क्रमेणाकाशं सृष्ट्वा तेजोऽसृजतेति सम्बन्धे तेजःप्राथम्यभङ्गप्रसङ्गाद्वस्तुनि विकल्पासम्भवेन त

स्रष्टुः स्रष्टव्यद्वयसम्बन्धासम्भवात् द्वयोश्च प्रथमजत्वासम्भवाद्विक-ल्पासम्भवाच्चेति। नैष दोषः। तेजःसर्गस्य तैत्तिरीयके तृतीयत्व-श्रवणात् 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूत आकाशाद्वायुः वायोरग्निः' इति। अशक्या हीयं श्रुतिरन्यथा परिणेतुं, शक्या परिणेतुं छान्दोग्यश्रुतिः तदा आकाशं वायुञ्च सृष्ट्वा तत्तेजो-ऽसृजतेति। न हीयं श्रुतिः तेजोजनिप्रधाना सती श्रुत्यन्तर-प्रसिद्धामाकाशस्योत्पत्तिं वारयितुं शक्नोति। एकस्य वाक्यस्य व्यापारद्वयासम्भवात्। स्रष्टा त्वेकोऽपि क्रमेणानेकं स्रष्टव्यं सृजेत् इत्येकवाक्यत्वकल्पनायां सम्भवन्त्यां न विरुद्धार्थत्वेन श्रुतिर्हा-

शाखाभेदेन प्राथम्यव्यवस्थाया अयोगान्नैकवाक्यतेति प्राप्ते मुख्य एव दूषयति। नैष दोष इति। अप्रामाण्यकल्पनादरं अपौरुषेयश्रुती-नामेकवाक्यत्वेन प्रामाण्यकल्पनं तच्चैकवाक्यत्वं बलवच्छ्रुत्या दुर्बलश्रुतेः कल्प्यं, बलवती च तित्तिरिश्रुतिः प्रकृतिपञ्चम्या पौर्वापर्याख्यक्रमस्य श्रुतत्वात्, छान्दोग्यश्रुतिस्तु दुर्बला। तेजःप्राथम्यश्रुत्यभावात् तेजःसर्ग-मात्रन्तु श्रुतं तृतीयत्वेन परिणेयमित्येकवाक्यतेत्यर्थः। यदुक्तं एकदेशि-ना छान्दोग्यश्रुत्याकाशोत्पत्तिर्वा यत इति तन्निरस्तं। किञ्च सा श्रुतिः किं तेजोजन्मपरा तत्तेजोजन्म वियदनुत्पत्त्योरुभयपरा, आद्ये न निवारणमित्याह। न हीति। अविरोधादित्यर्थः। न द्वितीयः श्रुत्यन्तर-विरोधेनोभयपरत्वकल्पनायोगाद्वाक्यभेदापत्तेश्चेत्याह। एकस्येति। न-न्वेकस्य स्रष्टुरनेकार्थसम्बन्धवद्वाक्यस्याप्यनेकार्थता किं न स्यादित्यत आह। स्रष्टा त्विति। एकस्य कर्तुरनेकार्थसम्बन्धो दृष्टः। न त्वेकस्य वाक्यस्य नानार्थत्वं दृष्टं नानार्थकप्रयोगे तु पय आनयेत्यादावावृत्त्या वाक्यभेद एव। आनयनस्य जलक्षीराभ्यां पृथक्सम्बन्धादित्यर्थः। फलितमाह। इत्येकेति। एकस्य शब्दस्यावृत्तिं विनाऽनेकार्थत्वं नास्ति तदसृजतेति शब्दस्य छान्दोग्य उपसंहृत्वाकाशादिसम्बन्धार्थमाह

तथा। न चास्माभिः सकृच्छ्रुतस्य स्रष्टुः स्रष्टव्यद्वयसम्बन्धोऽभिप्रेयते, श्रुत्यन्तरवशेन स्रष्टव्यान्तरोपसंग्रहात्। यथा च 'सर्वं खल्विदं ब्रह्म तज्जलान्' इत्यत्र साक्षादेव सर्वस्य वस्तुजातस्य ब्रह्मजत्वं श्रूयमाणं न प्रदेशान्तरविहितं तेजःप्रमुखमुत्पत्तिक्रमं वारयति। एवं तेजसोऽपि ब्रह्मजत्वं श्रूयमाणं न श्रुत्यन्तरविहितं नभःप्रमुखमुत्पत्तिक्रमं वारयितुमर्हति। ननु शमविधानार्थमेतद्वाक्यं 'तज्जलानिति शान्त उपासीत' इति श्रुतेर्नैतत् सृष्टिवाक्यं, न तस्मादेतत्प्रदेशान्तरप्रसिद्धं क्रममनुरोद्धुमर्हति, तत्तेजोऽसृजतेत्येतत्सृष्टिवाक्यं तस्मादत्र यथा श्रुतिक्रमो ग्रहीतव्य इति, नेत्युच्यते। न हि तेजःप्राथम्यानुरोधेन श्रुत्यन्तरप्रसिद्धो वियत्पदार्थः परित्यक्तव्यो भवति पदार्थधर्मत्वात् क्र-

---

त्तिदोषः स्यादित्यत आह। न चेति। छान्दोग्यस्थतेजोजन्म आकाशादिजन्मपूर्वकं तेजोजन्यत्वात् तित्तिरिस्थतेजोजन्मवदित्याकाशादिजन्मोपसंहारि तदाकाशमसृजतेति वाक्यान्तरस्यैव कल्पनान्नावृत्तिदोष इत्यर्थः। श्रुत्यन्तरस्थः क्रमः श्रुत्यन्तरे ग्राह्य इत्यत्र दृष्टान्तमाह। यथा चेति। सृष्टौ तात्पर्यातात्पर्याभ्यां दृष्टान्तश्रुतिवैषम्यं शङ्कते। नन्वित्यादिना। तेजःप्राथम्यस्वीकारे आकाशसर्गो धर्मी तद्धर्मः प्राथम्यं चेति द्वयं श्रुतं बाधनीयमिति गौरवमाकाशप्राथम्यत्वार्थित्वे तेजःसर्गप्राथम्यमात्रबाध इति लाघवमिति मत्वाह। नेत्युच्यत इति किञ्च प्रधानधर्मित्यागाद्वरं गुणभूतस्य तेजःप्राथम्यस्य धर्मस्य त्याग इत्याह। न हीति। किञ्च किं सृष्टिपरश्रुतिसिद्धत्वात् तेजःप्राथम्यं गृह्यते उत प्रथमस्थाने तेजसः सर्गश्रुत्याऽर्थात् प्राथम्यभानान्नाद्य इत्याह। अपि चेति। द्वितीयमनूद्य दूषयति। अर्थात्त्विति। यद्वा वस्तुनि विकल्पासम्भवादुभयोः प्राथम्यं शाखाभेदेन व्यवस्थितं न भव

मस्य। अपि च तस्मोऽग्निरिति नात्र क्रमस्य वाचकः कश्चिच्छब्दोऽस्ति अर्थात्तु क्रमो गम्यते, स च वायोरग्निरित्यनेन श्रुत्यन्तरप्रसिद्धेन क्रमेण निवार्यते। विकल्पसमुच्चयौ तु वियत्तेजसोः प्रथमजत्वविषयावसम्भवानभ्युपगमाभ्यां निवारितौ, तस्मान्नास्ति श्रुत्योर्विप्रतिषेधः। अपि च छान्दोग्ये 'येनाश्रुतं श्रुतं भवति' इत्येतां प्रतिज्ञां वाक्योपक्रमे श्रुतां समर्थयितुमसमाम्नातमपि वियदुत्पत्तावुपसङ्ख्यातव्यं किमङ्ग पुनस्तैत्तिरीयके समाम्नातं नभो न संगृह्यते। यच्चोक्तमाकाशस्य सर्वेणानन्यदेशत्वाद्ब्रह्मणा तत्कार्यैश्च सह विदितमेव तद्भवति, अतो न प्रतिज्ञा हीयते न चैकमेवाद्वितीयमिति श्रुतिकोपो भवति क्षीरोदकवद्ब्रह्मनभसोरव्यतिरेकोपपत्तेरिति। अत्रोच्यते। न क्षीरोदकन्यायेनेदमेकविज्ञानेन सर्वविज्ञानं नेतव्यं। मृदादिदृष्टान्तप्रणयनाद्धि प्रकृतिविकारन्यायेनैवेदं सर्वविज्ञानं नेतव्यमिति गम्यते। क्षीरोदकन्यायेन च सर्वविज्ञानं कल्प्यमानं न सम्यग्विज्ञानं स्यात्। न हि क्षीरज्ञानगृहीतस्योदकस्य सम्यग्विज्ञानगृहीतत्वमस्ति।

प्युभययोर्द्विदलाङ्कुरवत् समुच्चयोत्पत्त्या प्राथम्यं वायोरग्निरिति मबाधापातादिति। तदिति तदिष्टमेवेत्याह। विकल्पेति। न केतं श्रुतिद्वयोरविरोधः सौहार्दञ्चास्तीत्याह। अपि चेति। वियसंग्राह्यमित्यन्वयः। वियदनुत्पत्तिवादिनोऽक्रममनूद्य प्रतिज्ञाया द्वितीयश्रुतेश्च मुख्यार्थतात्पर्यावगमान्न गौणार्थतेति दूषयति। यच्चोमित्यादिना। प्रकृतिविकारन्यायः तदनन्यत्वन्यायः, उदकं क्षीरर्पि क्षीरज्ञानान्न गृह्यते भेदादिति भावः। मास्तु सम्यक्नं श्रुतेर्भ्रान्तिमूलत्वसम्भवादित्याशङ्क्यापौरुषेयत्वान्नैवमित्याह। न च

न च वेदस्य पुरुषाणामिव मायालीकवञ्चनादिभिरर्थावधारण-मुपपद्यते। सावधारणा चेयमेकमेवाद्वितीयमिति श्रुतिः क्षीरोदकन्यायेन नीयमाना पीड्येत। न च स्वकार्यापेक्षयेदं वस्त्वेकदेशविषयं सर्वविज्ञानमेकाद्वितीयतावधारणञ्चेति न्याय्यं। मृदादिष्वपि हि तत्सम्भवात् न तदपूर्ववदुपन्यसितव्यं भवति 'श्वेतकेतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवति' इत्यादिना। तस्मादशेष-वस्तुविषयमेवेदं सर्वविज्ञानं सर्वस्य ब्रह्मकार्यतापेक्षयोपन्यस्यत इति द्रष्टव्यं। यत्पुनरेतदुक्तमसम्भवाद्गौणी गगणस्योत्पत्तिश्रुति-रिति तत्र ब्रूमः ॥ ६ ॥

यावद्विकारन्तु विभागो लोकवत् ॥ ७ ॥

तुशब्दोऽसम्भवाशङ्काया व्यावृत्त्यर्थः। न खल्वाकाशोत्पत्त्या-वसम्भवाशङ्का कर्तव्या, यतो यावत् किञ्चिद्विकारजातं दृश्यते

वदस्येति। माया भ्रान्तिः तयाऽलीकं मिथ्याभाषणं तेन वञ्चनमयथा-र्थबोधनं आदिपदाद्विप्रलिप्साप्रमादकरणापाटवानि गृह्यन्ते। प्रति-ज्ञामुख्यत्वमभिधायाद्वितीयश्रुतिमुख्यत्वमाह। सावधारणेति। सर्व-द्वैतनिषेधपरेत्यर्थः। उभयगौणत्वेऽद्भुतवदुपन्यासो मृदादिदृष्टान्तैस्त-त्साधनं च स्यादिति दोषान्तरमाह। न चेत्यादिना। कार्यमेव वस्त्वे-कदेश आकाशो नोत्पद्यते सामग्रीशून्यत्वादित्यत्राकाशो विकारः विभ-क्तत्वाद्घटादिवदिति सत्प्रतिपक्षमाह। यत्पुनरित्यादिना।

यो विभक्तः स विकार इत्यन्वयमुक्त्वा यस्त्वविकारः स न विभ-क्तः यथात्मेति व्यतिरेकव्याप्तिमाह। न त्वविकृतमिति। दिगादिषु व्यभि-

घटघटिकोदञ्चनादि वा कटककेयूरकुण्डलादि वा सूचीनाराचनिस्त्रिंशादि वा तावानेव विभागो लोके लक्ष्यते, न त्वविकृतं किञ्चित् कुतश्चिद्विभक्तमुपलभ्यते। विभागश्चाकाशस्य पृथिव्यादिभ्योऽवगम्यते, तस्मात् सोऽपि विकारो भवितुमर्हति। एतेन दिक्कालमनःपरमाण्वादीनां कार्यत्वं व्याख्यातं। नन्वात्माप्याकाशादिभ्यो विभक्त इति तस्यापि कार्यत्वं घटादिवत् प्राप्नोति, न आत्मन आकाशः सम्भूत इति श्रुतेः। यदि ह्यात्मापि विकारः स्यात् तस्मात् परमन्यन्न श्रुतमित्याकाशादि सर्वं कार्यं निरात्मकमात्मनः कार्यत्वे स्यात्, तथा च शून्यवादः प्रसज्येत। आत्मत्वादेवात्मनो निराकरणशङ्कानुपप-

---

त्तिरमाशङ्क्य पक्षसमत्वान्मैवमित्याह। एतेनेति। विभक्तत्वेनेत्यर्थः। आत्मनि व्यभिचारं शङ्कते। नन्विति। धर्मिसमानसत्ताकविभागस्य हेतुत्वात् परमार्थात्मनि विभागस्य कल्पितत्वेन भिन्नसत्ताकत्वान्न व्यभिचार इत्याह। नेति। अत्र चाज्ञानान्यद्रव्यत्वं विशेषणं अतो नाज्ञानतत्सम्बन्धादौ व्यभिचारः। नन्वात्मा कार्यः विभक्तत्वात् वस्तुत्वाद्वा घटवदित्याभासतुल्यमिदं अनुमानमित्याशङ्क्यात्मनः परमकारणत्वेन श्रुतस्य कार्यत्वे शून्यताप्रसङ्ग इति बाधकसत्त्वात् तस्याभासत्वं नात्र किञ्चिद्बाधकमस्ति प्रत्युत आकाशस्याकार्यत्वे नित्यानेकद्रव्यकल्पना श्रौतप्रतिज्ञाहान्यादयो बाधकाः सन्तीति नाभासतुल्यतेत्याह। आत्मन इति। दुष्टप्रसङ्ग इति वदन्तं प्रत्याह। आत्मत्वादिति। आत्माभावः केनचित् ज्ञायते न वा, आद्ये यो ज्ञाता स परिशिष्यत इति न शून्यता, द्वितीयेऽपि न शून्यता मानाभावादित्यर्थः। किञ्च यद्धि कार्यं सत्तास्फुर्त्योरन्यापेक्षं तन्निराकार्यमात्मा त्वकार्यो निरपेक्षत्वान्न बाधयोग्य इत्याह। न ह्यात्मेत्यादिना। कस्यचित्कारणस्यागन्तुकः कार्यो न हि सत्ता स्फुर्तेरनन्या यस्यादि-

प्तिः। न ह्यात्माऽऽगन्तुकः कस्यचित् स्वयं सिद्धत्वात्। न ह्यात्माऽऽत्मनः प्रमाणमपेक्ष्य सिध्यति। तस्य हि प्रत्यक्षादीनि प्रमाणान्यसिद्धप्रमेयसिद्धये उपादीयन्ते। न ह्याकाशादयः पदार्थाः प्रमाणनिरपेक्षाः स्वयं सिद्धाः केनचिदभ्युपगम्यन्ते। आत्मा तु प्रमाणादिव्यवहाराश्रयत्वात् प्रागेव प्रमाणादिव्यवहारात् सिध्यति। न चेदृशस्य निराकरणं सम्भवति। आगन्तुकं हि वस्तु निराक्रियते न स्वरूपं। य एव हि निराकर्ता तदेव तस्य स्वरूपं। न ह्यग्नेरौष्ण्यं अग्निना निराक्रियते, तथाहमेवेदानीं जानामि वर्तमानं वस्त्वहमेवातीतमतीततरञ्चाज्ञासिषमहमेवानागतमनागततरञ्च ज्ञास्यामीत्यतीतानागतवर्तमानभावेनान्यथा

त्यक्षरार्थः। तत्र स्फूर्तेरनन्यायत्तत्वं विवृणोति। न हीति। तदुक्तं सुरेश्वराचार्यैः॥

"प्रमाता च प्रमाणञ्च प्रमेयं प्रमितिस्तथा।
यस्य प्रसादात् सिध्यन्ति तत्सिद्धौ किमपेक्ष्यते"॥ इति॥

तथा श्रुतिराह 'पुरुषः स्वयं ज्योतिस्तस्य भासा सर्वमिदं विभाति' इति च। नन्वात्मनः स्वतः सिद्धौ प्रमाणवैयर्थ्यं तत्राह। तस्येति। ननु प्रमेयस्यापि स्वप्रकाशत्वं किं न स्यादित्यत आह। न हीति। अतो न प्रमाणवैयर्थ्यमिति भावः। आत्माऽपि मानाधीनसिद्धिकः किं न स्यादित्यत आह। आत्मा त्विति। अयमर्थः निश्चितसत्ताकं हि ज्ञानं प्रमेयसत्तानिश्चायकं गेहे घटो दृष्टो न वेति ज्ञानसंशयेन दृष्ट इति व्यतिरेकनिश्चये चार्थस्वरूपानिश्चयात् ज्ञानसत्तानिश्चयश्च स्वतः कार्यस्य स्वप्रकाशत्वायोगाज्ज्ञानान्तरादनवस्थानादतः साक्षिणैव ज्ञानसत्तानिश्चयो वाच्यः। तत्र साक्षिणश्चेत् ज्ञानाधीनसत्तानिश्चयः अन्योन्याश्रयः स्यादतः सर्वसाधकत्वादात्मा स्वतः सिद्ध इति

भवत्यपि ज्ञातव्ये न ज्ञातुरन्यथाभावोऽस्ति सर्वदा वर्तमानस्वभावत्वात्, तथा भस्मीभवत्यपि देहे नात्मन उच्छेदो वर्तमानस्वभावत्वादन्यथास्वभावत्वं वा न सम्भावयितुं शक्यं। एवमप्रत्याख्येयस्वभावत्वादेवाकार्य्यत्वमात्मनः कार्य्यत्वञ्चाकाशस्य। यत्तूक्तं समानजातीयमनेककारणद्रव्यं व्योम्नो नास्तीति तत् प्रत्युच्यते, न तावत् समानजातीयमेवारभते न भिन्नजातीयमिति नियमोऽस्ति। न हि तन्तूनां तत्संयोगानाञ्च समानजातीयत्वमस्ति द्रव्यगुणत्वाभ्युपगमात्। न च निमित्तकारणानामपि तुरीवेमादीनां समानजातीयत्वनियमोऽस्ति। स्यादेतत् समवायिकारणविषय एव समानजातीयत्वाभ्युपगमो न

स्वप्रकाशस्यापि बाधः किं न स्यादित्यत आह। न चेति। जडं हि परायत्तप्रकाशत्वादागन्तुकं बाधयोग्यं न प्रकाशात्मस्वरूपं, तस्य सर्वबाधसाक्षिस्वरूपस्य निराकर्त्रन्तराभावात् स्वस्य च स्वनिराकर्तृत्वायोगात्। न हि सुनिपुणेनापि स्वाभावो द्रष्टुं शक्यत इत्यर्थः। एवं स्वतः स्फूर्तित्वादात्माऽबाध्यः इत्युक्त्वा स्वतःसत्ताकत्वाच्च न बाध्य इत्याह। तथाहमेवेति। ज्ञानज्ञेययोः सत्ताव्यभिचारेऽपि ज्ञातुः सदैकरूपत्वान्न सत्ताव्यभिचार इत्यर्थः। मास्तु जीवतो ज्ञातुरन्यथाभावः मृतस्य तु स्यादित्यत आह। तथेति। उच्छेदो विनाशोऽन्यथास्वभावत्वं मिथ्यात्वं वा सम्भावयितुमपि न शक्यं, अहमस्मीत्यनुभवसिद्धसत्स्वभावस्य बाधकाभावादित्यर्थः। एवमात्मनः शून्यत्वनिरासेन शून्यताप्रसङ्गस्यानिष्टत्वं उक्तं, ततश्चात्मनः कार्य्यत्वानुमानमाभास इत्याह। एवमिति। अकार्यात्मनः सिद्धौ तस्याविद्यासहितस्योपादानस्यादृष्टादिनिमित्तस्य च सत्त्वादाकाशानुत्पत्तिहेतोः साध्यीशून्यत्वस्य स्वरूपासिद्धेरुक्तसत्प्रतिपक्षबाधाच्चाकाशस्य कार्य्यत्वमेवध्रुवमित्याह। कार्यत्वञ्चेति। आत्माविद्ययोर्विजातीयत्वान्नाका-

कारणान्तरविषय इति, तदप्यनैकान्तिकं। सूत्रगोबालैर्ह्यनेक-जातीयैरेका रज्जुः सृज्यमाना दृश्यते। तथा सूत्रैरूर्णादिभिश्च विचित्रान् कम्बलान् वितन्वते। सत्त्वद्रव्यत्वाद्यपेक्षया वा समानजातीयत्वे कल्प्यमाने नियमानर्थक्यं सर्वस्य सर्वेण समानजातीयकत्वात्, नाप्यनेकमेवारभते नैकमिति नियमोऽस्ति। अणु-मनसोराद्यकर्मारम्भाभ्युपगमात्। एकैको हि परमाणुः मन-श्चाद्यं स्वकर्मारभते न द्रव्यान्तरैः संहत्येत्यभ्युपगम्यते। द्रव्यारम्भ एवानेकारम्भकत्वनियम इति चेन्न, परिणामाभ्युपगमात् भवेदेष नियमो यदि संयोगसचिवं द्रव्यं द्रव्यान्तरस्यारम्भक-मभ्युपगम्येत। तदेव तु द्रव्यं विशेषवदवस्थान्तरमापद्यमान कार्य्यं नामाभ्युपगम्यते तच्च क्वचिदनेकं परिणमते मृद्बीजा-

---

श्चारम्भकत्वमित्युक्तमनूद्य निरस्यति। यत्त्वित्यादिना। किं कारण-मात्रस्य साजात्यनियमः उत समवायिनः तत्राद्यं निरस्य द्वितीयं शङ्कते। स्यादेतदिति। किं समवायितावच्छेदकधर्म्मेण साजात्यं उ सत्तादिना, नाद्य इत्याह। तदपीति। न च रज्ज्वादि न द्रव्यान्तर-मिति वाच्यं, पटादेरपि तथात्वापाताद्द्वितीयोऽस्मदिष्टः, आत्माविद-योर्वस्तुत्वेन साजात्यादित्याह। सत्त्वेति। उपादानस्य साजात्यनिय-निरस्य संयुक्तानेकत्वनियमाद्द्वितीयस्यासङ्गस्याप्यात्मन उपादानत्व-सिद्धये निरस्यति। नापीत्यादिना। किमारम्भकमात्रस्यायं नियम उत द्रव्यारम्भकस्य नाद्य इत्याह। अणिवति। द्व्यणुकस्य ज्ञानस्य चास-मवायिकारणसंयोगजनकमाद्यं कर्म्म, यद्यप्यदृष्टवदात्मसंयुक्ते अणु-मनसी आद्यकर्मारम्भके तथापि कर्मसमवायिन एकत्वादनेकत्वनिय-मभङ्ग इत्याह। एकैको हीति। द्रव्यान्तरैः समवायिभिरित्यर्थः। द्वितीयमुत्थाप्यारम्भवादानङ्गीकारेण दूषयति। द्रव्येत्यादिना। न

अङ्कुरादिभावेन क्वचिदेकं परिणमते क्षीरादिदध्यादिभावेन। नेश्वरशासनमस्त्यनेकमेव कारणं कार्य्यं जनयतीति, अतः श्रुतिप्रामाण्यादेकस्माद्ब्रह्मण आकाशादिमहाभूतोत्पत्तिक्रमेण जगज्जातमिति निश्चीयते। तथाचोक्तं 'उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि' [शा० सू०२।१।२४] इति। यच्चोक्तमाकाशस्योत्पत्तौ न पूर्वोत्तरकालयोर्विशेषः सम्भावयितुं शक्यत इति, तदयुक्तं, येनैव हि विशेषेण पृथिव्यादिभ्यो व्यतिरिच्यमानं नभःस्वरूपवदिदानीमध्यवसीयते स एव विशेषः प्रागुत्पत्तेर्नासीदिति गम्यते। यथाच ब्रह्म न स्थूलादिभिः पृथिव्यादिस्वभावैः स्वभाववत् 'अस्थूलमनणु'इत्यादिश्रुतिभ्यः, एवमाकाशस्वभावेनापि न स्वभाववदनाकाशमिति श्रुतेरवगम्यते, तस्मात् प्रागुत्पत्तेरनाकाश*मच्छिद्रमिति स्थितं। यदप्युक्तं पृथिव्यादिवैधर्म्या-

---

भ्युपगम्यते तस्मान्नैष नियम इति शेषः। यत्तु क्षीरपरमाणुषु रसान्तरोत्पत्तौ तैरेव दध्यारम्भ इति तन्न, क्षीरनाशे मानाभावात् रसवद्‌गोऽप्येकद्रव्यारभ्यत्वसम्भवाच्च द्रव्यगुणसङ्केतस्य पौरुषेयस्य श्रुत्यर्थनिर्णाहेतुत्वादिति भावः। लोके कर्तुः सहायदर्शनात् असहायाद्ब्रह्मणः कथं सर्ग इति तत्राह। तथा चोक्तमिति। प्रागभावशून्यत्वं हेतुरप्यसिद्ध इत्याह। यच्चोक्तमित्यादिना। शब्दाश्रयत्वं विशेषः शब्दादिमानाकाशः प्रलये नास्ति 'नासीद्रजो नो व्योम' इति श्रुतेः। नन्वाकाशाभावे काठिन्यं स्यादिति चेत्, सुशिक्षितोऽयं नैयायिकतनयः। न ह्याकाशाभावस्तद्धर्मो वा काठिन्यं किन्तु मूर्तद्रव्यविशेषः तत्संयोगविशेषो वा काठिन्यं, तच्च प्रलये नास्तीति भावः। 'आकाशशरीरं ब्रह्म' इति श्रुतेरन्यैश्यावद्ब्रह्मस्वभावस्याकाशस्य सति ब्रह्मणि कथमभावस्तत्राह। यथा चेति। विभुत्वादाकाशसमं ब्रह्मेति श्रुत्यर्थः। विभुत्वास्पर्श-

* अनाकाशत्वमुचितमिति वर्ध० का०।

दाकाशस्याजत्वमिति, तदप्यसत्, श्रुतिविरोधे सत्युत्पत्त्यसम्भा-
वानुमानस्याभासत्वोपपत्तेः, उत्पत्त्यनुमानस्य च दर्शितत्वात्,
अनित्यमाकाशमनित्यगुणाश्रयत्वात् घटादिवदित्यादि*प्रयोग-
सम्भवाच्च । आत्मनानैकान्तिकमिति चेत् न, तस्यौपनिषद
प्रत्यनित्यगुणाश्रयत्वासिद्धेः । विभुत्वादीनाञ्चाकाशस्योत्पत्तिवा
दिनं प्रत्यसिद्धत्वात् । यच्चोक्तमेतच्छब्दाच्चेति तत्रामृतत्वश्रुति
स्तावद्वियत्यमृता दिवौकस इतिवद्द्रष्टव्याः । उत्पत्तिप्रलययो
रुपपादितत्वात् 'आकाशवत् सर्वगतश्च नित्यः' इत्यपि प्रसिद्ध
महत्त्वेनाकाशेनोपमानं क्रियते, निरतिशयमहत्त्वाय नाकाश
समत्वाय यथेषुरिव सविता धावतीति चिप्रगतित्वायोच्यं

द्रव्यत्वनिरवयवत्वलिङ्गानां विभक्तत्वादिलिङ्गसहितागमबाधमाह
यदपीत्यादिना । धर्मिविकाराभावे गुणनाशो न स्यादिति तर्कार्थम-
नित्यपदं गुणाश्रयत्वमेवं हेतुः, तच्च स्वसमानसत्ताकगुणवत्त्वमतो
निर्गुणात्मनि न व्यभिचारः । भूतत्वमादिशब्दार्थः । स्वरूपासिद्धिम-
प्याह । विभुत्वादीनाञ्चेति । सर्वमूर्तसंयोगः परिमाणविशेषो वा वि-
भुत्वं निर्गुणात्मनि दृष्टान्तेनास्ति संयोगस्य सावयवत्वनियतस्याज
त्वसाध्यविरुद्धता च, स्वरूपोपचयरूपं तु विभुत्वमात्माकाशयोर्न सर्व
'ज्यायानाकाशात्' इति श्रुतेः। क्वचिदाकाशसाम्यन्तु ब्रह्मणो यत्किञ्चित्
सर्वसम्बन्धेन व्यपदिश्यते असक्तत्वेन वा पञ्चीकरणादस्पर्शत्वमसिद्ध
कार्यद्रव्यत्वान्निरवयवत्वमप्यसिद्धं, द्रव्यत्वजातिस्त्वात्मन्यसिद्धेत्यर्थः । नि
इत्यंशेन साम्यं न विवक्षितं । ननु स यथाऽनन्तोऽयमाकाश एवमनन्त
आत्मेति श्रुतिर्नित्यत्वेनैव साम्यं ब्रूते नेत्याह । एतेनेति । आकाश
कार्यत्वेनानित्यत्वादित्यर्थः । श्रुतिस्त्वापेक्षिकाऽऽनन्त्यद्वारा मुख्याऽऽनन्त
बोधयतीति भावः। न्यूनत्वाच्चाकाशस्य न मुख्योपमानत्वमित्याह । ज्या

---

* प्रतिप्रयोगेति वर्ध० का० ।

नेषुतुल्यगतित्वाय तद्वत्। एतेनानन्तत्वोपमानश्रुतिर्व्याख्याता। ज्यायानाकाशादित्यादिश्रुतिभ्यश्च ब्रह्मणः *सकाशात् आकाशस्योनपरिमाणत्वसिद्धिः न तस्य प्रतिमास्तीति च ब्रह्मणोऽनुपमानत्वं दर्शयति, 'अतोऽन्यदार्त्तम्' इति च ब्रह्मणोऽन्येषामाकाशादीनामार्त्तत्वं दर्शयति। तपसि ब्रह्मशब्दवत् आकाशस्य जन्मश्रुतेर्गौणत्वमित्येतदाकाशसम्भवश्रुत्यनुमानाभ्यां परिहृतं, तस्माद्ब्रह्मकार्य्यं वियदिति सिद्धं॥

वायुविषया विप्रतिपत्तिः

एतेन मातरिश्वा व्याख्यातः॥ ८॥

अतिदेशोऽयं एतेन वियद्व्याख्यानेन मातरिश्वापि वियदाश्रयो वायुर्व्याख्यातः। तत्राप्येते यथायोगं पक्षा रचयितव्याः। न वायुरुत्पद्यते, छन्दोगानामुत्पत्तिप्रकरणेऽनाम्नानादित्येकः पक्षः, अस्ति तु तैत्तिरीयाणामुत्पत्तिप्रकरणे आम्नानं 'आकाशा-

---

यानिति। मुख्योपमानासत्त्वे श्रुतिर्न तस्येति तस्मादाकाशस्योपमानमात्रेण नित्यत्वं नास्तीति भावः। अनित्यत्वेनासत्त्वे श्रुतिमाह। अतोऽन्यदिति। यत्तु एकस्यैव सम्भूतशब्दस्य गौणत्वं मुख्यत्वञ्चेति तन्न, आकाशेऽपि तस्य मुख्यत्वसम्भवादित्याह। तपसीति। बलवत्तित्तिरिश्रुत्या छान्दोग्यश्रुतेर्नयनादेकवाक्यतया स्रष्टरि ब्रह्मात्मनि समन्वय इत्युपसंहरति; तस्मादिति॥

एतेन मातरिश्वा व्याख्यातः। अतिदेशत्वान्न पृथक् सङ्गत्याद्यपेक्षा, तेजोऽसृजतेति श्रुतेः। आकाशाद्वायुरिति श्रुत्या विरोधोऽस्ति न वेति एकवाक्यभावाभावाभ्यां संशये गौणपक्षपूर्व्वपक्षसिद्धान्तपक्षानतिदि-

---

* सकाशादिति वर्ध० का० नास्ति।

द्वायुरिति पक्षान्तरं। ततश्च श्रुत्योर्विप्रतिषेधे सति गौणी वायोरुत्पत्तिश्रुतिः असम्भवादित्यपरोऽभिप्रायः, असम्भवश्च दर्शितः। 'सैषाऽनस्तमिता देवता यद्वायुः' इत्यस्तमयप्रतिषेधादमृतत्वादिश्रवणाच्च प्रतिज्ञानुपरोधाद्यावद्विकारञ्च विभागाभ्युपगमादुत्पद्यते वायुरिति सिद्धान्तः। अस्तमयप्रतिषेधो अपरविद्याविषय आपेक्षिकः, अग्न्यादीनामिव वायोरस्तमयाभावात्। कृतं प्रतिविधानञ्चामृतत्वादिश्रवणं। ननु वायोराकाशस्य च तुल्ययोरुत्पत्तिप्रकरणे श्रवणाश्रवणयोरेकमेवाधिकरणमुभयविषयमस्तु किमतिदेशेनाम्मति विशेषे इति, उच्यते, सत्यमेवमेतत्, तथापि मन्दधियां शब्दमात्रकृताशङ्कानिवृत्त्यर्थोऽयमतिदेशः

शेति। तत्रापीत्यादिना। पूर्वत्र ह्याकाशानन्तर्यं तेजसः स्थापितं तत्र वायुतेजसोस्तुल्यवदानन्तर्यं वायोरग्निरिति क्रमश्रुतिबाधात् पौर्वापर्यं तेजः प्राथम्यभङ्गान्नैकवाक्यतेति पूर्वपक्षे गौणविद्याभिप्रायमाह। ततश्चेति। अस्तमयप्रतिषेधो मुख्योत्पत्त्यसम्भवे लिङ्गं, वायुश्चान्तरिक्षं चैतदमृतमिति। तस्यैव लिङ्गस्याभ्यासः वायुरेव व्यष्टिः समष्टिश्चेति सर्वात्मत्वलिङ्गान्तरमादिपदार्थः। तथा संवर्गविद्यायां वायुर्ह्येवैतान् सर्वानग्न्यादीन् संहरतीति शब्दमात्रेणैश्वर्यश्रवणं लिङ्गान्तरं ग्राह्यं। एतैर्लिङ्गैर्वायुरनाद्यनन्त इति प्रतीतेरुत्पत्तिर्गौणीत्यविरोधः। श्रुत्योरिति प्राप्ते प्रतिपिपादयिषितप्रतिज्ञाश्रुतेर्बलीयस्त्वात् तत्साधकानां तत्र तत्र वायूत्पत्तिवाक्यानां भूयस्त्वादुक्तविभक्तत्वादिलिङ्गानुग्रहाच्च मुख्या वायोरुत्पत्तिः, तथाचाकाशं वायुञ्च सृष्ट्वा तेजोऽसृजतेति श्रुत्योरेकवाक्यतया ब्रह्मणि समन्वयः। लिङ्गानि तूपास्यवायुस्तावकत्वादापेक्षिकतया व्याख्येयानीति मुख्यसिद्धान्तमाह। प्रतिज्ञेत्यादिना कृतं प्रतिविधानं आपेक्षिकत्वेन समाधानं यस्य तत्तथा। अधिकरणारम्भमाक्षिप्योक्तामधिकाशङ्कामाह। नन्वित्यादिना। वायुर्ह्येवै

क्रियते। संवर्गविद्यादिषु ह्युपास्यतया वायोर्महाभागत्वश्रवणात्, अस्तमयप्रतिषेधादिभ्यश्च भवति नित्यत्वाशङ्का कस्यचिदिति ॥ ८ ॥

असम्भवस्तु सतोऽनुपपत्तेः ॥ ९ ॥

वियत्पवनयोरसम्भाव्यमानजन्मनोरप्युत्पत्तिमुपश्रुत्य ब्रह्मणोऽपि भवेत् कुतश्चिदुत्पत्तिरिति स्यात् कस्यचिन्मतिः। तथा विकारेभ्य एवाकाशादिभ्य उत्तरेषां विकाराणामुत्पत्तिमुपश्रुत्याकाशस्यापि विकारादेव ब्रह्मण उत्पत्तिरिति कश्चिन्मन्येत, तामाशङ्कामपनेतुमिदं सूत्रं। असम्भवस्त्विति। न खलु ब्रह्मणः सदात्मकस्य कुतश्चिदन्यतः सम्भव उत्पत्तिराशङ्कितव्या, कस्मात् अनुपपत्तेः, सन्मात्रं हि ब्रह्म न तस्य सन्मा-

---

ान सर्वान् संवृङ्क्ते इत्यादिशब्दमात्रं शङ्कामूलं नार्थ इति द्योतनार्थं मात्रपदं। तामेव शङ्कामाह। संवर्गेति। व्यष्टिसमष्ट्युपास्तिर्वायुं दिशां वत्स वेदेत्युपास्तिस्त्वादिशब्दार्थः ॥

असम्भवस्तु सतोऽनुपपत्तेः। 'अनाद्यनन्तं महतः परं ध्रुवं न चास्य कश्चिज्जनिता' इत्यादि ब्रह्मानादित्वश्रुतीनां त्वं जातो भवसि विश्वतोमुख इत्युत्पत्तिश्रुत्या विरोधोऽस्ति नवेत्येकवाक्यभावाभावाभ्यां सन्देहे अस्ति विरोध इति पूर्वपक्षे यथा वाय्वादेरमृतत्वादिकमुत्पत्तिश्रुतिबलादापेक्षिकं तथा ब्रह्मानादित्वं आपेक्षिकमिति दृष्टान्तसङ्गत्या एकदेशिपक्षं ापयति। वियदिति। ब्रह्म कुतश्चिज्जायते कारणत्वादाकाशवदिति अनुमानानुग्रहाज्जन्मश्रुतिर्बलीयसीत्याह। तथेति। न चानादिकारणाभावेनानवस्था बीजाङ्कुरवदनादित्वोपपत्तेः। तथा च दीपाद्दीपवद्-

चादेवोत्पत्तिः सम्भवति, असत्यतिशये प्रकृतिविकारभावानुपपत्तेः। नापि सद्विशेषात् दृष्टविपर्ययात् सामान्याद्विशेषा उत्पद्यमाना दृश्यन्ते। मृदादेर्घटादयो न तु विशेषेभ्यः सामान्यं नाप्यसतो निरात्मकत्वात्, कथं 'असतः सज्जायेत' इति चाक्षेपश्रवणात् 'स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः' इति च ब्रह्मणो जनयितारं वारयति। वियत्पवनयोः पुनरुत्पत्तिः प्रदर्शिता न तु ब्रह्मणः साऽस्तीति वैषम्यं। न च विकारेभ्यो विकारान्तरोत्पत्तिदर्शनाद्ब्रह्मणोऽपि विकारत्वं भवितुमर्हतीति मूलप्रकृत्यनभ्युपगमेऽनवस्थाप्रसङ्गात्। या मूलप्रकृतिरभ्युपगम्यते तदेव च नो ब्रह्मेत्यविरोधः॥

ह्मान्तराद्ब्रह्मान्तरोत्पत्तिः, उत्पत्तिश्रुत्या चानादित्वश्रुतिर्नेयेत्यनाद्यनन्त
ब्रह्मसमन्वयासिद्धिरिति प्राप्ते मुख्यसिद्धान्तमाह। तामिति। ब्रह्म
न जायते कारणशून्यत्वान्नरविषाणवद्व्यतिरेकेण घटवच्चेत्यनुमाना
नुग्राह्यादिपक्षे चाकारणककार्यवादप्रसङ्गाद्ब्रह्मानादित्वश्रुतयो बलीयस्य
इति कारणत्वलिङ्गबाधाज्जन्मश्रुतिः कार्यभेदेन व्याख्येयेत्यनाद्यनन्त-
ब्रह्मसमन्वयसिद्धिरिति सिद्धान्तफलं। न च हेत्वसिद्धिः कारणस्या-
निरूपणात्। तथा हि किं सन्मात्रस्य ब्रह्मणः सन्मात्रमेव सामान्य
कारणं सद्विशेषो वा असद्वा न त्रेधापीत्याह। सन्मात्रं हीत्यादिना
दीपस्तु दीपान्तरे निमित्तमित्यनुदाहरणं। वियत्पवनयोर्ब्रह्मणश्च वि
कृत्वाविभक्तत्वाभ्यां कारणभावाभावाभ्याञ्च वैषम्यं। कारणत्वलिङ्गस्य
प्रामाणिकानवस्था। तर्केणापि बाधमाह। न च विकारेभ्य इत्य
दिना। कारणस्यानभ्युपगमे यदृच्छावादप्रसङ्गः, अनादिकारणा
भ्युपगमेऽनवस्थाप्रसङ्गः, तदभ्युपगमे ब्रह्मवादप्रसङ्गः, कारणान्तर
प्रधानादेर्निरासादिति भावः॥

तेजो विषया विप्रतिपत्ति:

तेजोऽतस्तथा ह्याह ॥१०॥

छान्दोग्ये सन्मूलत्वं तेजसः श्रावितं, तैत्तिरीयके तु वायुमूलत्वं, तत्र तेजोयोनिं प्रति श्रुतिविप्रतिपत्तौ सत्यां प्राप्तं तावत् ब्रह्मयोनि तेजः इति। कुतः, सदेवेत्युपक्रम्य तत्तेजोऽसृजतेत्युपदेशात्, सर्वविज्ञानप्रतिज्ञायाश्च ब्रह्मप्रभवत्वे सर्वस्य सम्भवात्, तज्जलानिति चाविशेषश्रुतेः, एतस्माज्जायते प्राण इति चोपक्रम्य श्रुत्यन्तरे सर्वस्याविशेषेण ब्रह्मजत्वोपदेशात्, तैत्तिरीयके च 'स तपस्तप्त्वा इदं सर्वमसृजत यदिदं किञ्च' इत्यविशेषश्रवणात्। तस्माद्वायोरग्निरिति क्रमोपदेशो द्रष्टव्यः, वायोरनन्तरमग्निः सम्भूत इति, एवं प्राप्ते उच्यते। तेजोऽतो मातरिश्वनो जायत इति। कस्मात् तथा ह्याह 'वायोरग्निः' इति। अव्यवहिते हि तेजसो ब्रह्मजत्वे सत्यसति वायुजत्वे वायोरग्निरितीयं श्रुतिः कदर्थिता

तेजोऽतस्तथा ह्याह। 'तत्तेजोऽसृजत' इति 'वायोरग्नि' इति च श्रुत्योर्विरोधोऽस्ति न वेति सन्देहे सामान्यात् सामान्योत्पत्त्यसम्भवेऽपि ब्रह्मवाय्वोः सामान्ययोस्तेजोरूपविशेषोपादानत्वसम्भवात्तुल्यबलतयास्ति विरोध इति प्रत्युदाहरणेन पूर्वपक्षः सर्वत्राध्यायसमाप्तेरेकवाक्यत्वासम्भवासम्भवौ संशयबीजं। पूर्वपक्षे श्रुतीनां विरोधादप्रामाण्यं फलं सिद्धान्ते प्रामाण्यमित्युक्तं न विस्मर्तव्यं। एवं पूर्वपक्षे कार्यमात्रस्य विवर्तत्वात् कल्पितस्य वायोस्तेजःकल्पनाधिष्ठानत्वायोगात् ब्रह्मैव तेजस उपादानं सर्वकार्याणां ब्रह्मैवोपादानमित्यर्थे श्रुतीनां भूयस्त्वाच्च तदनुरोधाद्वायोरिति क्रमार्था पञ्चमीत्यविरोध इत्येकदेशिसिद्धान्तं प्राप्तेति। प्राप्तं तावद्ब्रह्मयोनि तेज इत्यादिना। श्रुतीनां विरोधमात्रोपन्यासेन पूर्वपक्षः अपसिद्धान्तेनाविरोधात् तावदेकदेशिपक्ष इति ध्येयं। अयमपि मुख्यसिद्धान्तापेक्षया पूर्वपक्षत्वेन व्यवह्रियते। सिद्धान्त-

स्यात्। ननु क्रमार्थैषा भविष्यतीत्युक्तं नेति ब्रूमः। 'तस्माद्वा एत-स्मादात्मन आकाशः सम्भूतः' इति पुरस्तात् सम्भवति अपादान-स्यात्मनः पञ्चमीनिर्देशात्, तस्यैव च सम्भवतेरिहाधिकारात् परस्तादपि तदधिकारे पृथिव्या ओषधयः इत्यपादाने पञ्चमी-दर्शनाद्वायोरग्निरित्यपादानपञ्चम्यैवैषेति गम्यते। अपि च वायो-रूर्द्धमग्निः सम्भूत इति कल्प्य उपपदार्थयोगः, क्लृप्तस्तु कार-कार्थयोगः वायोरग्निः सम्भूत इति। तस्मादेषा श्रुतिर्वायुयो-नित्वं तेजसोऽवगमयति। नन्वितरापि श्रुतिर्ब्रह्मयोनित्वं तेजसोऽ-वगमयति तत्तेजोऽसृजतेति। न तस्याः पारम्पर्यजत्वेऽप्यविरोधात्। यदापि ह्याकाशं वायुञ्च सृष्ट्वा वायुभावापन्नं ब्रह्म तेजोऽसृजतेति

यति। एवं प्राप्त इति। कदर्थिता बाधितार्थेति यावत्। वायोस्तेजः प्रकृतित्वं पञ्चमीश्रुत्या निर्धारितं, न च कल्पितस्योपादानत्वासम्भवः अधिष्ठानत्वासम्भवेऽपि मृदादिवत्परिणामित्वसम्भवात्, सतस्तु ब्रह्मण छान्दोग्ये स्रष्टृत्वमात्रं श्रुतं नोपादानत्वं। न च बहु स्यामिति कार्या-भेदेच्छालिङ्गादुपादानत्वसिद्धिर्लिङ्गात् श्रुतेर्बलीयस्त्वेन श्रुत्यविरोधेन लिङ्गस्य नेयत्वात्। नयनञ्चेत्थं वायोर्ब्रह्मानन्यत्वाद्वायुजस्यापि तेजसो ब्रह्मप्रकृतिकत्वमविरुद्धमिति सिद्धान्तग्रन्थाशयः। इहाधिकारादिति वायोरग्निः सम्भूत इति वाक्ये सम्बन्धादित्यर्थः। तदधिकारे सम्भूत्य-धिकारे निरपेक्षकारकविभक्तेरुपपदसापेक्षविभक्त्यपेक्षया प्रबलत्वाच न क्रमार्था पञ्चमीत्याह। अपि चेति। ऊर्द्धमनन्तरमिति चोपपदं विना पञ्चमीमात्रात् क्रमो न भातीति कल्प्य उपपदार्थप्रयोगः प्रकृत्य-र्थोपादानकारकन्तु निरपेक्ष्यपञ्चम्या भाति विशेषतोऽत्र प्रकरणाद-पादानार्थत्वं पञ्चम्याः क्लृप्तं* सति विरोधे बाध्यमिति स्थितिरित्यर्थः पारम्पर्यजत्वमेवाह। यदापीति। तस्या धेनोः सृतं तप्तं क्षीरं साक्षा

---

* क्लृप्तेन च कल्प्यमिति सो० टी०।

कल्प्यते तदापि ब्रह्मजत्वं तेजसो न विरुध्यते, यथा तस्याः शृतं तस्या दधि तस्या आमिक्षेत्यादि। दर्शयति च ब्रह्मणो विकारात्मनावस्थानं 'तदात्मानं स्वयमकुरुत' इति। तथा चेश्वरस्मरणं भवति। बुद्धिर्ज्ञानमसंमोह इत्याद्यनुक्रम्य 'भवन्ति भावा भूतानां मत्त एव पृथग्विधाः' इति। यद्यपि बुद्ध्यादयः स्वकारणेभ्यः प्रत्यक्षं भवन्तो दृश्यन्ते तथापि सर्वस्य भावजातस्य साक्षात् प्रनाड्या वा ईश्वरवंश्यत्वात्। एतेनाक्रमसृष्टिवादिन्यः श्रुतयो व्याख्याताः तासां सर्वथोपपत्तेः क्रमवत्सृष्टिवादिनीनान्त्वन्यथानुपपत्तेः प्रतिज्ञापि सद्वंश्यत्वमात्रमपेक्षते नाव्यवहितजन्यत्वमित्यविरोधः॥

आपः॥ ११॥

अतस्तथा ह्याहेत्यनुवर्तते। आपोऽतस्तेजसो जायन्ते, कस्मात्

कार्यं दध्यादिकन्तु पारम्पर्यजमित्यर्थः। दध्नि संसृष्टं कठिनक्षीरमामिक्षा। ब्रह्मणो वायुभावे मानमाह। दर्शयति चेति। पारम्पर्यजस्यापि तज्जत्वव्यपदेशे स्मृतिमाह। तथा चेति। अन्तःकरणादिभ्यो जायमानबुद्ध्यादीनां मत्त एवेत्यवधारणं कथमित्याशङ्क्याह। यद्यपीत्यादिना। प्रनाड्या परम्परया ईश्वरवंश्यत्वात् तज्जत्वात् परमकारणान्तरनिरासार्थं अवधारणं युक्तमिति शेषः। एतत्पदार्थमाह। तासामिति। तज्जलानित्याद्युक्तश्रुतीनां साक्षात् प्रनाड्या वा ब्रह्मजत्वमात्रेणोपपत्तेरित्यर्थः। अक्रमश्रुतीनां बलवत्क्रमश्रुत्यनुसारेणैकवाक्यत्वादियद्वायुद्वारा तेजःकारणे ब्रह्मणि समन्वय इति सिद्धं॥

आपः। अतिदेशोऽयं तथा ह्याथर्वणे मुण्डकग्रन्थे 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धा-

तथाह्याह 'तदपोऽसृजत' इति 'अग्नेरापः' इति च। सति वचने नास्ति संशयः। तेजसस्तु सृष्टिं व्याख्याय पृथिव्या व्याख्यास्यन्नपोऽन्तरयामीत्याप इति सूचयाम्बभूव ॥

पृथ्वीविषया विप्रतिपत्तिः

पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥ १२ ॥

'ता आप ऐचन्त बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजन्त' इति श्रूयते। तत्र संशयः। किमनेनान्नशब्देन व्रीहियवाद्यभ्यवहार्यं वौदनाद्युच्यते किं वा पृथिवीति। तत्र प्राप्तं तावत् व्रीहियवाद्योदनादि वा परिग्रहीतव्यमिति, तत्र ह्यन्नशब्दः प्रसिद्धो लोके वाक्यशेषोपेतमर्थमुपोद्वलयति, तस्माद्यत्र क्वचन वर्षति

रिणी' इति मन्त्रे अपां ब्रह्मजत्वं श्रुतं। अग्नेराप इति श्रुत्या तस्य विरोधोऽस्ति न वेति सन्देहे तुल्यत्वादस्ति विरोध इति पूर्वपक्षे अपामग्निदाह्यत्वेन विरोधादग्निजत्वासम्भवात् क्रमार्था पञ्चमीत्यविरोध इत्यधिकाशङ्कायामुक्ततेजोन्यायमतिदिश्य व्याचष्टे। अत इति। प्रत्यक्षविरोधे कथमपामग्निजत्वनिर्णयस्तत्राह। सति वचन इति। त्रिवृत्कृतयोरप्तेजसोर्विरोधेऽप्यग्नेराप इति वचनादतीन्द्रिययोस्तयोर्नास्ति विरोध इति निर्णीयत इत्यर्थः। न केवलं श्रुत्यविरोधज्ञानायायमतिदेशः किन्तु पञ्चभूतोत्पत्तिक्रमनिर्णयार्थश्चेत्याह। तेजसस्त्विति। तस्मात्तेजोभावापन्ने ब्रह्मणि श्रुतिसमन्वय इति सिद्धं ॥

पृथिव्यधिकाररूपशब्दान्तरेभ्यो विषयमुक्त्वान्नशब्दमहाभूतप्रकरणाभ्यां संशयमाह। ता इति। अभ्यवहार्यं भक्ष्यं, अत्र श्रुतौ यद्यन्नमोदनादिकं तदा अद्भ्यः पृथिवीति श्रुत्या विरोधः, यदि पृथिवी तदा न विरोध इति फलं बोध्यं। अप्पृथिव्योः कार्यकारणभावादधिकरणसङ्गतिः। अन्नश्रुतिरपि भवत्वलिङ्गाभ्यां पूर्वपक्षः। तदेव तत्रैवेति श्रुत्यर्थः। तथाच क्वचिदन्नं क्वचिदद्भ्यः पृथिवी ततोऽन्नमिति विरोधान्नैकवाक्यतेति

तदेव भूयिष्ठमन्नं भवतीति व्रीहियवाद्येव हि सति वर्षणे बहु भवति न पृथिवीति, एवं प्राप्ते ब्रूमः। पृथिव्येवेयमन्नशब्देनाद्भ्यो जायमाना विवक्ष्यत इति। कस्मात् अधिकारात् रूपात् शब्दान्तराच्च। अधिकारस्तावत् तत्तेजोऽसृजत, तदपोऽसृजतेति च महाभूतविषयो वर्तते। तत्र क्रमप्राप्तां पृथिवीं महाभूतं विलङ्घ्य नाकस्माद्व्रीह्यादिपरिग्रहो न्याय्यः, तथा रूपमपि वाक्यशेषे पृथिव्यनुगुणं दृश्यते यत्कृष्णं तदन्नस्येति। न ह्योदनादेरभ्यवहार्यस्य कृष्णत्वनियमोऽस्ति नापि व्रीह्यादीनां। ननु पृथिव्या अपि नैव कृष्णत्वनियमोऽस्ति, पयःपाण्डरस्याङ्गाररोहितस्य च क्षेत्रस्य दर्शनात्। नायं दोषो बाहुल्यापेक्षत्वात्। भूयिष्ठं हि पृथिव्याः कृष्णं रूपं न तथा श्वेतरोहिते। पौराणिका अपि पृथिवीच्छायां शर्वरीमुपदिशन्ति, सा च कृष्णाभेत्यतः कृष्णं रूपं पृथिव्या इति

प्राप्ते सिद्धान्तयति। एवं प्राप्त इति। अधिकारः प्रकरणं, रूपं लिङ्गं पयः क्षीरं तद्वत् पाण्डरं श्वेतं, अङ्गारवत् रोहितं रक्तं। शब्दान्तरशब्दितं स्थानं व्याचष्टे। श्रुत्यन्तरमपीति। *अथवानन्तर्यं पृथिव्याः स्थानं श्रुत्यन्तरसिद्धान्तेनाप्यन्नस्य पृथिवीत्वमित्यर्थः। तत्तत्र सृष्टिकाले यदपां शर आसीत् स एव समहन्यत कठिनः सङ्घातो भूत् सा अपां कठिना परिणतिः पृथिव्यभवदिति श्रुत्यर्थः। व्रीह्याद्यन्नसर्गः कस्मिन् स्थान इति विवक्षायामाह। पृथिव्यास्त्विति। छान्दोग्ये वृष्टिभवत्वलिङ्गसहितान्नश्रुतेः कथं प्रकरणलिङ्गस्थानैर्बाध इत्याशङ्क्याह। वाक्यशेषोऽपीति। प्रबलदुर्बलप्रमाणसन्निपाते बहूनां दुर्बलानामत्यन्तबाधादरं प्रबलप्रमाणस्याल्पबाधेन कथञ्चिन्नयनमिति न्यायेन श्रुतिलिङ्गयोरन्नमात्रनिष्ठत्वं बाधित्वान्नात्मकपृथिवीनिष्ठत्वं नीयते ताभ्यामन्नमात्रग्रहे प्रकाशादीनां पृथिवीमात्रविषयाणा-

* अवान्तर्यमिति सो०।

स्त्रिष्यते। श्रुत्यन्तरमपि समानाधिकारमन्नः पृथिवीति भवति तद्यदपां शर आसीत् तत्समहन्यत सा पृथिव्यभवदिति च। पृथिव्यास्तु व्रीह्यादेरुत्पत्तिं दर्शयति पृथिव्या ओषधयः ओषधीभ्योऽन्नमिति च। एवमधिकारादिषु पृथिव्याः प्रतिपादके सत्सु कुतो व्रीह्यादिप्रतिपत्तिः। प्रसिद्धिरप्यधिकारादिभिर्बाध्यते। वाक्यशेषोऽपि पार्थिवत्वादन्नाद्यस्य तद्द्वारेण पृथिव्या एवान्नः प्रभवत्वं सूचयतीति द्रष्टव्यं, तस्मात् पृथिवीयमन्नशब्देति॥

पञ्चभूतविषया विप्रतिपत्तिः

तदभिध्यानादेव तु तल्लिङ्गात् सः॥१३॥

किमिमानि वियदादीनि भूतानि स्वयमेव स्वविकारान् सृजन्ति आहोस्वित् परमेश्वर एव तेन तेनात्मनावतिष्ठमानोऽभिध्यायंस्तं तं विकारं सृजतीति सन्देहे सति प्राप्तं तावत् स्वयमेव सृजन्तीति। कुतः आकाशाद्वायुर्वायोरग्निरित्यादि स्वातन्त्र्य-

---

मत्यन्तबाधापत्तेरिति भावः। अन्नस्य वृष्टिजत्वोक्तिद्वारा पृथिव्या अन्नजन्यत्वं सूच्यते। पृथिव्यन्ना पृथिवीत्वादन्नवदित्यनुमानादित्यर्थः। एवं तित्तिरिश्रुत्यनुसारेण छन्दोगश्रुतेर्नयनादविरुद्धो भूतसृष्टिश्रुतीनां ब्रह्मणि समन्वय इति सिद्धं॥

सम्प्रति तानि भूतान्याश्रित्याश्रयाश्रयिभावसङ्गत्या तेषां स्वातन्त्र्यमाशङ्क्य निषेधति। तदभिध्यानादेव तु तल्लिङ्गात् सः। उक्तभूतान्याश्रित्य संशयपूर्वपक्षौ दर्शयति। किमिमानीत्यादिना। संशयबीजं तु श्रौ पर्वापरपक्षयुक्तयोर्बीजमिति ज्ञेयं। नन्वत्र भूतानां किं स्वातन्त्र्येणोपादानत्वमाशङ्क्यते कर्तृत्वं वा, नाद्यः, वचनानुपपत्तेरित्यादिना अविरोधादिति शङ्कते। नन्विति। न द्वितीयः अचेतनत्वादिति भावः

श्रवणात्। नन्वचेतनानां स्वतन्त्राणां प्रवृत्तिः प्रतिषिद्धा, नैष दोषः, तत्तेज ऐक्षत ता आप ऐक्षन्तेति च भूतानामपि चेतनत्वश्रवणादित्येवं प्राप्तेऽभिधीयते। स्वयमेव परमेश्वरः तेन तेनात्मनावतिष्ठमानोऽभिध्यायंस्तं तं विकारं सृजतीति। कुतस्तल्लिङ्गात्। तथा हि शास्त्रं यः पृथिव्यां तिष्ठन् यः पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयतीत्येवंजातीयकं साध्यक्षाणामेव भूतानां प्रवृत्तिं दर्शयति। तथा

यथा मनुष्यादिशब्दैस्तत्तद्देहाभिमानिनो जीवा उच्यन्ते तथाकाशाद्वायुरित्यादिश्रुतौ आकाशादिशब्दैस्तत्तद्भूताभिमानिदेवता उच्यते, तासां स्वकार्ये वाय्वादौ कर्तृत्वसम्भवान्निरपेक्षनिमित्तत्वं पक्षार्थः। एवं तदात्मानं स्वयमकुरुतेति श्रुतौ स्वयमिति विशेषणाद्ब्रह्मणोऽन्यानपेक्षं सर्वकर्तृत्वं श्रुतं। तथा च मिथोनिरपेक्षेश्वरभूतकर्तृत्वश्रुत्योर्विरोधान्न ब्रह्मणि समन्वय इति सफलं पूर्वपक्षमाह। नैष दोष इति। भूतानां तदभिमानिदेवतानामित्यर्थः। यथा आकाशादिभावापन्नब्रह्मणः सर्वोपादानत्वं तथा तदभिमानिदेवताजीवभावमापन्नब्रह्मणः कर्तृत्वमिति परम्परया ईश्वरकर्तृत्वश्रुत्यविरोधः। स्वयमिति विशेषणं ईश्वरान्तरनिरासार्थं न जीवभावापेक्षानिरासार्थमित्येकदेशिसिद्धान्त ऊहनीयः। मुख्यसिद्धान्तमाह। एवं प्राप्त इति। आकाशादिशब्दैर्न देवतालक्षणा मुख्यार्थे बाधकाभावात्, पञ्चम्यश्च प्रकृतित्वार्थत्वेन रूढतरत्वात्, तथा चाचेतनानां भूतानां कर्तृत्वमेव नास्ति, कुतः ईश्वरानपेक्षकर्तृत्वं यद्यपि देवतानां कर्तृत्वं सम्भवति तथापीश्वरनियम्यत्वश्रवणाचेतनानामपि न स्वातन्त्र्यं किमु वाच्यमचेतनानां भूतानां स्वातन्त्र्यमिति मत्वोक्तं। तल्लिङ्गादिति। तत्तदचेतनात्मनावस्थितस्य ब्रह्मणः उपादानत्वेऽपि जीवव्यावृत्तेश्वररूपाकारेणैव साक्षात् सर्वकर्तृत्वं जीवत्वद्वारा तस्य सर्वनियन्तृत्वाल्लिङ्गादित्यर्थः। प्रकरणाच्च साक्षात्

'सोऽकामयत बहु स्यां प्रजायेय' इति प्रस्तुत्य 'सच्च त्यच्चाभवत्' 'तदात्मानं स्वयमकुरुत' इति तस्यैव सर्वात्मभावं दर्शयति। यत्त्वीक्षणश्रवणमप्तेजसोस्तत् परमेश्वरावेशवशादेव द्रष्टव्यं 'नान्योऽतोऽस्ति द्रष्टा' इतीक्षित्रन्तरप्रतिषेधात् प्रकृतत्वाच्च सत ईक्षितुः तदैक्षत बहु स्यां प्रजायेयेत्यत्र॥

प्रतिसंचर क्रम विप्रतिपत्तिः

विपर्ययेण तु क्रमोऽत उपपद्यते च॥ १४॥

भूतानामुत्पत्तिक्रमश्चिन्तितः, अथेदानीमप्ययक्रमश्चिन्त्यते किमनियतेन क्रमेणाप्यय उतोत्पत्तिक्रमेणाथ वा तद्विपरीतेनेति। त्रयोऽपि चोत्पत्तिस्थितिप्रलया भूतानां ब्रह्मायत्ताः श्रूयन्ते, 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति

सर्वकर्तृत्वमित्याह। तथेति। पूर्वोक्तमनूद्य निरस्यति। यत्त्विति परमेश्वरस्यान्तर्यामिभावेनावेशः सम्बन्धः। तद्वशाद्भूतेष्वीक्षणश्रवणं नैतावता तेषां चेतनत्वं स्वातन्त्र्यं वेत्यर्थः। अनेन तदभिध्यानादिति पदं व्याख्यातं, इत्थं सूत्रयोजना। स ईश्वरस्तत्तदात्मना स्थितोऽपि साक्षादेव सर्वकर्ता तस्यान्तर्यामित्वलिङ्गाज्जीवत्वद्वारा कर्तृत्वं नाम जीवस्यैव कर्तृत्वमित्यन्तर्यामिणः कर्तृत्वासिद्धेरन्तर्यामित्वायोगात् तदभिध्यानादीश्वरेक्षणादेव भूतेषु श्रुतेक्षणोपपत्तेश्चेति तत्तेज ऐक्षतेति श्रुत ईक्षिता परमात्मैवेत्यत्र श्रुत्यन्तरं प्रकरणञ्चाह। नान्य इति। स्मादीश्वरपदार्थलोपप्रसङ्गेनेश्वरादन्यस्य स्वातन्त्र्याभावान्नेश्वरकर्तृत्वश्रुतेर्भूतश्रुत्या विरोध इति सिद्धं॥

विपर्ययेण तु। यद्यप्यत्र श्रुतिविरोधो न परिह्रियत इत्यसङ्गतिस्तथाप्युत्पत्तिक्रमे निरूपिते लयक्रमो बुद्धिस्थो विचार्यत इति प्रासङ्गिक्यैव पादाववान्तरसङ्गतिमिति मत्वाह। भूतनामिति। अत्रोत्पत्तिक्रमाद्विपरीतक्रमनिर्णयात् सिद्धान्ते भूतानां प्रातिलोम्येन लयध्यानपूर्वं

यत्प्रयन्त्यभिसंविशन्ति' इति, तत्रानियमोऽविशेषादिति प्राप्तं, अथ-वोत्पत्तेः क्रमस्य श्रुतत्वात् प्रलयस्याऽपि क्रमाकाङ्क्षिणः स एव क्रमः स्यादित्येवं प्राप्तं ततो ब्रूमः विपर्ययेण तु प्रलयक्रमोऽत उत्पत्तिक्रमाद्भवितुमर्हति, तथा हि लोके दृश्यते येन क्रमेण सोपानमारूढस्ततो विपरीतक्रमेणावरोहतीति, अपि च दृश्यते मृदो जातं घटशरावाद्यप्ययकाले मृद्भावमप्येति, अद्भ्यश्च जातं हिमकरकाद्यब्भावमप्येतीति। अतश्चोपपद्यत एतद्यत् पृथिव्यद्भ्यो-जाता सती स्थितिकालव्यतिक्रान्तावपोऽपीयात्, आपश्च तेजसो जाताः सत्यस्तेज अपीयुः, एवं क्रमेण सूक्ष्मं सूक्ष्मतरं चानन्तर-मनन्तरतरं कारणमपीत्य सर्वं कार्यजातं परमकारणं परम-सूक्ष्मञ्च ब्रह्माप्येतीति वेदितव्यं। नहि स्वकारणव्यतिक्रमेण कारणकारणे कार्याप्ययो न्याय्यः। स्मृतावप्युत्पत्तिक्रमविपर्य-येणैवाप्ययक्रमस्तत्र तत्र दर्शितः,

---

...त्यगब्रह्मणि मनःसमाधानं फलं, पूर्वपक्षे तु कारणनाशे सति कार्य-
...नाश इति सर्वलयाधारब्रह्मासिद्धेरुक्तसमाध्यसिद्धिरिति भेदः। सति
...भूतानां लये क्रमचिन्ता स एव नास्तीति केचित्तान् प्रत्याह। त्रयो-
...प्येति। अनियम इत्यनास्थयोक्तं श्रौतस्य प्रलयस्य क्रमाकाङ्क्षायां
...त उत्पत्तिक्रम एव ग्राह्यः, श्रौतत्वेनान्तरङ्गत्वादित्येवं पूर्वपक्षः,
...ति कारणे कार्यं नश्यतीति लोके दृश्यते। तथा च श्रौतोऽप्युत्पत्तिक्र-
...। लयेन गृह्यते किन्तु लौकिकक्रम एव गृह्यते श्रुतेर्लोकदृष्टपदार्थ-
...धाधीनत्वेन श्रौतादपि लौकिकस्यान्तरङ्गत्वाद्योग्यत्वाच्च, कारणमेव
... कार्यस्य रूपमिति तदनन्यत्वन्यायेन स्थापितं। न हि स्वरूपनाशे
...र्यस्य क्षणमपि स्थितिर्युक्ता, तस्माद्योग्य उत्पत्तिक्रमो लयस्य न ग्राह्यः

'जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते।
ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते' ॥

इत्येवमादौ। उत्पत्तिक्रमस्तूत्पत्तावेव श्रुतत्वात् नाप्यये भवितुमर्हति, नचासावयोग्यत्वादप्ययेनाकाङ्क्ष्यते, न हि कार्ये ध्रियमाणे कारणस्याप्ययो युक्तः कारणाप्यये कार्यस्यावस्थानानुपपत्तेः। कार्याप्यये तु कारणस्यावस्थानं युक्तं मृदादिष्वेवं दृष्टत्वात्॥

अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात्॥ १५॥

भूतानामुत्पत्तिप्रलयावनुलोमप्रतिलोमक्रमाभ्यां भवत इत्युक्तं, आत्मादिरुत्पत्तिः प्रलयश्चात्मान्त इत्यप्युक्तं, सेन्द्रियस्य तु मनसो बुद्धेश्च सद्भावः प्रसिद्धः श्रुतिस्मृत्योः। 'बुद्धिं तु सारथि

लौकिकक्रमावरोधेन निराकाङ्क्षत्वादिति सिद्धान्तयति। ततो ब्रूम इत्यादिना। क्रमेण परम्परया सर्वकार्यलयाधारत्वं ब्रह्मणः किमित्या श्रीयते साक्षादेव तत् किं न स्यादित्यत आह। न हि स्वकारणव तिक्रमेणेति। घटनाशे मृदनुपलब्धिप्रसङ्गादित्यर्थः। 'वायुश्च लीयते व्योम्नि तच्चाव्यक्तं प्रलीयते' इति स्मृतिशेषः आदिपदार्थः। योग्यताधीनः सम्बन्ध इति न्यायादयोग्यक्रमबाध इति सिद्धं॥

अन्तराविशेषात्। उक्तभूतोत्पत्तिलयक्रममुपजीव्य स किं करणो त्पत्तिक्रमेण विरुध्यते न वेति करणानामभौतिकत्वभौतिकत्वा सन्देहे वृत्तानुवादपूर्वकपूर्वपक्षमाह। भूतानामित्यादिना। करणानि न सन्तीति वदन्तं प्रत्याह। सेन्द्रियस्येति। 'मनसस्तु परा बुद्धिर्यो बु परतस्तु सः। श्रोत्रादीनीन्द्रियाण्यन्ये' इति स्मृतिर्द्रष्टव्या। अन्यपर

जीवात्मा— विज्ञान मनसी (देवाः प्राणाः-) भूतग्रामः शरीर

विद्धि मनः प्रग्रहमेव च। इन्द्रियाणि हयानाहुः' इत्यादिलिङ्गेभ्यः। तयोरपि कस्मिंश्चिदन्तराले क्रमेणोत्पत्तिप्रलयावुपसंग्राह्यौ, सर्वस्य वस्तुजातस्य ब्रह्मजत्वाभ्युपगमात्। अपि चाथर्वणे उत्पत्तिप्रकरणे भूतानामात्मनश्चान्तराले करणान्यनुक्रम्यन्ते 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी' (मु॰) इति, तस्मात् पूर्वोक्तोत्पत्तिप्रलयक्रमभङ्गप्रसङ्गो भूतानामिति चेन्न, अविशेषात्। यदि तावद्भौतिकानि करणानि ततो भूतोत्पत्तिप्रलयाभ्यामेवैषामुत्पत्तिप्रलयौ भवत इति नैतयोः क्रमान्तरं मृग्यं। भवति च भौतिकत्वे लिङ्गं

शब्दाः लिङ्गानीत्युच्यन्ते। करणानां क्रमाकाङ्क्षामाह। तयोरिति। आकाङ्क्षायां श्रुतिसिद्धः क्रमो ग्राह्य इत्याह। अपि चेति। विज्ञायतेऽनेनेति विज्ञानं सेन्द्रिया बुद्धिः। आत्मनो भूतानां चान्तरा मध्ये तल्लिङ्गात् सृष्टिवाक्यात् 'एतस्माज्जायते प्राणो मनः' इत्यादिरूपाद्विज्ञानमनसी अनुक्रम्येते। तथा च करणक्रमेण पूर्वोक्तक्रमभङ्ग इति शङ्कासूत्रार्थः। न च करणानां भौतिकत्वाद्भूतानन्तर्यमिति वाच्यं, तेषां भौतिकत्वे मानाभावात्। तथा चात्मनः प्रथममाकाशस्य जन्म पश्चाद्वायोरित्युपक्रमस्यात्मनः करणानि ततो भूतानीति क्रमेण विरोध इति तित्तिर्यथर्वश्रुत्योर्विरोधान्न ब्रह्मणि समन्वय इति पूर्वपक्षफलं सिद्धान्तयति। नेति। 'आत्मन आकाशः' इत्यादि तित्तिरिश्रुतौ पञ्चम्याः कार्यकारणभावेनार्थतः क्रमो भवति न तस्याथर्वणपाठेन बाधः अर्थक्रमविरोधिक्रमविशेषस्याश्रुतेः पाठक्रमस्यार्थक्रमधीशेषस्य शेषिबाधकत्वायोगादिति श्रुत्यर्थक्रमाविरोधेन पाठस्य नेयत्वाद्भूतानन्तर्यं करणानामित्यर्थः। किञ्च भौतिकत्वात् तेषां तदानन्तर्यमित्याह। यदीति। च प्राणस्याधिकारत्वायोगादन्नमयमित्यादि मयटो न विकारार्थतेति

करणानां, 'अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक्' इत्येवं जातीयकं। व्यपदेशोऽपि क्वचिद्भूतानां करणानाञ्च ब्राह्मणपरिव्राजकन्यायेन नेतव्यः। अथ त्वभौतिकानि करणानि तथापि भूतोत्पत्तिक्रमो न करणैर्विशेष्यते, प्रथमं करणान्युत्पद्यन्ते चरमं भूतानि प्रथमं वा भूतानि उत्पद्यन्ते चरमं करणानीति। आथर्वणे तु समाम्नाय क्रममात्रं करणानां भूतानाञ्च न तत्रोत्पत्तिक्रम उच्यते। तथान्यत्रापि पृथगेव भूतक्रमात् करणक्रम आम्नायते 'प्रजापतिर्वा इदमग्र आसीत् स आत्मानमैक्षत स मनोऽसृजत तन्मन एवासीत् तदा-

---

वाच्यं करणानां विभक्तत्वेन कार्यतया कारणाकाङ्क्षायामन्नमयमित्यादिश्रुतेराकाङ्क्षितान्वयार्थमसति बाधके मयटो विकारार्थताया युक्तत्वात्। प्राचुर्यार्थत्वे त्वनाकाङ्क्षितोक्तिप्रसङ्गाच्छ्रुत्यैव तेजोऽबन्नप्राशने वाक्प्राणमनसां वृद्धिस्तदभावे तन्नाश इति विकारत्वस्य दर्शितत्वाच्च विवादावसरः। यद्वा स्थूलभूताधीना तेषां वृद्धिर्विकारो मयडर्थः श्रूयमाणो भौतिकत्वे लिङ्गं प्राणेन्द्रियमनांसि भौतिकानि भूताधानवृद्धिमत्त्वाद्देहवदिति भावः। ननु तेषां भौतिकत्वे कथमाथर्वणे पृथक्जन्मकथनं भूतजन्मोक्त्यैव तज्जन्मसिद्धेरित्यत आह। व्यपदेशोऽपीति। प्रौढवादेन तेषामभौतिकत्वमुपेत्यापि श्रुत्यविरोधमाह। अथ त्विति। करणानां भूतानाञ्च पूर्वापरत्वे मानाभावात् नोक्तभूतक्रमभङ्गः। न चाथर्वणवाक्यं मानं पाठमात्रत्वादित्यर्थः। तर्हि कथं क्रमनिर्णयस्तत्राह। तथेति इदंस्थूल उत्पत्तेः प्राक् प्रजापतिः सूत्रात्मासीत्। ननु लिङ्गदेहस्य मनोघटितत्वात् प्रजापतेश्च लिङ्गसमष्टिरूपत्वात् कथं प्रजापतिसृष्ट्यनन्तरं मनःसृष्टिरिति विचारणीयं। अथ सूक्ष्मभूतात्मकप्रजापतिसर्गः प्रथम ततो मनआदिसर्गः इति क्रमो भवतीति भावः। एवञ्च भूत

त्मानमैक्षत तद्वायुमसृजत' इत्यादिना। तस्मान्नास्ति भूतोत्पत्तिक्रमस्य भङ्गः॥ जीवोत्पत्तिप्रलयविषयविप्रतिपत्तिः

चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्॥ १६॥

स्तो जीवस्याप्युत्पत्तिप्रलयौ जातो देवदत्तो मृतो देवदत्त इत्येवंजातीयकाल्लौकिकव्यपदेशाज्जातकर्मादिसंस्कारविधानाच्चेति स्यात् कस्यचिद्भ्रान्तिः, तामपनुदामः, न जीवस्योत्पत्तिप्रलयौ स्तः शास्त्रफलसम्बन्धोपपत्तेः। शरीरानुविनाशिनि हि जीवे शरीरान्तरगतेष्टानिष्टप्राप्तिपरिहारार्थौ विधिप्रतिषेधावनर्थकौ स्यातां। श्रूयते च 'जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते' इति। ननु लौकिको जन्ममरणव्यपदेशो जीवस्य दर्शितः सत्यं दर्शितः, भाक्तस्त्वेष जीवस्य जन्ममरणव्यपदेशः, किमाश्रयः पुनरयं मुख्यो यदपेक्षया भाक्त

कारणोत्पत्तिश्रुत्योरविरोधात् ब्रह्मणि समन्वयसिद्धिरिति सिद्धान्तफलं गमयति। तस्मादिति॥

चराचरभावित्वात्। एवं तावत् तत्पदवाच्यकारणनिर्णयाय भूतश्रुतीनां विरोधो निरस्त इदानीमापादसमाप्तेस्त्वंपदार्थशुद्धौ जीवश्रुतीनां विरोधो निरस्यते इह जीवो न जायते म्रियते इत्यादिश्रुतेः जातेष्टिश्राद्धशास्त्रेण विरोधोऽस्ति न वेति सन्देहे विरोधोऽस्तीति प्राप्ते लौकिकजन्मादिव्यपदेशसहायाज्जातेष्ट्यादिशास्त्रेण जीवाजत्वादिश्रुतिबाध इति पूर्वपक्षयति। स्त इति। तथा च कारणोत्पत्तिश्रुत्या भूतक्रमस्य बाधाभावेऽपि जीवोत्पत्तिक्रमेण बाधः स्यादिति प्रत्युदाहरणसङ्गतिः। पूर्वपक्षे जीवब्रह्मैक्यासिद्धिः सिद्धान्ते तत्सिद्धिरिति

इति, उच्यते। चराचरव्यपाश्रयः। स्थावरजङ्गमशरीरविषयौ जन्ममरणशब्दौ, स्थावरजङ्गमानि हि भूतानि जायन्ते च म्रियन्ते चातस्तद्विषयौ जन्ममरणशब्दौ मुख्यौ सन्तौ तत्स्थे जीवात्मन्युपचर्य्येते। तद्भावभावित्वात्। शरीरप्रादुर्भावतिरोभावयोर्हि सतोर्जन्ममरणशब्दौ भवतः नासतोः। नहि शरीरसम्बन्धादन्यत्र जीवो जातो मृतो वा केनचिदुपलक्ष्यते। 'स वा अयं पुरुषो जायमानः शरीरमभिसम्पद्यमानः स उत्क्रामन् म्रियमाणः' इति च शरीरसंयोगवियोगनिमित्तावेव जन्ममरणशब्दौ दर्शयति। जातकर्मादिविधानमपि देहप्रादुर्भावापेक्षमेव द्रष्टव्यं अभावाज्जीवप्रादुर्भावस्य। जीवस्य परस्मादात्मनः उत्पत्तिर्वियदादीनामिवास्ति नास्ति वेत्येतदुत्तरेण सूत्रेण वक्ष्यति देहाश्रयौ तावज्जीवस्य स्थूलावुत्पत्तिप्रलयौ न स्तः इत्येतदनेन सूत्रेणावोचत्॥

भेदः। चेतनजन्माद्युद्देशेन चेतनस्य तस्य जन्मान्तरीयफलसाधनं जातकर्मादि संस्कारो विधीयते तथा चोद्देश्यविधेययोर्मिथोविरोधे सति विधेयाविरोधेनोद्देश्यं नेयमिति न्यायात् जन्मादिकं देहोपाधिकं न स्वत इति सिद्धान्तयति। तामित्यादिना। जीवापेतं जीवेन त्यक्तं इदं शरीरं जन्मादिव्यपदेशश्चराचरदेहविषयो मुख्यः जीवे तु भाक्तो गौणः औपाधिकजन्मादिविषयः स्यादुपाधिजन्माभावे भावादसत्यभावादिति सूत्रार्थः। जीवस्यौपाधिकजन्ममृत्योः श्रुतिमप्याह। स वा इति। जायमानपदार्थमाह। शरीरमिति। म्रियमाणत्वं व्याचष्टे। उत्क्रामन्निति। ननूत्तरत्र जीवस्य जन्मादि निरस्यते अत्रापि तन्निरासे पुनरुक्तिरित्याशङ्क्याह। जीवस्येति। तदेवं जातेष्ट्यादिशास्त्रस्यौपाधिकजन्मादिविषयत्वान्न जीवनाद्यजन्यत्वश्रुतिविरोध इति सिद्धं॥

नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १७ ॥

अस्त्यात्मा जीवाख्यः शरीरेन्द्रियपञ्जराध्यक्षः कर्मफलसम्बन्धी, स किं व्योमादिवदुत्पद्यते ब्रह्मण आहोस्विद्ब्रह्मवदेव नोत्पद्यते इति श्रुतिविप्रतिपत्तेर्विषयः कासुचिच्छ्रुतिष्वग्निविस्फुलिङ्गादिनिदर्शनैर्जीवात्मनः परस्मात् ब्रह्मण उत्पत्तिराम्नायते, कासुचित्त्वविकृतस्यैव परस्य ब्रह्मणः कार्यप्रवेशेन जीवभावो विज्ञायते नचोत्पत्तिराम्नायत इति। तत्र प्राप्तं तावदुत्पद्यते जीव इति, कुतः प्रतिज्ञानुपरोधात्। 'एकस्मिन् विदिते सर्वमिदं विदितम्' इतीयं प्रतिज्ञा सर्वस्य वस्तुजातस्य ब्रह्मप्रभवत्वे सति नोपरुध्येत, तत्त्वान्तरत्वे तु जीवस्य प्रतिज्ञेयमुपरुध्येत। न चाविकृतः परमात्मैव जीव इति शक्यते विज्ञातुं, लक्षणभेदात्। अपहतपाप्मत्वादिधर्मको हि परमात्मा, तद्विपरीतो हि जीवः, विभागाच्चास्य विकारत्वसिद्धिः। यावान् हि आकाशादिः प्रविभक्तः स सर्वो विकारः, तस्य चाकाशादेरुत्पत्तिः समधिगता जीवात्मापि पुण्यापुण्यकर्मा सुखदुःखभाक् प्रति शरीरं विभक्त इति तस्यापि प्रपञ्चोत्पत्त्यवसरे उत्पत्तिर्भवितुमर्हति।

नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः। 'अग्नेर्विस्फुलिङ्गवदेतस्मात् परमात्मनः सर्वे जीवात्मानो व्युच्चरन्ति' इत्यादिजीवोत्पत्तिश्रुतीनां 'स एष इह प्रविष्ट आनखाग्रेभ्यः अज आत्मा' इत्याद्यनुत्पत्तिश्रुतीनाञ्च मिथोविरोधात् संशये प्राप्ते भूतां देहजन्मनाशयोर्जीवजन्मनाशौ, देहान्तरभोग्यस्वर्गादिहेतुविधाद्यसम्भवात्। कल्पाद्यन्तयोर्नभस इव जीवस्य तौ किं न स्यातां तत्-

अपि च 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः' इति प्राणादेर्भोग्यजातस्य सृष्टिं शिष्ट्वा सर्वे एते आत्मानो व्युच्चरन्तीति भोक्तॄणामात्मनां पृथक् सृष्टिं शास्ति। 'यथा सुदीप्तात् पावकात् विस्फुलिङ्गाः सहस्रशः प्रभवन्ति स्वरूपास्तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति' इति च जीवात्मनामुत्पत्तिप्रलयावुच्येते सरूपवचनात्। जीवात्मानो हि परमात्मना सरूपा भवन्ति चैतन्ययोगात्। न च क्वचिदश्रवणमन्यत्र श्रुतं वारयितुमर्हति, श्रुत्यन्तरगतस्यापि अविरुद्धस्याधिकस्यार्थस्य सर्वत्रोपसंहर्त्तव्यत्वात्। प्रवेशश्रुतिरप्येवं सति विकारभावापत्त्यैव व्याख्यातव्या 'तदात्मानं स्वयमकुरुत' इत्यादिवत् तस्मादुत्पद्यते जीव इत्येवं प्राप्ते ब्रूमः, नात्मा जीव उत्पद्यत इति। कस्मादश्रुतेः, न ह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति भूयःसु प्रदेशेषु। ननु क्वचिदश्रवणमन्यत्र श्रुतं न वारयतीत्युक्तं, सत्यमुक्तं उत्पत्तिरेव त्वस्य न सम्भवतीति वदामः। कस्मात् नित्यत्वाच्च ताभ्यः। चशब्दादजत्वादिभ्यश्च। नित्यत्वं ह्यस्य श्रुतिभ्योऽवगम्यते, तथाजत्वमविकारित्वमविकृतस्यैव ब्रह्मणो जीवात्मनावस्थानं ब्रह्मात्मता चेति। न चैवंरूपस्योत्पत्तिरुपप

सम्भवादिति प्रत्युदाहरणेन पूर्वपक्षमाह। तत्र प्राप्तं तावदिति। प्रा पूर्ववत्,उपरोधो बाधः। नन्वविकृतब्रह्मैवात्र प्रविष्टं जीवो न तस्यान्त रमिति प्रतिज्ञासिद्धिस्तत्राह। न चेति। जीवः परस्माद्भिन्नः विरुद्ध मंवत्त्वाद्भिन्नस्याविकारत्वे प्रतिज्ञाबाध इति तर्कोपेतविभक्तत्वलिङ्गानुगृ हीतोत्पत्तिश्रुतेर्बलीयस्त्वात् प्रवेशश्रुतिर्जीवरूपविकारात्मना प्रति

द्यते, ताः काः श्रुतयः, 'न जीवो म्रियते' 'स वा एष महानज आत्माऽजरो*ऽमृतोऽभयो ब्रह्म' 'न जायते म्रियते वा विपश्चित्' 'अजो नित्यः शाश्वतोऽयं पुराणः' 'तत् सृष्ट्वा तदेवानुप्राविशत्' 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' 'स एष इह प्रविष्ट आनखाग्रेभ्यः' 'तत्त्वमसि' 'अहं ब्रह्मास्मि' 'अयमात्मा ब्रह्म सर्वानुभूः' इत्येवमाद्या नित्यत्ववादिन्यः सत्यो जीवस्योत्पत्तिं प्रतिबध्नन्ति। ननु प्रविभक्तत्वाद्विकारो विकारत्वाच्चोत्पद्यते इत्युक्तं, अत्रोच्यते, नास्य प्रविभागः स्वतोऽस्ति, 'एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा' इति श्रुतेः, बुद्ध्याद्युपाधिनिमित्तं त्वस्य प्रविभागप्रतिभानमाकाशस्येव घटादिसम्बन्धनिमित्तं। तथाच शास्त्रं 'स वा

श्वर इति व्याख्येयमिति समुदायार्थः, स्वरूपा इति दृष्टान्तश्रुतेर्भावो जीव इति निश्चीयते। ननु आत्मन आकाशः सम्भूत इत्यादौ जीवोत्पत्त्यश्रवणादनुत्पत्तिस्तत्राह। न चेति। एवं विकारत्वे सति विकारप्रपञ्चात्मना स्वात्मानमकुरुतेति वद्विकारजीवात्मना प्रवेश इत्यर्थः। अजत्वादिति श्रुतिः कल्पमध्ये जीवस्यानुत्पत्त्यादिविषया तत्त्वमसीति श्रुतिश्च मठ्ठट इत्यभेदवाक्यवद्व्याख्येयेति प्राप्ते सिद्धान्तयति। एवमिति। धर्मिवत् सत्यो विभागो हेतुरौपाधिको वा नाद्यः असिद्धेरित्याह। अत्रोच्यते नास्येति। द्वितीये जीवस्य न स्वतो विकारत्वसिद्धिः अप्रयोजकत्वादित्याह। बुद्ध्यादाविति। औपाधिकभेदे मानमाह। तथा चेति। मयटो विकारार्थत्वमाशङ्क्याह। तन्मयत्वेति। जाल्मः कामजडः स्त्रीपरतन्त्रः। स्त्रीमय इतिवज्जीवस्य स्वरूपाज्ञानाद्बुद्ध्यादिपरतन्त्रत्वेन भेदकर्तृत्वादिभानात् प्राचुर्यार्थमयट्प्रयोग इत्यर्थः। लिङ्गं निरस्य तदनुग्राह्यश्रुतेर्गतिमाह। यद-

---

* अमरोऽमृत इति वर्ध॰ का॰।

अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः' इत्येवमादि ब्रह्मण एवाविकृतस्य सतोऽस्यैकस्यानेकबुद्ध्यादिमयत्वं दर्शयति। तन्मयत्वञ्चास्य तद्विविक्तस्वरूपानभिव्यक्त्या तदुपरक्तस्वरूपत्वं स्त्रीमयो जाल्म इत्यादिवद्द्रष्टव्यं। यदपि क्वचिदस्योत्पत्तिप्रलयश्रवणं तदप्यत एवोपाधिसम्बन्धान्नेतव्यं, उपाध्युत्पत्त्यौ चास्योत्पत्तिस्तत्प्रलये च प्रलय इति। तथा च दर्शयति 'प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति' इति। तथोपाधिप्रलय एवायं नात्मप्रलय इत्येतदपि, अत्रैव 'मा भगवान्मोहान्तमापीपदन्न वा *अहमिमं विजानामि न प्रेत्य संज्ञास्ति' इति प्रश्नपूर्वकं प्रतिपादयति, 'न वा अरे अहं मोऽहं ब्रवीम्यविनाशी वा अरेऽयमात्मानुच्छित्ति-

---

पीति। जीवस्यौपाधिकजन्मनाशयोः श्रुतिमाह। तथेति। एतेभ्यो देहात्मना परिणतेभ्यो भूतेभ्यः समुत्थाय जनित्वा तान्येव लीयमानान्यनु पश्चाद्विनश्यति प्रेत्यौपाधिकमरणानन्तरं सञ्ज्ञा नास्तीत्यर्थः। न प्रज्ञानघनः सञ्ज्ञा नास्तीति च विरुद्धमित्यत आह। तथेति। उपाधिलयाद्विशेषज्ञानाभावः। एवं सञ्ज्ञाभावो नात्मस्वरूपविज्ञानाभाव इत्युत्तरं प्रतिपादयति श्रुतिरित्यन्वयः। अत्रैवात्मविज्ञानघने प्रेत्य सञ्ज्ञा नास्तीत्युक्त्या मां मोहान्तं मोहमध्यं भ्रान्तिमापीपददपोदितवानिममर्थं न जानामि ब्रूहि त्वदुक्तेरर्थमिति मैत्रेयीप्रश्नार्थः। मुनिराह न वा इति। मोहकरं वाक्यमुच्छित्तिः पूर्वावस्थानाशो धर्मोऽस्येत्युच्छित्तिधर्मा परिणामी, तस्मादविनाशीत्यर्थः, तर्हि न प्रेत्य सञ्ज्ञेति कथमुक्तं तत्राह। मात्रेति। मात्राभिर्विषयैरसंसर्गात् तयोक्तमित्यर्थः। बिम्बप्रतिबिम्बयोरिव विरुद्धधर्मभेदोऽध्यस्त इत्यत्र हेतुमाह। अत उभमिति। जीवस्य विकारित्वे मुख्ययोगात् तत्त्वमसीति वाक्यमखण्डा

---

* अहमिदमिति वर्ध० का०।

धर्मा मायासंसर्गस्तस्य भवति' इति। प्रतिज्ञानुपरोधोऽप्यविकृतस्यैव ब्रह्मणो जीवभावाभ्युपगमात्। लक्षणभेदोऽप्यनयोरुपाधिनिमित्त एव। अत ऊर्द्ध्वं विमोक्षायैव ब्रूहीति च प्रकृतस्यैव विज्ञानमयस्यात्मनः सर्वसंसारधर्मप्रत्याख्यानेन परमात्मभावप्रतिपादनात्। तस्मान्नैवात्मोत्पद्यते प्रविलीयते वेति ॥

ज्ञोऽत एव ॥ १८ ॥ चैतन्य विप्रतिपत्तिः

स किं काणभुजानामिवागन्तुकचैतन्यः स्वतोऽचेतनः आहोस्वित् साङ्ख्यानामिव नित्यचैतन्यस्वरूप एवेति वादिविप्रतिपत्तेः संशयः। किं तावत् प्राप्तं आगन्तुकमात्मनश्चैतन्यमात्ममनःसंयोगजमग्निघटसंयोगजरोहितादिगुणवदिति प्राप्तं। नित्यचैतन्यत्वे हि *सुप्तमूर्च्छितग्रहाविष्टानामपि चैतन्यं स्यात्, ते पृष्टाः सन्तो न किञ्चिद्वयमचेतयामहीति जल्पन्ति। स्वस्था-

मिति वक्तव्यं, तथा च फलवत्प्रधानवाक्यापेक्षितजीवनित्यत्वश्रुतीनां बलवत्त्वादुत्पत्त्यादिकमध्यस्तमनुवदन्त्युत्पत्त्यादिश्रुतय इत्यविरोध इति सिद्धम् ॥

ज्ञोऽत एव। 'आत्मैव स्यात् ज्योतिः' इत्याद्यात्मस्वप्रकाशत्वश्रुतीनां 'पश्यंश्चक्षुः शृण्वन् श्रोत्रम्' इत्यनित्यज्ञानवत्त्वश्रुतिभिर्विरोधोऽत्र निरस्यते अस्य लोकस्य चक्षुर्द्रष्टा श्रोत्रं श्रोतेत्यर्थः। प्रागुक्तजीवानुत्पत्तिहेतुमाश्रित्य स्वप्रकाशत्वसाधनाद्धेतुसाध्यभावः सङ्गतिः। अनुत्पत्तौ हि स्वप्रकाशं ब्रह्मैवोपहितं जीव इति जीवस्य स्वप्रकाशता सिध्यति। न चैवं तार्थता अनुत्पन्नस्याऽपि जीवस्य स्वप्रकाशत्वे ज्ञानसाधनवैयर्थ्यमिति संहितानित्यज्ञानश्रुतिबलेन स्वप्रकाशत्वश्रुतेर्बाध्यतया ब्रह्मण्यत्वायां तदैक्ययोग्यतायै स्वप्रकाशत्वस्यात्र साधनात्, तथा च पूर्वपक्षे जीवस्य ब्रह्मैक्यायोग्यता सिद्धान्ते तद्योग्यतेत्यापादसमाप्तेः फलं अव-

* सुप्तेत्यादि वर्धं० का०।

श्च चेतयमाना दृश्यन्ते, अतः कादाचित्कचैतन्यत्वादागन्तुकचैतन्य आत्मेत्येवं प्राप्तेऽभिधीयते। ज्ञः, नित्यचैतन्योऽयमात्मा, अत एव यस्मादेव नोत्पद्यते परमेव ब्रह्माविकृतमुपाधिसम्पर्काज्जीवभावेनावतिष्ठते। परस्य हि ब्रह्मणः चैतन्यस्वरूपत्वमाम्नातं 'विज्ञानमानन्दं ब्रह्म' 'सत्यं ज्ञानमनन्तं ब्रह्म' 'अनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव' इत्यादिषु श्रुतिषु। तदेव चेत् परं ब्रह्म जीवस्तस्माज्जीवस्यापि नित्यचैतन्यस्वरूपत्वमग्न्यौष्ण्यप्रकाशवदिति गम्यते। विज्ञानमयप्रक्रियायाञ्च श्रुतयो भवन्ति 'असुप्तः सुप्तानभिचाकशीति' इत्यत्र 'अयं पुरुषः स्वयंज्योतिर्भवति' 'न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते'

गन्तव्यं। इष्टापत्तिं निराचष्टे। ते पृष्टा इति। साधनाधीनज्ञानत्वान्न स्वप्रकाशो जीवो व्यतिरेकेणेश्वरवदित्याह। अतः कादाचित्केति। यथाश्रुते भाष्ये हेतोः साध्याविशेष इति मन्तव्यं अतो जीवस्य स्वप्रकाशत्वश्रुतिर्बाध्येति प्राप्ते सिद्धान्तयति। एवमिति। चेच्छब्दो निश्चयार्थः। न केवलं स्वप्रकाशब्रह्माभेदाज्जीवस्य स्वप्रकाशता किन्तु श्रुतितोऽपीत्याह। विज्ञानमयेति। योऽयं विज्ञानमय इति प्रकरणमित्यर्थः। असुप्तः स्वभासमान एवात्मा सुप्तान् लुप्तव्यापारान् वागादीनभिलक्ष्य चाकशीति सुप्तार्थान् पश्यतीति यावत्। अत्र स्वप्ने विज्ञातुर्बुद्धिसत्त्व साक्षिणो विज्ञातेर्विनाशो नास्तीत्यर्थः। घ्राणादिजन्यगन्धादिज्ञानानुसन्धानसिद्धये आत्मनो ज्ञानरूपत्वं वाच्यमिति श्रुत्यन्तरेणाह। अथेति आत्मनो नित्यचिद्रूपत्वेऽपि स्वतोऽसङ्गतया गन्धाद्यसम्बन्धात् तत्सम्बघटनात्मकवृत्त्यर्थानि ज्ञानसाधनानि इति न तेषां वैयर्थ्यमित्याह। गन्धेति। परिच्छेदो वृत्तिः गन्धाय तद्गोचरान्तःकरणवृत्तये इत्यर्थः। सुप्ताद्यवस्थास्वात्मसत्त्वेऽपि चैतन्याभावान्नात्मा चिद्रूप इत्युक्तं दूषयति यत्त्विति। तत् तदा सुप्तौ न पश्यतीति यत् तत्पश्यन्नेवानुसन्धान

इत्येवं रूपाः । अथ 'यो वेदेदं जिघ्राणि' इति 'स आत्मा' इति च सर्वैः करणद्वारैरिदं वेदेदं वेदेति विज्ञानेनानुसन्धानात् तद्रूपत्वसिद्धिः, नित्यस्वरूपचैतन्यत्वे घ्राणाद्यानर्थक्यमिति चेन्न, गन्धादिविषयविशेषपरिच्छेदार्थत्वात्। तथा हि दर्शयति ग-न्धाय घ्राणमित्यादि। यत् तु *सुप्तादयो न चेतयन्त इति तस्य श्रुत्यैव परिहारोऽभिहितः। सुषुप्तं प्रकृत्य 'यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविना-शित्वात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत् पश्येत्' इत्यादिना। एतदुक्तं भवति विषयाभावादियमचेतयमानता न चैतन्याभावादिति। यथा वियदाश्रयस्य प्रकाशस्य प्रकाश्या-भावादनभिव्यक्तिर्न स्वरूपाभावात् तद्वत्। वैशेषिकादितर्कश्च श्रुतिविरोधे आभासोभवति तस्मान्नित्यचैतन्यस्वरूप एवात्मेति निश्चिनुमः ॥

तन्न पश्यतीत्यत्र हेतुः। नहीति। नाशायोग्यत्वादित्यर्थः। किमिति न पश्यतीत्यत आह। न त्विति। वृत्तेः साधनाधीनत्वोक्त्या स्वरूपज्ञा-नस्य साधनाधीनत्वं हेतुरसिद्ध इत्युक्तं, साधनवैयर्थ्यतर्कोऽपि निरस्तः, इत्येवन्नित्याद्यनित्यज्ञानश्रुतीनां वृत्तिविषयत्वं व्याख्यातं, आत्मा न ज्ञान द्रव्यत्वादित्यादितर्कास्त्वागमबाधिताः फलवत्प्रधानवाक्यापेक्षि-तस्वप्रकाशत्वागमस्य बलवत्त्वात्। किञ्च निरवयवात्मनो मनःसंयो-गायोगान्नानित्यज्ञानगुणता समवायाभावाच्च न स्वसमवेतज्ञानवेद्य-ता कर्मकर्तृत्वविरोधाच्च। किञ्च ज्ञानत्वस्यैकवृत्तित्वे लाघवादात्मैव ज्ञानं वृत्तेश्च मनःपरिणामत्वश्रुत्या कामः संकल्प इत्याद्यया ऽङ्गत्वान्नास्माकं ज्ञानद्वैविध्यगौरवमित्यनवद्यमात्मनः स्वप्रकाशत्व-मेति सिद्धं ॥

* सुप्ताद्य इति वर्ध० का०।

जीवपरिमाणविप्रतिपत्तिः

उत्क्रान्तिगत्यागतीनाम् ॥ १९ ॥

इदानीन्तु किंपरिमाणो जीव इति चिन्त्यते, किमणुपरिमाण उत मध्यमपरिमाण आहोस्विन्महत्परिमाण इति। ननु नात्मोत्पद्यते नित्यचैतन्यश्चायमित्युक्तं, अतश्च पर एवात्मा जीव इत्यापतति, परस्य चात्मनोऽनन्तत्वमाम्नातं, तत्र कुतो जीवस्य परिमाणचिन्तावतार इति, उच्यते सत्यमेतत्, उत्क्रान्तिगत्यागतिश्रवणानि तु जीवस्य परिच्छेदं प्रापयन्ति, स्वशब्देन चास्य क्वचिदणुपरिमाणत्वमाम्नायते, तस्य सर्वस्यानाकुलत्वोपपादनायायमारम्भः। तत्र प्राप्तं तावदुत्क्रान्तिगत्यागतीनां श्रवणात् परिच्छिन्नोऽणुपरिमाणो जीव इति, उत्क्रान्तिस्तावत् 'स यदास्माच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्रामति' इति। गतिरपि, 'ये वै के चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति' इति, आगतिरपि 'तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणः' इति, आसामुत्क्रान्तिगत्यागतीनां श्रवणात्

स्वप्रकाशत्वादात्मस्वरूपादीषद्बहिष्ठं परिमाणमेवाश्रिताश्रयत्वेनान्तर्बहिर्भावेनैवासङ्गत्या विचारयति। उत्क्रान्तिगत्यागतीनाम्। विषयसंशयौ दर्शयति। इदानीमिति। नात्माश्रुतेरित्यादिना गतार्थत्वमस्याशङ्क्यात्माणुत्वश्रुतीनां महत्त्वश्रुतीनाञ्च विरोधकथनार्थमस्याधिकरणस्यारम्भ इत्याह। नन्वित्यादिना। न केवलं श्रुतोत्क्रान्त्याद्यनुपपत्त्याऽऽत्मनोऽणुत्वं किन्त्वेषोऽणुरात्मेति श्रुत्यापीत्याह। स्वशब्देनेति। पूर्वपक्षे जीवस्याणुत्वात् ब्रह्मैक्यासिद्धिः सिद्धान्ते तत्सिद्धिरिति मत्वा सूत्रं व्याकुर्वन् पूर्वपक्षमाह। तत्र प्राप्तमित्यादिना। श्रुतेरणुरिति

परिच्छिन्नस्तावज्जीव इति प्राप्नोति, न हि विभोश्चलनमव-कल्पत इति। सति च परिच्छेदे शारीरपरिमाणत्वस्यार्हतपरीक्षायां निरस्तत्वादणुरात्मेति गम्यते ॥

स्वात्मना चोत्तरयोः ॥ २० ॥

उत्क्रान्तिः कदाचिदचलतोऽपि ग्रामस्वाम्यनिवृत्तिवद्देह-स्वाम्यनिवृत्त्या कर्मक्षयेणावकल्पेत, उत्तरे तु गत्यागती नाच-लतः सम्भवतः, स्वात्मना हि तयोः सम्बन्धो भवति, गमेः कर्तृ-स्थक्रियात्वात्। अमध्यमपरिमाणस्य च गत्यागती अणुत्व एव सम्भवतः। सत्योश्च गत्यागत्योरुत्क्रान्तिरप्यपसृप्तिरेव देहादिति प्रतीयते, न ह्यनपसृप्तस्य देहाद्गत्यागती स्याताम्। देहप्रदेशाना-मोत्क्रान्तावपादानत्ववचनाच्चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरी-

---

उत्तरसूत्रादाकृष्य सूत्रं पूरितं, उत्क्रान्तिः श्रूयत इति शेषः। स मुमूर्षुः जीव एतैर्बुद्ध्यादिभिस्तस्माच्चन्द्रलोकादिमं लोकं प्रति कर्म कर्तुमायातीत्यर्थः ॥

उत्क्रान्तिरात्मनो देहान्निर्गमो न भवति येनाणुत्वं स्यात् किन्तु स्वा-मित्वनिवृत्तिरिति केचित्। तदङ्गीकृत्याप्यणुत्वमावश्यकमित्याह। स्वा-त्मनेति। उत्क्रान्तेरुत्तरयोर्गत्यागत्योः स्वात्मना कर्त्रा सम्बन्धादणुत्वमिति सूत्रयोजना, पाकानाश्रयस्य पक्तृत्ववद्गत्यनाश्रयस्यापि गन्तृत्वोक्तिः किं स्यादित्यत आह। गमेरिति। गमनस्य कर्तरि संयोगविभाग-प्रातिशय्यहेतुत्वात् कर्त्राश्रितत्वं लोकसिद्धमित्यर्थः। जीवोऽणुरमध्य-परिमाणत्वे सति गतिमत्त्वात् परमाणुवदित्याह। अमध्यमेति। देहाकारं व्यजति। सत्योश्चेति। न स्वाम्यनिवृत्तिमात्रं उत्क्रान्तिरि-त्यर्थः। देहान्निर्गम एवोत्क्रान्तिरित्यत्र लिङ्गान्तरमाह। देहप्रदेशा-

रदेशेभ्य इति। स एतास्तेजोमात्राः समभ्याददानो हृदय-मेवान्ववक्रामति शुक्रमादाय पुनरेति स्थानमिति चान्तरेऽपि शरीरे शारीरस्य गत्यागती भवतस्तस्मादप्यस्याणुत्वसिद्धिः॥

नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्॥ २१॥

अथापि स्यान्नाणुरयमात्मा, कस्मादतच्छ्रुतेः अणुत्वविपरीतपरिमाणश्रवणादित्यर्थः। 'स वा एष महानज आत्मा, योऽयं विज्ञानमयः प्राणेषु, आकाशवत् सर्वगतश्च नित्यः, सत्यं ज्ञानमनन्तं ब्रह्म' इत्येवंजातीयका हि श्रुतिरात्मनोऽणुत्वे विप्रतिषिध्येतेति चेन्नैष दोषः। कस्मादितराधिकारात्। परस्य ह्यात्मनः प्रक्रियायामेषा परिमाणान्तरश्रुतिः, परस्यैवात्मनः प्राधान्येन वेदान्तेषु वेदितव्यत्वेन प्रकृतत्वात्, विरजः पर आकाशादित्येवंविधाच्च परस्यैवात्मनः तत्र तत्र विशेषाधिकारात्। ननु 'योऽयं विज्ञानमयः प्राणेषु' इति शारीर एव महत्त्वसम्बन्धित्वेन प्रति-

---

वामिति। अपादानत्वं अवधित्वं अन्येभ्यो वा मुखादिभ्य एष आत्मा निष्क्रामतीति शेषः। किञ्च देहमध्येऽपि जीवस्य गत्यागतिश्रुतेरणुत्वमित्याह। स इति। इन्द्रियाणि गृह्णन् स्वापादौ हृदयं स जीवो गच्छति शुक्रं प्रकाशकं इन्द्रियग्राममादाय पुनर्जागरितस्थानमागच्छतीत्यर्थः॥

इतराधिकाराद्ब्रह्मप्रकरणात्। ननु महत्त्वश्रुतेः कथं परप्रकरणस्थत्वमित्यत आह। परस्यैवेति। या वेदान्तश्रुतिः सा परप्रकरणस्थेत्युत्सर्गात् तस्मात्तत्स्थत्वं ब्रह्मारभ्याधीतत्वाच्चेत्याह। विरज इति। निर्दोष इत्यर्थः। विज्ञानमयश्रुत्या प्रकरणं बाध्यमिति शङ्कते। नन्विति

निर्दिश्यते। शास्त्रदृष्ट्या त्वेष निर्देशो वामदेववद्द्रष्टव्यः, तस्मात् प्राज्ञविषयत्वात् परिमाणान्तरश्रवणस्य न जीवस्याणुत्वं विरुध्यते॥

स्वशब्दोन्मानाभ्याञ्च॥ २२॥

इतश्चाणुरात्मा यतः साक्षादेवास्याणुत्ववाची शब्दः श्रूयते, 'एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पञ्चधा संविवेश' इति, प्राणसम्बन्धाच्च जीव एवायमणुरभिहित इति गम्यते। *तथा चोन्मानमपि जीवस्याणिमानं गमयति 'बालाग्रशतभागस्य शतधा कल्पितस्य तु। भागो जीवः स विज्ञेयः' इति 'आराग्रमात्रो ह्यवरोऽपि दृष्टः' इति चोन्मानान्तरं। नन्वणुत्वे सत्येकदेशस्थस्य सकलदेहगतोपलब्धिर्विरुध्यते, दृश्यते च जाह्नवीह्रदनिमग्नानां सर्वाङ्गशैत्योपलब्धिर्निदाघसमये च सकलशरीरपरितापोपलब्धिरित्यत उत्तरं पठति॥

...णोर्जीवस्य ब्रह्मणा भेदाभेदाङ्गीकाराच्छास्त्रीयाभेददृष्ट्या सहत्त्वो-...र्गया वामदेवस्याहं मनुरिति सर्वात्मत्वोक्तिरित्यविरोधमाह। ...स्त्वेति॥

एवमुत्क्रान्त्यादिश्रुत्याणुत्वमनुमितं, तत्र श्रुतिमप्याह। स्वशब्देति। ...लाग्रादुद्धृतः शततमो भागस्तस्मादप्युद्धृतः शततमो भागो जीव ...ति उद्धृत्य मानमुन्मानमत्यन्ताल्पत्वमित्यर्थः। बालः केशः, तोत्त्रप्रो-...यःशलाकाग्रमाराग्रं, तस्मादुद्धृता मात्रा मानं यस्य स जीवस्तथा॥

---

* तथोन्मानमिति वर्ध० का०।

अविरोधश्चन्दनवत् ॥ २३ ॥

यथाहि हरिचन्दनविन्दुः शरीरैकदेशसम्बन्धोऽपि सन् सकलदेहव्यापिनमाह्लादं करोति, एवमात्मापि देहैकदेशस्थः सकलदेहव्यापिनीमुपलब्धिं करिष्यति, त्वक्सम्बन्धाच्चास्य सकलशरीरगता वेदना न विरुध्यते, त्वगात्मनोर्हि सम्बन्धः कृत्स्नायां त्वचि वर्त्तते, त्वक् च कृत्स्नशरीरव्यापिनीति ॥

अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥ २४ ॥

अत्राह यदुक्तमविरोधश्चन्दनवदिति तदयुक्तं, दृष्टान्तदार्ष्टान्तिकयोरतुल्यत्वात्, सिद्धे ह्यात्मनो देहैकदेशस्थत्वे चन्दनदृष्टान्तो भवति, प्रत्यक्षन्तु चन्दनस्यावस्थितिवैशेष्यमेकदेशस्थत्वं सकलदेहाह्लादनं च आत्मनः पुनः सकलदेहोपलब्धिमात्रं प्रत्यक्षं नैकदेशवर्त्तित्वं। अनुमेयन्तु तदिति यदप्युच्येत, न चात्रानुमानं सम्भवति। किमात्मनः सकलशरीरगता वेदना त्वगिन्द्रियस्येव सकलदेहव्यापिनः सतः किं वा विभोर्नभस इव आ-

---

आत्मसंयुक्तायास्त्वचो देहव्यापिस्पर्शोपलब्धिकरत्वात्स्य मध्यस्थाऽऽत्मनोऽव्यापिकार्य्यकारित्वमविरुद्धं। त्वगात्मनोरिति सम्बन्धस्य त्वगवयविनिष्ठत्वादवयविनश्चैकत्वादात्मसंयोगस्य कृत्स्नत्वङ्निष्ठतेत्यर्थः ॥

सिद्धे हीति। न तु सिद्धमित्यतुल्यतेत्यर्थः। विशेष एव वैशेष्यं, चन्दनबिन्दोरल्पत्वस्य प्रत्यक्षत्वात् त्वग्व्याप्यव्यापिकार्य्यकारित्वकल्पना युक्ता जीवस्य त्वणुत्वे सन्देहाद्व्यापिकार्यदृष्ट्या व्यापित्वकल्पनमेव युक्तं। अ

देशस्थचन्दनबिन्दोरिवाणोरेकदेशस्थस्येति संशयानिवृत्तेरिति। अत्रोच्यते नायं दोषः। कस्मात् अभ्युपगमात्। अभ्युपगम्यते ह्यात्मनोऽपि चन्दनस्येव देहैकदेशवृत्तित्वमवस्थितिवैशेष्यं कथमिति उच्यते। हृदि हि। एष आत्मा पठ्यते वेदान्तेषु 'हृदि ह्येष आत्मा' 'स वा एष आत्मा' 'हृदि कतम आत्मा' इति 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः' इत्याद्युपदेशेभ्यः। तस्माद्दृष्टान्तदार्ष्टान्तिकयोरवैषम्याद्युक्तमेवैतदविरोधश्चन्दनवदिति॥

गुणाद्वा लोकवत्॥ २५॥

चैतन्यगुणव्याप्तेर्वाणोरपि सतो जीवस्य सकलदेहव्यापि कार्य्यं न विरुध्यते। यथा लोके मणिप्रदीपप्रभृतीनामपवरकैकदेशवर्त्तिनामपि प्रभाऽपवरकव्यापिनी सती कृत्स्नेऽपवरके कार्य्यं करोति तद्वत्। स्यात् कदाचिच्चन्दनस्य सावयवत्वात् सूक्ष्मावयवविसर्पणेनापि सकलदेहे आह्लादयितृत्वं न त्वणोर्जीव-

---

पिकार्य्याश्रयो व्यापीत्युत्सर्गादिति सूत्रशङ्काभागार्थः। आत्माल्पः व्यापिकार्य्यकारित्वाच्चन्दनबिन्दुवदित्यनुमानमयुक्तं, त्वगादौ व्यभिचारादित्याह। न चात्रानुमानमिति। पूर्व्वोक्तश्रुतिभिर्जीवस्याणुत्वनिश्चयाद्धृदिस्थत्वश्रुतिभिरेकदेशस्थत्वनिश्चयाच्च न दृष्टान्तवैषम्यमिति परिहारभागार्थमाह। अत्रोच्यत इति॥

आत्मवत्तद्धर्म्मज्ञानस्याप्यणुत्वं स्वतः, कादाचित्कन्तु देहपरिमाणत्वमित्युक्ता स्वत एव व्यापित्वमिति मतान्तरमाह। गुणादिति। वाशब्देन चन्दनदृष्टान्तापरितोषः सूचितस्तमाह। स्यादिति। उत्तरसूत्र-

स्यावयवाः सन्ति यैरयं सकलं देहं विप्रसर्पेदित्याशङ्क्य गुणाद्वा लोकवदित्युक्तं, कथं पुनर्गुणो गुणिव्यतिरेकेणान्यत्र वर्त्तेत, नहि पटस्य शुक्लो गुणः पटव्यतिरेकेणान्यत्र वर्त्तमानो दृश्यते। प्रदीपप्रभावद्भवेदिति चेन्न, तस्या अपि द्रव्यत्वाभ्युपगमात्। निविडावयवं हि तेजोद्रव्यं प्रदीपः, प्रविरलावयवन्तु तेजो-द्रव्यमेव प्रभेति अत उत्तरं पठति॥

व्यतिरेको गन्धवत्॥ २६॥

यथा गुणस्यापि सतो गन्धस्य गन्धवद्द्रव्यव्यतिरेकेण वृत्तिर्भवति अप्राप्तेष्वपि कुसुमादिषु गन्धवत्सु गन्धोपलब्धेः एवमणोरपि सतो जीवस्य चैतन्यगुणव्यतिरेको भविष्यति, अतश्चानैकान्तिकमेतद्गुणत्वाद्रूपादिवत् आश्रयविश्लेषानुपपत्ति-रिति गुणस्यैव सतो गन्धस्याश्रयविश्लेषदर्शनात्, गन्धस्यापि सहैवाश्रयेण विश्लेष इति चेन्न, यस्मान्मूलद्रव्यादिश्लेषस्तस्य

व्यावर्त्यं शङ्कते। कथमिति। ज्ञानं न गुणिव्यतिरिक्तदेशव्यापि गुणत्वाद्रूपवत्, न च प्रभायां व्यभिचारस्तस्या अपि द्रव्यत्वादिति प्राप्ते गन्धव्यभिचारमाह। अत उत्तरमिति॥

गुणस्य द्रव्यव्यतिरेक आश्रयविश्लेषः। ननु विश्लिष्टावयवानामल्पत्वा-द्द्रव्यक्षयो न भातीत्यत आह। अक्षीयमाणमपीति। अपिरवधारणे, पूर्व्वावस्थालिङ्गेनाक्षीयमाणमेव तद्द्रव्यमनुमीयत इत्यर्थः। विमतं कु विश्लिष्टावयवं पूर्व्वावस्थातो गुरुत्वाद्यपचयहीनत्वात् सम्मतवदिति भावः। शङ्कते। स्यादेतदिति। विश्लिष्टानामल्पत्वादित्युपलक्षणं, अवय-वान्तराणां प्रवेशादित्यपि द्रष्टव्यं। विशेषोऽवयवानां विश्लेषप्रवेशरूप

क्षयप्रसङ्गात्। अक्षीयमाणमपि तत्पूर्वावस्थातो गम्यते, अन्यथा तत्पूर्वावस्थैर्गुरुत्वादिभिर्हीयेत। स्यादेतत् गन्धाश्रयाणां विश्लिष्टानामवयवानामल्पत्वात् सन्नपि विशेषो नोपलक्ष्यते, सूक्ष्मा हि गन्धपरमाणवः सर्वतो विप्रसृता गन्धबुद्धिमुत्पादयन्ति नासिकापुटमनुप्रविशन्त इति चेत्, न अतीन्द्रियत्वात् परमाणूनां, स्फुटगन्धोपलब्धेश्च नागकेशरादिषु। न च लोके प्रतीतिर्गन्धवद्द्रव्यमाघ्रातं इति, गन्ध एवाघ्रात इति तु लौकिकाः प्रतीयन्ति। रूपादिष्वाश्रयव्यतिरेकानुपलब्धेर्गन्धस्याप्ययुक्त आश्रयव्यतिरेक इति चेत्, न प्रत्यक्षत्वादनुमानाप्रवृत्तेः, तस्माद्यद्यथा लोके दृष्टं तत् तथैवानुमन्तव्यं निरूपकैर्नान्यथा। न हि रसो गुणो जिह्वयोपलभ्यत इति अतो रूपादयोऽपि गुणा जिह्वयैवोपलभ्येरन्निति नियन्तुं शक्यते॥

तथा च दर्शयति॥ २७॥

हृदयायतनत्वमणुपरिमाणत्वं चात्मनोऽभिधाय तस्यैव

सन्नपि न ज्ञायते, तथा च गुरुत्वापचयो न भवतीति हेतोरन्यथासिद्धिरिति शङ्कार्थः। आगच्छन्तोऽवयवाः परमाणवस्त्रसरेणवो वा, नाद्यस्तद्गतरूपवद्गन्धस्याप्यनुपलब्धिप्रसङ्गादिति परिहरति। नेति। द्वितीयं प्रत्याह। स्फुटेति। त्रसरेणुगन्धश्चेत् स्फुटो न स्यादित्यर्थः। अतो गन्धस्य पुष्पादिष्वस्यैव गुणिव्यतिरेको वाच्य इति भावः। गन्धो न गुणिविश्लिष्टः गुणत्वात् रूपवदिति शङ्कते। रूपेति। विश्लेषस्य प्रत्यक्षत्वाद्बाध इत्याह। नेति॥

आत्मनश्चैतन्यगुणेनैव देहव्याप्तिरित्यत्र श्रुतिमाह सूत्रकारः। तथा च दर्शयतीति। तद्व्याचष्टे। हृदयेति॥

'आलोमभ्य आनखाग्रेभ्यः' इति चैतन्येन गुणेन समस्तशरीरव्यापित्वं दर्शयति ॥

पृथगुपदेशात् ॥ २८ ॥

'प्रज्ञया शरीरं समारुह्य' इति चात्मप्रज्ञयोः कर्तृकरणभावेन पृथगुपदेशात् चैतन्यगुणेनैवास्य शरीरव्यापिताऽवगम्यते, तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति च कर्तुः शरीरात् पृथग्विज्ञानस्योपदेशः, एतमेवाभिप्रायमुपोद्बलयति, तस्मादणुरात्मेत्येवं प्राप्ते ब्रूमः ॥

तद्गुणसारत्वात् तु तद्व्यपदेशः प्राज्ञवत् ॥ २९ ॥

तुशब्दः पक्षं व्यावर्तयति। नैतदस्त्यणुरात्मेति, उत्पत्त्यश्रवणात्, परस्यैव तु ब्रह्मणः प्रवेशश्रवणात् तादात्म्योपदेशाच्च परमेव ब्रह्म जीव इत्युक्तं। परमेव चेद्ब्रह्म जीवः तस्माद्यावत् परं ब्रह्म तावानेव जीवो भवितुमर्हति, परस्य च ब्रह्मणो विभुत्वमाम्नातं, तस्माद्विभुर्जीवः। तथा च 'स वा एष महानज

तत्रैव श्रुत्यन्तरार्थं सूत्रं। पृथगिति। विज्ञानमिन्द्रियाणां ज्ञानशक्तिं विज्ञानेन चैतन्यगुणेनादाय शेत इत्यर्थः। एतं चैतन्यगुणव्याप्तिगोचरमभिप्रायं ॥

तत्रात्माणुत्वविभुत्वश्रुतीनां विरोधादप्रामाण्यप्राप्तावणुत्वं जीवस्य विभुत्वमीश्वरस्येत्यविरोध इत्येकदेशिपक्षो दर्शितस्तं दूषयन् सिद्धान्तसूत्रं व्याचष्टे। तुशब्द इत्यादिना। तस्माद् ब्रह्माभिन्नत्वात् विभुर्जीवः ब्रह्मवदित्यनुमानानुगृहीते श्रुतिस्मृती आह। तथा च

आत्मा योऽयं विज्ञानमयः प्राणेषु' इत्येवंजातीयका जीवविषया विभुत्ववादाः श्रौताः स्मार्ताश्च समर्थिता भवन्ति। न चाणोर्जीवस्य सकलशरीरगता वेदनोपपद्यते। त्वक्सम्बन्धात् स्यादिति चेत्, न, त्वक्कण्टकतोदनेऽपि सकलशरीरगतैव वेदना प्रसज्येत, त्वक्कण्टकयोर्हि संयोगः कृत्स्नायां त्वचि वर्त्तते, त्वक् च कृत्स्नशरीरव्यापिनीति पादतल एव तु कण्टकतुन्ना वेदनां प्रतिलभन्ते। न चाणोर्गुणव्याप्तिरुपपद्यते गुणस्य गुणिदेशत्वात्, गुणत्वमेव हि गुणिनमनाश्रित्य गुणस्य हीयेत। प्रदीपप्रभायाश्च द्रव्यान्तरत्वं व्याख्यातं, गन्धोऽपि गुणत्वाभ्युपगमात् साश्रय एव सञ्चरितुमर्हति, अन्यथा गुणत्वहानिप्रसङ्गात्। तथा

स वा एष इति। नित्यः सर्व्वगतः स्थाणुरित्याद्याः स्मार्त्तवादाः। एतेन जीवस्य ब्रह्माभेदज्ञानेऽणुत्वाभावधीस्तस्यां तदित्यन्योन्याश्रय इति निरस्तं। प्रधानमहद्वाक्यानुगुणश्रुतिस्मृतिभिरणुत्वाभावनिश्चयानन्तरमभेदज्ञानात् प्रधानवाक्यविरोधे गुणभूताणुत्वश्रुतीनामौपाधिकाणुत्वविषयकल्पनादगुणे त्वन्याय्यकल्पनेति न्यायादिति भावः। किञ्च सर्व्वदेहव्यापिशैत्यानुभवान्यथानुपपत्त्याऽणुत्वविषयत्वेन कथञ्चिदर्थवादा नेयाः लौकिकन्यायादपि तेषां दूर्बलत्वादिति न्यायादिति मत्वाह। न चाणोरिति। शङ्कते। त्वगिति। यथैवात्मसम्बन्धस्य त्वग्व्याप्त्या देहव्यापिनी वेदना स्यात् तर्ह्यतिप्रसङ्ग इति दूषयति। नेति। प्रसङ्गस्येष्टत्वं निरस्यति। पादतल एवेति। तस्मादल्पमहतोः संयोगो न महद्व्यापी कण्टकसंयोगस्य देहव्याप्त्यदर्शनात्, तथा च आत्मसंयोगस्त्वगेकदेशस्य एवेति देहव्यापिवेदनानुपपत्तिः। न च सिद्धान्ते त्वगात्मसम्बन्धस्य व्यापित्वात् कण्टकसम्बन्धे देहव्यापिवेदनाप्रसङ्ग इति वाच्यं। यावती विषयसम्बन्धा त्वक् ताव-

चोक्तं भगवता द्वैपायनेन 'उपलभ्याप्सु चेद्गन्धं केचिद्ब्रूयुरनैपुणाः । पृथिव्यामेव तं विद्यादपो वायुञ्च संश्रितमिति । यदि चैतन्यं जीवस्य समस्तशरीरं व्याप्नुयान्नाणुर्जीवः स्यात्, चैतन्यमेव ह्यस्य स्वरूपमग्नेरिवौष्ण्यप्रकाशौ, नात्र गुणगुणिविभागो विद्यत इति । शरीरपरिमाणत्वञ्च प्रत्याख्यातं, पारिशेष्याद्विभुर्जीवः । कथं तर्ह्यणुत्वादिव्यपदेश इत्यत आह । तद्गुणसारत्वात् तु तद्व्यपदेश इति । तस्या बुद्धेर्गुणास्तद्गुणा इच्छा द्वेषः सुखं दुःखं इत्येवमादयस्तद्गुणाः सारः प्रधानं यस्यात्मनः संसारित्वे सम्भवति स तद्गुणसारस्तस्य भावस्तद्गुणसारत्वं । न हि बुद्धेर्गुणैर्विना केवलस्यात्मनः संसारित्वमस्ति बुद्ध्युपाधिधर्माध्यासनिमित्तं हि कर्तृत्वभोक्तृत्वादिलक्षणं संसारित्वमकर्तुरभोक्तुश्चासंसारिणो

ह्यात्यात्मसम्बन्धस्तावद्व्यापिवेदनाहेतुरिति नियमात् । न चैवं विषयत्वक्सम्बन्ध एव तद्धेतुरस्तु किमात्मव्याप्त्येति वाच्यं । वेदना हि सुखं दुःखं तदनुभवश्च, न चैषां व्यापकानां कार्याणामल्पमुपादानं सम्भवति कार्यस्योपादानाद्विश्लेषानुपपत्तेः । न चैषां व्यापकत्वमसिद्धं सूर्यतप्तस्य गङ्गानिमग्नस्य सर्वाङ्गव्यापिदुःखसुखानुभवस्य दुरपह्नवत्वात् । यदुक्तं गुणस्यापि गुणिविश्लेषो गन्धवदिति तन्नेत्याह । न चाणोरिति गन्धो नाश्रयाद्विश्लिष्टः गुणत्वाद्रूपवदित्यत्रागममाह । तथा चोक्तमिति । न च प्रत्यक्षबाधः गन्धस्य प्रत्यक्षत्वेऽपि निराश्रयत्वस्याप्रत्यक्षत्वान्महतां त्रसरेणूनामनुद्भूतस्पर्शानामुद्भूतगन्धानामागमनात् स्पृष्टगन्धोपलम्भसम्भवः, अवयवान्तरप्रवेशान्न सहसा मूलद्रव्यक्षय इति भावः । पूर्वं चैतन्यस्य गुणत्वमुपेत्य तद्व्याप्त्या गुण्यात्मनोऽणुत्वं निरस्तं, सम्प्रति तस्य गुणत्वमसिद्धमित्याह । यदि चैतन्यमिति । उत्सूत्रं सूत्रं विना विभुत्वं प्रसाध्याणुत्वाद्युक्तेर्गतिप्रदर्शनार्थं सूत्रं व्याचष्टे । कथमित्यादिना

नित्यमुक्तस्य सत आत्मनस्तस्मात् तद्गुणसारत्वाद्बुद्धिपरिमाणेनास्य परिमाणव्यपदेशः, तदुत्क्रान्त्यादिभिश्चास्योत्क्रान्त्यादिव्यपदेशो न स्वतः, तथा च,

"बालाग्रशतभागस्य शतधा कल्पितस्य तु।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते" ॥

इत्यणुत्वं जीवस्योक्त्वा तस्यैव पुनरानन्त्यमाह। तच्चैवमेव समञ्जसं स्यात् यद्यौपचारिकमणुत्वं जीवस्य भवेत् पारमार्थिकञ्चानन्त्यं। न ह्युभयं मुख्यमवकल्पेत। न चानन्त्यमौपचारिकमिति शक्यं विज्ञातुं सर्वोपनिषत्सु ब्रह्मात्मभावस्य प्रतिपिपादयिषितत्वात्।*तथेतरस्मिन्नप्युन्माने बुद्धेर्गुणेनात्मगुणेन चैव 'आराग्रमात्रो ह्यवरोऽपि दृष्टः' इति बुद्धिगुणसम्बन्धेनैवाराग्रमात्रतां शास्ति न स्वेनैवात्मना। 'एषोऽणुरात्मा चेतसा वेदितव्यः' इत्यत्राऽपि न जीवस्याणुपरिमाणत्वं शिष्यते परस्यैवात्मनश्चक्षुराद्यनवगा-

---

अन्तरा विज्ञानमनसी हृदि होति च प्रकृता बुद्धिर्योग्यत्वात् तच्छब्देन परामृश्यते। बुद्धिगुणानामात्मन्यध्यासादणुत्वाद्युक्तिर्न स्वतः आनन्त्यश्रुतिविरोधादित्याह। तथा चेति। अकार्यकारणद्रव्यसमानाधिकरणतया तत्त्वमसीति वाक्यस्य सोऽयमिति वाक्यवदखण्डाभेदार्थत्वादानन्त्यं सत्यमणुत्वमध्यस्तमित्यर्थः। उक्तञ्चैतदङ्गुष्ठाधिकरणे 'प्रतिपाद्यविरुद्धमुद्देश्यगतविशेषणमविवक्षितं' इति बालाग्रवाक्यमाराग्रवाक्यञ्चेत्युन्मानद्वयमुक्तं तत्राद्यं निरस्य द्वितीयं निरस्यति। तथेतरस्मिन्नपीति। बुद्धेर्गुणनिमित्तेनात्मन्यध्यस्तो गुणो भवति तेनात्मगुणेनाध्यस्तेनैवाराग्रपरिमाणोऽपकृष्टश्च जीवो दृष्टः स्वतस्त्वनन्त एवेत्यर्थः।

---

* तथोत्तरस्मिन्निति वर्ध० का०।

त्वेन ज्ञानप्रसादावगम्यत्वेन च प्रकृतत्वात्, जीवस्याऽपि च मुख्याणुपरिमाणत्वानुपपत्तेः, तस्माद्दुर्ज्ञानत्वाभिप्रायमिदमणुत्ववचनमुपाध्यभिप्रायं वा द्रष्टव्यं। तथा प्रज्ञया शरीरं समारुह्येत्येवंजातीयकेष्वपि भेदोपदेशेषु बुद्ध्यैवोपाधिभूतया जीवः शरीरं समारुह्येत्येवं योजयितव्यं व्यपदेशमात्रं वा शिलापुत्रकस्य शरीरमित्यादिवत्। न ह्यत्र गुणगुणिविभागो विद्यत इत्युक्तं। हृदयायतनत्ववचनमपि बुद्धेरेव तदायतनत्वात्। तथोत्क्रान्त्यादीनामप्युपाध्यायत्ततां दर्शयति 'कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामि' इति, 'स प्राणमसृजत' इति। उत्क्रान्त्यभावे हि गत्यागत्योरप्यभावो विज्ञायते, न ह्यनपसृप्तस्य देहाद्गत्यागती स्यातां। एवमुपाधिगुणसारत्वाज्जीवस्याणुत्वादिव्यपदेशः प्राज्ञवत्, यथा प्राज्ञस्य परमात्मनः सगुणेषूपासनेषूपाधिगुणसारत्वादणीयस्त्वादिव्यपदेशोऽणीयान् व्रीहेर्वा यवाद्वा मनोमयः प्राणशरीरः सर्वगन्धः सर्वरसः सत्यकामः सत्यसङ्कल्प इत्येवंप्रकारस्तद्वत्।

'न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा। ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः' इत्युक्त्वा एषोऽणुरात्मेत्युक्तः पर एव यदि जीवः तथाप्यध्यस्ताणुत्वं अणुशब्दार्थ इत्याह। जीवस्यापीति। यदुक्तं पृथगुपदेशाच्चैतन्यगुणेनैवात्मनो देहव्याप्तिरिति तत्राह। तथा प्रज्ञयेति। बुद्धिप्रज्ञयेत्यर्थः। यदि चैतन्यं प्रज्ञा तदा भेदोपचार इत्याह। व्यपदेशमात्रं वेति। न चैतन्यं गुण इति भेदो मुख्योऽस्तु नेत्याह। न ह्यत्रेति। निर्गुणत्वश्रुते

स्यादेतत् यदि बुद्धिगुणसारत्वादात्मनः संसारित्वं कल्प्येत ततो बुद्ध्यात्मनोर्भिन्नयोः संयोगावसानमवश्यं भावीत्यतो बुद्धिवियोगे सत्यात्मनो विभक्तस्यानालक्ष्यत्वादसत्त्वमसंसारित्वं वा प्रसज्येतेत्यत उत्तरं पठति ॥

बुद्धियोग विप्रतिपत्तिः

यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥ ३० ॥

नेयमनन्तरनिर्दिष्टदोषप्राप्तिराशङ्कनीया, कस्मात् यावदात्मभावित्वात्। बुद्धिसंयोगस्य यावदयमात्मा संसारी भवति यावदस्य सम्यग्दर्शनेन संसारित्वं न निवर्तते तावदस्य बुद्ध्या संयोगो न शाम्यति। यावदेव चायं बुद्ध्युपाधिसम्बन्धस्तावदेवास्य जीवस्य जीवत्वं संसारित्वञ्च, परमार्थतस्तु न जीवो नाम बुद्ध्युपाधिपरिकल्पितस्वरूपव्यतिरेकेणास्ति। न हि नित्यमुक्तस्वरूपात् सर्वज्ञादीश्वरादन्यश्चेतनधातुर्द्वितीयो वेदान्तार्थनिरूपणायामुपलभ्यते 'नान्योऽतोऽस्ति द्रष्टा श्रोता मन्ता विज्ञाता' 'नान्यदतोऽस्ति द्रष्टृ श्रोतृ मन्तृ विज्ञातृ' 'तत्त्वमसि' 'अहं ब्रह्मास्मि'

रित्यर्थः। अन्यदपि पूर्वोक्तं बुद्ध्याद्युपाधिकमित्याह। हृदयेत्यादिना। सौत्रं दृष्टान्तं विवृणोति। यथेति। असत्त्वमित्यापाततः असंसारित्वमापाद्यं। शेषं सुबोधं।

ननु स्वतः संसारित्वमस्तु किं बुद्ध्युपाधिनेत्यत आह। यावदेव चायमिति। समानो बुद्धितादात्म्यापन्नः सन् विज्ञानं ब्रह्म तन्मयो विकारोऽणुरित्यर्थः किं न स्यादित्यत आह। प्रदेशान्तर इति। विज्ञानमयो बुद्धिप्रचुर इत्यर्थः। केन समान इत्याकाङ्क्षायामिति

इत्यादिश्रुतिशतेभ्यः। कथं पुनरवगम्यते यावदात्मभावी बुद्धिसंयोग इति तद्दर्शनादित्याह। तथा हि शास्त्रं दर्शयति 'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः स समानः सन्नुभौ लोकावनुसञ्चरति ध्यायतीव लेलायतीव' इत्यादि। तत्र विज्ञानमय इति बुद्धिमय इत्येतदुक्तं भवति। प्रदेशान्तरे 'विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः' इति विज्ञानस्य मनआदिभिः सह पाठात् बुद्धिमयत्वञ्च तद्गुणसारत्वमेवाभिप्रेयते, यथा लोके स्त्रीमयो देवदत्तः इति स्त्रीरागादिप्रधानोऽभिधीयते तद्वत्। स समानः सन्नुभौ लोकावनुसञ्चरति इति च लोकान्तरगमनेऽप्यवियोगं बुद्ध्यादेर्दर्शयति, केन समानस्तयैव बुद्ध्या इति गम्यते सन्निधानात्। तच्च दर्शयति 'ध्यायतीव लेलायतीव' इति, एतदुक्तं भवति नायं स्वतो ध्यायति नापि चलति ध्यायन्त्यां बुद्धौ ध्यायतीव चलन्त्यां चलतीवेति। अपि च मिथ्याज्ञानपुरःसरोऽयमात्मनो बुद्ध्युपाधिसम्बन्धः, न च मिथ्याज्ञानस्य सम्यग्ज्ञानादन्यत्र निवृत्तिरस्तीत्यतो यावत् ब्रह्मात्मतानवबोधस्तावदयं बुद्ध्याद्युपाधिसम्बन्धो न शाम्यति। दर्शयति च

शेषः। श्रुतिबलाद्बुद्धेर्यावत्संसार्यात्मभावित्वमुक्तं सति मूले कार्यस्य वियोगासम्भवाच्चेति युक्त्याप्याह। अपि च मिथ्येति। सम्यग्ज्ञानादेव बुद्ध्यादिसम्बन्धध्वंस इत्यत्र श्रुतिमाह। दर्शयतीति। महान्तमवैतीत्यन्वयः। आदित्यवर्णं स्वप्रकाशं। तमसः परस्तादज्ञानास्पृष्टमि

'वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् । तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति । ननु सुषुप्तप्रलययोर्न शक्यते बुद्धिसम्बन्धः आत्मनोऽभ्युपगन्तुं 'सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति' इति वचनात् कृत्स्नविकारप्रलयाभ्युपगमाच्च तत्कथं यावदात्मभावित्वं बुद्धिसम्बन्धस्येत्युच्यते ॥

पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ ३१ ॥

यथा लोके पुंस्त्वादीनि बीजात्मना विद्यमानान्येव बाल्यादिष्वनुपलभ्यमानानि अविद्यमानवदभिप्रेयमाणानि यौवनादिष्वाविर्भवन्ति, नाविद्यमानान्युत्पद्यन्ते षण्ढादीनामपि तदुत्पत्तिप्रसङ्गात्, एवमयमपि बुद्धिसम्बन्धः शक्त्यात्मना विद्यमान एव सुषुप्तप्रलययोः पुनः प्रबोधप्रसवयोराविर्भवति । एवं ह्येतद्युज्यते, न ह्याकस्मिकी कस्यचिदुत्पत्तिः सम्भवति अतिप्रसङ्गात् । दर्शयति च सुषुप्तादुत्थानमविद्यात्मकबीजसद्भावकारितं सति सम्पद्य न विदुः सति सम्पद्यामह इति

त्यर्थः । यावदात्मभावित्वस्यासिद्धिं शङ्कते । नन्विति । सुषुप्तौ बुद्धिसत्त्वे ब्रह्मसम्पत्तिर्न स्यात् प्रलये तत्सत्त्वे प्रलयव्याहतिरित्यर्थः ॥

स्थूलसूक्ष्मात्मना बुद्धेर्यावदात्मभावित्वमस्ति इत्याह । पुंस्त्वेति । पुंस्त्वं रेतः, आदिपदेन श्मश्र्वादिग्रहः, अस्य बुद्धिसम्बन्धस्येत्यर्थः । बाल्ये बीजात्मना सतो बुद्ध्यादेः प्रबोधेऽभिव्यक्तिरित्यत्र श्रुतिमाह ।

'स इह व्याघ्रो वा सिंहो वा' इत्यादिना । तस्मात् सिद्धमेतत् यावदात्मभावो बुद्ध्याद्युपाधिसम्बन्ध इति ॥

नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा ॥ ३२ ॥

तच्चात्मन उपाधिभूतमन्तःकरणं मनो बुद्धिर्विज्ञानं चित्तमिति चानेकधा तत्र तत्राभिलप्यते । क्वचिच्च वृत्तिविभागेन संशयादिवृत्तिकं मन इत्युच्यते, निश्चयादिवृत्तिकं बुद्धिरिति । तच्चैवम्भूतमन्तःकरणमवश्यमस्तीत्यभ्युपगन्तव्यं । अन्यथा ह्यनभ्युपगम्यमाने तस्मिन्नित्योपलब्ध्यनुपलब्धिप्रसङ्गः स्यात् आत्मेन्द्रियविषयाणामुपलब्धिसाधनानां सन्निधाने सति नि-

---

दर्शयतीति । न विदुरित्यविद्यात्मकबीजसद्भावोक्तिः । ते व्याघ्रादयः पुनराभवन्ति इत्यभिव्यक्तिनिर्देशः ॥

बुद्धिसद्भावे मानमाह सूत्रकारः । नित्येति । मनसा ह्येव पश्यति, बुद्धिश्च न विचेष्टति, विज्ञानं यज्ञं तनुते, चेतसा वेदितव्यः, चित्तश्च चेतयितव्यश्चेति तत्र तत्र श्रुतिषु मनआदिपदवाच्यं तावद्बुद्धिद्रव्यं प्रसिद्धमित्यर्थः । कथमेकस्यानेकोक्तिस्तत्राह । क्वचिच्चेति । गर्ववृत्तिकोऽहङ्कारो विज्ञानं चित्प्रधानं स्मृतिप्रधानं वा चित्तमित्यपि द्रष्टव्यं । यद्यपि साक्षिप्रत्यक्षसिद्धमन्तःकरणं श्रुत्यनूदितञ्च तथापि प्रत्यक्षश्रुत्योर्विवदमानं प्रति व्यासङ्गानुपपत्त्या तत्साधयति । तच्चेत्यादिना । सूत्रं योजयति । अन्यथेति । पञ्चेन्द्रियाणां पञ्चविषयसम्बन्धे सति नित्यं युगपत् पञ्चोपलब्धयः स्युः, मनोऽतिरिक्तसामग्र्याः सत्त्वात् यदि सत्यामपि सामग्र्यां उपलब्ध्यभावस्तर्हि सदैवानुपलब्धिप्रसङ्गादित्यर्थः । अतः कादाचित्कोपलब्धिनियामकं मन एष्टव्यमिति

त्यमेवोपलब्धिः प्रसज्येत। अथ सत्यपि हेतुसमवधाने फलाभाव-स्ततोऽपि नित्यमेवानुपलब्धिः प्रसज्येत, न चैवं दृश्यते। अथ वान्य-तरस्यात्मन इन्द्रियस्य वा शक्तिप्रतिबन्धोऽभ्युपगन्तव्यः। न चा-त्मनः शक्तिप्रतिबन्धः सम्भवति अविक्रियत्वात्, नापीन्द्रियस्य, न हि तस्य पूर्वोत्तरयोः क्षणयोरप्रतिबद्धशक्तिकस्य ततोऽकस्माच्छ-क्तिः प्रतिबध्येत, तस्मात् यस्यावधानानवधानाभ्यामुपलब्ध्यनु-पलब्धी भवतस्तन्मनः। तथा च श्रुतिः, 'अन्यत्रमना अभूवं नाद-र्शमन्यत्रमना अभूवं नाश्रौषम्' इति 'मनसा ह्येव पश्यति मनसा शृणोति' इति च। कामादयश्चास्य वृत्तय इति दर्शयति 'कामः

भावः। ननु सत्यपि कराग्निसंयोगे दाहकादाचित्कत्ववदुपलब्धि-कादाचित्कत्वमस्तु किं मनसेत्याशङ्क्यान्यतरनियमो वेत्येतद्याचष्टे। अ-थवेति। सत्यां सामग्र्यां नित्योपलब्धिर्वाङ्गीकार्या अन्यतरस्य का-रणस्य केनचिच्छक्तिप्रतिबन्धनियमो वाङ्गीकार्यः, यथा मणिनाऽग्नि-शक्तिप्रतिबन्ध इति वाकारार्थः। अस्तु प्रतिबन्ध इत्यत आह। न चेति। न चेन्द्रियस्यैवास्तु शक्तिप्रतिबन्धकत्वं प्रतिबन्धकाभावात्, न च दृष्टसामग्र्यां सत्यां अदृष्टं प्रतिबन्धकमिति युक्तं अतिप्रसङ्गात्। न च व्यासङ्गः प्रतिबन्धकमनोऽसत्त्वे तस्यासम्भवात्, तथा हि रसा-दीनां सहोपलब्धिप्राप्तौ रसबुभुत्सारूपो व्यासङ्गो रूपाद्युपलब्धिप्रति-बन्धको वाच्यः, स च गुणत्वाद्रूपवद्द्रव्याश्रयः, तत्रात्मनोऽसङ्गनिर्गुणा-कूटस्थस्य गुणित्वायोगान्मन एव गुणित्वेनैष्टव्यमिति व्यासङ्गानुपपत्त्या मनःसिद्धिः। एतदभिप्रेत्योपसंहरति। तस्मादिति। अवधानं बुभु-त्सा, न चानिच्छतोऽपि दुर्गन्धाद्युपलम्भान्न बुभुत्सोपलब्धिर्नियामिकेति वाच्यं, अनेकविषयसन्निधौ क्वचिदेव तस्या नियामकत्वाङ्गीकारात्। येषां ते पुनरिच्छादीनामात्मधर्मत्वं तेषां मनो दुर्लभमिति मन्तव्यं। इच्छा-

सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' इति, तस्मादयुक्तमेतत् तद्गुणसारत्वात् तद्व्यपदेश इति ॥

जीवकर्तृत्वविप्रतिपत्तिः

कर्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥

तद्गुणसारत्वाधिकारेणैवापरोऽपि जीवधर्मः प्रपञ्च्यते। कर्ता चायं जीवः स्यात्, कस्मात् शास्त्रार्थवत्त्वात्। एवञ्च यजेत जुहुयात् दद्यादित्येवंविधं विधिशास्त्रमर्थवद्भवति, अन्यथा तदनर्थकं स्यात्। तद्धि कर्तुः सतः कर्तव्यविशेषमुपदिशति, न चा-

---

दिधर्मिणैवात्मना व्यासङ्गोपपत्तेः। सम्प्रति व्यासङ्गस्य मानसत्वे श्रुतिमाह। तथा चेति। न केवलं व्यासङ्गात्मनः सिद्धिः किन्तु कामाद्याश्रयत्वेनापीत्याह। कामादयश्चेति। बुद्धेः प्रामाणिकत्वोक्तिफलमाह। तस्मादिति ॥

एवमात्मन्यणुत्वाध्यासोक्त्या स्वाभाविकं महत्त्वं स्थापितं सम्प्रति ततो बहिष्ठं कर्तृत्वं साधयति। कर्ता शास्त्रार्थवत्त्वात्। स नित्यचिद्रूपो महानात्मा कर्ता न वेत्यसङ्गत्वश्रुतीनां विध्यादिश्रुतीनाञ्च विप्रतिपत्त्या संशये बुद्धिकर्तृत्वेनैव विध्यादिशास्त्रोपपत्तेरकर्तात्मेति साङ्ख्यपक्षप्राप्तौ सिद्धान्तयन्नेव तद्गुणसारत्वोक्त्यात्मनि कर्तृत्वाध्यासस्याऽपि सिद्धत्वात् पुनरुक्तिमाशङ्क्य साङ्ख्यपक्षनिरासार्थमात्मनि कर्तृत्वाध्यासप्रपञ्चनान्न पुनरुक्तिरित्याह। तद्गुणेति। अधिकारः प्रसङ्गः, वस्तुतोऽसङ्गत्वमविघातः, कर्तृत्वमित्यसङ्गत्वकर्तृत्वश्रुतीनां अविरोधोक्तेः कर्तृत्वविचारात्मकाधिकरणत्रयस्य पादसङ्गतिः, श्रुतीनां मिथोविरोधाविरोधौ पूर्वोत्तरपक्षयोः फलं, यद्वात्र पूर्वपक्षे बन्धाभावाच्छास्त्रवैयर्थ्यं फलं सिद्धान्ते कर्तृत्वादिसम्बन्धसत्त्वाच्छास्त्रार्थवत्तेति भेदः। ननु बुद्धिकर्तृत्वेन शास्त्रार्थवत्त्वाऽस्तु किं जीवकर्तृ-

सति कर्तृत्वे तदुपपद्यते तथेदमपि शास्त्रमर्थवद्भवति, 'एष हि द्रष्टा श्रोता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः' इति॥

विहारोपदेशात्॥ ३४॥

इतश्च जीवस्य कर्तृत्वं यज्जीवप्रक्रियायां सन्ध्ये स्थाने विहारमुपदिशति 'स ईयते मृतो यत्र कामम्' इति 'स्वे शरीरे यथाकामं परिवर्तते' इति च॥

उपादानात्॥ ३५॥

इतश्चास्य कर्तृत्वं यज्जीवप्रक्रियायामेव करणानामुपादानं सङ्कीर्तयति 'तदेषां प्राणानां विज्ञानेन विज्ञानमादाय' इति 'प्राणान् गृहीत्वा' इति च॥

त्वेन तत्राह। तद्धि कर्तुः सत इति। मयेदं कर्तव्यमिति बोधसमर्थस्य चेतनस्यैव कर्तृत्वं वाच्यं न त्वचेतनाया बुद्धेः। किञ्च भोक्तुरात्मन एव कर्तृता वाच्या शास्त्रफलं प्रयोक्तरीति न्यायादिति भावः। सन्ध्यं स्थानं स्वप्नः अमृतः स आत्मा यथेष्टमीयते गच्छतीति॥

विहारोपदेशात्। आत्मा कर्ता प्राणानां मध्येऽपि ज्ञानेन बुद्ध्या विज्ञानसमर्थमिन्द्रियजातं आदाय शेते इति प्राणान् गृहीत्वा परिवर्तत इति॥

उपादानकर्तृत्वमात्मनः, अकर्तृत्वे उपादानानुपपत्तेरिति भावः। विज्ञानशब्दो जीवस्य निर्देशो न चेत् तदा प्रथमानिर्देशाद्विपर्ययः करणद्योतितृतीयया निर्देशः स्यात्, तस्मादिह श्रुतौ तनुत इत्याख्यातेन कर्तृवाचिना विज्ञानपदस्य सामानाधिकरण्यनिर्देशात् क्रियायामात्मनः कर्तृत्वं सूच्यत इति सूत्रभाष्ययोरर्थः॥

व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्य्ययः ॥ ३६ ॥

इतश्च जीवस्य कर्तृत्वं यदस्य लौकिकीषु वैदिकीषु च क्रियासु कर्तृत्वं व्यपदिशति शास्त्रं 'विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि च' इति। ननु विज्ञानशब्दो बुद्धौ समधिगतः कथमनेन जीवस्य कर्तृत्वं सूच्यते इति नेत्युच्यते जीवस्यैवैष निर्देशो न बुद्धेर्न चेज्जीवस्य स्यान्निर्देशविपर्य्ययः स्याद्विज्ञानेनेत्येवं निरदेक्ष्यत्। तथा ह्यन्यत्र बुद्धिविवक्षायां विज्ञानशब्दस्य करणविभक्तिनिर्देशो दृश्यते 'तदेषां प्राणानां विज्ञानेन विज्ञानमादाय' इति। इह तु विज्ञानं यज्ञं तनुत इति कर्तृसामानाधिकरण्यनिर्देशाद्बुद्धिव्यतिरिक्तस्यैवात्मनः कर्तृत्वं सूच्यत इत्यदोषः। अत्राह यदि बुद्धिव्यतिरिक्तो जीवः कर्ता स्यात् स स्वतन्त्रः सन् प्रियं हितञ्चैवात्मनो नियमेन सम्पादयेन्न विपरीतं, विपरीतमपि तु सम्पादयन्नुपलभ्यते, न च स्वतन्त्रस्यात्मन ईदृशी प्रवृत्तिरनियमेनोपपद्यत इत्यत उत्तरं पठति ॥

उपलब्धिवदनियमः ॥ ३७ ॥

यथायमात्मोपलब्धिं प्रति स्वतन्त्रोऽप्यनियमेनेष्टमनिष्टञ्चोपलभते एवमनियमेनैवेष्टमनिष्टञ्च सम्पादयिष्यति, उपलब्धा-

---

सूत्रान्तरमवतारयति। अत्राहेति। जीवः स्वतन्त्रश्चेदिष्टमेव कुर्य्यादस्वतन्त्रश्चेन्न कर्त्ता स्वतन्त्रः कर्त्तेति न्यायादित्यर्थः ॥

सत्यपि स्वातन्त्र्ये कारकवैचित्र्यादनियता प्रवृत्तिरिति सूत्रेण परि

वप्यस्वातन्त्र्यं उपलब्धिहेतूपादानोपलम्भादिति चेत्, न विषयप्रकल्पनामात्रप्रयोजनत्वादुपलब्धिहेतूनां। उपलब्धौ त्वनन्यापेक्षत्वमात्मनश्चैतन्ययोगात्। अपि चार्थक्रियायामपि नात्यन्तमात्मनः स्वातन्त्र्यमस्ति देशकालनिमित्तविशेषापेक्षत्वात्। न च सहायापेक्षस्य कर्तुः कर्तृत्वं निवर्तते। भवति ह्येधोदकाद्यपेक्षस्यापि पक्तुः पक्तृत्वं, सहकारिवैचित्र्याच्चेष्टानिष्टार्थक्रियायामनियमेन प्रवृत्तिरात्मनो न विरुध्यते॥

शक्तिविपर्ययात्॥ ३८॥

इतश्च विज्ञानव्यतिरिक्तो जीवः कर्ता भवितुमर्हति। यदि पुनर्विज्ञानशब्दवाच्या बुद्धिरेव कर्त्री स्यात् ततः शक्तिविपर्ययः स्यात् करणशक्तिर्बुद्धेर्हीयेत कर्तृशक्तिश्चापद्येत।

हरति। यथेति। दृष्टान्तासम्प्रतिपत्त्या शङ्कते। उपलब्धावपीति। चक्षुरादीनां चैतन्येन विषयसम्बन्धार्थत्वात् स्वसम्बन्धोपलब्धौ चात्मनश्चैतन्यस्वभावत्वेन स्वातन्त्र्यात् दृष्टान्तसिद्धिरित्याह। नेति। नन्वात्मा विषयसम्बन्धाय करणान्यपेक्षते चेत् कथं स्वतन्त्र इत्याशङ्क्याह। अपि चेति। स्वातन्त्र्यं नाम न स्वान्यानपेक्षत्वं ईश्वरस्यापि प्राणिकर्मापेक्षत्वेनास्वातन्त्र्यप्रसङ्गात्। किन्तु स्वेतरकारकप्रयोक्तृत्वे सति कारकाप्रेर्यत्वं स्वातन्त्र्यं इति न स्वतन्त्रोऽपि जीवः इष्टसाधनत्वभ्रान्त्यानिष्टसाधनमप्यनुतिष्ठतीत्यनियता प्रवृत्तिः। स्वातन्त्र्यं चेत्यविरुद्धमित्यर्थः॥

जीवस्य कर्तृत्वे हेत्वन्तरार्थं सूत्रं। शक्तीति। बुद्धेः करणशक्तिविपरीता कर्तृशक्तिः स्यादित्यर्थः। ततः किं तत्राह। सत्याञ्च बुद्धेरिति।

सत्याश्च बुद्धेः कर्तृशक्तौ तस्या एवाहंप्रत्ययविषयत्वमभ्युपगन्तव्यं, अहङ्कारपूर्विकाया एव प्रवृत्तेः सर्वत्र दर्शनात्, अहं गच्छाम्यहं आगच्छाम्यहं भुञ्जेऽहं पिवामीति च। तस्याश्च कर्तृशक्तियुक्तायाः सर्वार्थकारिण्याः सर्वार्थकारि करणमन्यत् कल्पयितव्यं, शक्तोऽपि हि सन् कर्ता करणमुपादाय क्रियासु प्रवर्तमानो दृश्यते। ततश्च सञ्ज्ञामात्रे विसंवादः स्यात् न वस्तुभेदः कश्चित्, करणव्यतिरिक्तस्य कर्तृत्वाभ्युपगमात्॥

समाध्यभावाच्च ॥ ३९ ॥

योऽप्ययमौपनिषदात्मप्रतिपत्तिप्रयोजनः समाधिरुपदिष्टो वेदान्तेषु 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः ओमित्येवं ध्यायथ आत्मानम्' इत्येवंलक्षणः सोऽप्यसत्यात्मनः कर्तृत्वे नोपपद्येत तस्मादप्यस्य कर्तृत्वसिद्धिः॥

यथा च तक्षोभयथा॥ ४०॥

एवं तावच्छास्त्रार्थवत्त्वादिभिर्हेतुभिः कर्तृत्वं शारीरस्य

योऽहंधीगम्यः स कर्ता स एव जीवो यत् तदपेक्षितं करणं तन्मन इति जीवकर्तृत्वसिद्धिरिति भावः॥

ज्ञानसाधनविध्यन्यथानुपपत्त्याप्यात्मनः कर्तृत्वं वाच्यमित्याह समाधीति। मुक्तिफलभोक्तुरेव तदुपायसमाधिकर्तृत्वं युक्तं अन्यथात्मनोऽकर्तृत्वे बुद्धेरपि अभोक्त्र्याः कर्तृत्वायोगात् समाध्यभावप्रसङ्ग इत्यर्थः॥

यथा च तक्षोभयथा। उक्तमात्मनः कर्तृत्वमुपजीव्य संशयपूर्वपक्षा

प्रदर्शितं तत्पुनः स्वाभाविकं वा स्यादुपाधिनिमित्तं वेति चिन्त्यते। तत्र तैरेव शास्त्रार्थवत्त्वादिभिः हेतुभिः स्वाभाविकं कर्तृत्वं अपवादहेत्वभावादित्येवं प्राप्ते ब्रूमः, न स्वाभाविकं कर्तृत्वमात्मनः सम्भवत्यनिर्मोक्षप्रसङ्गात् कर्तृत्वस्वभावत्वे ह्यात्मनो न कर्तृत्वान्निर्मोक्षः सम्भवति अग्नेरिवौष्ण्यात् न च कर्तृत्वादनिर्मुक्तस्याऽस्ति पुरुषार्थसिद्धिः कर्तृत्वस्य दुःखरूपत्वात्। ननु स्थितायामपि कर्तृत्वशक्तौ कर्तृत्वकार्यपरिहारात् पुरुषार्थः सेत्स्यति, तत्परिहारश्च निमित्तपरिहारात् यथाग्नेर्दहनशक्तियुक्तस्यापि काष्ठवियोगाद्दहनकार्याभावस्तद्वत् निमित्तानामपि शक्तिलक्षणेन सम्बन्धेन सम्बद्धानामत्यन्तपरिहारासम्भवात्। ननु मोक्षसाधनविधानान्मोक्षः सेत्स्यति न साधनायत्तस्यानित्यत्वात्। अपि च नित्यशुद्धबुद्धमुक्तात्मप्रतिपादनान्मोक्षसिद्धिः *अभिहिता तादृगात्मप्रतिपादनञ्च न स्वाभाविके

वाह। एवं तावदित्यादिना। साङ्ख्यनिरासेनात्मनः कर्तृत्वे साधिते बाधकाभावात् तत्सत्यमिति मीमांसकादिपक्षः प्राप्तः। न चासङ्गत्वागमेन बाधः अहं कर्तेत्यनुभवसहितकर्तृत्वश्रुतिबलेन तस्यागमस्य स्तावकत्वादिति प्राप्ते उत्सूत्रमेव सिद्धान्तयति। न स्वाभाविकमिति। यदुक्तं बाधकाभावादिति तदसिद्धमित्याह। अनिर्मोक्ष इति। ननु कर्तृत्वं नाम क्रियाशक्तिर्मुक्तावप्यस्ति तत्रापि शक्तिकार्यस्य क्रियारूपशक्यस्याभावान्मुक्तेः पुरुषार्थत्वं सिद्धिरिति शङ्कते। ननु स्थितायामिति। सत्यां शक्तौ कथं कार्यपरिहारस्तत्राह। तत् परिहारश्चेति। मुक्तौ शक्तिसत्त्वे कार्यमपि स्यात् शक्यभावे शक्त्य-

---

* अभिमतेति वर्ध० का०।

कर्तृत्वेऽवकल्पते, तस्मादुपाधिधर्माध्यासेनैवात्मनः कर्तृत्वं न स्वाभाविकं। तथा च श्रुतिः 'ध्यायतीव लेलायतीव' इति। "आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" इति चोपाधिसंयुक्तस्यैवात्मनो भोक्तृत्वादिविशेषलाभं दर्शयति। न हि विवेकिनां परस्मादन्यो जीवो नाम कर्ता भोक्ता वा विद्यते, 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिश्रवणात्, पर एव तर्हि संसारी कर्ता भोक्ता च प्रसज्येत परस्मादन्यश्चेच्चितिमान् जीवो बुद्ध्यादिसङ्घातव्यतिरिक्तो न स्यान्नाविद्याप्रत्युपस्थापितत्वात् कर्तृभोक्तृत्वयोः। तथा च शास्त्रं 'यत्र हि द्वैतमिव भवति तदितर

योगात्। अस्ति हि प्रलयेऽपि कार्यं पुनरुद्भवयोग्यं सूक्ष्मं शक्यं, तथा च शक्त्या धर्मादिनिमित्तैः सहितकार्याक्षेपान्मुक्तिलोप इति परिहरति। न निमित्तानामपीति। सनिमित्तस्य कार्यस्य शक्त्या शक्यत्वेन सम्बन्धान्निमित्तानामपि परम्परया शक्तिसम्बन्धत्वमुक्तं मन्तव्यं सम्बन्धेनेत्यर्थः। यद्वा शक्तिर्लक्षणमाक्षेपकं यस्य कार्यस्य तेन कार्येण यः सम्बन्धस्तेनेति अधिकरणे तृतीया। ननु नरस्य कर्मणा देवत्ववच्छास्त्रबलात् कर्तुरेवाकर्तृतासिद्धिरिति शङ्कते। नन्विति। ज्ञानादकर्तृत्वाख्यमोक्षश्चेत् कर्तृत्वमाविद्यकं स्याद्यतो ज्ञानमज्ञानस्यैव निवर्तकं। यदि कर्मणा मोक्षस्तत्राह। नेति। आत्मनः स्वाभाविकं कर्तृत्वमभ्युपगम्यानिर्मोक्ष उक्तः सम्यक्त्वसङ्गनिर्विकारत्वानेकश्रुतिव्याकोपात् तत्स्वाभाविकमित्याह। अपि चेति। नचाभ्यस्तानेकश्रुतीनां स्वार्थकल्पकल्पनं न युक्तं, न चाहं कर्तेत्यनुभवो विरुध्यते तस्य सत्यमिथ्योदासीनकर्तृत्वावगाहिनोऽध्यासत्वेनाप्युपपत्तेरित्यर्थः। कर्तृत्वसाध्यस्वत्वे श्रुतिमाह। तथा चेति। विद्वदनुभवबाधितश्च कर्तृत्वमित्याह। न हीति। बुद्ध्यादिसङ्घाताद्व्यतिरिक्तो यदि परस्मादन्यश्चेतनो न स्यात् तदा पर एव संसारी प्रसज्येत तच्चानिष्टं परस्य

इतरं पश्यति' इत्यविद्यावस्थायां कर्तृत्वभोक्तृत्वे दर्शयित्वा विद्यावस्थायां ते एव कर्तृत्वभोक्तृत्वे निवारयति। यत्र त्वस्य 'सर्वमात्मैवाभूत्तत् केन कं पश्येत्' इति तथा स्वप्नजागरितयोरात्मन उपाधिसम्पर्ककृतं श्रमं श्येनस्येवाकाशे विपरिपततः श्रावयित्वा तदभावं सुषुप्ते प्राज्ञेनात्मना सम्परिष्वक्तस्य श्रावयति 'तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं शोकान्तरम्' इत्यारभ्य 'एषास्य परमा गतिरेषास्य परमा सम्पदेषोऽस्य परमो लोक एषोऽस्य परम आनन्दः' इत्युपसंहारात्। तदेतदाहाचार्यः। 'यथा च तक्षोभयथा' इति त्वर्थे चायं चः पठितः। नैवं मन्तव्यं स्वाभाविकमेवात्मनः कर्तृत्वमग्नेरिवौष्ण्यमिति। यथा तु तक्षा लोके वास्यादिकरणहस्तः कर्ता दुःखी भवति, स एव स्वगृहं प्राप्तः विमुक्तवास्यादिकरणः स्वस्थो *निर्वृत्तो निर्व्यापारः सुखी भवति, एवमविद्याप्रत्युपस्थापितद्वैतसंयुक्त आत्मा स्वप्नजागरितावस्थयोः कर्ता दुःखी भवति, स तच्छ्रमापनुत्तये स्वमात्मानं परं प्रविश्य विमुक्तकार्यकरणसङ्घातोऽकर्ता सुखी भवति, सम्प्र-

---

नित्यमुक्तत्वव्याघातादिति शङ्कते। पर एवेति। न वयं शुद्धस्य चिद्धातोः परस्य बन्धं वदामः किन्तु तस्यैवाविद्याबुद्ध्यादिप्रतिबिम्बितस्याविद्यया भिन्नस्य जीवत्वं प्राप्तस्य बन्धमोक्षाविति ब्रूमः। कल्पितभेदोऽपि लोके बिम्बप्रतिबिम्बयोर्धर्मव्यवस्थापको दृष्ट इति परिहरति। नाविद्येति। अविद्योपहिते बन्धो न शुद्धात्मनीत्यत्र श्रुतिमाह। यथा चेति। कर्तृत्वस्य बुद्ध्याद्युपाध्यन्वयव्यतिरेकानुविधायित्वाच्छुतेश्च न स्वाभाविकत्वमित्याह। तथा स्वप्नेति। आत्मैव काम्यते आनन्दत्वादि-

---

* निवृत्तव्यापार इति वर्ध०।

साद्यावस्थायां तथा मुक्त्यवस्थायामप्यविद्याध्वान्तं विद्याप्रदीपेन विधूयात्मैव केवलो निर्वृतः सुखी भवति। तक्षदृष्टान्तश्चैतावतांशेन द्रष्टव्यः, तक्षा हि विशिष्टेषु तक्षणादिव्यापारेष्वपेक्ष्यैव प्रतिनियतानि करणानि वास्यादीनि कर्ता भवति स्वशरीरेण त्वकर्तैव, एवमयमात्मा सर्वव्यापारेष्वपेक्ष्यैव मनआदीनि करणानि कर्ता भवति स्वात्मना त्वकर्तैवेति न त्वात्मनस्तक्ष्ण इवावयवाः सन्ति यैर्हस्तादिभिरिव वास्यादीनि तक्षा मनआदीनि करणान्यात्मोपाददीत न्यस्येद्वा। यत्तूक्तं शास्त्रार्थवत्त्वादिभिर्हेतुभिः स्वाभाविकमात्मनः कर्तृत्वमिति तन्न विधिशास्त्रं तावद्यथा प्राप्तं कर्तृत्वमुपादाय कर्तव्यविशेषमुपदिशति न कर्तृत्वमात्मनः प्रतिपादयति। न च स्वाभाविकमस्य कर्तृत्वमस्ति ब्रह्मात्मत्वोपदेशादित्यवोचाम, तस्मादविद्याकृतं कर्तृत्वमुपादाय विधिशास्त्रं प्रवर्तिष्यते। 'कर्ता विज्ञानात्मा पुरुषः' इत्येवंजातीयकमपि शास्त्रमनुवादरूपत्वाद्यथा प्राप्तमेवाविद्याकृतं कर्तृत्वमनुवदिष्यति। एतेन विहा-

---

त्यात्मकामं स्वरूपं स्वातिरिक्तकाम्यासत्त्वादकामं आत्मकामत्वादकामत्वाच्चाप्तकामं विशोकत्वाच्चेत्याह। शोकेति। शोकान्तरं दुःखास्पृष्टमित्यर्थः। तस्यैव सुषुप्तात्मरूपस्य परमपुरुषार्थमाह। एष इति। गतिः प्राप्यं सम्पदैश्वर्यं लोको भोग्यसुखञ्चैतस्मादन्यन्नास्तीत्यर्थः। आत्मा स्वतोऽकर्ता बुद्ध्याद्युपाधिना तु कर्तेत्युभयथाभाव उक्तस्तत्रार्थे सूत्रं योजयति। तदेतदाहेत्यादिना। संप्रसादः सुषुप्तिः। यथा स्फटिकस्य लौहित्यं कुसुमाद्युपाधिकं तथात्मनः कर्तृत्वं बुद्ध्याद्युपाधिकं अन्यथ

रोपादाने परिहृते, तयोरप्यनुवादरूपत्वात्। ननु सन्ध्ये स्थाने प्रसुप्तेषु करणेषु स्वे शरीरे यथाकामं परिवर्तत इति विहार उपदिश्यमानः केवलस्यात्मनः कर्तृत्वमावहति, तथोपादानेऽपि 'तदेषां प्राणानां विज्ञानेन विज्ञानमादाय' इति करणेषु कर्मकरणविभक्ती श्रूयमाणे केवलस्यैवात्मनः कर्तृत्वं गमयत इति। अत्रोच्यते, न तावत् सन्ध्ये स्थानेऽत्यन्तमात्मनः करणविरमणमस्ति 'सधीः स्वप्नो भूत्वा इमं लोकमतिक्रामति' इति, तत्रापि धीसम्बन्धश्रवणात्। तथा च स्मरन्ति,

'इन्द्रियाणामुपरमे मनोऽनुपरतं यदि।
सेवते विषयानेव तद्विद्यात् स्वप्नदर्शनम्' ॥ इति।

'कामादयश्च मनसो वृत्तयः' इति श्रुतिः, तास्च स्वप्ने

व्यतिरेकाभ्यां सिद्धं। न च तौ बुद्धेरात्मकर्तृत्वे करणत्वविषयौ नोपादानत्वविषयाविति युक्तं, करणत्वात् कार्यान्वय्युपादानत्वस्यान्तरङ्गतया चित्सम्वलितबुद्धेस्ताभ्यामुपादानत्वस्यैव सिद्धेः, एवं बुद्ध्यभेदेनाध्यस्तचिदहङ्कारस्य कर्तृत्वोपादानत्वे महावाक्यसम्मतिश्चेति भावः। ननु तक्षा स्वहस्तादिना वास्यादिप्रेरणशक्तत्वात् स्वतः कर्ता आत्मा तु निरवयवत्वादशक्त इति दृष्टान्तवैषम्यमाशङ्क्यौपाधिककर्तृत्वांशेन विवक्षितेन साम्यमाह। तक्षदृष्टान्तस्येति। शास्त्रेणान-

दृश्यन्ते, तस्मात् समना एव स्वप्ने विहरति, विहारोऽपि च तत्रत्यो वासनामय एव न तु पारमार्थिकोऽस्ति। तथा च श्रुतिरिवकारानुबद्धमेव स्वप्नव्यापारं वर्णयति 'उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवाऽपि भयानि पश्यन्' इति। लौकिका अपि तथैव स्वप्नं कथयन्ति आरुक्षमिव गिरिशृङ्गमद्राक्षमिव वनराजिमिति। तथोपादाने यद्यपि करणेषु कर्मकरण-विभक्तिनिर्देशः तथापि तत्संयुक्तस्यैवात्मनः कर्तृत्वं द्रष्टव्यं, केवले कर्तृत्वासम्भवस्य दर्शितत्वात्। भवति च लोकेऽनेकप्रकारा विवक्षा योधा युध्यन्ते योधै राजा युध्यत इति। अपि

त्वे करणेषु कर्तृविभक्तिः स्यात् न करणविभक्तिरित्युक्तं प्रत्याह। भवति च लोक इति। कर्तृष्वपि करणविभक्तिर्न विरुध्यते दृष्टत्वात्, अस्ति च कर्तृप्रयोगः, विज्ञानं यज्ञं तनुत इत्यादाविति भावः। उपादानस्य सकर्तृकत्वमङ्गीकृत्य केवलात्मनः कर्तृत्वं निरस्तं इदानीं तस्याक्रियत्वात् तत्कर्त्रपेक्षेत्याह। अपि चेति। पूर्वं विज्ञानं जीव इत्यङ्गीकृत्य जीवस्य कर्तृत्वे तनुत इति श्रुतिरुक्ता, सम्प्रति तया श्रुत्याऽनुपहितात्मनः कर्तृत्वमिति प्राप्तौ विज्ञानं बुद्धिरेव तस्या एवा कर्तृत्वमुच्यते। तदुपहितात्मनः कर्तृत्वसिद्धयः इत्यभिप्रेत्याह। यस्त्विति योऽयं विज्ञानमय इत्यादिश्रुतिषु विज्ञानशब्दस्य बुद्धौ प्रसिद्धत्वादत्र च मनोमयकोशानन्तरं पठितत्वात् श्रद्धादिलिङ्गाच्च बुद्धिरेव विज्ञानमित्यर्थः। तत्रैव लिङ्गान्तरमाह। विज्ञानं देवा इति महद्यक्षं प्रथमजं इत्यादिश्रुतौ हिरण्यगर्भब्रह्मात्मकबुद्धेर्ज्येष्ठत्वोक्तेश्च देवैरिन्द्रियैरुपास्यमानं ज्येष्ठं ब्रह्मविज्ञानं बुद्धिरेवेत्यर्थः। यच्च पूर्वं। किञ्च श्रुत्यन्तरे यज्ञस्य बुद्धिकार्यत्वोक्तेः अत्रापि यज्ञकर्तृ विज्ञा बुद्धिरित्याह। स एष इति। चित्तेन ध्यात्वा वाचा मन्त्रोक्त्या यज्ञे

चास्मिन्नुपादाने करणव्यापारोपरममात्रं विवक्ष्यते न स्वातन्त्र्यं कस्यचिदबुद्धिपूर्वकस्यापि स्वापेक्षकरणव्यापारोपरमस्य दृष्टत्वात्। यस्त्वयं व्यपदेशो दर्शितो 'विज्ञानं यज्ञं तनुते' इति स बुद्धेरेव कर्तृत्वं प्रापयति विज्ञानशब्दस्य तत्र प्रसिद्धत्वान्मनोऽनन्तरपाठाच्च, तस्य श्रद्धैव शिर इति च विज्ञानमयस्यात्मनः श्रद्धाद्यवयवत्वसङ्कीर्तनात् श्रद्धादीनाञ्च बुद्धिधर्मत्वप्रसिद्धेः 'विज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपासते' इति च वाक्यशेषात् ज्येष्ठत्वस्य च प्रथमजत्वस्य बुद्धौ प्रसिद्धत्वात् 'स एष वाचश्चित्तस्योत्तरोत्तरक्रमो यद्यज्ञः' इति च श्रुत्यन्तरे

जायते ततश्चित्तस्य वाचः पूर्वोत्तरभावो यज्ञ इत्यर्थः। यच्चोक्तं बुद्धेः कर्तृत्वे शक्तिवैपरीत्यप्रसङ्ग इति तन्न, विक्लिद्यन्ते तण्डुलाः, ज्वलन्ति काष्ठानि, बिभर्ति स्थालीति स्वस्वव्यापारेषु सर्वकारकाणां कर्तृत्वस्वीकारादित्याह। न चेति। तर्हि बुद्ध्यादीनां कर्तृत्वे करणत्ववार्ता तेषु न स्यादित्यत आह। उपलब्धीति। यथा काष्ठानां स्वव्यापारे कर्तृत्वेऽपि पाकापेक्षया करणत्वं तथा बुद्ध्यादीनां अध्यवसायसङ्कल्पादिक्रियाकर्तृत्वेऽप्युपलब्ध्यपेक्षया करणत्वमित्यर्थः। ननु तर्ह्युपलब्धिः कस्य व्यापार इत्याह। सा चेति। तर्हि तस्यामात्मा केवलः कर्ता स्यात् यस्य यो व्यापारः स तस्य कर्तेति स्थितिरित्यत आह। न चेति। उपलब्धेः नित्यत्वे बुद्ध्यादीनां कथं करणत्वमुक्तमिति चेत्, उच्यते अखण्डसाक्षिचैतन्यं बुद्धिवृत्तिभिर्भिन्नं सद्विषयावच्छिन्नत्वेन जायते, तथा च विषयावच्छिन्नचैतन्यस्योपलब्धौ बुद्ध्यादीनां करणत्वं बुद्ध्याद्युपहितात्मनः कर्तृत्वं न केवलस्य, न च बुद्धेरेव तत्कर्तृत्वं चैतन्यस्य व्यापारत्वायोगादिति भावः। यच्चोक्तं बुद्धेः कर्तृत्वे स एवाहंधीगम्यो जीव इति तस्य करणान्तरं कल्पनीयं तथा च नाममात्रे विवाद इति तत्र केवलात्मनः कर्तृत्वमुक्तमिति भ्रान्तिं निरस्यति। अवज्ञा-

यत्नस्य रागबुद्धिसाध्यत्वावधारणात्। न च बुद्धेः शक्तिविपर्ययः करणानां कर्तृत्वाभ्युपगमे भवति सर्वकारकाणामेव स्वव्यापारेषु कर्तृत्वस्यावश्यंभावित्वात्। उपलब्ध्यपेक्षन्त्वेषां करणानां करणत्वं, सा चात्मनः। न च तस्यामप्यस्य कर्तृत्वमस्ति नित्योपलब्धिस्वरूपत्वात्। अहङ्कारपूर्वकमपि कर्तृत्वं नोपलब्धिर्भवितुमर्हति अहङ्कारस्याप्युपलभ्यमानत्वात्। न चैवं सति करणान्तरकल्पनाप्रसङ्गः, बुद्धेः करणत्वाभ्युपगमात्। समाध्यभावस्तु शास्त्रार्थवत्त्वेनैव परिहृतः, यथाप्राप्तमेव कर्तृत्वं उपादाय समाधिविधानात्, तस्मात् कर्तृत्वमप्यात्मन उपाधिनिमित्तमेवेति स्थितं ॥

ईश्वरापेक्ष जीवकर्तृत्व विज्ञाने प॰

परात्तु तच्छ्रुतेः ॥ ४१ ॥

यदिदमविद्यावस्थायामुपाधिनिबन्धनं कर्तृत्वं जीवस्याभिहितं तत् किमनपेक्ष्येश्वरं भवति आहोस्वित् ईश्वरापेक्ष-

---

रेति। साङ्ख्यनिरासार्थं बुद्ध्यभेदेनाध्यस्तचिदात्मकाहङ्कारगतं कर्तृत्वं यदुक्तं तदद्वंधीगम्यस्य बुद्धिविशिष्टात्मन एव न केवलस्य साक्षिणो भवितुमर्हति, दृश्यधर्मस्य साक्षिस्वभावत्वायोगात्। एवं विशिष्टात्मनः कर्तृत्वे विशेषणीभूताया जडबुद्धेरेव कारणत्वोपपत्तेर्न करणान्तरकल्पनाप्रसङ्गः। अध्यासं विना केवलबुद्धिकर्तृत्ववादिनस्तु करणान्तरप्रसङ्गो दुर्वार इत्यर्थः। एवं शास्त्रार्थवत्त्वादिहेतूनामात्मनः कर्तृत्वमात्रसाधकत्वेऽपि स्वाभाविककर्तृत्वसाधनसामर्थ्याभावादध्यस्तमेव कर्तृत्वं विध्यादिकर्तृत्वश्रुतीनामुपजीव्यं। तस्मादसङ्गत्वविध्यादिकर्तृत्वश्रुतीनामविरोध इति सिद्धं ॥

परात्तु तच्छ्रुतेः। यथा स्फटिको लौहित्याध्यासे लोहितद्रव्यं करणं

मिति भवति विचारणा। तत्र प्राप्तं तावन्नेश्वरमपेक्षते जीवः कर्तृत्वे इति। कस्मादपेक्षाप्रयोजनाभावात्। अयं हि जीवः स्वयमेव रागद्वेषादिदोषप्रयुक्तः कारकान्तरसामग्रीसम्पन्नः कर्तृत्वमनुभवितुं शक्नोति तस्य किमीश्वरः करिष्यति। न च लोके प्रसिद्धिरस्ति कृष्यादिकासु क्रियासु अनडुहादिवदीश्वरोऽपरोऽपेक्षितव्य इति। क्लेशात्मकेन च कर्तृत्वेन जन्तून् संसृजत ईश्वरस्य नैर्घृण्यं प्रसज्येत। विषमफलञ्चैषां कर्तृत्वं विदधतो वैषम्यं। ननु वैषम्यनैर्घृण्येन सापेक्षत्वादित्युक्तं। सत्यमुक्तं सति त्वीश्वरस्य सापेक्षत्वसम्भवे, सापेक्षत्वञ्च नेश्वरस्य सम्भवति सतोर्जन्तूनां धर्माधर्मयोस्तयोश्च सद्भावः सति जीवस्य कर्तृत्वे तदेव चेत् कर्तृत्वं ईश्वरापेक्षं स्यात् किं विषयमीश्वरस्य सापेक्षत्वमुच्येत। अकृता-

---

तेनायं स्फटिको लोहित इत्यनुभवात् तथा कामादिपरिणामिबुद्धिरात्मनि कर्तृत्वाद्यध्यासे कारणमित्युक्तं तदध्यस्तं कर्तृत्वमुपजीव्य जीवस्य कारकसम्पन्नत्वादीश्वरस्य कारयितृत्वश्रुतेश्च संशयमाह। यदिदमिति। एषैव ह्येवेत्यादिश्रुतीनां कर्तृत्वस्वातन्त्र्यद्योतकविध्यादिश्रुतिभिर्विरोधसमाधानात् पादसङ्गतिः। कर्ममीमांसकमतेन पूर्वपक्षयति। तत्रेत्यादिना। बुद्ध्यादिकारकसम्पत्तावीश्वरव्यतिरेके कर्तृत्वव्यतिरेकानुपलब्धेर्नेश्वरः प्रयोजकः। किञ्च प्रयोजकत्वे नैर्घृण्यादिप्रसङ्ग इत्याह। क्लेशात्मकेन चेति। दत्तोत्तरमिदं चोद्यमिति शङ्कते। नन्विति। पूर्वं जीवस्य धर्माधर्मवत्त्वं सिद्धवत्कृत्य तत्सापेक्षत्वात् विषमजगत्कर्तृत्वमविरुद्धमित्युक्तं. सम्प्रति ईश्वराधीनत्वे जीवस्य कर्तृत्वे सिद्धे धर्माधर्मवत्त्वसिद्धिः तद्वत् तत्सिद्धौ तत्सापेक्षकारयितृत्वसिद्धिः ईश्वरस्य कारयितृत्वे सिद्धे जीवस्य कर्तृत्वसिद्धिरिति चक्रकापत्तेः कर्मसापेक्षत्वं न सम्भवतीत्युच्यत इत्याह। सत्यमिति।

भ्यागमश्चैवं जीवस्य प्रसज्येत। तस्मात् स्वत एव जीवस्य कर्तृत्वमिति। एतां प्राप्तिं तुशब्देन व्यावर्त्य प्रतिजानीते। परादिति। अविद्यावस्थायां कार्यकरणसङ्घाताविवेकदर्शिनो जीवस्याविद्यातिमिरान्धस्य सतः परस्मादात्मनः कर्माध्यक्षात् सर्वभूताधिवासात् साक्षिणश्चेतयितुरीश्वरात्तदनुज्ञया कर्तृत्वभोक्तृत्वलक्षणस्य संसारस्य सिद्धिस्तदनुग्रहहेतुकेनैव च विज्ञानेन मोक्षसिद्धिर्भवितुमर्हति। कुतस्तच्छ्रुतेः। यद्यपि रागादिदोषप्रयुक्तः सामग्रीसम्पन्नश्च जीवः, यद्यपि च लोके कृष्यादिषु कर्मसु नेश्वरकारणत्वं प्रसिद्धं, तथापि सर्वास्वेव प्रवृत्तिषु ईश्वरो हेतुकर्तेति श्रुतेरवसीयते। तथा हि श्रुतिर्भवति 'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष ह्येवासाधु कर्म कारयति तं यमधो निनीषते' इति 'य आत्मनि तिष्ठन् आत्मानमन्तरो यमयति' इति चैवंजातीयका। नन्वेवमीश्वरस्य कारयितृत्वे सति वैषम्यनैर्घृण्ये स्यातां अकृताभ्यागमश्च जीवस्येति, नेत्युच्यते॥

अस्तु कर्मानपेक्षस्य प्रवर्तकत्वं तत्राह। अकृतेति। अनपेक्षस्य प्रवर्तकत्वे धर्मवतो नरान् दुःखेनाधर्मवतः सुखेन योजयेत्, कारुणिकत्वे वा सर्वे सुखेन एकरूपाः स्युरिति जगद्वैचित्र्यं विध्यादिशास्त्रञ्च न स्यात्। तस्माद्विध्यादिशास्त्रार्थवत्त्वाय रागद्वेषापन्नं स्वत एव जीवस्य कर्तृत्वं वाच्यं, तथा च कारयितृत्वश्रुतिविरोधः। ईश्वरस्तावकी वा सा श्रुतिरिति प्राप्ते सिद्धान्तयति। एतामिति। यथा चन्दनादिसामग्र्यां सत्यां धर्मव्यतिरेके सुखव्यतिरेकग्रहाभावेऽपि 'पुण्यो वै पुण्येन कर्मणा भवति' इत्यादिशास्त्रप्रामाण्यादेव धर्मस्य हेतुत्वसिद्धिः, एवमीश्वरस्याऽपि शास्त्रबलात् कारयितृत्वसिद्धिरिति भावः॥

कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥ ४२ ॥

तुशब्दश्चोदितदोषव्यावर्तनार्थः। कृतो यः प्रयत्नो जीवस्य धर्माधर्मलक्षणः तदपेक्ष एवैनमीश्वरः कारयति, ततश्चैते *चोदिता दोषा न प्रसज्यन्ते। जीवकृतधर्माधर्मवैषम्यापेक्ष एव तत्तत्फलानि विषमं विभजते पर्जन्यवदीश्वरो निमित्तत्वमात्रेण। यथा लोके नानाविधानां गुच्छगुल्मादीनां व्रीहियवादीनां चाऽसाधारणेभ्यः स्वस्वबीजेभ्यो जायमानानां साधारणं निमित्तं भवति पर्जन्यः, न ह्यसति पर्जन्ये रसपुष्पफलपलाशादिवैषम्यं तेषां जायते नाप्यसत्सु स्वस्वबीजेषु, एवं जीवकृतप्रयत्नापेक्ष ईश्वरस्तेषां शुभाशुभं विदध्यादिति श्लिष्यते। ननु कृतप्रयत्नापेक्षत्वमेव जीवस्य परायत्ते कर्तृत्वे नोपपद्यते। नैष दोषः, परायत्तेऽपि हि कर्तृत्वे करोत्येव जीवः, कुर्वन्तं हि तमीश्वरः कारयति। अपि च पूर्वप्रयत्नमपेक्ष्येदानीं कारयति पूर्वतरञ्च प्रयत्न-

---

धर्माधर्माभ्यामेव फलवैषम्यसिद्धेरलमीश्वरेणेत्याशङ्क्य बीजैरेवाङ्कुरवैषम्यसिद्धेः पर्ज्जन्यवैयर्थ्यं स्यात्। यदि विशेषहेतूनां साधारणहेत्वपेक्षत्वान्न वैयर्थ्यं तर्हि ईश्वरस्याऽपि साधारणहेतुत्वान्न वैयर्थ्यमित्याह। पर्जन्यवदिति। दृष्टान्तं विवृणोति। यथेति। अतिदीर्घवल्लीग्रन्थयो गुच्छाः पुष्पस्तवका वा, गुल्मास्तु क्षुद्रवल्ल्य इति भेदः। किमीश्वरस्य कारयितृत्वे जीवस्य कर्तृत्वं न स्यात् इत्यापाद्यते उत चक्रकापत्तिर्वा नाद्य इत्याह। नैष दोष इति। अध्यापकाधीनस्य वटोर्मुख्याध्ययनकर्तृत्वदर्शनादिति भावः। चक्रकं निरस्यति। अपि चेति। अनवद्यं जीवस्य कर्तृत्वं ईश्वरस्य कारयितृत्वञ्चेति शेषः।

---

* चोदिता इति वर्ध० नास्ति।

मपेक्ष्य पूर्वमकारयदित्यनादित्वात् संसारस्यानवद्यं। कथं पुन-रवगम्यते कृतप्रयत्नापेक्ष ईश्वर इति। विहितप्रतिषिद्धा-वैयर्थ्यादिभ्य इत्याह। एवं हि स्वर्गकामो यजेत, ब्राह्मणो न हन्तव्य इत्येवंजातीयकस्य विहितस्य प्रतिषिद्धस्य चावैयर्थ्यं भवति, अन्यथा तदनर्थकं स्यात्, ईश्वर एव विधिप्रतिषेधयो-र्नियुज्येत अत्यन्तपरतन्त्रत्वात् जीवस्य। तथा विहितकारिण-मप्यनर्थेन संसृजेत् प्रतिषिद्धकारिणमप्यर्थेन, ततश्च प्रामाण्यं वेदस्यास्तमियात्। ईश्वरस्य चात्यन्तानपेक्षत्वे लौकिकस्याऽपि पुरुषकारस्य वैयर्थ्यं, तथा देशकालनिमित्तानां पूर्वोक्तदोष-प्रसङ्गश्चेत्येवंजातीयकं दोषजातमादिग्रहणेन दर्शयति॥

जीवेश्वरयो[illegible] विप्रतिपत्तिः

अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्व-मधीयत एके॥ ४३॥

जीवेश्वरयोरुपकार्योपकारकभाव उक्तः, स च सम्बन्ध-

ईश्वरस्य सापेक्षत्वे विध्यादिशास्त्रप्रमाण्यान्यथानुपपत्तिं प्रमाणयति। कथमित्यादिना। एवं सापेक्षत्वे सत्यवैयर्थ्यं भवति अन्यथानपेक्षत्वे वैयर्थ्यं प्रपञ्चयति। ईश्वर इति। तयोः स्थाने स एव नियुज्येत इत्यभिधीयेत तयोः कार्थं स एव कुर्यादिति यावत्। तथा च जीवस्य निरपेक्षेश्वरपरतन्त्रत्वाद्विध्यादिशास्त्रमकिञ्चित्करमनर्थकं स्यात् इति सम्बन्धः। आदिशब्दार्थमाह। तथेति। पुरुषकारः प्रयत्नः। पूर्वोक्तदोषोऽकृताभ्यागमादिः, तस्मात् कर्मसापेक्षेश्वरस्य कारयितृत्वा-देव श्रुवेत्यादिश्रुतेर्विध्यादिश्रुत्यविरोध इति सिद्धं॥

अंशः 'एको नित्यः स्वप्रकाशो नाणुरकर्ता जीव' इति शोधिततत्त्व-

योरेव लोके दृष्टः, यथा स्वामिभृत्ययोर्यथावाऽग्निस्फुलिङ्गयोः। ततश्च जीवेश्वरयोरप्युपकार्योपकारकभावाभ्युपगमात् किं स्वामिभृत्यवत् सम्बन्धः आहोस्वित् विस्फुलिङ्गवदित्यस्यां विचिकित्सायामनियमो वा प्राप्नोति, अथवा स्वामिभृत्यप्रकारेष्वेवेशित्रीशितव्यभावस्य प्रसिद्धत्वात् तद्विध एव सम्बन्ध इति प्राप्नोति। अतो ब्रवीति अंश इति। जीव ईश्वरस्यांशो भवितुमर्हति यथाऽग्नेर्विस्फुलिङ्गः। अंश इवांशः, न हि निरवयवस्य मुख्योऽंशः सम्भवति। कस्मात् पुनर्निरवयवत्वात् स एव न भवति नानाव्यपदेशात्। 'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' एतमेव विदित्वा मुनिर्भवति 'य आत्मनि तिष्ठन्नात्मानमन्तरो यमयति' इति चैवंजातीयको भेदनिर्देशो नासति भेदे युज्यते। ननु चायं नानाव्यपदेशः सुतरां स्वामिभृत्यसारूप्ये युज्यत इति, अत आह, अन्यथा चापीति। न च नानाव्यपदेशादेव केवलादंशत्वप्रतिपत्तिः किं तर्ह्यन्यथा चापि व्यपदेशो भवत्यनानात्वस्य प्रतिपादकः। तथा

पदार्थस्यात्र ब्रह्मैक्यसाधनेन भेदाभेदश्रुतीनां विरोधसमाधानात् पादसङ्गतिः। पूर्वपक्षे प्रत्यगभिन्नब्रह्मासिद्धिः सिद्धान्ते तत्सिद्धिरिति भेदः। पूर्वोक्तोपकार्योपकारकभावाच्छिन्नं जीवांशयोः सम्बन्धं विषयीकृत्य द्विविधदृष्टान्तदर्शनात् संशयमाह। ततश्चेति। प्रसिद्धस्वस्वामित्वसम्बन्धसम्भवाद्यः कश्चित् सम्बन्ध इत्यनियमो न युक्त इत्यरुचेराह। अथ वेति। अनेन य आत्मनि तिष्ठन्नित्यादिश्रुतिप्रसिद्धभेदकोटिर्दर्शिता। एवं तत्त्वमसीत्यादिश्रुतिसिद्धा भेदकोटिर्द्रष्टव्या, तथा च भेदाभेदश्रुतीनां समबलत्वाद्विरोधे सति सम्बन्धानिश्चयात् सम्बन्धा-

हि एके शाखिनो दाशकितवादिभावं ब्रह्मण आमनन्ति 'आथर्वणिका ब्रह्मसूक्ते ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा उत' इत्यादिना। दाशा य एते कैवर्ताः प्रसिद्धाः ये चामी दासाः स्वामिन्यात्मानमुपक्षिपन्ति ये चान्ये कितवा द्यूतकृतस्ते सर्वे ब्रह्मैवेति हीनजन्तूदाहरणेन सर्वेषामेव नामरूपकृतकार्यकरणसङ्घातप्रविष्टानां जीवानां ब्रह्मत्वमाह। तथा अन्यत्रापि ब्रह्मप्रक्रियायामेव अयमर्थः प्रपञ्च्यते 'त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुखः' इति, "सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन् यदास्ते" इति च। 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिश्रुतिभ्यश्चास्यार्थस्य सिद्धिः। चैतन्यञ्चाविशिष्टं जीवेश्वरयोर्यथाऽग्निविस्फुलिङ्गयोरौष्ण्यं। अतो भेदाभेदावगमाभ्यामंशत्वावगमः। कुतश्चांशत्वावगमः॥

पेक्षस्य पूर्वोक्तोपकार्योपकारकभावस्यासिद्धिरित्याक्षेपात् सङ्गतिः। लोकसिद्धानर्थात्मकभेदानुवादित्वेन भेदश्रुतीनां दुर्बलत्वादज्ञातफलवदभेदश्रुत्यनुसारेण प्रकल्पितभेदनिबन्धनोऽंशांशिभावः सम्बन्ध इति सिद्धान्तयति। अत इत्यादिना। अग्नेः सांशत्वेऽपि निष्कलेश्वरस्य कथं सांशत्वमत आह। अंश इवेति। जीव इत्यनुषङ्गः। भेद एव चेत् स्वस्वामिभावो युक्तो नांशांशिभाव इति शङ्कते। ननु चेति। अभेदस्याऽपि सत्त्वादंशांशिभाव इत्याह। अत इति। वञ्चसि गच्छसि, यदास्ते यो नामरूपे निर्माय प्रविश्य व्यवहरन् वर्तते तं विद्वानमृतो भवतीति श्रुत्यर्थः। श्रुतिसिद्धाभेदे युक्तिमाह। चैतन्यञ्चेति। जीवो ब्रह्मैव चेतनत्वाद्ब्रह्मवदित्यर्थः॥

मन्त्रवर्णाच्च ॥ ४४ ॥

मन्त्रवर्णश्चैतमर्थमवगमयति 'तावानस्य महिमा ततो ज्यायांश्च पूरुषः। पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि' इति। अत्र भूतशब्देन जीवप्रधानानि स्थावरजङ्गमानि निर्दिशति 'अहिंसन् सर्वभूतानि अन्यत्र तीर्थेभ्यः' इति प्रयोगात्। अंशः पादो भाग इत्यनर्थान्तरं, तस्मादप्यंशत्वागमः। कुतश्चांशत्वावगमः॥

अपि च स्मर्यते ॥ ४५ ॥

ईश्वरगीतास्वपि चेश्वरांशत्वं जीवस्य स्मर्यते 'ममैवांशो जीवलोके जीवभूतः सनातनः' इति। तस्मादप्यंशत्वावगमः। यत्तूक्तं स्वामिभृत्यादिष्वेवेशित्रीशितव्यभावो लोके प्रसिद्ध इति। यद्यप्येषा लोके प्रसिद्धिस्तथापि शास्त्रात्त्वंशांशित्वमीशित्रीशि-

---

अस्य सहस्रशीर्षपुरुषस्य तावान् प्रपञ्चो महिमा विभूतिः पुरुषस्तस्मात् प्रपञ्चो ज्यायान्महत्तरः। भूतानि देहिनो जीवा इत्यत्र नियामकमाह। अहिंसन्निति। तीर्थानि शास्त्रोक्तकर्माणि, तेभ्योऽन्यत्र सर्वप्राणिहिंसामकुर्वन् ब्रह्मलोकमाप्नोतीत्यर्थः। अत्र भूतशब्दस्य प्राणिषु प्रयोगात् सूत्रोक्तमन्त्रेऽपि तथेति भावः। भूतानां पादत्वेऽपि कांशत्वं कुतस्तत्राह। अंशः पाद इति॥

जीवस्य पुरुषसूक्तमन्त्रोक्तभगवदंशत्वे भगवद्गीतामुदाहरति सूत्रकारः। अपि चेति। अत्यन्तभिन्ने ईशित्रीशितव्यभावप्रसिद्धेः ईशितव्यजीवस्य कथमीश्वरांशत्वमित्याशङ्क्य कल्पितभेदेनाप्यीशितव्यत्वोपपत्तेः अनन्यथासिद्धाभेदशास्त्रबलादंशत्वमित्याह। यत्त्वित्यादिना। औपाधिके ईश्वरस्य नियन्तृत्वे जीव एव तन्नियन्ता किं न स्यादि-

तद्भावश्च निश्चीयते। निरतिशयोपाधिसम्पन्नश्चेश्वरो निहीनोपाधिसम्पन्नान् जीवान् प्रशास्तीति न किञ्चिद्विप्रतिषिध्यते। अत्राह ननु जीवेश्वरांशत्वाभ्युपगमे तदीयेन संसारदुःखोपभोगेनांशिन ईश्वरस्याऽपि दुःखित्वं स्यात्, यथा लोके हस्तपाद्याद्यन्यतमाङ्गगतेन दुःखेनाङ्गिनो देवदत्तस्य दुःखित्वं तद्वत्। ततश्च तत्प्राप्तानां महत्तरं दुःखं प्राप्नुयात्, अतोऽवरं पूर्वावस्थः संसार एवास्त्विति सम्यग्दर्शनानर्थक्यप्रसङ्गः स्यादिति। अत्रोच्यते॥

प्रकाशादिवन्नैवं परः॥ ४६॥

यथा जीवः संसारदुःखमनुभवति नैवं पर ईश्वरोऽनुभवति इति प्रतिजानीमहे। जीवो ह्यविद्यावेशवशाद्देहाद्यात्मभावमिव गत्वा तत्कृतेन दुःखेन दुःख्यहमिति अविद्याकृतं दुःखोपभोगमभिमन्यते नैवं परमेश्वरस्य देहाद्यात्मभावो

ध्यत आह। निरतिशयेति। नितरां हीनः शरीराद्युपाधिः, अज्ञानिकोपाधितारतम्यादीशेशितव्यव्यवस्था, न वस्तुतः। तदुक्तं सुरेश्वराचार्यैः "ईशेशितव्यसम्बन्धः प्रत्यगज्ञानहेतुजः। सम्यग्ज्ञाने तमोध्वस्तावीश्वराणामपीश्वरः" इति। उत्तरसूत्रमवतारयति। अत्राहेति। ईश्वरः स्वांशदुःखैर्दुःखी अंशित्वात् देवदत्तवदित्यर्थः। ततः किं तत्राह। ततश्चेति। ज्ञानात् सर्वांशदुःखसमष्टिप्राप्त्यपेक्षया संसारोऽवरं तत्र स्वदुःखमात्रानुभवादित्यर्थः॥

नैवं पर इति प्रतिज्ञां विभजते। यथा जीव इति। देवदत्तदृष्टान्ते भ्रान्तिकामकर्मरूपदुःखसामग्रीमत्त्वमुपाधिः तदभावान्नेश्वरस्य दुःखित्वप्राप्तिः। उक्तञ्चैतदभेदेऽपि बिम्बप्रतिबिम्बयोर्धर्मव्यवस्थेति भावः। दुःखस्य

दुःखाभिमानो वास्ति। जीवस्याऽपि अविद्याकृतनामरूपनिर्वृत्तदेहेन्द्रियाद्युपाध्यविवेकभ्रमनिमित्त एव दुःखाभिमानो न तु पारमार्थिकोऽस्ति। यथा च स्वदेहगतं दाहच्छेदादिनिमित्तं दुःखं तदभिमानभ्रान्त्यानुभवति तथा पुत्रमित्रादिगोचरमपि दुःखं तदभिमानभ्रान्त्यैवानुभवत्यहमेव पुत्रोऽहमेव मित्रमित्येवं स्नेहवशेन पुत्रमित्रादिष्वभिनिविशमानः। ततश्च निश्चितमेतदवगम्यते मिथ्याभिमानभ्रमनिमित्त एव दुःखानुभव इति। व्यतिरेकदर्शनाच्चैवमवगम्यते। तथा हि पुत्रमित्रादिमत्सु बहुषूपविष्टेषु तत्सम्बन्धाभिमानिष्वितरेषु च पुत्रो मृतो मित्रं मृतमित्येवमाद्युद्घोषिते येषामेव पुत्रमित्रादिमत्त्वाभिमानस्तेषामेव तन्निमित्तं दुःखमुत्पद्यते नाभिमानहीनानां परिव्राजकानां। अतश्च लौकिकस्याऽपि पुंसः सम्यग्दर्शनार्थवत्त्वं दृष्टं किमुत विषयशून्यादात्मनोऽन्यद्वस्त्वन्तरमपश्यतो नित्यचैतन्यमात्रस्वरूपस्येति। तस्मान्नास्ति सम्यग्दर्शनानर्थक्यप्रसङ्गः। प्रकाशादिवदिति निदर्शनोपन्यासः। यथा प्रकाशः सौर्यश्चान्द्रमसो वा वियद्व्याप्यावतिष्ठमानोऽङ्गुल्याद्युपाधिसम्बन्धात् तेषु ऋजुवक्रादिभावं प्रतिपद्यमानेषु तत्तद्भा-

---

भ्रान्तिकृतत्वं प्रपञ्चयति। जीवस्यापीत्यादिना। भ्रान्तौ सत्यां दुःखमित्यन्वयमुक्त्वा भ्रान्त्यभावे दुःखाभावः। दर्शनाच्च भ्रान्तिकृतं दुःखमिति निश्चीयत इत्याह। व्यतिरेकेति। इतरेष्वभिमानशून्येष्वित्यर्थः। जीवस्याऽपि सम्यग्ज्ञाने दुःखाभावो दृष्टः किमु वाच्यं नित्यसर्वज्ञेश्वरस्येत्याह। अतश्चेति। एवमंशित्वे हेतोः सोपाधित्वमुक्त्वा योऽंशी स

वमिव प्रतिपद्यमानोऽपि न परमार्थतस्तद्भावं प्रतिपद्यते, यथा चाकाशो घटादिषु गच्छत्सु गच्छन्निव विभाव्यमानोऽपि न परमार्थतो गच्छति, यथा चोदशरावादिकम्पनात् तद्गते सूर्यप्रतिबिम्बे कम्पमानेऽपि न तद्वान् सूर्यः कम्पते, एवमविद्याप्रत्युपस्थापिते बुद्ध्याद्युपाध्युपहिते जीवाख्येंऽशे दुःखायमानेऽपि न तद्वानीश्वरो दुःखायते। जीवस्यापि दुःखप्राप्तिरविद्यानिमित्तैवेत्युक्तं। तथा चाविद्यानिमित्तजीवभावव्युदासेन ब्रह्मभावमेव जीवस्य प्रतिपादयन्ति वेदान्ताः 'तत्त्वमसि' इत्येवमादयः, तस्मान्नास्ति जैवेन दुःखेन परमात्मनो दुःखित्वप्रसङ्गः॥

स्मरन्ति च॥ ४७॥

स्मरन्ति च व्यासादयः यथा जैवेन दुःखेन न परमात्मा दुःखायते इति।

"तत्र यः परमात्मा हि स नित्यो निर्गुणः स्मृतः।
न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसा॥
कर्मात्मा त्वपरो योऽसौ मोक्षबन्धैः स युज्यते।
स सप्तदशकेनापि राशिना युज्यते पुनः"॥ इति।

वस्तुतः स्वांशधर्मवानिति व्याप्तिस्थलत्रये व्यभिचारयति। प्रकाशादिवदिति। वस्तुतः स्वांशदुःखित्वसाध्यस्य देवदत्तदृष्टान्ते वैकल्यमप्याह। जीवस्येति। कल्पितदुःखित्वसाध्यन्तु भ्रान्त्याद्यभावादीश्वरे नास्तीत्युक्तं, किञ्च जीवस्येश्वरस्य वा वस्तुतो दुःखित्वानुमानं न युक्तं आगमबाधादित्याह। तथा चेति। दुःखित्वे तद्भावोपदेशो न स्यादित्यर्थः॥

स्मृत्याप्यनुमानं बाध्यमित्याह। स्मरन्ति चेति। सूत्रं व्याचष्टे। स्मरन्तीति। तत्र जीवपरयोर्मध्ये कर्मात्मा कर्माश्रयो जीवः। दशेन्द्रियाणि

च शब्दात् समामनन्ति चेति वाक्यशेषः। 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशि' इति 'एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः' इति च। अत्राह यदि तर्हि एक एव सर्वेषां भूतानामन्तरात्मा स्यात् कथमनुज्ञापरिहारौ स्यातां लौकिकौ वैदिकौ वेति। ननु चांशो जीव ईश्वरस्येत्युक्तं तद्भेदाच्चानुज्ञापरिहारौ तदाश्रयावव्यतिकीर्णावुपपद्येते किमत्र चोद्यते इति। उच्यते नैतदेवं, अनंशत्वमपि हि जीवस्याभेदवादिन्यः श्रुतयः प्रतिपादयन्ति 'तत्सृष्ट्वा तदेवानुप्राविशत्' 'नान्योऽतोऽस्ति द्रष्टा' 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' 'तत्त्वमसि' 'अहं ब्रह्मास्मि' इत्येवंजातीयिकाः। ननु भेदाभेदावगमाभ्यामंशत्वं सिध्यतीत्युक्तं। स्यादेतदेवं यद्युभावपि भेदाभेदौ प्रतिपिपादयिषितौ स्यातां, अभेद एव त्वत्र प्रतिपिपादयिषितः, ब्रह्मात्मत्वप्रतिपत्तौ पुरुषार्थसिद्धेः। स्वभावप्राप्तस्तु भेदोऽनूद्यते। न च निरवयवस्य ब्रह्मणो मुख्योऽंशो जीवः सम्भवतीत्युक्तं,

---

पञ्च प्राणाः मनो बुद्धिश्चेति सप्तदशसङ्ख्याको राशिर्लिङ्गं। सूत्रे चशब्दः श्रुतिसमुच्चयार्थ इत्याह। चशब्दादिति। यथाऽऽदित्यः प्रकाश्यदोषैर्न लिप्यते तथेत्यर्थः। यतो बाह्योऽसङ्गः तस्मात् न लिप्यते, एवमंशित्वहेतमीश्वरे दोषं निरस्यांश इत्युक्तं जीवस्यांशत्वं देहाद्युपाधिकमिति स्फुटयितुमत्यन्तस्वरूपैक्यमादायाक्षिपति। अत्राहेत्यादिना। कथं तर्हि इत्यन्वयः। तद्भेदादंशभेदात्। निरवयवब्रह्मणो मुख्यांशेन सम्भवतीति वदता सिद्धान्तिना भेदो नास्तीत्युक्तं भवति, भेदाभावे चांशांशित्वाभावादनुज्ञादिभेदाव्यवहारानुपपत्तिरित्याक्षेपाभिप्रायः। न वयं भेदस्यासत्त्वं नरशृङ्गवत् ब्रूमः, किन्तु मिथ्यात्वं वदामः। तथा च

तस्मात् पर एव एकः सर्वेषां भूतानामन्तरात्मा जीवभावे-नावस्थित इत्यतो वक्तव्यानुज्ञापरिहारोपपत्तिः, तां ब्रूमः॥

अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत्॥ ४८॥

ऋतौ भार्यामुपेयादित्यनुज्ञा, गुर्वङ्गनां नोपगच्छेदिति परिहारः, तथाऽग्नीषोमीयं पशुं संज्ञपयेदित्यनुज्ञा, मा हिंस्यात् सर्वा भूतानीति परिहारः। एवं लोकेऽपि मित्रमुपसेवितव्यमित्यनुज्ञा, शत्रुः परिहर्तव्य इति परिहारः, एवम्प्रकारावनुज्ञापरिहारावेकत्वेऽप्यात्मनो देहसम्बन्धात् स्याताम्। देहैः सम्बन्धो देहसम्बन्धः। कः पुनर्देहसम्बन्धः। देहादिरयं सङ्घातोऽहमेवेत्यात्मनि विपरीतप्रत्ययोत्पत्तिः। दृष्टा च सा सर्वप्राणिनाम् अहं गच्छाम्यहमागच्छामि अहमन्धोऽहमनन्धोऽहं मूढोऽहममूढ इत्येवमात्मिका। न ह्यस्याः सम्यग्दर्शनादन्यन्निवारकमस्ति। प्राक् तु सम्यग्दर्शनात् प्रततैषा भ्रान्तिः *सर्वजन्तूनाम्। तदेवमविद्यानिमित्तदेहाद्युपाधिसम्बन्धकृताद्विशेषादैकात्म्याभ्युपगमेऽपि अनुज्ञापरिहाराववकल्प्येते, सम्यग्दर्शिनस्तर्ह्यनुज्ञापरिहारानर्थक्यं प्राप्तं न तस्य कृतार्थत्वान्नियोज्यत्वानुपपत्तेः।

देहाद्युपाधिभेदेनांशजीवानामात्मबोधात् कल्पितभेदाद्विदव्यवस्था-दोषपर्यत्तिरिति सूत्रेण समाधत्ते। तामित्यादिना॥

ननु भ्रान्तिः कुतश्चिन्निवृत्तौ व्यवहारविच्छेदः स्यादित्यत आह। न ह्यस्या इत्यादिना। प्रतता सन्तता, विशेषो भेदः, अनियोज्यत्वाद्ब्रह्मविदः। शास्त्रानर्थक्यमिष्टमित्याह। न तस्येति। नियोगविषय-

---

* सर्वजन्तुष्विति वर्ध० का०।

हेयोपादेययोर्हि नियोज्यो नियोक्तव्यः स्यात्, आत्मनस्त्वतिरिक्तं हेयमुपादेयं वा वस्त्वपश्यन् कथं नियुज्येत, न चात्माऽऽत्मन्येव नियोज्यः स्यात्। शरीरव्यतिरेकदर्शिन एव नियोज्यत्वमिति चेन्न तत्संहतत्वाभिमानात्। सत्यं व्यतिरेकदर्शिनो नियोज्यत्वं तथापि व्योमादिवद्देहाद्यसंहतत्वमपश्यत एवात्मनो नियोज्यत्वाभिमानः। न हि देहाद्यसंहतत्वदर्शिनः *कस्यचिदपि नियोगो दृष्टः किमुतैकात्म्यदर्शिनः। न च नियोगाभावात् सम्यग्दर्शिनो यथेष्टचेष्टाप्रसङ्गः, सर्वत्राभिमानस्यैव प्रवर्त्तकत्वात्, अभिमानाभावाच्च सम्यग्दर्शिनः, तस्माद्देहसम्बन्धादेवानुज्ञापरिहारौ ज्योतिरादिवत्। यथा ज्योतिष एकत्वेऽपि अग्निः क्रव्यात् परिह्रियते नेतरः, यथा च प्रकाश एकस्यापि सवितुरमेध्यप्रदेशसम्बन्धः परिह्रियते नेतरः शुचिभूमिष्ठः, तथा भौमाः प्रदेशा वज्र-

द्वैताभावादात्मन्यसाध्ये नियोगानुपपत्तेर्न ब्रह्मविन्नियोज्य इत्यर्थः। नन्वामुष्मिकफलहेतुके कर्मणि देहभिन्नात्मविवेकिन एवाधिकारी वाच्यः, तथा च ब्रह्मविन्नियोज्यः विवेकित्वात् कर्माधिकारिवदिति शङ्कते। शरीरव्यतिरेकेति। परोक्षविवेकस्यापरोक्षभ्रमाविरोधित्वात् कर्मिणो देहाभेदभ्रमोऽस्ति, तथा च भ्रम उपाधिरिति परिहरति। नेत्यादिना। यथा व्योम देहाच्छिन्नं तद्वदहमित्यपश्यतः भ्रान्तस्येत्यर्थः। ब्रह्मविन्नियोज्यः अभ्रान्तत्वात् सुषुप्तवदित्याह। न हीति। देहाद्यसंहतत्वदर्शिनः संहतत्वदर्शनशून्यस्य भेदभ्रान्तिरहितस्य सुषुप्तस्येति यावत्। अज्ञस्याऽपि भ्रान्त्यभावकाले नियोज्यत्वं न दृष्टं किमु वाच्यमात्मविद इत्यर्थः। अनियोज्यत्वे बाधकमाशङ्क्य परिहरति। न चेति। विषयवैराग्यस्य ज्ञानार्थमभ्यस्तस्य ज्ञानान्तरमनुवृत्त्या विषयेषु प्रवर्त्तकरागनिवृत्तेर्नातिप्रसङ्ग इत्यर्थः। यदुक्तं भगवता 'रसोऽप्यस्य परं दृष्ट्वा निवर्त्तते' इति। एवमनुज्ञादिप्रसङ्गेनानियोज्यत्वं विदुष उक्त्वा प्रकृत-

* कस्यचिदपीति वर्ध०।

वैदूर्यादयः उपादीयन्ते, भौमा अपि सन्तो नरकलेवरादयः परिह्रियन्ते, तथा मूत्रपुरीषं गवां पवित्रतया परिगृह्यते, तदेव जात्यन्तरे परिवर्ज्यते तद्वत्॥

असन्ततेश्चाव्यतिकरः॥ ४९ ॥

स्यातां नामानुज्ञापरिहारावेकस्याप्यात्मनो देहविशेषयोगात्। यस्त्वयं कर्मफलसम्बन्धः स चैकात्म्याभ्युपगमे व्यतिकीर्येत स्वाम्येकत्वादिति चेत्, नैतदेवं, असन्ततेः। न हि कर्तुर्भोक्तुश्चात्मनः सन्ततिः सर्वैः शरीरैः सम्बन्धोऽस्ति। उपाधितन्त्रो हि जीव इत्युक्तं, उपाध्यसन्तानाच्च नास्ति जीवसन्तानः, ततश्च कर्मव्यतिकरः फलव्यतिकरो वा न भविष्यति॥

आभास एव च॥ ५०॥

आभास एव चैष जीवः परस्यात्मनो जलसूर्यकादिवत् प्रतिपत्तव्यः, न स एव साक्षान्नापि वस्त्वन्तरं। अतश्च यथा

मुपसंहरति। तस्मादिति। एकस्याप्युपाधिभेदात् अनुज्ञापरिहारयोर्दृष्टान्तमाह। ज्योतिरिति। क्रव्यं मांसमत्तीति क्रव्यादशुचिः श्मशानाग्निरित्यर्थः॥

प्रश्नोत्तरत्वेन सूत्रं व्याचष्टे। स्यातामित्यादिना। यद्यपि स्थूलदेहसम्बन्धादुपादानपरित्यागौ स्यातां तथाप्यन्यकृतकर्मफलमितरेणापि भुज्येतेति कर्मफलव्यतिकरः साङ्कर्यं स्यादिह विशिष्टस्य स्वर्गादिभोगायोगेनाविशिष्टात्मन एकस्यैव भोक्तृत्वात्। तस्मात् स्वर्गी नरकी चेति व्यवस्थासिद्धये आत्मस्वरूपभेदो वाच्य इति प्रश्नार्थः। भवेत्तदा साङ्कर्यं यद्यनुपहितात्मन एव भोक्तृत्वं स्यान्न त्वेतदस्ति। तद्गुणसारत्वादित्यत्र मोक्षस्यापि, बुद्ध्युपहितस्यैव कर्तृत्वादिस्थापनात्, तथा च बुद्धेः परदेहासम्बन्धात् तदुपहितजीवस्य नास्ति परदेहसम्बन्ध इति बुद्धिभेदेन भोक्तृभेदान्न कर्मादिसाङ्कर्यमिति समाधानार्थः॥

नैकस्मिन् जलसूर्यके कम्पमाने जलसूर्यकान्तरं कम्पते, एवं नैकस्मिन् जीवे कर्मफलसम्बन्धिनि जीवान्तरस्य तत्सम्बन्धः, एवमव्यतिकर एव कर्मफलयोः आभासस्य चाविद्याकृतत्वात् तदाश्रयस्य संसारस्याविद्याकृतत्वोपपत्तिरिति तद्व्युदासेन च पारमार्थिकस्य *ब्रह्मात्मभावस्योपदेशोपपत्तिः। येषान्तु बहव आत्मानस्ते च सर्वे सर्वगतास्तेषामेवैष व्यतिकरः प्राप्नोति। कथं बहवो विभवश्चात्मानश्चैतन्यमात्रस्वरूपा निर्गुणा निरतिशयाश्च तदर्थं साधारणं प्रधानं तन्निमित्तैषां भोगापवर्गसिद्धिरिति साङ्ख्याः। सति बहुत्वे विभुत्वे च घटकुड्यादिसमानाः द्रव्यमात्र-

---

अंशेत्याद्यसूत्रे जीवस्यांशत्वं घटाकाशस्येवोपाध्यवच्छेदबुद्ध्योक्तं संप्रति एवकारेणावच्छेदपक्षारुचिं सूचयन् रूपं रूपं प्रतिरूपो बभूवेत्यादिश्रुतिसिद्धं प्रतिबिम्बपक्षमुपन्यस्यति भगवान् सूत्रकारः। आभास एव चेति। स परमात्मैवानुपहितो जीवो न भवति उपाध्यनुभवात् नापि ततो भिन्नः, स एष इह प्रविष्ट इत्याद्यभेदश्रुतिस्मृतिविरोधात्, तस्मादविद्यातत्कार्यबुद्ध्यादिप्रतिबिम्ब एव जीव इत्यर्थः। अस्मिन् पक्षे बुद्धिप्रतिबिम्बभेदात् स्वर्गी नरकीत्यादिव्यवस्था जीवस्याविद्यकत्वाद्विद्यया मोक्षश्चेत्युपपद्यत इत्याह। अतश्चेत्यादिना। यत्त्वयं भास्करस्य प्रलापः प्रतिबिम्बस्य नोपाधिसंसृष्टतया कल्पितत्वं किन्तु स्वरूपेणैव, अतः कल्पितप्रतिबिम्बस्य मुक्तौ स्थित्ययोगात् न जीवत्वं इति स सिद्धान्तरहस्याज्ञानकृत इत्युपेक्षणीयः। यदि दर्पणे मुखं शुक्तौ रजतवत् कल्पितं स्यात् तदा नेदं रजतमिति स्वरूपबाधवन्नेदं मुखमिति बाध्यं स्यात्, अतो नास्ति दर्पणे मुखमिति संसर्गमात्रबाधान्मदीयं मुखमेवेदमित्यबाधितमुखाभेदानुभवात् संसृष्टत्वेनैव कल्पितत्वं प्रवेशवाक्यैश्चाविकृतब्रह्मण एव प्रतिबिम्बभावाख्यप्रवेशोक्तेर्न स्वरूपकल्पना, पराक्रान्तं चात्र दर्पणटीकायामाचार्यैरित्यु-

---

* ब्रह्मभावस्येति. वर्ध०।

स्वरूपाः स्वतोऽचेतना आत्मानस्तदुपकरणानि चाणूनि मनांसि अचेतनानि तत्रात्मद्रव्याणां मनोद्रव्याणां च संयोगान्न वेच्छादयो वैशेषिका आत्मगुणा उत्पद्यन्ते, ते चाव्यतिकरेण प्रत्येकमात्मसु समवयन्ति, स संसारस्तेषां नवानामात्मगुणानामत्यन्तानुत्पादो मोक्ष इति काणादाः। तत्र साङ्ख्यानां तावच्चैतन्यस्वरूपत्वात् सर्वात्मनां सन्निधानाद्यविशेषाच्च एकस्य सुखदुःखसम्बन्धे सर्वेषां सुखदुःखसम्बन्धः प्राप्नोति। स्यादेतत् प्रधानप्रवृत्तेः पुरुषकैवल्यार्थत्वात् व्यवस्था भविष्यति। अन्यथा हि स्वविभूतिख्यापनार्था प्रधानप्रवृत्तिः स्यात्, तथा चानिर्मोक्षः प्रसज्येतेति। नैतत्सारं। न ह्यभिलषितसिद्धिनिबन्धना व्यवस्था शक्या विज्ञातुं, उपपत्त्या तु कयाचित् व्यवस्थोच्येतासत्यां पुनरुपपत्तौ कामं माभूदभिलषितं पुरुषकैवल्यं, प्राप्नोति तु व्यवस्थाहेत्वभावाद्व्यतिकरः, काणादाना-

---

परस्यते। एवं स्वमते स्वरूपैक्येऽप्युपहितजीवभेदादसाङ्कर्यमुक्तं, सम्प्रति सूत्रे चकारसूचितं परेषां साङ्कर्यं वक्तुमुपक्रमते। येषामित्यादिना। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावना नवात्मविशेषगुणाः, सन्निधानादित्यादिपदादौदासीन्यमुक्तं। साङ्ख्यः स्वाभिप्रायं शङ्कते। स्यादेतदिति। सर्वेषां पुंसां प्रकृतिसान्निध्याद्यविशेषेऽपि प्रकृतिरेव प्रतिपुरुषं नियमेन भोगापवर्गार्थं प्रवर्त्तते, तथा चोद्देश्यपुरुषार्थनियता प्रधानप्रवृत्तिरिति भोगादिव्यवस्था, अन्यथा नियमप्रवृत्त्यनङ्गीकारे स्वमाहात्म्यख्यापनार्था प्रधानस्य प्रवृत्तिरित्युद्देश्यविघातः स्यादित्यर्थः। जडप्रधानस्योद्देश्यविवेकाभावात् पुरुषार्थस्याप्यनागतस्याचेतनस्यानियामकत्वान्न व्यवस्था मानयुक्तिशून्यत्वादित्याह। नैतदिति। यो हि नियामकाभावेनोद्देश्यविघातमापादयति तं प्रति तस्यैवापादनमिष्टमिति भावः। तार्किकमतेऽपि भोगादिसाङ्कर्यमित्याह। काणादाना-

मपि यदैकेनात्मना मनः संयुज्यते तदात्मान्तरैरपि नान्तरी-यकः संयोगः स्यात् सन्निधानाद्यविशेषात्, ततश्च हेत्वविशेषात् फलाविशेष इत्येकस्यात्मनः सुखदुःखसंयोगे सर्वात्मनामेव समानसुखदुःखत्वं प्रसज्येत। स्यादेतत् *अदृष्टनिमित्तो नियमो भविष्यतीति, नेत्याह॥

अदृष्टानियमात्॥ ५१॥

बहुष्वात्मसु †आकाशवत् सर्वगतेषु प्रतिशरीरं बाह्याभ्यन्तराविशेषेण सन्निहितेषु मनोवाक्कायैर्धर्माधर्मलक्षणं अदृष्टमुपार्ज्यते। साङ्ख्यानां तावत्तदनात्मसमवायिप्रधानवर्त्ति-प्रधानसाधारण्यान्न प्रत्यात्मं सुखदुःखोपभोगस्य नियामकमुपपद्यते। काणादानामपि पूर्ववत् साधारणेन आत्ममनः-संयोगेन निर्वर्त्तितस्यादृष्टस्यापि, अस्यैवात्मन इदमदृष्टमिति नियमे हेत्वभावादेष एव दोषः। स्यादेतत् अहमिदं फलं प्राप्नवानीदं परिहराणि इत्थं प्रयते इत्थं करवाणीत्येवंविधा अभिसन्ध्यादयः प्रत्यात्मं प्रवर्तमाना अदृष्टस्यात्मनां च स्वस्वामिभावं नियंस्यन्तीति, नेत्याह॥

मिति। हेतुर्मनःसंयोगः, फलं सुखादि, यदात्माद्दृष्टकृतो यो मनः-संयोगः स तदात्मन एव सुखादिहेतुरिति व्यवस्थां शङ्कते। स्यादेत-दिति। सूत्रेण परिहरति। नेत्याहेति॥

पूर्ववत् मनःसंयोगवत्, अदृष्टस्याऽपि सर्वात्मसाधारणत्वात् न व्यव-स्थेत्यर्थः। रागादिनियमात् तज्जादृष्टनियम इत्याशङ्कोत्तरत्वेन सूत्रं गृह्णाति। स्यादेतदित्यादिना॥

---

* अदृष्टनियम इति वर्ध०। † आकाशवदिति वर्ध० नास्ति।

अभिसन्ध्यादिष्वपि चैवं ॥ ५२ ॥

अभिसन्ध्यादीनामपि साधारणेनैवात्ममनःसंयोगेन सर्वात्मसन्निधौ क्रियमाणानां नियमहेतुत्वानुपपत्तेरुक्तदोषानुषङ्ग एव॥

प्रदेशादिति चेन्नान्तर्भावात् ॥ ५३ ॥

अथोच्येत विभुत्वेऽप्यात्मनः शरीरप्रतिष्ठेन मनसा संयोगः शरीरावच्छिन्ने एवात्मप्रदेशे भविष्यति, अतः प्रदेशकृता व्यवस्थाऽभिसन्ध्यादीनामदृष्टस्य सुखदुःखयोश्च भविष्यतीति। तदपि नोपपद्यते, कस्मात् अन्तर्भावात्। विभुत्वाविशेषाद्धि सर्व एवात्मनः सर्वशरीरेष्वन्तर्भवन्ति। तत्र न वैशेषिकैः शरीरावच्छिन्नोऽप्यात्मनः प्रदेशः कल्पयितुं शक्यः। कल्प्यमानोऽप्ययं निष्प्रदेशस्यात्मनः प्रदेशः काल्पनिकत्वादेव न पारमार्थिकं कार्यं नियन्तुं शक्नोति। शरीरमपि सर्वात्मसन्निधावुत्पद्यमानमस्यैवात्मनो नेतरेषामिति न नियन्तुं शक्यं। प्रदेशविशेषाभ्युप-

---

अनियमः उक्तदोषः, आत्मान्तरप्रदेशस्य परदेहे अन्तर्भावात् व्यवस्थेति शङ्कार्थः॥

किं मनसा संयुक्तात्मैवात्मनः प्रदेशः उत कल्पितः। आद्ये सर्वात्मनां सर्वदेहेषु अन्तर्भाव इति व्यवस्था। द्वितीयं दूषयति। तत्र न वैशेषिकैरिति। सर्वात्मसान्निध्ये सति कस्यचिदेव प्रदेशः कल्पयितुमशक्यः नियामकाभावादित्यर्थः। प्रदेशकल्पनामङ्गीकृत्याह। कल्प्येति। कार्यमभिसन्ध्यादिकं यस्यात्मनो यच्छरीरं तत्र तस्यैव भोग इति व्यवस्थामाशङ्क्याह। शरीरमपीति। प्रदेशपक्षे दोषान्तरमाह। प्रदेशेति। यस्मिन्नात्मप्रदेशेऽदृष्टोत्पत्तिः स किं चलः स्थिरो वा, नाद्यः अचलेऽंशिन्यंशस्य चलनविभागयोरसम्भवादनात्मवादापाताच्च। द्वितीये तस्मिन्नेव प्रदेशे परस्याऽपि भोगदर्शनाददृष्टमस्त्वेकेनापि शरीरेण द्वयोरात्मनोर्भोगप्रसङ्गः। यद्यात्म-

णमेऽपि च द्वयोरात्मनोः समानसुखदुःखभाजोः कदाचिदेकेनैव तावच्छरीरेणोपभोगसिद्धिः स्यात्, समानप्रदेशस्यापि द्वयोरात्मनोरदृष्टस्य सम्भवात्। तथा हि देवदत्तो यस्मिन् प्रदेशे सुखदुःखमन्वभूत् तस्मात् प्रदेशादपक्रान्ते तच्छरीरे यज्ञदत्तशरीरे च तं देशमनुप्राप्ते तस्यापीतरेण समानः सुखदुःखानुभवो दृश्यते स न स्यात् यदि देवदत्तयज्ञदत्तयोः समानप्रदेशमदृष्टं न स्यात्, स्वर्गाद्यनुपभोगप्रसङ्गश्च प्रदेशवादिनः स्यात्, ब्राह्मणादिशरीरप्रदेशेष्वदृष्टनिष्पत्तेः प्रदेशान्तरवर्तित्वाच्च। स्वर्गाद्युपभोगस्य सर्वगतत्वानुपपत्तिश्च बहूनामात्मनां दृष्टान्ताभावात्। वद तावत् त्वं के बहवः समानप्रदे-

---

भेदात् प्रदेशयोर्भेदः तदापि तयोरेकदेहान्तर्भावाद्भोगसाङ्कर्यं तदवस्थं सावयवात्मवादप्रसङ्गश्च। किञ्च यत्र यत्रात्मनः प्रदेशे शरीरादिसंयोगाददृष्टमुत्पन्नं तत्तत्रैवाचलप्रदेशे स्थितमिति स्वर्गादिशरीरावच्छिन्नात्मन्यदृष्टाभावात् भोगो न स्यात, अतः प्रदेशभेदो न व्यवस्थापकः। यत्तु अत्रोत्पन्नमदृष्टं स्वाश्रये यत्र क्वचित् भोगहेतुरिति स्वर्गादिभोगसिद्धिरिति, तन्न भोगशरीरात् दूरस्थादृष्टे मानाभावादिति भावः। यदपि केचिदाहुः मनस एकत्वेऽप्यात्मनां भेदेन संयोगव्यक्तीनां भेदात् कयाचित् संयोगव्यक्त्या कस्मिंश्चिदेवात्मन्यदृष्टादिकमित्यसाङ्कर्यमिति, तन्न संयोगव्यक्तीनां वैजात्याभावेन सर्वासामेवैकदेहान्तः सर्वात्मस्वदृष्टहेतुत्वापत्तेः, तथाच सर्वात्मनां एकस्मिन् देहे भोक्तृत्वं दुर्वारं। किञ्च बहूनां विभुत्वमङ्गीकृत्य साङ्कर्यमुक्तं सम्प्रति बहूनां विभुत्वमसिद्धमहमिहैवास्मि इत्यव्याप्तत्वानुभवात् मानाभावाच्चेत्याह। सर्वगतत्वानुपपत्तिश्चेति। किञ्च बहूनां विभुत्वे समानदेशत्वं वाच्यं तच्चायुक्तमदृष्टत्वादित्याह। वदेति। ननु रूपरसादीनामेकघटस्थत्वं दृष्टमिति चेत् नायमस्मत्संमतो दृष्टान्तः। रूपस्य तेजोमात्रत्वाद्रसस्य अम्मात्रत्वात् गन्धस्य पृथिवीमात्रत्वात् इत्येवं तत्तद्गुणस्य स्वस्वधर्म्यंशेनाभेदात्


शाखेति । रूपादय इति चेत् न, तेषामपि धर्म्यंशेनाभेदाल्लक्षणभेदाच्च न तु बहूनामात्मनां लक्षणभेदोऽस्ति अन्त्यविशेषवशाद्भेदोपपत्तिरिति चेत् न, भेदकल्पनाया अन्त्यविशेषकल्पनायाश्चेतरेतराश्रयत्वात्, आकाशादीनामपि विभुत्वं ब्रह्मवादिनोऽसिद्धं कार्यत्वाभ्युपगमात्, तस्मादात्मैकत्वपक्ष एव सर्वदोषाभाव इति सिद्धं ॥

इति श्रीमच्छारीरकमीमांसाभाष्ये शङ्करभगवत्पादकृतौ द्वितीयस्याध्यायस्य तृतीयः पादः ॥ * ॥

तजन्यादिधर्म्यतिरिक्तपटाभावात् । किञ्चात्मनां बहुत्वमप्यसिद्धं, आत्मत्वरूपलक्षणस्याभेदात्, तथा च देवदत्तात्मा यज्ञदत्तात्मनो न भिन्नः आत्मत्वाद्यज्ञदत्तात्मवत् । अत्र वैशेषिकः शङ्कते । अन्त्यविशेषेति । नित्यद्रव्यमात्रवृत्तयो विशेषास्ते च स्वयं स्वाश्रयव्यावर्तका एव न तेषां व्यावर्तकमपेक्षन्ते इत्यन्त्या उच्यन्ते । तथा च विशेषरूपलक्षणभेदात् अन्त्यात्मभेद इत्यर्थः । न तावदात्मन्यनात्मनः सकाशाद्भेदज्ञानार्था विशेषकल्पना आत्मत्वादेवानात्मभेदसिद्धेः । नाप्यात्मनां मिथो भेदज्ञानार्थं तत्कल्पना, आत्मभेदस्याद्याप्यसिद्धेः । न च विशेषभेदकल्पनादेवात्मभेदकल्पना युक्ता आत्मभेदज्ञानाभावात्मसु विशेषभेदसिद्धिस्तत्सिद्धौ तत्सिद्धिरित्यन्योन्याश्रयादिति परिहारार्थः । यत्तु बहूनां विभुत्वे आकाशादिकालदृष्टान्त इति सोऽप्यसम्मत इत्याह । आकाशादीनामिति । विभुत्वैकवृत्तित्वे लाघवान्न विभुभेदः । यथैकस्मिन्नाकाशे भेरीवीणादिभेदेन तारमन्द्रादिशब्दव्यवस्था एवमेकस्मिन्नप्यात्मनि बुद्ध्युपाधिभेदेन सुखादिव्यवस्थोपपत्तेरात्मभेदेऽपि व्यवस्थानुपपत्तेरात्मन्यमुधा भेदकल्पनेत्युपसंहरति । तस्मादिति । एवम्भूतभोक्तृश्रुतीनां विरोधाभावात् ब्रह्मण्यद्वये समन्वय इति सिद्धं ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य्य श्रीगोविन्दानन्दभगवत्पादकृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां द्वितीयाध्यायस्य तृतीयः पादः ॥ * ॥

ॐ परमात्मने नमः।



तथा प्राणाः ॥ १ ॥

वियदादिविषयः श्रुतिविप्रतिषेधः तृतीयेन पादेन परिहृतः, चतुर्थेनेदानीं प्राणविषयः परिहृयते। तत्र तावत् 'तत्तेजोऽसृजत' इति, 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः' इति चैवमादिषूत्पत्तिप्रकरणेषु प्राणानामुत्पत्तिर्नाम्नायते। क्वचिच्चानुत्पत्तिरेवैषामाम्नायते 'असद्वा इदमग्र आसीत् तदाहुः किं तदसदासीदित्यृषयो वाव तेऽग्रे सदासीत् तदाहुः के ते ऋषय इति प्राणा वा ऋषयः' इत्यत्र प्रागुत्पत्तेः प्राणानां

ॐ ब्रह्मणे नमः।

पूर्वाधिकरणे कर्तुः स्वरूपं विचार्य तदुपकरणानामिन्द्रियाणामुत्पत्तिं साधयति। तथा प्राणाः। भूतभोक्तृविचारानन्तरं भौतिकप्राणविचार इति हेतुहेतुमद्भावं पादयोः सङ्गतिमाह। वियदादीति। तमेव विप्रतिषेधमाह। तत्रेत्यादिना। यद्यपि प्राणानामनुत्पत्तौ एकविज्ञानप्रतिज्ञानुपपत्तेर्वियदधिकरणन्यायात्तेषामुत्पत्तिः सिध्यति तथापि प्रलये प्राणसद्भावश्रुतेः गतिकथनार्थमेतदधिकरणमित्यपौनरुक्त्यं। अत्र प्राणाः विषयाः। ते किमुत्पद्यन्ते न वेति श्रुतीनां विप्रतिपत्त्या संशये तासां समबलत्वादनिर्णय इत्यप्रामाण्यमिति पूर्वपक्षफलं, तत्र गौणत्वादिसमाधानमाह। अथ वेति। प्राणानां प्रलये सद्भावश्रुतेर्निरवकाशत्वेन बलीयस्त्वादुत्पत्तिश्रुतिर्जीवोत्पत्तिश्रुतिवद्गौणीत्यविरोध इत्यर्थः।

सद्भावश्रवणात्। अन्यत्र तु प्राणानामप्युत्पत्तिः पठ्यते 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेवैतस्मादात्मनः सर्वे प्राणाः' इति 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' इति 'सप्त प्राणाः प्रभवन्ति तस्मात्' इति 'स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नं' इति चैवमादिप्रदेशेषु। तत्र तत्र श्रुतिविप्रतिषेधादन्यतरनिर्धारणकारणानिरूपणाच्चा-प्रतिपत्तिः प्राप्नोति, अथवा प्रागुत्पत्तेः सद्भावश्रवणाद् गौणी प्राणानामुत्पत्तिश्रुतिरिति प्राप्नोति, अत इदं पठति। तथा प्राणा इति। कथं पुनरत्र तथेत्यक्षरानुलोम्यं, प्रकृतोपमा-नाभावात्। सर्वगतात्मबहुत्ववादिदूषणमतीतानन्तरपादान्ते प्रकृतं तत्तावन्नोपमानं सम्भवति, सादृश्याभावात्। सादृश्ये

अप्रमाणपक्षवद्गौणपक्षोऽपि मुख्यसिद्धान्तिनः पूर्वपक्ष एवेति ज्ञाप-नार्थमथवेत्युक्तं। मुख्यसिद्धान्त्याह। अत इति। तथाशब्दमाक्षि-पति। कथमिति। आनुलोम्यं सामञ्जस्यमित्यर्थः। साम्यं स्फुटयति, यथा दृष्टस्येति। दूषणवत् प्राणा इत्यनुचितं। यद्यप्यदृष्टवत् प्राणा अप्यनियता इति सूत्रमन्वेति तथापि पुनरुक्तं जीववत् प्राणा नो-त्पद्यन्त इति सूत्रार्थश्चेदपसिद्धान्त इत्याक्षेपार्थः। समाधत्ते। न उदा-हरणेति। दृष्टान्तो दार्ष्टान्तिकसन्निहितो वाच्य इत्यङ्गीकृत्यैकवाक्य-स्थत्वेन सान्निध्यमुक्तं, सम्प्रति नायं नियमः। जैमिनिना भगवता व्यवहिताव्यवहितदृष्टान्तस्याश्रितत्वादित्याह। अथ वेति। अस्ति तृतीयाध्यायेऽश्वप्रतिग्रहेष्ट्यधिकरणं, तस्येदं विषयवाक्यं, "यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणांश्चतुष्कपालान्निर्वपेद्" इत्येतदुत्तराधिक-रणे किमियं वारुणेष्टिर्दातुरुत प्रतिग्रहीतुरिति विषये प्रतिगृह्णी-यादिति श्रुतेः प्रतिग्रहीतुरित्याशङ्क्य प्रजापतिर्वरुणायाश्वमनयदि-

हि सत्युपमानं स्यात्, यथा सिंहस्तथा बलवर्मेति। अदृष्टसाम्यप्रतिपादनार्थमिति यद्युच्येत, यथा अदृष्टस्य सर्वात्मसन्निधावुत्पद्यमानस्यानियतत्वं, एवं प्राणानामपि सर्वात्मनः प्रत्यनियतत्वमिति, तदपि देहानियमेनैवोक्तत्वात् पुनरुक्तं भवेत्। न च जीवेन प्राणा उपमीयेरन्, सिद्धान्तविरोधात्। जीवस्य ह्यनुत्पत्तिराख्याता प्राणानां तूत्पत्तिराचिख्यासिता। तस्मात् तथेत्यसम्बन्धमेतत् प्रतिभाति। न, उदाहरणोपात्तेनाप्युपमानेन सम्बन्धोपपत्तेः। अत्र प्राणोत्पत्तिवादिवाक्यजातमुदाहरणं 'एतस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि च व्युच्चरन्त्येवंजातीयकं। तत्र यथा लोकादयः परस्माद्ब्रह्मण उत्पद्यन्ते तथा प्राणा* अपीत्यर्थः।

त्युपक्रमे दातृकीर्तनात् लिङ्गादश्वदातुरेवेति स्थास्यति, अतः प्रतिगृह्णीयादित्यस्य पदस्याऽश्वान् यः प्रतिग्राहयेदित्यर्थः। दद्यादिति यावत्। योऽश्वदाता स वारुणीमिष्टिं कुर्यादिति वाक्यार्थे स्थिते चिन्ता, अश्वदाननिमित्तेयमिष्टिः किं लौकिकेऽश्वदाने वैदिके वेति। तत्र 'न केशरिणो ददाति' इति निषिद्धलौकिकाश्वदाने दोषसम्भवात् तन्निरासार्थेयमिष्टिरिति दोषात्त्विष्टिर्लौकिके स्यादिति सूत्रेण प्राप्ते सिद्धान्तः। 'अत्र हि वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति' इति दातुर्दोषं सङ्कीर्त्येष्टिर्विहिता। वरुणशब्दो जलोदराख्यरोग रूढः। न च लौकिकेऽश्वदानेऽयं रोगो भवति इति प्रसिद्धं। नचानेनैव वाक्येन प्रसिद्धिः। दाने दोषस्तन्निरासार्था चेष्टिरित्यर्थभेदे वाक्यभेदात्। न च वृणोति इति व्युत्पत्त्या वरुणशब्दो निषेधातिक्रमकृतदोषानुवादक इति युक्तं, रूढियोगापातात्। तत्त्यागे च वैदि-

* प्राणादय इति वर्धं॰ का॰।

'तथा एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी' इत्येवमादिष्वपि खादिवत् प्राणानामुत्पत्तिरिति द्रष्टव्यं। अथवा पानव्यापच्च तद्वदित्येवमादिषु व्यवस्थितोपमानसम्बन्धस्याप्याश्रितत्वात् यथातीतानन्तरपादाद्युक्ता वियदादयः परस्य ब्रह्मणो विकाराः समधिगतास्तथा प्राणा अपि परस्य ब्रह्मणो विकारा इति योजयितव्यं। कः पुनः प्राणानां विकारत्वे हेतुः, श्रुतत्वमेव। ननु केषुचित् प्रदेशेषु न प्राणानामुत्पत्तिः श्रूयत इत्युक्तं, तदयुक्तं, प्रदेशान्तरेषु श्रवणात्। न हि क्वचिदश्रवणमन्यत्र श्रुतं निवारयितुमुत्सहते, तस्माच्छ्रुतत्वाविशेषादाकाशादिवत् प्राणा अपि उत्पद्यन्त इति सूक्तं॥

कोऽपि दानेऽश्वत्यागजन्यदुःखं प्रागुक्तव्युत्पत्त्या शक्नोत्यनुवदितुं, तस्मात् प्राशानुवादार्थवादोऽयमिति यद्वसम्बन्धिन्यश्वदाने इयमिष्टिरित्येवं विचार्योक्तं। पानव्यापच्च तद्वदिति। सोमपाने क्रियमाणे व्यापद्वमनं यदि स्यात् तदा एतं सौमेन्द्रं श्यामाकचरुं निर्वपेदिति श्रूयते। तत्राऽस्य प्रतिपद्येष्ट्यधिकरणपूर्वपक्षन्यायेन वक्ष्यमाणव्यवस्थितत्वाद्वदिति पराम्रश्यते, तद्वल्लौकिके धातुसाम्यार्थं पीतसोमस्य वमनेऽयं चरुः स्याद्वमननिमित्तेन्द्रियशोषाख्यदोषस्य दृष्टस्येन्द्रियेण वीर्येण बाध्यते, यः सोमं वमतीत्यनुवादादिति पूर्वपक्षसूत्रार्थः। वैदिके तु सोमपाने शेषप्रतिपत्तेर्जातत्वाद्वमनेऽपि न दोष इति प्राप्ते सिद्धान्तः। लोके वमनकृतेन्द्रियशोषस्य धातुसाम्यकरत्वेन गुणत्वान्न दोषता, वेदे तु मा मे वाङ्नाभिमतिगा इति सम्यग्जरणार्थमन्त्रलिङ्गाद्वमने कर्मवैगुण्यात् तस्य दोषता। तस्माद्वैदिकसोमवमने सौमेन्द्रश्चरुरिति स्थितमित्येवमादिषु सूत्रेष्वित्यर्थः॥

गौण्यसम्भवात्॥ २॥

यत्पुनरुक्तं प्रागुत्पत्तेः सद्भावश्रवणात् गौणी प्राणानामुत्पत्तिरिति तत्प्रत्याह। गौण्यसम्भवादिति। गौण्या असम्भवो गौण्यसम्भवः। न हि प्राणानामुत्पत्तिश्रुतिर्गौणी सम्भवति, प्रतिज्ञाहानिप्रसङ्गात्। 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति' इति ह्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय तत्साधनायेदमाम्नायते 'एतस्माज्जायते प्राणः' इत्यादि। सा च प्रतिज्ञा प्राणादेः समस्तस्य जगतः ब्रह्मविकारत्वे सति प्रकृतिव्यतिरेकेण विकाराभावात् सिध्यति, गौण्यान्तु प्राणानामुत्पत्तिश्रुतौ प्रतिज्ञेयं हीयेत। तथा च प्रतिज्ञातार्थमुपसंहरति 'पुरुष एवेदं विश्वं* तपो ब्रह्म परामृतं' इति, 'ब्रह्मैवेदं विश्व-

---

ननु प्रतिज्ञाऽपि गौणी किं न स्यात् इत्यत आह। तथा च प्रतिज्ञातार्थमिति। उपक्रमोपसंहाराभ्यां प्रतिपिपादयिषिता द्वितीयत्वप्रतिज्ञानुरोधेन प्राणोत्पत्तिर्मुख्यैवेति भावः। मुण्डकवत् श्रुत्यन्तरेऽपि प्रतिज्ञादर्शनात् सा मुख्येत्याह। तथेति। एषा प्रतिज्ञा प्राणोत्पत्तिमुख्यत्वे हेतुत्वेन द्रष्टव्येत्यर्थः। इदानीं प्रलये प्राणसत्त्वश्रुतेर्गतिं प्रश्नपूर्वकमाह। कथमित्यादिना। नेदं वाक्यं महाप्रलये परमकारणस्य ब्रह्मणः प्राणवत्त्वपरं किन्त्ववान्तरप्रलये हिरण्यगर्भाख्यावान्तरप्रकृतिरूपप्राणसद्भावपरमित्यर्थः। ननु हिरण्यगर्भरूपविकारस्य सत्त्वे कथं तदा विकारासत्त्वकथनं तत्राह। सविकारेति। सस्य कार्यब्रह्मणो यत् कार्यं स्थूलं तस्योत्पत्तिरित्यर्थः। ननु यथाश्रुति महाप्रलये प्राणसद्भावरूपं लिङ्गं प्राणानुत्पत्तिसाधकं किमित्यवान्तरप्र-

---

* कर्म्म तप इति वर्ध० का०।

मिदं वरिष्ठं' इति च। तथा 'आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितं' इत्येवंजातीयकासु श्रुतिषु एषैव प्रतिज्ञा योजयितव्या। कथं पुनः प्रागुत्पत्तेः प्राणानां सद्भावश्रवणं, नैतन्मूलप्रकृतिविषयं, 'अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः परः' इति मूलप्रकृतेः प्राणादिसमस्तविशेषरहितत्वावधारणात्। अवान्तरप्रकृतिविषयन्त्वेतत् स्वविकारापेक्षं प्रागुत्पत्तेः प्राणानां सद्भावावधारणमिति द्रष्टव्यं, व्याकृतविषयाणामपि भूयसीनामवस्थानां श्रुतिस्मृत्योः प्रकृतिविकारभावप्रसिद्धेः। वियदधिकरणे हि गौण्यसम्भवादिति पूर्वपक्षसूत्रत्वात् गौणी जन्मश्रुतिरसम्भवादिति व्याख्यातं। प्रतिज्ञाहान्या च तत्र सिद्धान्तोऽभिहितः। इह तु सिद्धान्तसूत्रत्वात् गौण्या जन्मश्रुतेरसम्भवादिति व्याख्यातं। तदनुरोधेन त्विहापि गौणी जन्मश्रुतिरसम्भवादिति व्याचक्षाणैः प्रतिज्ञाहानिरुपेक्षिता स्यात्॥

लयपरतया नीयत इति चेत्, एतस्माज्जायते प्राण इत्यादि प्रबलजन्मश्रुतिबलादिति वदामः। ननु विकारस्य ब्रह्मणः कथं प्रकृतित्वमित्यत आह। व्याकृतेति। 'हिरण्यगर्भः समवर्त्तताग्रे' इत्यादिश्रुतौ 'आदिकर्ता स भूतानां' इत्यादि स्मृतौ च विकारात्मनामपि मूलकारणावस्थारूपाणां ब्रह्मविराडादीनां प्रकृतिविकारभावेन प्रसिद्धिरस्ति। पूर्वापेक्षया विकारस्याप्युत्तरत्वादप्रकृतित्वमित्यर्थः। केचिद्वियदधिकरणानुरोधेनेदं सूत्रं व्याचक्षते तान् दूषयति। वियदिति।

तस्य जायत इति पदस्याकाशादिषु मुख्यस्य पाठापेक्षया प्राचीनेषु प्राणेषु श्रुतेर्मुख्यं जन्मेति सूत्रयोजना। तत्सामान्यादिति। तेनाकाशादिजन्मना सामान्यमेकशब्दोक्तत्वं तस्मादित्यर्थः। एकस्मिन् वाक्ये

तत् प्राक् श्रुतेः ॥ ३ ॥

इतश्चाकाशादीनामिव प्राणानामपि मुख्यैव जन्मश्रुतिः, यज्जायत इत्येकं जन्मवाचि पदं प्राणेषु प्राक् श्रुतं सदुत्तरेष्वाकाशादिष्वनुवर्तते, 'एतस्माज्जायते प्राणः' इत्यत्राकाशादिषु मुख्यं जन्मेति प्रतिष्ठापितं, तत् सामान्यात् प्राणेष्वपि मुख्यमेव जन्म भवितुमर्हति। न ह्येकस्मिन् प्रकरणे एकस्मिन् वाक्ये एकः शब्दः सकृदुच्चरितो बहुभिः सम्बध्यमानः क्वचिन्मुख्यः क्वचिद्गौण इत्यध्यवसातुं शक्यं, वैरूप्यप्रसङ्गात्। तथा 'स प्राणमसृजत प्राणाच्छ्रद्धां' इत्यत्रापि प्राणेषु श्रुतः सृजतिः परेष्वपि उत्पत्तिमत्सु श्रद्धादिष्वनुषज्यते। यत्रापि पश्चाच्छ्रुतः उत्पत्तिवचनः शब्दः पूर्वैः सम्बध्यते तत्राप्येष एव न्यायः, यथा सर्वाणि भूतानि व्युच्चरन्तीत्ययमन्ते पठितो व्युच्चरन्तिशब्दः पूर्वैरपि प्राणादिभिः सम्बध्यते ॥

तत्पूर्वकत्वाद्वाचः ॥ ४ ॥

यद्यपि 'तत्तेजोऽसृजत' इत्येतस्मिन् प्रकरणे प्राणानामुत्पत्तिर्न पठ्यते तेजोऽबन्नानामेव त्रयाणां भूतानां उत्पत्तिश्रवणात्,

---

एकस्य शब्दस्य क्वचिन्मुख्यत्वं क्वचित् गौणत्वमिति वैरूप्यं न युक्तमिति न्यायमन्यत्राप्यतिदिशति। यत्रापि पश्चाच्छ्रुत इति ॥

यच्चोक्तं छान्दोग्येऽपि प्राणानामुत्पत्तिर्न श्रूयत इति। तत्राह। तत्पूर्वकत्वाद्वाच इति। अत्र सूत्रे वाक्पदं प्राणमनसोरुपलक्षणं।

तथापि ब्रह्मप्रकृतिकतेजोऽबन्नपूर्वकत्वाभिधानाद्वाक्प्राणमनसां तत्सामान्याच्च सर्वेषामेव प्राणानां ब्रह्मप्रभवत्वं सिद्धं भवति। तथा ह्यस्मिन्नेव प्रकरणे तेजोऽबन्नपूर्वकत्वं वाक्प्राणमनसामाम्नायते 'अन्नमयं हि सोम्य मनः आपोमयः प्राणः तेजोमयी वाक्' इति। तत्र यदि तावन्मुख्यमेवैषामन्नादिमयत्वं ततो वर्तत एव* ब्रह्मप्रभवत्वं अथ भाक्तं तथापि ब्रह्मकर्तृकायां नामरूपव्याक्रियायां श्रवणात् 'येनाश्रुतं श्रुतं भवति' इति चोपक्रमात् 'ऐतदात्म्यमिदं सर्वं' इति चोपसंहारात् श्रुत्यन्तरप्रसिद्धेश्च ब्रह्मकार्यत्वप्रपञ्चनार्थमेव मनआदीनामन्नादिमयत्ववचनमिति गम्यते। तस्मादपि प्राणानां ब्रह्मविकारत्वसिद्धिः॥

सप्तगतेर्विशेषितत्वाच्च॥ ५॥

उत्पत्तिविषयः श्रुतिविप्रतिषेधः प्राणानां परिहृतः,

वाक्प्राणमनसां तेजोऽबन्नपूर्वकत्वोक्तेरश्रवणमसिद्धमिति योजना। तैर्वागादिभिश्चक्षुरादीनां सामान्यं करणत्वं तत्सामान्यादित्यर्थः। अत्र मयड्विकारे मुख्य इति पक्षे वर्तत एव प्राणानां ब्रह्मकार्यत्वं तेजोऽबन्नानां ब्रह्मविकारत्वात्। यदि प्राणस्य वायोर्जलविकारत्वायोगात् तदधीनस्थितिकत्वमात्रेण भाक्तस्तथापि प्राणानां विकारत्वे भूताधीनस्थितिकत्वं लिङ्गं मयटोक्तमिति सिद्धं ब्रह्मकार्यत्वं 'स प्राणमसृजत' इत्यादिश्रुत्यन्तरे स्पष्टं, ब्रह्मकार्यत्वोक्तेः। तस्मात् प्राणानामुत्पत्तिश्रुतीनां सद्भावश्रुत्यविरोधात् कारणे ब्रह्मणि समन्वय इति सिद्धं। लिङ्गशरीरविचारात्मकाधिकरणानां लिङ्गात् तत्त्वंपदार्थभेदधीः फलमिति द्रष्टव्यं॥

एवं जन्मलब्धसत्ताकानां प्राणानामुपजीव्योपजीवकत्वसङ्गत्या सङ्ख्यां निर्णेतुं श्रुतीनां विरोधात् संशये पूर्वपक्षयति। सप्तगतेर्विशेषित-

---

* ब्रह्मप्रकृतिकत्वमितिवर्ष॰ का॰।

सङ्ख्याविषय इदानीं परिच्छिद्यते। तत्र मुख्यं प्राणमुपरिष्टाद्वक्ष्यति। सम्प्रति तु कतीतरे प्राणा इति सम्प्रधारयति। श्रुतिविप्रतिपत्तेश्चात्र विशयः। क्वचित् सप्त प्राणाः सङ्कीर्त्यन्ते "सप्त प्राणाः प्रभवन्ति तस्मात्" इति। क्वचिदष्टौ प्राणा ग्रहत्वेन गुणेन सङ्कीर्त्यन्ते, "अष्टौ ग्रहा अष्टावतिग्रहाः" इति, क्वचिन्नव "सप्त वै शीर्षण्याः प्राणा द्वाववाञ्चौ" इति। क्वचिद्दश "नव वै पुरुषे प्राणा नाभिर्दशमी" इति। क्वचिदेकादश "दशेमे पुरुषे प्राणा आत्मैकादश" इति। क्वचिद्द्वादश "सर्व्वेषां स्पर्शानां त्वगेकायतनम्" इत्यत्र। क्वचित्त्रयोदश "चक्षुश्च द्रष्टव्यञ्च" इत्यत्र। एवं हि विप्रतिपन्नाः प्राणेयत्तां प्रति श्रुतयः, किं तावत् प्राप्तं सप्तैव प्राणा इति। कुतः गतेः, यतस्तावन्तोऽवगम्यन्ते "सप्त प्राणाः प्रभवन्ति तस्मात्" इत्येवंविधासु श्रुतिषु। विशेषिताश्चैते "सप्त वै शीर्षण्याः प्राणाः" इत्यत्र। ननु "गुहाशया निहिताः

त्वाच्च। विशयः संशयः। इन्द्रियाण्यत्र विषयः। पञ्च धीन्द्रियाणि वाङ्मनश्चेति सप्त प्राणास्त एव ग्रहत्वेन सहाष्टौ। ग्रहत्वं बन्धकत्वं गृह्णन्ति बध्नन्तीति ग्रहा इन्द्रियाणि तेषां बन्धकत्वं विषयाधीनमित्यतिग्रहाः ग्रहानतिक्रान्ता विषया इत्यर्थः। द्वे श्रोत्रे द्वे चक्षुषी द्वे घ्राणे वाक् चेति सप्त शीर्षणि भवाः प्राणा द्वाववाञ्चौ पायूपस्थौ चेति नव, ज्ञानकर्मेन्द्रियाणि दशेमे पुरुषे देहे प्राणाः आत्मा मन एकादशप्राण इति सिद्धान्तकोटिरुक्ता एत एव हृदयाख्यया बुद्ध्या सह द्वादश। अहङ्कारेण सह त्रयोदश, श्रुतितः सप्तत्वावगतेर्ये शीर्षण्याः सप्त ते प्राणा इति शीर्षण्योद्देशेन प्राणत्वविशेषणाच्च शीर्षण्यानां प्राणत्वशब्दता, इन्द्रियत्वपरिसङ्ख्या सप्तैव प्राणा इति सूत्रयोजना। सप्तत्वं वीप्साविरुद्धमिति शङ्कते।

सप्त सप्त” इति वीप्सा श्रूयते, सा सप्तभ्योऽतिरिक्तान् प्राणान् गमयतीति। नैष दोषः, पुरुषभेदाभिप्रायेयं वीप्सा प्रति पुरुषं सप्त सप्त प्राणा इति, न तत्त्वभेदाभिप्राया सप्त सप्तान्येऽन्ये प्राणा इति। नन्वष्टत्वादिकापि सङ्ख्या प्राणेषूदाहृता कथं सप्तैव स्युः। सत्यमुदाहृता विरोधात्त्वन्यतमा सङ्ख्याध्यवसातव्या, तत्र स्तोककल्पनोपरोधात् सप्तसङ्ख्याध्यवसानं वृत्तिभेदापेक्षञ्च सङ्ख्यान्तरश्रवणमिति गम्यते। अत्रोच्यते॥

हस्तादयस्तु स्थितेऽतो नैवं॥ ६॥

हस्तादयस्त्वपरे सप्तभ्योऽतिरिक्ताः प्राणाः श्रूयन्ते, “हस्तो वै ग्रहः स कर्मणातिग्रहेण गृहीतः, हस्ताभ्यां हि कर्म करोति” इत्येवमाद्यासु श्रुतिषु। स्थिते च सप्तत्वातिरेके सप्तत्वमन्तर्भावाच्छक्यते सम्भावयितुं। हीनाधिकसङ्ख्याविप्रतिपत्तौ ह्यधिका सङ्ख्या संग्राह्या भवति, तस्यां *हीनान्तर्भवति, न तु ही-

नन्विति। गुहायां हृदये शेरत इति गुहाशयाः। स्वस्थानेषु निहिताः निक्षिप्ता इत्यर्थः। चित्तेन चतुर्दशत्वं मन्तव्यं। पूर्वपक्षी परिहरति। नैष दोष इति। सिद्धान्तिनाप्येकादशसु मनोवृत्तिभेदान्निश्चयात्मिका बुद्धिः गर्वात्मकोऽहङ्कारः, स्मरणात्मकं चित्तं इति द्वादशादिसङ्ख्यान्तर्भावनीया। ततो वरं प्राथमिकसप्तत्वेऽन्तर्भावः लाघवादिति प्राप्ते सिद्धान्तयति। अत्रेति॥

आदानेन कर्मणा गृहीतः सम्बद्धः। सम्बन्धमेवाह। हस्ताभ्यामिति। अतोऽधिकसङ्ख्यायाः न्यूनायामन्तर्भावायोगात् सप्तैव प्राणाः स्युर्लाघवानुरोधादित्येवं न मन्तव्यमित्यन्वयः। तर्हि कतीन्द्रियाणी-

* हीनतरेति का० वर्ध०।

नायामधिका, अतश्च नैवं मन्तव्यं लोककल्पनानुरोधात् सप्तैव प्राणाः स्युरिति। उत्तरसङ्ख्यानुरोधात्त्वेकादशैव ते प्राणाः स्युः। तथा चोदाहृता श्रुतिः "दशेमे पुरुषे प्राणा आत्मैकादश" इति। आत्मशब्देन चात्रान्तःकरणं परिगृह्यते करणाधिकारात्। ननु एकादशत्वादप्यधिके द्वादशत्रयोदशत्वे उदाहृते। सत्यमुदाहृते न त्वेकादशभ्यः कार्य्यजातेभ्योऽधिकं कार्य्यजातमस्ति यदर्थं अधिकं करणं कल्प्येत। शब्दस्पर्शरूपरसगन्धविषयाः पञ्च बुद्धिभेदास्तदर्थानि पञ्च बुद्धीन्द्रियाणि वचनादानविहरणोत्सर्गानन्दाः पञ्च कर्म्मभेदास्तदर्थानि च पञ्च कर्म्मेन्द्रियाणि सर्व्वार्थविषयं त्रैकाल्यवृत्ति मन एकमनेकवृत्तिकं तदेव वृत्तिभेदात् क्वचिद्भिन्नवद्व्यपदिश्यते "मनो बुद्धिरहङ्कारश्चित्तञ्च" इति। तथाच श्रुतिः कामाद्या नानाविधा वृत्तीरनुक्रम्याह "एतत् सर्वं मन एव" इति। अपि च सप्तैव शीर्षण्यान् प्राणानभिमन्यमानस्य चत्वार एव प्राणा अभिमताः स्युः स्थानभेदाद्ध्येते चत्वारः सन्तः सप्त गण्यन्ते, "द्वे श्रोत्रे द्वे चक्षुषी

त्याकाङ्क्षायामाह। उत्तरेति। श्रुतीनां मिथो विरोधे सति मानान्तरानुगृहीता श्रुतिर्बलीयसीति न्यायेन कार्य्यलिङ्गानुमानानुगृहीतैकादशप्राणश्रुत्यनुसारेणान्याः श्रुतयो नेया इत्यभिसन्धायाह। सत्यमिति। एकादशकार्य्यलिङ्गान्याह। शब्देति। त्रयः कालास्त्रैकाल्यं, तद्विषया वृत्तिर्यस्य तत् त्रैकाल्यवृत्ति। इन्द्रियान्तराणां वर्त्तमानमात्रग्राहित्वादतीतादिज्ञानाय मनोऽङ्गीकार्य्यमित्यर्थः। विशेषितत्वादित्युक्तं निरस्यति। अपि च सप्तेति। न च तावतामिति। आदानादीनां श्रोत्रा-

द्वे नासिके एका वाक्" इति। न च तावतामेव वृत्तिभेदा इतरे प्राणा इति शक्यते वक्तुं, हस्तादिवृत्तीनामत्यन्तविजातीयत्वात्। तथा "नव वै पुरुषे प्राणा नाभिर्दशमी" इत्यत्रापि देहच्छिद्रभेदाभिप्रायेणैव दश प्राणा उच्यन्ते, न प्राणतत्त्वभेदाभिप्रायेण 'नाभिर्दशमी' इति वचनात्। न हि नाभिर्नाम कश्चित् प्राणः प्रसिद्धोऽस्ति, मुख्यस्य तु प्राणस्य भवति, नाभिरपि एकं विशेषायतनमित्यतो नाभिर्दशमीत्युच्यते। क्वचिदुपासनार्थं कतिचित् प्राणा गण्यन्ते, क्वचित् प्रदर्शनार्थं। तदेवं विचित्रे प्राणेयत्ताम्नाने सति क्व किं परमाम्नानमिति विवेक्तव्यं। कार्य्यजातवशात्त्वेकादशत्वाम्नानं प्राणविषयं प्रमाणमिति स्थितं। इयमपरा सूत्रद्वययोजना। सप्तैव प्राणाः स्युः यतः सप्तानामेव गतिः श्रूयते "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इत्यत्र। ननु सर्वशब्दोऽप्यत्र पठ्यते कथं सप्तानामेव गतिः प्रतिज्ञायत इति, विशेषितत्वादित्याह। सप्तैव हि प्राणाश्चक्षुरादयः त्वक्पर्य्यन्ता विशे-

---

दिभ्योऽत्यन्तवैजात्यादित्यर्थः। तेषां तद्वृत्तित्वे बधिरादीनामादानादि न स्यादिति भावः। कथं तर्हि छिद्रे प्राणशब्दः इत्याशङ्क्य लक्षणयेत्याह। मुख्यस्य त्विति। सप्त प्राणाः प्रभवन्तीत्युपासनार्थं। अष्टौ ग्रहा इति श्रुतिस्तूपलक्षणार्था। पायूपस्थपादानामपि बन्धकत्वाविशेषादिति विवेक्तव्यं। नन्विदं सूत्रव्याख्यानमसङ्गतं पञ्चधीन्द्रियवाङ्मनसां सप्तत्वावगतिः शीर्षण्यानाञ्चतुर्णां विशेषितत्वमिति हेतोर्वैयधिकरण्यादुक्तपरिसङ्ख्यादोषाच्चेत्यरुचेराह। इयमपरेति। इन्द्रि-

षिताः इह प्रकृताः, स यत्रैष चाक्षुषः पुरुषः पराङ् पर्य्यावर्त्तते अथारूपज्ञो भवति एकीभवति न पश्यतीत्याहुरित्येवमादिनानुक्रमणेन। प्रकृतगामी च सर्वशब्दो भवति। यथा सर्वे ब्राह्मणा भोजिता इति ये निमन्त्रिताः प्रकृता ब्राह्मणास्त एव सर्वशब्देनोच्यन्ते नान्ये, एवमिहापि ये प्रकृताः सप्त प्राणास्त एव सर्वशब्देनोच्यन्ते नान्य इति। नन्वत्र विज्ञानमष्टममनुक्रान्तं कथं सप्तानामेवानुक्रमणं, नैष दोषः। मनोविज्ञानयोस्तत्त्वाभेदाद्वृत्तिभेदेऽपि सप्तत्वोपपत्तेः। तस्मात् सप्तैव प्राणा इत्येवं प्राप्ते ब्रूमः। हस्तादयस्त्वपरे सप्तभ्योऽतिरिक्ताः प्राणाः प्रतीयन्ते "हस्तो वै ग्रहः" इत्यादिश्रुतिषु। ग्रहत्वञ्च बन्धनभावो गृह्यते, बध्यते क्षेत्रज्ञोऽनेन ग्रहसंज्ञकेन बन्धनेनेति। स च क्षेत्रज्ञो नैकस्मिन्नेव शरीरे बध्यते शरीरान्तरेष्वपि तुल्यत्वाद्बन्धनस्य। तस्माच्छरीरान्तरसञ्चारीदं ग्रहसंज्ञकं बन्धनमित्यर्थादुक्तं भवति। तथा च स्मृतिः "पुर्य्यष्टकेन लिङ्गेन प्राणाद्येन स युज्यते। तेन बद्धस्य वै बन्धो मोक्षो मुक्तस्य तेन च" इति। प्राङ्मोक्षाद्ग्रहसंज्ञकेनानेन बन्धनेनावियोगं

यान्ति कतीति सन्देहे पूर्वपक्षसूत्रं योजयति। सप्तेति। तं जीवात्मानं ये प्राणाः सह गच्छन्ति तेषामेव भोगहेतुत्वादिन्द्रियत्वमित्यर्थः। विपन्नावस्थायां एष चाक्षुषश्चक्षुषि स्थितोऽनुग्राहकसूर्य्यांशरूपः पुरुषः पराङ् पर्य्यावर्त्तते बहिर्देशात् स्वांशिनं सूर्य्यं प्रतिगच्छति। अथ तदानीमयं मुमूर्षुररूपज्ञो भवति देवांशे देवं प्रविष्टे लिङ्गांशश्चक्षुर्हृदये मनस्येकीभवति तदायं न पश्यतीति पार्श्वस्था आहुरित्यर्थः। आदिपदान्न जिघ्रति न वदति न रसयते न शृणोति न मनुते न स्पृ-

दर्शयति। आथर्वणे च विषयेन्द्रियानुक्रमणे "चक्षुश्च द्रष्टव्यञ्च" इत्यत्र तुल्यवद्धस्तादीनीन्द्रियाणि सविषयाण्यनुक्रामति "हस्तौ चादातव्यञ्च उपस्थश्चानन्दयितव्यञ्च पायुश्च विसर्जयितव्यञ्च पादौ च गन्तव्यञ्च" इति। तथा "दशेमे पुरुषे प्राणा आत्मैकादशः ते यदास्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्ति" इत्येकादशानां प्राणानामुत्क्रान्तिं दर्शयति। सर्वशब्दोऽपि च प्राणशब्देन सम्बध्यमानोऽशेषान् प्राणानभिदधानो न प्रकरणवशेन सप्तस्वेव व्यवस्थापयितुं शक्यते, प्रकरणाच्छब्दस्य च बलीयस्त्वात्। सर्वे ब्राह्मणा भोजिता इत्यत्रापि सर्वेषामेव अवनिवर्त्तिनां ब्राह्मणानां ग्रहणं न्याय्यं सर्वशब्दसामर्थ्यात्। सर्वभोजनासम्भवात् तु तत्र निमन्त्रितमात्रविषया सर्वशब्दस्य वृत्तिराश्रिता, इह तु न किञ्चित् सर्वशब्दार्थसङ्कोचकारणमस्ति, तस्मात् सर्वशब्देनात्राशेषाणां प्राणानां परिग्रहप्रदर्शनार्थं सप्तानामनुक्रमणमित्यनवद्यं। तस्मादेकादशैव प्राणाः शब्दतः कार्य्यतश्चेति सिद्धं॥

शति न विजानातीति गृह्यते। सप्तानामेव जीवेन सह गतिरित्यसिद्धं। पञ्चत्वश्रुत्या हस्तादीनामपि गतिप्रतीतेरिति सिद्धान्तयति। एवमित्यादिना। हस्तादिबन्धस्यामोचनात् सहगतौ स्मृतिमाह। पुर्य्यष्टकेनेति। प्राणादिपञ्चकं भूतसूक्ष्मपञ्चकं ज्ञानेन्द्रियपञ्चकं कर्म्मेन्द्रियपञ्चकं अन्तःकरणचतुष्टयमविद्या कामकर्म्म चेति पुर्य्यष्टकमात्मनो ज्ञापकत्वाल्लिङ्गं सति सम्भवे सर्वश्रुतिसङ्कोचो न युक्त इत्याह। सर्वशब्दोऽपीति। तस्मात् सङ्ख्याश्रुतीनामविरोधादेकादशेन्द्रियकारणे ब्रह्मणि समन्वय इति सिद्धं॥

अणवश्च ॥ ७ ॥

अधुना प्राणानामेव स्वभावान्तरमभ्युच्चिनोति। अणवश्चैते प्रकृताः प्राणाः प्रतिपत्तव्याः। अणुत्वञ्चैषां सौक्ष्म्यपरिच्छेदौ न परमाणुतुल्यत्वं, कृत्स्नदेहव्यापि *कार्य्यानुपपत्तिप्रसङ्गात्। सूक्ष्मा एते प्राणाः स्थूलाश्चेत् स्युः मरणकाले शरीरान्निर्गच्छन्तो बिलादहिरिवोपलभ्येरन् म्रियमाणस्य पार्श्वस्थैः। परिच्छिन्नाश्चैते प्राणाः सर्वगताश्चेत् स्युः उत्क्रान्तिगत्यागतिश्रुतिव्याकोपः स्यात्, तद्गुणसारत्वञ्च जीवस्य न सिध्येत्। सर्वगतानामपि वृत्तिलाभः शरीरदेशे स्यादिति चेत्, न, वृत्तिमात्रस्य करणत्वोपपत्तेः। यदेव ह्युपलब्धिसाधनं वृत्तिः अन्यद्वा तस्यैव नः करणत्वं, तेन संज्ञामात्रे विवाद इति करणानां व्यापित्वकल्पना निरर्थिका, तस्मात् सूक्ष्माः परिच्छिन्नाश्चैते प्राणा इत्यध्यवस्यामः ॥

अणवश्च। 'प्राणाः सर्वे तन्ता इति श्रुतेः' इन्द्रियाणां विभुत्वात् तेषामुत्क्रान्तिरसिद्धा किन्तु तत्तद्देहे तेषामभिव्यक्तिरूपाः प्रादेशिक्यो वृत्तयः सन्ति न तासामुत्क्रान्तादिरिति साङ्ख्यानामाक्षेपस्तत्सङ्गत्या प्राणाः किंपरिमाणा इति सन्देहे सिद्धान्तयति। अधुनेत्यादिना। उत्पत्तिसङ्ख्यानिर्णयानन्तरं परिमाणं निरूप्यत इत्यर्थः। अनुद्भूतरूपस्पर्शत्वं सूक्ष्मत्वं, परिच्छेदोऽल्पत्वं, बुद्ध्यादीनां विभुत्वे तदुपाधिकमात्मनोऽणुत्वादिकं न सिध्येदित्युक्तन्यायविरोधमाह। तद्गुणसारत्वमिति। उक्ताक्षेपमनूद्य निरस्यति। सर्वगतानामिति। आनन्त्यश्रुतेरुपासनार्थत्वान्नोत्क्रान्त्यादिश्रुतीनां तया विरोध इति सिद्धं ॥

---

* कार्यानुत्पत्तीति का० वर्ध०।

श्रेष्ठश्च ॥ ८ ॥

मुख्यश्च प्राणः इतरप्राणवद्ब्रह्मविकार इत्यतिदिश्यति। नन्वविशेषेणैव सर्वप्राणानां ब्रह्मविकारत्वमाख्यातं, 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' इति, सेन्द्रियमनोव्यतिरेकेणापि प्राणस्योत्पत्तिश्रवणात्, 'स प्राणमसृजत' इत्यादिश्रवणेभ्यश्च। किमर्थः पुनरतिदेशः, अधिकाशङ्कावारणार्थः। नासदासीये हि ब्रह्मप्रधाने सूक्ते मन्त्रवर्णो भवति, 'न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परं किञ्च नास' इति। आनीदिति प्राणकर्मोपादानात् प्रागुत्पत्तेः सन्तमिव प्राणं सूचयति। तस्मात् अजः प्राण इति जायते कस्यचिन्मतिः, तामतिदेशेनापनुदति। आनीच्छब्दोऽपि न प्रागुत्पत्तेः प्राणसद्भावं सूचयति। अवातमिति विशेषणात्, "अप्राणो ह्यमनाः शुभ्रः" इति च मूलप्रकृतेः प्राणादिसमस्तविशेषरहितत्वस्य दर्शितत्वात्। तस्मात्

श्रेष्ठश्च। अतिदेशत्वान्न सङ्गत्याद्यपेक्षा तथा प्राणा इत्युक्तन्यायोऽत्रातिदिश्यते। ननु प्राणो जायते न वेति संशयाभावादतिदेशो न युक्त इत्याक्षिपति। किमर्थ इति। निश्चितमहाप्रलये प्राणसद्भावश्रुत्याऽधिकाशङ्कामाह। नासदासीये हीति। नासदासीदित्यारभ्याधीत इत्यर्थः। तर्हि तदा प्रलयकाले मृत्युर्मारको मृत्युमत्कार्यं वा नासीदमृतञ्च देवभोग्यं नासीत् रात्र्याः प्रकेतश्चिह्नरूपश्चन्द्रः अह्नः प्रकेतः सूर्यश्च नास्तां, स्वधया सहेत्यन्वयः, पितृभ्यो देयमन्नं स्वधा। यद्वा स्वेन धृता माया स्वधा तया सह तदेकं ब्रह्मानीदासीदिति परमार्थः। अत्रानीदिति तच्चेष्टां कृतवदिति पूर्वपक्षार्थः। तस्माद् ब्रह्मणः

कारणसद्भावप्रदर्शनार्थं एवायमानीच्छब्द इति। श्रेष्ठ इति च मुख्यं प्राणमभिदधाति, "प्राणो वाव ज्येष्ठः श्रेष्ठश्च" इति श्रुतिनिर्देशात्। ज्येष्ठश्च प्राणः, शुक्रनिषेककालादारभ्य तस्य वृत्तिलाभात्, न चेत् तस्य तदानीं वृत्तिलाभः स्यात् योनौ निषिक्तं शुक्रं पूयेत न सम्भवेद्वा, श्रोत्रादीनान्तु कर्णशष्कुल्यादिस्थानविभागनिष्पत्तौ वृत्तिलाभान्न ज्येष्ठत्वं। श्रेष्ठश्च प्राणः गुणाधिक्यात्, "न वै शक्ष्यामस्त्वदृते जीवितुम्" इति श्रुतेश्च॥

न वायुक्रिये पृथगुपदेशात्॥ ९॥

स पुनर्मुख्यः प्राणः किंस्वरूप इतीदानीं जिज्ञास्यते। तत्र प्राप्तं तावत् श्रुतेर्वायुः प्राण इति, एवं हि श्रूयते, 'यः प्राणः स वायुः स एष वायुः पञ्चविधः प्राणोऽपानो व्यान उदानः समानः' इति। अथवा तन्त्रान्तरीयाभिप्रायात् सम-

---

परः परमुत्कृष्टमन्यच्च किमपि न बभूवेत्यर्थः। परिहारः सुबोधः। ननु श्रेष्ठशब्दस्य प्राणे प्रसिद्ध्यभावात् कथं सूत्रमिति तत्राह। श्रेष्ठ इति चेति। श्रुतिं व्याचष्टे। ज्येष्ठश्च प्राण इत्यादिना। पूयेत पूयं भवेत्। न सम्भवेद्गर्भो न भवेदित्यर्थः। वागादिजीवनहेतुत्वं प्राणस्य गुणः। एवमानीच्छ्रुत्यविरोधात् प्राणोत्पत्तिश्रुतीनां ब्रह्मणि समन्वय इति सिद्धं॥

इन्द्रियाणि विचार्य्य तद्व्यापारात् प्राणं पृथक् कर्तुमुत्पत्तिरतिदिष्टा, संप्रत्युत्पन्नप्राणस्वरूपं पृथक् करोति। न वायुक्रिये पृथगुपदेशात्। मुख्यः प्राणः किं वायुमात्रं उत करणानां साधारणव्या-

सकरणवृत्तिः प्राण इति इति प्राप्तं, एवं हि तन्त्रान्तरीया आचक्षते। 'सामान्या करणवृत्तिः प्राणाद्या वायवः पञ्च' इति। अत्रोच्यते। न वायुः प्राणः नापि करणव्यापारः। कुतः पृथग्-गुपदेशात्। वायोस्तावत् प्राणस्य पृथगुपदेशो भवति, 'प्राण एव ब्रह्मणश्चतुर्थः पादः, स वायुना ज्योतिषा भाति च तपति च' इति। नहि वायुरेव सन् वायोः पृथगुपदिश्यते तथा करण-वृत्तेरपि पृथगुपदेशो भवति, वागादीनि करणान्यनुक्रम्य तत्र तत्र पृथक् प्राणस्यानुक्रमणात् वृत्तिवृत्तिमतोश्चाभेदात्। नहि करणव्यापार एव सन् करणेभ्यः पृथगुपदिश्येत। तथा 'एत-स्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च खं वायुः' इत्येवमाद-योऽपि वायोः करणेभ्यश्च प्राणस्य पृथगुपदेशा अनुसर्त्तव्याः। न च समस्तानां करणानामेका वृत्तिः सम्भवति, प्रत्येकमेकैक-वृत्तित्वात्, समुदायस्य चाकारकत्वात्। ननु पञ्जरचालनन्या-येन एतद्भविष्यति यथैकपञ्जरवर्त्तिनः एकादश पक्षिणः प्र-त्येकं प्रतिनियतव्यापाराः सन्तः सम्भूयैकं पञ्जरं चालयन्ति एवमेकशरीरवर्त्तिनः एकादश प्राणाः प्रत्येकं नियतवृत्तयः सन्तः सम्भूयैकां प्राणाख्यां वृत्तिं प्रतिलप्स्यन्त इति। नेत्युच्यते

---

*

पारः आहोस्वित्तत्त्वान्तरमिति वायुप्राणयोर्भेदाभेदश्रुतीनां मिथो विरोधात्। संशये पूर्वपक्षमाह। तत्रेति। द्वितीयं सांख्यपूर्व-पक्षमाह। अथवेति। सिद्धान्तत्वेन सूत्रमादत्ते। अत्रोच्यत इति। मनोरूपब्रह्मणो वाक्प्राणचक्षुःश्रोत्रैश्चतुष्पात्त्वं श्रुतावुक्तं, तत्र प्राणो वायुनाधिदैविकेन भात्यभिव्यज्यते अभिव्यक्तः संतपति कार्य्यक्षमो

युक्तं। तत्र प्रत्येकवर्त्तिभिरवान्तरव्यापारैः पञ्जरचालनानुरूपैरेवोपेताः पक्षिणः सम्भूयैकं पञ्जरं चालयेयुरिति तथा दृष्टत्वात्। इह तु श्रवणाद्यवान्तरव्यापारोपेताः प्राणा न सम्भूय प्राण्युरिति युक्तं, प्रमाणाभावात् अत्यन्तविजातीयत्वाच्च श्रवणादिभ्यः प्राणनस्य। तथा प्राणस्य श्रेष्ठताद्युद्घोषणं गुणभावोपगमश्च तं प्रति वागादीनां न करणवृत्तिमात्रे प्राणेऽवकल्पते, तस्मादन्यो वायुक्रियाभ्यां प्राणः। कथं तर्हीयं श्रुतिः, 'यः प्राणः स वायुः' इति, उच्यते। वायुरेवायमध्यात्ममापन्नः पञ्चव्यूहो विशेषात्मनावतिष्ठमानः प्राणो नाम भण्यते न तत्त्वान्तरं नापि वायुमात्रं, अतश्चोभे अपि भेदाभेदश्रुती न विरुध्येते। स्यादेतत्, प्राणोऽपि तर्हि जीववदस्मिन् शरीरे स्वातन्त्र्यं प्राप्नोति, श्रेष्ठत्वात् गुणभावोपगमाच्च तं प्रति वागादीनामिन्द्रियाणां। तथा हि अनेकविधा विभूतिः प्राणस्य श्राव्यते। 'सुप्तेषु वागादिषु प्राण एवैको जागर्त्ति

भवतीत्यर्थः। श्रुतिषु तत्र तत्र प्राणस्य वागादीनाञ्च मिथः संवादलिङ्गेन पृथगुत्पत्तिलिङ्गेन चेन्द्रियतदभिन्नव्यापारेभ्योऽपि भिन्नत्वमित्याह। तथेति। प्राणस्येन्द्रियवृत्तित्वं श्रुत्या निरस्य युक्त्यापि निरस्यति। न च समस्तानामिति। या चक्षुःसाध्या वृत्तिः सैव न श्रोत्रादिसाध्या करणानां प्रत्येकमेकैकरूपग्रहादिवृत्तावेव हेतुत्वात्। न च समुदायस्य वृत्तिः सम्भवति तस्यासत्त्वादित्यर्थः। प्रमाणाभावादिति श्रोत्रादीनामेकप्राणनाख्यवृत्त्यनुकूलपरिस्पन्देषु मानाभावात् श्रवणादीनामपरिस्पन्दत्वेन विजातीयत्वात् परिस्पन्दरूपप्राणनानुकूलत्वादवान्तरव्यापाराभावान्न समस्तकरणवृत्तिः प्राण इत्यर्थः। किञ्च प्राणस्य वृत्तित्वे वागादीनामेव प्राधान्यं वाच्यं नैतदस्तीत्याह। तथा

प्राण एवैको मृत्युनाऽनाप्तः प्राणः संवर्गो वागादीन् संवृङ्क्ते प्राण इतरान् प्राणान् रक्षति मातेव पुत्रान्' इति । तस्मात् प्राणस्यापि जीववत् स्वातन्त्र्यप्रसङ्गः, तं परिहरति ॥

चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॥ १० ॥

तुशब्दः प्राणस्य स्वातन्त्र्यं व्यावर्त्तयति । यथा चक्षुरादीनि राजप्रकृतिवत् जीवस्य कर्तृत्वं भोक्तृत्वं च प्रत्युपकरणानि न स्वतन्त्राणि तथा मुख्योऽपि प्राणो राजमन्त्रिवत् जीवस्य सर्वार्थत्वेन उपकरणभूतो न स्वतन्त्रः । कुतः तत्सहशिष्ट्यादिभ्यः तैश्चक्षुरादिभिः सहैव प्राणः शिष्यते, प्राणसंवादादिषु समानधर्माणाञ्च सहशासनं युक्तं बृहद्रथन्तरादिवत् । आदिशब्देन संहतत्वाचेतनत्वादीन् प्राणस्य स्वातन्त्र्यनिराकरणहेतून् दर्शयति । स्यादेतत् यदि चक्षुरादिवत् प्राणस्य जीवं

प्राणस्येति । यथा मृदो घटो न वस्त्वन्तरं नापि मृण्मात्रं तद्विकारत्वात् तथा वायोर्विकारः प्राण इत्यभेदश्रुतेर्गतिमाह । उच्यत इति । देहे प्राप्तः पञ्चावस्थो विकारात्मना स्थितो वायुरेव प्राण इत्यर्थः । प्राणस्य करणवृत्तित्वाभावे जीववत् भोक्तृत्वं स्यादिति शङ्कते । स्यादेतदिति ॥

प्राणो न भोक्ता भोगोपकरणत्वात् चक्षुरादिवदिति सूत्रार्थमाह । तुशब्द इत्यादिना । यथा बृहद्रथन्तरयोः सर्वत्र सहप्रयुज्यमानत्वेन सामत्वेन वा साम्यात् सहपाठस्तथा करणैः सहोपकरणत्वेन साम्यात् प्राणस्य पाठ इति न हेत्वसिद्धिरित्यर्थः । किञ्च प्राणो न भोक्ता सा-

प्रति करणभावोऽभ्युपगम्येत विषयान्तरं रूपादिवत् प्रसज्येत रूपालोचनाद्याभिर्वृत्तिभिर्यथा चक्षुरादीनां स्वं जीवं प्रति करणभावो भवति। अपि चैकादशैव कार्यजातानि रूपालोचनादीनि परिगणितानि यदर्थमेकादश प्राणाः संगृहीताः न तु द्वादशमपरं कार्य्यजातमवगम्यते यदर्थमयं द्वादशः प्राणः प्रतिज्ञायत इति। अत उत्तरं पठति॥

अकरणत्वाच्च न दोषस्तथा हि दर्शयति॥ ११॥

न तावद्विषयान्तरप्रसङ्गो दोषः, अकरणत्वात् प्राणस्य। नहि चक्षुरादिवत् प्राणस्य विषयपरिच्छेदेन करणत्वमभ्युपगम्यते। न चास्यैतावता कार्याभाव एव। कस्मात्, तथा हि श्रुतिः प्राणान्तरेष्वसम्भाव्यमानं मुख्यप्राणस्य वैशेषिकं कार्यं दर्शयति। प्राणसंवादादिषु "अथ ह प्राणा अहंश्रेयसे व्यूदिरे" इत्युपक्रम्य 'यस्मिन् व उत्क्रान्त इदं शरीरं पापिष्ठतरमिव दृश्यते स वः श्रेष्ठः' इति चोपन्यस्य प्रत्येकं वागाद्युत्क्रमणेन तद्वृत्ति-

---

वयवत्वाज्जडत्वाद्भौतिकत्वाच्च देहवत्। ननु यदङ्गोपकरणं तत् सविषयं दृष्टं यथा चक्षुरादिकं, प्राणस्य तु निर्विषयत्वादसाधारणकार्य्याभावाच्च नोपकरणत्वमिति शङ्कते। स्यादेतदिति॥

उत्क्रान्तेः शरीरे व्यभिचाराद्देहेन्द्रियधारणोत्क्रान्त्याद्यसाधारणकार्य्यसत्त्वाच्च निर्विषयस्यापि प्राणस्य शरीरवदङ्गोपकरणत्वमक्षतं न तु चक्षुरादिवत् ज्ञानकर्मकरणत्वमस्ति येन सविषयत्वं स्यादिति परिहरति। न तावदित्यादिना। अहंश्रेयसे स्वस्य श्रेष्ठतानिमित्तं,

मात्रहीनं यथापूर्वं जीवनं मुख्यप्राणस्य वैशेषिकं कार्यं दर्शयित्वा प्राणोत्क्रिमिषायां वागादिशैथिल्यापत्तिं शरीरपातप्रसङ्गञ्च दर्शयन्ती श्रुतिः प्राणनिमित्तां शरीरेन्द्रियस्थितिं दर्शयति 'तान् वरिष्ठः प्राण उवाच मा मोहमापद्यथाहमेवैतत् पञ्चधात्मानं प्रविभज्यैतद्वाणमवष्टभ्य विधारयामि' इति च। एतमेवार्थं श्रुतिराह। "प्राणेन रक्षन्नवरं कुलायं" इति च सुप्तेषु चक्षुरादिषु प्राणनिमित्तां शरीररक्षां दर्शयति। 'यस्मात् कस्माच्चाङ्गात् प्राण उत्क्रामति तदेव तच्छुष्यति तेन यदश्नाति यत् पिबति तेनेतरान् प्राणानवति' इति च प्राणनिमित्तां शरीरेन्द्रियपुष्टिं दर्शयति। 'कस्मिन्नहमुत्क्रान्ते उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठितेऽहं प्रतिष्ठास्यामीति स प्राणमसृजत' इति प्राणनिमित्ते एव जीवस्योत्क्रान्तिप्रतिष्ठे दर्शयति ॥

पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥ १२ ॥

इतश्चास्ति मुख्यप्राणस्य वैशेषिकं कार्य्यं यत्कारणं पञ्चवृत्तिरयं व्यपदिश्यते श्रुतिषु 'प्राणोऽपानो व्यान उदानः स-

---

चूदिरे विवादं चक्रिरे। तद्वृत्तिमात्रहीनमिति मूकादिभावेन स्थितमित्यर्थः। अवरं नीचं, कुलायं देहाख्यं गृहं, प्राणेन रक्षञ्जीवः स्वपितीत्यर्थः। तदेव तदानीमेव, तेन प्राणेन यदश्नाति जीवः तेन प्राणकृताशनेनेति यावत्। एवंश्रुतेः प्राणस्यासाधारणं कार्य्यमस्तीत्युक्तं ॥

तत्रैव हेत्वन्तरार्थं सूत्रं व्याचष्टे। इतश्चेत्यादिना। वृत्तिरवस्था।

मानः’ इति। वृत्तिभेदश्चायं कार्य्यभेदापेक्षः। ‘प्राणः प्राग्वृत्तिरुच्छ्वासादिकर्म्मा, अपानोऽवाग्वृत्तिर्निश्वासादिकर्म्मा, व्यानः तयोः सन्धौ वर्त्तमानो वीर्य्यवत् कर्म्महेतुः, उदानः ऊर्द्ध्ववृत्तिरुत्क्रान्त्यादिहेतुः, समानः समं सर्व्वेष्वङ्गेषु योऽन्नरसान्नयति’ इति। एवं पञ्चवृत्तिः प्राणः मनोवत् यथा मनसः पञ्चवृत्तयः एवं प्राणस्यापीत्यर्थः। श्रोत्रादिनिमित्ताः शब्दादिविषयाः मनसः पञ्च वृत्तयः प्रसिद्धाः। न तु कामः सङ्कल्प इत्याद्याः परिपठिताः परिगृह्येरन्, पञ्चसङ्ख्यातिरेकात्। नन्वत्रापि श्रोत्रादिनिरपेक्षा भूतभविष्यदादिविषयाऽपरा मनसो वृत्तिरस्तीति समानः पञ्चसङ्ख्यातिरेकः। एवं तर्हि परमतमप्रतिषिद्धमनुमतं भवतीति न्यायादिहापि योगशास्त्रप्रसिद्धा मनसः पञ्च वृत्तयः परिगृह्यन्ते प्रमाणविपर्य्ययविकल्पनिद्रास्मृतयो नाम। बहुवृत्तित्वमात्रेण वा मनः प्राणस्य निदर्शनमिति द्रष्टव्यं। जीवोपकरणत्वमपि प्राणस्य पञ्चवृत्तित्वान्मनोवदिति योजयितव्यं॥

अग्निमन्थनादिकं वीर्य्यवत् कर्म। कामादिवृत्तिवर्ज्जानेऽपि पञ्चत्वनियमो नास्तीत्यरुचिं स्वयमेवोद्भाव्य पक्षान्तरं गृह्णाति। नन्वत्रापीत्यादिना। प्रमाणं प्रमितिः। विपर्य्ययो भ्रमः। शशविषाणादिज्ञानं विकल्पः। तामसी वृत्तिर्निद्रा। स्मृतिः प्रसिद्धा। भ्रमनिद्रयोरविद्यावृत्तित्वान्न मनोवृत्तित्वमित्यरुच्या स्वमतमाह। बह्विति। सूत्रस्यार्थान्तरमाह। जीवेति। तदेवं प्राणवायोर्भेदाभेदश्रुत्योरविरोध इति सिद्धं॥

अणुश्च ॥ १३ ॥

अणुश्चायं मुख्यः प्राणः प्रत्येतव्यः इतरः प्राणवत्। अणुत्वं चेहापि सौक्ष्म्यपरिच्छेदौ न परमाणुतुल्यत्वं, पञ्चभिर्वृत्तिभिः कृत्स्नशरीरव्यापित्वात्। सूक्ष्मः प्राण उत्क्रान्तौ पार्श्वस्थेनानुपलभ्यमानत्वात्, परिच्छिन्नश्चोत्क्रान्तिगत्यागतिश्रुतिभ्यः। ननु विभुत्वमपि प्राणस्य समाम्नायते, "समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण" इत्येवमादिषु प्रदेशेषु। तदुच्यते, आधिदैविकेन समष्टिव्यष्टिरूपेण हैरण्यगर्भेण प्राणात्मना एतद्विभुत्वमाम्नायते नाध्यात्मिकेन। अपि च समः प्लुषिणेत्यादिना साम्यवचनेन प्रतिप्राणिवर्त्तिनः प्राणस्य परिच्छेद एव प्रदर्श्यते तस्माददोषः ॥

एवं मुख्यप्राणस्योत्पत्तिं स्वरूपञ्चोक्त्वा परिमाणसन्देहेऽणुत्वमुपदिशति। अणुश्चेति। अधिकाशङ्कामाह। ननु विभुत्वमपीति। प्लुषिर्मशकादपि सूक्ष्मो जन्तुः पुत्तिकेत्युच्यते। नागो हस्ती। प्राण उत्क्रामतीति श्रुत्याल्पत्वं प्राणस्य भाति, समोऽनेन सर्वेणेति श्रुत्या विभुत्वमिति विरोधे आध्यात्मिकप्राणस्याल्पत्वमाधिदैविकस्य विभुत्वमिति विषयभेदाच्छ्रुत्योरविरोधः इति समाधत्ते। तदुच्यत इति। किञ्चोपक्रमे प्राणस्य प्लुष्यादिसमत्वेनाल्पत्वोक्तेः सम एभिस्त्रिभिर्लोकैरिति विराड्देहसाम्यं। समोऽनेनेति सूत्रात्मत्वमिति विषयव्यवस्था सुस्थेत्याह। अपि चेति। अथवस्येत्यत्र सर्वेऽनन्ता इति इन्द्रियानन्त्यमुपासनार्थमिति समाहितं, अत्र तु प्राणविभुत्वमाधिदैविकमिति समाधानान्तरोक्तेरपौनरुक्त्यं। अन्ये तु प्रसङ्गात्तत्र सांख्यादेपो निरस्तः अत्र तु श्रुतिविरोधो निरस्त इत्यपौनरुक्त्यमाहुः। पूर्वं प्राणस्याध्यात्मिकाधिदैविकविभागेनाप्यणुत्वविभुत्वव्यवस्थोक्ता ॥

ज्योतिराद्यधिष्ठानन्तु तदामननात् ॥ १४ ॥

ते पुनः प्रकृताः प्राणाः किं स्वमहिम्नैव स्वस्मै स्वस्मै कार्य्याय प्रभवन्ति आहोस्विद्देवताधिष्ठिताः प्रभवन्तीति विचार्य्यते। तत्र प्राप्तं तावद्यथा स्वकार्य्यशक्तियोगात् स्वमहिम्नैव प्राणाः प्रवर्तेरन्निति। अपि च देवताधिष्ठितानां प्राणानां प्रवृत्तावभ्युपगम्यमानायां तासामेवाधिष्ठात्रीणां देवतानां भोक्तृत्वप्रसङ्गात् शारीरस्य भोक्तृत्वं प्रलीयेत, अतः स्वमहिम्नैवैषां प्रवृत्तिरिति, एवं प्राप्त इदमुच्यते। ज्योतिराद्यधिष्ठानन्त्विति। तुशब्देन पूर्वपक्षो व्यावर्त्यते। ज्योतिरादिभिरग्न्याद्यभिमानिनीभिर्देवताभिरधिष्ठितं वागादिकरणजातं स्वकार्य्येषु प्रवर्तत इति प्रतिजानीते। हेतुञ्च व्याचष्टे। तदामननादिति। तथा ह्यामनन्ति अग्निर्वाग्भूत्वा मुखं प्राविशदित्यादि। अग्नेश्चायं वाग्भावो मुखप्रवेशश्च देवतात्मनाऽधिष्ठा-

---

तत्प्रसङ्गेनाध्यात्मिकानां प्राणानामाधिदैविकाधीनत्वमाह। ज्योतिराद्यधिष्ठानन्तु तदामननात्। 'वाचा हि नामान्यभिवदति चक्षुषा रूपाणि पश्यति' इति तृतीयाश्रुत्याऽन्वयव्यतिरेकवत्या वागादीनां निरपेक्षसाधनत्वोक्तिविरोधादग्निर्वाग्भूत्वेत्यादिश्रुतिस्तेषामचेतनाग्न्याद्युपादानकत्वपरा न तु तेषामधिष्ठातृदेवतापरा। न च स्वकार्य्ये शक्तानामपि वागादीनामचेतनत्वादधिष्ठात्रपेक्षा न विरुध्यत इति वाच्यं, जीवस्याधिष्ठातृत्वात्। किञ्च देवतानामधिष्ठातृत्वे जीववद्भोक्तृत्वमस्मिन् देहे स्यात्, तथा चैकस्मिन्नेकभोक्तॄणां विरोधात् दुर्बलस्य जीवस्य भोक्तृत्वं न स्यादिति पूर्वपक्षार्थः। सिद्धान्तयति। एवं प्राप्त इत्यादिना। अग्निर्वाग्भूत्वादित्यश्चक्षुर्भूत्वेति च तद्भावोऽग्न्यादिदेवताधिष्ठेयत्वरूप एव सम्बन्धो न तदुपादानकत्वरूपो दूरस्थादित्य-

हत्वमङ्गीकृत्योच्यते। नहि देवतासम्बन्धं प्रत्याख्यायाग्नेर्वाचि मुखे वा कश्चिद्विशेषः सम्बन्धो दृश्यते। तथा 'वायुः प्राणो भूत्वा नासिके प्राविशत्' इत्येवमाद्यपि योजयितव्यं। तथान्यत्रापि 'वागेव ब्रह्मणश्चतुर्थः पादः सोऽग्निना ज्योतिषा भाति च तपति च' इत्येवमादिना वागादीनामग्न्यादिज्योतिष्ट्ववचनेनैतमेवार्थं द्रढयति। 'स वै वाचमेव प्रथमामत्यवहत् सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवदिति च' एवमादिना वागादीनामग्न्यादिभावापत्तिवचनेनैतमेवार्थं द्योतयति। सर्वत्र चाध्यात्माधिदैवतविभागेन वागाद्यग्न्याद्यनुक्रमणमनयैव प्रत्यासत्त्या भवति। स्मृतावपि।

'वागध्यात्ममिति प्राहुः ब्राह्मणास्तत्त्वदर्शिनः।
वक्तव्यमधिभूतन्तु वह्निस्तत्राधिदैवतम्'॥

इत्यादिना वागादीनामग्न्यादिदेवताधिष्ठितत्वं सप्रपञ्चं प्रदर्शितं। यदुक्तं स्वकार्य्यशक्तियोगात् स्वमहिम्नैव प्राणाः प्रवर्त्ते-

---

मण्डलादेर्मुखस्य चक्षुराद्युपादानत्वासम्भवादित्याह। अग्नेश्चायमिति। वायुः प्राणाधिष्ठाता भूत्वा नासापुटे प्राविशदिति व्याख्येयमित्याह। तथेति। भाति दीप्यते, तपति स्वकार्य्यं करोतीत्यर्थः। एतस्मिन्नधिष्ठात्रधिष्ठेयत्वरूपार्थे लिङ्गान्तरमाह। स वै वाचमिति। स प्राणो वाचं प्रथमामुद्गीथकर्म्मणि प्रधानामन्तादिपाप्मरूपं मृत्युमतीत्यावहत् मृत्युना मुक्तां कृत्वा अग्निदेवतात्मत्वं प्रापितवानित्यर्थः। किञ्चाग्नेरस्याग्निं वागप्येति वातं प्राणः चक्षुरादित्यमित्यादिश्रुतिरप्यधिष्ठात्रधिष्ठेयत्वे सम्बन्धं द्योतयतीत्याह। सर्वत्रेति। ननु शकटादीनां बलीवर्द्दादिप्रेरितानां प्रवृत्तिर्दृष्टा, क्षीरादीनान्त्वनधिष्ठितानामपि दध्यादिप्रवृत्तिर्दृश्यते, तथा चोभयथासम्भवे कथं निश्चयस्तत्राह।

रत्विति, तदयुक्तं। शक्तानामपि शकटादीनामनडुहाद्यधिष्ठितानां प्रवृत्तिदर्शनात्। उभयथोपपत्तौ चागमाद्देवताधिष्ठितत्वमेव निश्चीयते। यदप्युक्तं देवतानामेवाधिष्ठात्रीणां भोक्तृत्वप्रसङ्गो न शारीरस्य जीवस्येति तत् परिह्रियते॥

प्राणवता शब्दात्॥ १५॥

सतीष्वपि प्राणानामधिष्ठात्रीषु देवतासु प्राणवता कार्य्यकरणसङ्घातस्वामिना शारीरेणैवैषां प्राणानां सम्बन्धः श्रुतेरवगम्यते। तथा हि श्रुतिः 'अथ यत्रैतदाकाशमनुप्रविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणम्' इत्येवंजातीयका शारीरेणैव प्राणानां सम्बन्धं श्रावयति। अपि चानेकत्वात् प्रतिकरणमधिष्ठात्रीणां देवतानां न भोक्तृत्वमस्मिन् शरीरेऽवकल्पते। एको ह्ययमस्मिन् शरीरे शारीरो भोक्ता प्रतिसन्धानादिसम्भवादवगम्यते॥

उभयथोपपत्तौ चेति। उक्तदोषान्तरनिरासाय सूत्रमवतारयति। यदपीति॥

शारीरेणैवेति। भोक्त्रेति शेषः। सम्बन्धो भोक्तृभोग्यभावः। अथ देहे प्राणप्रवेशानन्तरं यत्र गोलके एतच्छिद्रमनुप्रविष्टं चक्षुरिन्द्रियं तत्र चक्षुष्यभिमानी स आत्मा चाक्षुषः तस्य रूपदर्शनाय चक्षुः। यद्यप्यात्मा करणान्यपेक्षते तथापि ज्ञेयज्ञानतदाश्रयाहङ्कारं यो वेद स आत्मा चिद्रूप एव, करणानि तु गन्धादिप्रवृत्तयेऽपेक्ष्यन्ते न चैतन्यायेति श्रुत्यर्थः। किञ्च योऽहं रूपमद्राक्षं स एवाहं स्पृशामीति प्रतिसन्धानादेकः शारीर एव भोक्ता न बहवो देवा इत्याह। अपि चेति॥

तस्य च नित्यत्वात् ॥ १६ ॥

तस्य च शारीरस्यास्मिन् शरीरे भोक्तृत्वेन नित्यत्वं पुण्यपापोपलेपसम्भवात् सुखदुःखोपभोगसम्भवाच्च न देवतानां। ता हि परस्मिन्नैश्वर्ये पदेऽवतिष्ठमाना न हीनेऽस्मिंच्छरीरे भोक्तृत्वं प्रतिलब्धुमर्हन्ति। श्रुतिश्च भवति 'पुण्यमेवामुं गच्छति न ह वै देवान् पापं गच्छति' इति शारीरेणैव च नित्यः प्राणानां सम्बन्धः। उत्क्रान्त्यादिषु तदनुवृत्तिदर्शनात्। 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' इत्यादिश्रुतिभ्यः। तस्मात् सतीष्वपि करणानां नियन्त्रीषु देवतासु न शारीरस्य भोक्तृत्वमपगच्छति, करणपक्षस्यैव हि देवता न भोक्तृत्वपक्षस्येति ॥

कदाचिद्देवानामन्नभोक्तृत्वं कदाचिज्जीवस्येत्यनियमोऽस्त्वित्याशङ्क्य स्वकर्मार्जिते देहे जीवस्य भोक्तृत्वनियमान्मैवमित्याह सूत्रकारः। तस्य चेति। उत्क्रमणादिषु जीवस्य प्राणाव्यभिचारात्तस्यैव प्राणस्वामित्वं, देवतानान्तु परस्वामिकरथसारथिवदधिष्ठातृत्वमात्रमिति व्याख्यान्तरमाह। शारीरेणैव च नित्य इति। यथा प्रदीपादिः करणोपकारकतया करणपक्षस्यान्तर्गतस्तथा देवाः करणोपकारिण एव न भोक्तार इत्यर्थः। जीवस्यादृष्टद्वारा करणाधिष्ठातृत्वाद्रथस्वामिवद्भोक्तृत्वं, देवानान्तु करणोपकाराभिज्ञतया सारथिवदधिष्ठातृत्वमिति न जीवेनान्यथासिद्धिः। देवानामधिष्ठातृत्वेनास्मिन् देहे भोक्तृत्वानुमानन्तु न ह वै देवान् पापं गच्छतीत्युक्तश्रुतिबाधितं, तस्माच्चक्षुषा हि रूपाणि पश्यतीति श्रुतेः साधनत्वमात्रबोधित्वादर्भिर्वाग्भूत्वेत्याद्यधिष्ठातृदेवतापेक्षाबोधकश्रुतिभिरविरोध इति सिद्धं ॥

त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १७ ॥

मुख्यश्चैक इतरे चैकादश प्राणा अनूक्तान्ताः, तत्रेदमपरं सन्दिह्यते किं मुख्यस्यैव प्राणस्य वृत्तिभेदा इतरे प्राणा आहो-स्वित् तत्त्वान्तराणीति। किन्तावत् प्राप्तं मुख्यस्यैवेतरे वृत्तिभेदा इति। कुतः श्रुतेः। तथा हि श्रुतिर्मुख्यमितरांश्च प्राणान् सन्निधाप्य मुख्यात्मतामितरेषां ख्यापयति 'हन्तास्यैव सर्वे रूप-मसामेति तत्र तस्यैव सर्वे रूपमभवन्' इति। प्राणैकश-ब्दत्वाच्चैकत्वाध्यवसायः, इतरथा ह्यन्याय्यमनेकार्थत्वं प्राणशब्दस्य प्रसज्येत एकत्र वा मुख्यत्वमितरत्र वा लाक्षणिकत्वमापद्येत। तस्माद् यथैकस्यैव प्राणस्य प्राणाद्याः पञ्च वृत्तयः एवं वागाद्या अप्येकादशैत्येवं प्राप्ते ब्रूमः। तत्त्वान्तराण्येव प्राणाद्वागादी-नीति। कुतः, व्यपदेशभेदात्। कोऽयं व्यपदेशभेदः, ते प्रकृ-ताः प्राणाः श्रेष्ठं वर्जयित्वाऽवशिष्टा एकादशेन्द्रियाणीत्युच्यन्ते।

सत्स्विन्द्रियेषु तदधिष्ठातृदेवताचिन्ता तान्येव प्राणवृत्तिव्यतिरेकेण न सन्तीत्याक्षेपं प्रत्याह। त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्। प्राणादिन्द्रियाणां भेदाभेदश्रुतिभ्यां संशयं वदन् पूर्वपक्षयति। मुख्य-स्येत्यादिना। हन्त इदानीमस्यैव मुख्यप्राणस्य सर्वे वयं स्वरूपं भवा-मेति सङ्कल्प्यते वागादयस्तथाऽभवन्नित्यभेदश्रुत्यर्थः। ते प्राणादभिन्नाः प्राणपदवाच्यत्वात् प्राणवदित्याह। प्राणेति। ते प्राणाः श्रेष्ठादन्यत्रान्य इति प्रतिज्ञार्थत्वेन पदत्रयं व्याचष्टे। तत्त्वान्तराण्येवेति। तद्व्यपदेशा-दित्यत्र तच्छब्दः प्रतिज्ञातान्यत्वं परामृशति। प्राणा इन्द्रियाणीति। अप-र्य्यायशब्दाभ्यामन्यत्वोक्तेरिति हेतूपपादनार्थत्वेन पुनरुक्तानि सूत्रपदानि योजयति। क इत्यादिना। सूत्रस्य विश्वतोमुखत्वादुभयार्थत्वमलङ्कार एव न दूषणं, एतेन प्रतिज्ञाध्याहारः तच्छब्दस्याप्रकृतभेदपराम-

श्रुतावेवं व्यपदेशभेददर्शनात्। 'एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च' इत्येवंजातीयकेषु श्रुतिप्रदेशेषु पृथक् प्राणो व्यपदिश्यते पृथक् चेन्द्रियाणि। ननु मनसोऽप्येवं सति वर्जनम् *इन्द्रियत्वेन प्राणवत् स्यात् 'मनः सर्वेन्द्रियाणि च' इति पृथक् व्यपदेशभेददर्शनात्। सत्यमेतत्, स्मृतौ तु एकादशेन्द्रियाणीति मनोऽपीन्द्रियत्वेन श्रोत्रादिवत् संगृह्यते, प्राणस्य त्विन्द्रियत्वं न श्रुतौ स्मृतौ वा प्रसिद्धमस्ति। व्यपदेशभेदश्चायं †तत्त्वभेदपक्षे उपपद्यते। तत्त्वैकत्वे तु 'स एवैकः सन् प्राण इन्द्रियव्यपदेशं लभते न लभते च' इति विप्रतिषिद्धं, तस्मात्तत्त्वान्तरभूता मुख्यादितरे। कुतश्च तत्त्वान्तरभूता मुख्यादितरे ॥

भेदश्रुतेः ॥ १८ ॥

भेदेन च वागादिभ्यः प्राणः सर्वत्र श्रूयते। 'ते ह वाचमूचुः'

श्रितत्वञ्चेति दोषद्वयमपास्तं। शब्दभेदाद्वस्तुभेदसाधनेऽतिप्रसङ्गं शङ्कते। नन्विति। प्राणवन्मनसोऽपि इन्द्रियेभ्यो भेदः स्यादित्यर्थः। अपर्य्यायसंज्ञाभेदात् स्वतन्त्रसंज्ञिवस्तुभेद इत्युत्सर्गः। स च मनःषष्ठानीन्द्रियाणीत्यादिस्मृतिबाधान्मनस्यपोद्यते, प्राणे तु बाधकाभावादुत्सर्गसिद्धिरिति समाधत्ते। सत्यमित्यादिना। मन इन्द्रियाणि चेति भेदोक्तिर्गोबलीवर्दन्यायेन नेया। सिद्धान्ते मनसः प्रथमोपादानत्वादात्मवदनिन्द्रियत्वमिष्टं ततो नोत्सर्गबाध इति केचित्। किञ्चैतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति पृथक्जन्मव्यपदेशात् स्वतन्त्रवस्तुभेद इत्याह। व्यपदेशभेदश्चायमिति। एकस्मिन् वाक्ये प्राण इन्द्रियशब्दमेकस्माल्लभते पुनरुक्तिभयान्न लभते चेति व्याख्यात इत्यर्थः ॥

एवं भेदेनापर्य्यायसंज्ञाभ्यामुक्तेः पृथक्जन्मोक्तेश्चेति तद्व्यपदेशादिति

---

* इन्द्रियत्वे इति वर्ध० का०।

† तत्त्वभेदे सतीति वर्ध० का०।

इत्युपक्रम्य वागादीनसुरपाप्मविध्वस्तानुपन्यस्योपसंहृत्य वागादिप्रकरणं, 'अथ हेममासन्यं प्राणमूचुः' इत्यसुरविध्वंसिनो मुख्यस्य प्राणस्य पृथगुपक्रमात्, तथा 'मनो वाचं प्राणं तान्यात्मनेऽकुरुत' इत्येवमाद्या अपि भेदश्रुतय उदाहर्त्तव्याः। तस्मादपि तत्त्वान्तरभूता मुख्यादितरे। कुतश्च तत्त्वान्तरभूता मुख्यादितरे॥

वैलक्षण्याच्च॥ १९॥

वैलक्षण्यञ्च भवति मुख्यप्राणस्येतरेषाञ्च सुप्तेषु वागादिषु मुख्य एको जागर्त्ति स एव चैको मृत्युनाऽनाप्तः। आप्तास्त्वितरे तस्यैव प्राणस्यावस्थित्युत्क्रान्तिभ्यां देहधारणपातनहेतुत्वं नेन्द्रियाणां विषयालोचनहेतुत्वञ्चेन्द्रियाणां न प्राणस्येत्येवंजातीयको भूयान् लक्षणभेदः प्राणेन्द्रियाणां। तस्मादप्येषां तत्त्वान्तरभावसिद्धिः। यदुक्तं 'तत्र तस्यैव सर्वे रूपमभवन्' इति श्रुतेः प्राण एवेन्द्रियाणीति, तदयुक्तं। तत्रापि पौर्वापर्य्यालोचनाद्भेदप्रतीतेः।

हेतुर्व्याख्यातः। भेदश्रुतेरिति सूत्रेण प्रकरणभेदो हेतुरुक्त इति न पौनरुक्त्यं। ते देवाः शास्त्रीयेन्द्रियमनोवृत्तिरूपाः असुराणां पापवृत्तिरूपाणां जयार्थमुद्गीथकर्म्माणि प्रथमं व्याप्ततां वाचमूचुस्त्वम उद्गायासुरनाशार्थमिति तथास्त्वित्यङ्गीकृत्योद्गायन्तीं वाचमन्तृतादिदोषेण विध्वंसितवन्तोऽसुरा इत्येवं क्रमेण सर्वेष्विन्द्रियेषु पापग्रस्तेषु पश्चादथेति प्रकरणं विच्छिद्य प्रसिद्धमास्ये भवमासन्यं मुख्यं प्राणमूचुस्त्वम उद्गायेति तेन प्राणेनोद्गाता निर्विषयतया सङ्गदोषशून्येनासुरा नष्टा इत्यसुराणां विध्वंसिनो मुख्यप्राणस्योक्तेर्भेदसिद्धिरित्याह। ते हेति। तानि त्रीण्यन्यान्यात्मने स्वार्थं प्रजापतिः कृतवानित्यर्थः॥

विरुद्धधर्म्मवत्त्वाच्च। भेद इत्याह। वैलक्षण्यञ्चेति। मृत्युरासङ्गदोषः। वागादयो हतवत इत्यर्थः। बहुभिर्भेदलिङ्गैर्विरोधाद्वागादीनां प्राण-

तथा हि 'वदिष्याम्येवाहमिति वाग्दध्रे' इति वागादीनीन्द्रियाण्यनुक्रम्य 'तानि मृत्युः श्रमो भूत्वोपयेमे तस्माच्छ्राम्यत्येव वाक्' इति च श्रमरूपेण मृत्युना ग्रस्तत्वं वागादीनामभिधाय 'अथेममेव नाप्नोत् योऽयं मध्यमः प्राणः' इति पृथक्प्राणं मृत्युनानभिभूतमनुक्रामति। 'अयं वै नः श्रेष्ठः' इति च श्रेष्ठतामस्यावधारयति। तस्मात्तदविरोधेन वागादिषु परिस्पन्दलाभस्य प्राणायत्तत्वं तद्रूपभवनं वागादीनामिति मन्तव्यं न तु तादात्म्यं। अतएव प्राणशब्दस्येन्द्रियेषु लाक्षणिकत्वसिद्धिः। तथा च श्रुतिः 'तत्र तस्यैव सर्वे रूपमभवन् तस्मादेत एतेनाख्यायन्ते प्राणाः' इति मुख्यप्राणविषयस्यैव प्राणशब्दस्य इन्द्रियेषु लाक्षणिकीं वृत्तिं दर्शयति। तस्मात्तत्त्वान्तराणि प्राणाद्वागादीन्द्रियाणीति॥

संज्ञामूर्त्तिकॢप्तिस्तु त्रिवृत्कुर्वत उपदेशात्॥ २०॥

सत्प्रक्रियायां तेजोऽबन्नानां *सृष्टिमभिधायोपदिश्यते। 'सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानु-

---

रूपभवनं प्राणाधीनस्थितिकत्वरूपं व्याख्येयं। एतदेव प्राणशब्दस्येन्द्रियेषु लक्षणाबीजं श्रुतौ तस्मादेत एतेनाख्यायन्त इति परामृष्टमिति न भेदाभेदश्रुत्योर्विरोध इति सिद्धं॥

उत्पत्तिमत्पादनेति च कार्य्यकर्त्रोर्व्यापारौ प्रसिद्धौ, तत्र जगदुत्पत्तिश्रुतिविरोधः अतीतेन पादद्वयेन निरस्तः, सम्प्रत्युपादानश्रुतिविरोधो निरस्यते। तत्रापि सूक्ष्मभूतोत्पादनं पारमेश्वरमेवेति श्रुतिष्वविप्रतिपन्नं, स्थूलभूतोत्पादने त्वस्ति श्रुतिविप्रतिपत्तिरिति तन्निरासार्थमाह। संज्ञामूर्त्तिकॢप्तिस्तु त्रिवृत्कुर्वत उपदेशात्। नामरूप-

---

* सृष्टिं विधायेति का० वर्ध०।

प्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति। तत्र संशयः किं जीवकर्तृकमिदं नामरूपव्याकरणमाहोस्वित् परमेश्वरकर्तृकमिति। तत्र प्राप्तं तावत् जीवकर्तृकमेवेदं नामरूपव्याकरणमिति। कुतः, अनेन जीवेनात्मनेति विशेषणात्। यथा लोके चारेणाहं परसैन्यमनुप्रविश्य सङ्कलयामीत्येवंजातीयके प्रयोगे चारकर्तृकमेव *सत्सैन्यसङ्कलनं हेतुकर्तृत्वाद्राजात्मन्यध्यारोपयति सङ्कलयामीत्युत्तमपुरुषप्रयोगेण, एवं जीवकर्तृकमेव सन्नामरूपव्याकरणं हेतुकर्तृत्वाद्देवतात्मन्यध्यारोपयति व्याकरवाणीत्युत्तमपुरुषप्रयोगेण। अपि च डित्थडवित्थादिषु नामसु घटशरावादिषु च रूपेषु जीवस्यैव व्याकर्तृत्वं दृष्टं, तस्माज्जीवकर्तृकमेवेदं नामरूपव्याकरणमित्येवं प्राप्तेऽभिधत्ते। संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत इति।

भेदात् करणभिन्नः प्राण इत्युक्तं, तत्प्रसङ्गेन स्थूलनामरूपक्लृप्तिः किंकर्तृकेति चिन्त्यत इत्यवान्तरसङ्गतिः। प्रक्रिया प्रकरणं। ईक्षणमेवाह। हन्तेत्यादिना। हन्त इदानीं देवताः सूक्ष्मा अनुप्रविश्येति सम्बन्धः। तासां तिसृणां देवतानामेकैकां देवतां तेजोऽबन्नात्मना त्र्यात्मिकां करिष्यामीति श्रुतिः पञ्चीकरणोपलक्षणार्था। छान्दोग्येऽप्याकाशवाय्वोरुपसंहारस्योक्तत्वात्। एवं स्थूलीकृतेषु भूतेषु प्राणिनां व्यवहारः सेत्स्यतीति परदेवतायास्तात्पर्यं। जीवेनेतिपदस्य व्याकरवाणीत्यनेन सम्बन्धसम्भवासम्भवाभ्यां संशयमाह। तत्रेति। पूर्वपक्षे जीवस्यैव भौतिकस्रष्टृत्वाद्ब्रह्मणः सर्वस्रष्टृत्वासिद्धिः सिद्धान्ते तत्सिद्धिरिति फलं। जीवेनेत्यस्य व्याकरवाणीतिप्रधानक्रियापदेन सम्बन्ध इति पूर्वपक्षमाह। तत्र प्राप्तमिति। परदेवताया अकर्तृत्वे कथमुत्तमपुरुषप्रयोग इत्याशङ्क्य प्रयोजकत्वात् कर्तृत्वोपचार इत्याह। यथा

---

* परसैन्येति वर्ध० का०।

तुशब्देन पक्षं व्यावर्त्तयति। संज्ञामूर्त्तिक्लृप्तिरिति नामरूपव्याक्रियेत्येतत् त्रिवृत्कुर्वत इति परमेश्वरं सूचयति, त्रिवृत्करणे तस्य निरपवादकर्तृत्वनिर्देशात्। येयं संज्ञाक्लृप्तिर्मूर्त्तिक्लृप्तिश्चाग्निरादित्यश्चन्द्रमा विद्युदिति तथा कुशकाशपलाशादिषु पशुमृगमनुष्यादिषु च प्रत्याकृति प्रतिव्यक्ति चानेकप्रकारा सा खलु परमेश्वरस्यैव तेजोऽबन्नानां निर्मातुः कृतिर्भवितुमर्हति। कुतः उपदेशात्। तथा हि सेयं देवतेत्युपक्रम्य व्याकरवाणीत्युत्तमपुरुषप्रयोगेण परस्यैव ब्रह्मणो व्याकर्तृत्वमिहोपदिश्यते। ननु जीवनेति विशेषणाज्जीवकर्तृकत्वं व्याकरणस्याध्यवसितुं नैतदेवं जीवेनेत्येतदनुप्रविश्येत्यनेन सम्बध्यते आनन्तर्यान्न व्याकरवाणीत्यनेन। तेन हि सम्बन्धे व्याकरवाणीत्ययं देवताविषय उत्तमपुरुष औपचारिकः कल्प्येत। न च गिरिनदीसमुद्रादिषु नानाविधेषु नामरूपेषु अनीश्वरस्य जीवस्य

लोक इति। सिद्धान्तयति। तुशब्देनेत्यादिना। प्रत्याकृति प्रतिजातीत्यर्थः। अनेन स्थूलसर्गे जीवस्यासामर्थ्यं द्योतितं। तथा च पदान्वयस्य पदार्थयोग्यताधीनत्वाज्जीवरूपेण प्रविश्याहमेव व्याकरवाणीत्यन्वयः न तु जीवेन व्याकरवाणीति। ननु तर्हि प्रवेशक्रिया जीवकर्तृका व्याकरणमीश्वरकर्तृकमिति कर्तृभेदात् क्त्वाप्रत्ययो न स्यादित्यत आह। न च जीवो नामेति। वस्तुतस्तु सूर्यो जले प्रविष्ट इति प्रतिविम्बभावाख्यप्रवेशे सूर्यस्यैव कर्तृत्वप्रयोगाज्जीवात्मना प्रवेशेऽपीश्वर एव कर्तेति क्त्वाश्रुतिर्युक्तेति बोध्यं। नन्वभेदस्तेज्जीव एव व्याकर्ता किं न स्यादित्याशङ्क्य कल्पनया भिन्नस्य तस्याशक्यत्वाच्छ्रुतिविरोधाच्च नैवमित्याह। परमेश्वर इति। प्रकृतं महाभूतसर्गस्य प्रागुक्तत्वा-

व्याकरणसामर्थ्यमस्ति, येष्वपि चास्ति सामर्थ्यं तेष्वपि परमेश्वरायत्तमेव तत्। न च जीवो नाम परमेश्वरादत्यन्तभिन्नश्चार इव राज्ञः, आत्मेति विशेषणात्, उपाधिमात्रनिबन्धनत्वाच्च जीवभावस्य। तेन तत्कृतमपि नामरूपव्याकरणं परमेश्वरकृतमेव भवति। परमेश्वर एव च नामरूपयोर्व्याकर्तेति सर्वोपनिषत्सिद्धान्तः। 'आकाशो ह वै नाम नामरूपयोर्निर्वहिता' इत्यादिश्रुतिभ्यः। तस्मात् परमेश्वरस्यैव त्रिवृत्कुर्वतः कर्म नामरूपव्याकरणं, त्रिवृत्करणपूर्वकमेवेदमिह नामरूपव्याकरणं विवक्ष्यते। प्रत्येकं नामरूपव्याकरणस्य तेजोऽन्नोत्पत्तिवचनेनैवोक्तत्वात्, तच्च त्रिवृत्करणमग्न्यादित्यचन्द्रविद्युत्सु श्रुतिर्दर्शयति 'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत् कृष्णं तदन्नस्य' इत्यादिना। तत्राग्निरितीदं रूपं व्याक्रियते। सति च रूपव्याकरणे विषयप्रतिलम्भादग्निरितीदं नाम व्याक्रियते। एवमेवादित्यचन्द्रविद्युत्स्वपि

दिह व्याकरणवाक्ये यत्नपूर्वकस्थूलभौतिकसर्ग उच्यते इति पाठव्यत्ययेन सूचितं श्रुत्यर्थमाह। त्रिवृत्करणपूर्वकमिति। ईश्वरकृतं व्याकृत्वमिति क्व दृष्टमित्यत आह। तच्चेति। इदानीं नामरूपव्याकरणे क्रममाह। तत्राग्निरिति। यद्यप्यतः प्रभवादित्यत्र वेदशब्दपूर्विकाऽर्थसृष्टिरुक्ता तथाप्यव्यक्तात् स्मृताच्छब्दादर्थसृष्टौ सत्यां स्फुटनामसन्ध्याभिव्यक्तिरित्युक्तेर्न विरोधः। अन्यग्न्यादीनां तैजसानामेव श्रुतावुदाहरणात् भूजलयोस्त्र्यात्मकत्वं न विवक्षितमित्यत आह। अन्नं चेति। उपक्रमे तासां मध्य इति शेषः। यत्कपालरूपादिकं कृष्णत्वादिविशेषाकारेणाविज्ञातमिव भवति तद्देवतानां समुदय-

द्रष्टव्यं । अनेन चाम्न्यायुदाहरणेन भौमाम्भसतैजसेषु त्रिष्वपि द्रव्येष्वविशेषेण त्रिवृत्करणमुक्तं भवति, उपक्रमोपसंहारयोः साधारणत्वात् । तथा हि अविशेषेणैवोपक्रमः 'इमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति' इति । अविशेषेणैव चोपसंहारः 'यदु रोहितमिवाभूत्' इति तेजसस्तद्रूपमित्येवमादिः 'यद्विज्ञातमिवाभूत्' इत्येतासामेव देवतानां समास इत्येवमन्तः । तासां तिसृणां देवतानां बहिस्त्रिवृत्कृतानां सतीनामध्यात्ममपरं त्रिवृत्करणमुक्तं 'इमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति' इति । तदिदानीमाचार्यो यथाश्रुत्यैवोपदर्शयत्याशङ्कितं कञ्चित् दोषं परिहरिष्यन् ॥

मांसादि भौमं यथाशब्दमितरयोश्च ॥ २१ ॥

भूमेस्त्रिवृत्कृतायाः पुरुषेणोपयुज्यमानाया मांसादि कार्यं यथाशब्दं निष्पद्यते । तथा हि श्रुतिः 'अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः' इति । त्रिवृत्कृता भूमिरेवैषा व्रीहियवाद्यन्नरूपेणाद्यत इत्यभिप्रायः । तस्याश्च

रूपमित्यर्थः । बाह्यं त्रिवृत्करणमुक्त्वाध्यात्मिकमपरं पूर्वोक्तलक्षणं वदन् उत्तरसूत्रमवतारयति । तासामित्यादिना । पुरुषशरीरं प्राप्यैकैका त्रिवृद्भवति कार्यत्रयात्मना भवतीत्यर्थः । उत्तरसूत्रेण शङ्कितं दोषं निरसितुमादौ शङ्काविषयमाध्यात्मिकत्रिवृत्करणं दर्शयतीति भाष्यार्थः ॥

स्थविष्ठं रूपं पुरीषभावेन बहिर्निर्गच्छति, मध्यममध्यात्मं मांसं वर्धयति, अणिष्ठन्तु मनः। एवमितरयोरप्तेजसोर्यथाशब्दं कार्यमवगन्तव्यं 'मूत्रं लोहितं प्राणश्चापां कार्यं अस्थि मज्जा वाक् तेजसः' इति। अत्राह यदि सर्वमेव त्रिवृत्कृतं भूतभौतिकं अविशेषश्रुतेः 'तासां त्रिवृतं त्रिवृतमेकैकामकरोत्' इति, किं कृतस्तर्ह्ययं विशेषव्यपदेशः, 'इदं तेज इमा आप इदमन्नं' इति। तथा 'अध्यात्ममिदमन्नमशितस्य कार्यं मांसादि इदमपां पीतानां कार्यं लोहितादि इदं तेजसोऽशितस्य कार्यमस्थ्यादि' इति। अत्रोच्यते॥

वैशेष्यात्तु तद्वादस्तद्वादः॥ २२॥

तुशब्देन चोदितं दोषमपनुदति। विशेषस्य भावो वैशेष्यं, भूयस्त्वमिति यावत्। सत्यपि त्रिवृत्करणे क्वचित् कस्यचित् भूतधातोर्भूयस्त्वमुपलभ्यते 'अग्नेस्तेजोभूयस्त्वमुदकस्याब्भूयस्त्वं पृथिव्या अन्नभूयस्त्वं' इति। व्यवहारप्रसिद्ध्यर्थञ्चेदं त्रिवृत्करणं। व्यवहारस्य त्रिवृत्कृतरज्जुवदेकलापत्तौ सत्यां न भेदेन भूतत्रयगोचरो लोकस्य प्रसिध्येत्। तस्मात् सत्यपि त्रिवृत्करणे वैशे-

---

नन्वन्नमयं मांसादि कथं भौममित्यत आह। त्रिवृत्कृता भूमिरेवेति। प्राणस्य वायोरपकार्यत्वं औपचारिकं द्रष्टव्यं॥

एवं विषयमुक्त्वा दोषं शङ्कते। अत्राहेति। तदुत्तरत्वेन सूत्रं व्याचष्टे। तुशब्देनेति। स्वभागाधिक्यं वैशेष्यं किमर्थं कृतमित्यत

स्यादेव तेजोऽबन्नविशेषवादो भूतभौतिकविषय उपपद्यते। तद्वादस्तद्वाद इति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति॥

इति श्रीमच्छारीरकमीमांसाभाष्ये शङ्करभगवत्पादकृतौ द्वितीयस्याध्यायस्य चतुर्थः पादः॥ ० ॥

अध्यायश्च समाप्तः।

स्यात्। व्यवहारप्रसिद्ध्यर्थमिति। एवं स्मृतिन्यायमतान्तरश्रुतिभिरविरोधो ब्रह्मणि वेदान्ततात्पर्यस्येति सिद्धं॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमद्गोविन्दानन्दभगवत्पादकृतौ शारीरकमीमांसाव्याख्यायां भाष्यरत्नप्रभायां द्वितीयाध्याय य चतुर्थः पादः॥ * ॥

अध्यायश्च समाप्तः॥

१ ब्रह्म शब्दः १९ सूत्राः।

२ आनन्द शब्दः २ "

३ आकाशः १ "

४ वायु प्राणः १

५ ज्योतिः १

६ छन्दः ३

७ प्रज्ञा प्राणः ४